पूर्णप्रज्ञविद्यापीठग्रन्थमालायां चतुर्थ पुष्पम्

श्रीआनन्दतीर्थभगवत्पादाचार्यविरचितः

गीतातात्पर्यनिर्णयः

श्रीजयतीर्थमुनिवर्यविरचितन्यायदीपिकासहितः
श्रीराघवेन्द्रतीर्थविरचितभावदीपटिप्पणीसहितश्च

Edited by

D. PRAHLADACHAR, VIDWAN, M.A.

Reader in Sanskrit, Bangalore University

पूर्णप्रज्ञविद्यापीठम्, बैङ्गलूरु - 28

पूर्णप्रज्ञविद्यापीठग्रन्थमालायां चतुर्थं पुष्पम्

श्री आनन्दतीर्थभगवत्पादाचार्यविरचितः

गीतातात्पर्यनिर्णयः

श्रीजयतीर्थमुनिविरचितन्यायदीपिकासहितः

श्रीराघवेन्द्रतीर्थविरचितभावदीपटिप्पणीसहितश्च

Edited by

D. PRAHLADACHAR, Vidwan, M.A.

Reader in Sanskrit, Bangalore University

पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - 28

GITATATPARYANIRNAYA of Sri Anandatirtha with the Commentary Nyayadipika of Sri Jayatirtha and the sub-commentary Bhavadipa of Sri Raghavendratirtha. Pages : 348

Published by Poornaprajna Vidyapeetha, Bangalore-28

First Edition 1987. Copies 1,000

प्रकाशकाः

पूर्णप्रज्ञविद्यापीठम्, बेङ्गलूरु - 28

सम्पादकसमितिः

श्री १०८ श्री विश्वेशतीर्थश्रीपादाः, श्री पेजावरमठ, उडुपि
पूर्णप्रज्ञविद्यापीठस्य कुलपतिः (अध्यक्षाः)

प्रो. के. टि. पाण्डुरङ्गि, उपकुलपतिः (सदस्यः)

विद्वान् डि. प्रह्लादाचार्यः, कार्यदर्शी
(अस्य सम्पुटस्य सम्पादकः)

विद्वान् के. हयवदन पुराणिकः (सदस्यः)

Copies can be had from

The Secretary, Poornaprajna Vidyapeetha, Bangalore-28

प्रास्ताविकम्

श्रीमदानन्दतीर्थभगवत्पादानां सत्सिद्धान्तस्य शिक्षणं प्रसारं च साधयितुमेव बेङ्गळूरुनगरे पूर्णप्रज्ञविद्यापीठम् प्रवर्तितम्। तदर्थमेव छात्राणां शास्त्रशिक्षणेन साकं तात्विकग्रन्थप्रकाशनकार्यमपि विद्यापीठेन समुपगृहीतम्। प्रदीपः, चन्द्रिका, विद्युत् इति इमे सर्वेऽपि प्रकाशाः एव। परन्तु सरसिजानि विकासयितुं सूर्यकिरणान्येव प्रभवन्ति। एवं विविधज्ञानविज्ञानेषु जाग्रत्स्वपि सज्जनहृदयोल्लासः शास्त्रसूर्यप्रभां विना न शक्याधिगमः। अतः व्याख्योपव्याख्याभिः सह श्रीमदानन्दतीर्थभगवत्पादीयग्रन्थप्रकाशनसाहसार्थं प्रवृत्तेन पूर्णप्रज्ञविद्यापीठेन एतावत्पर्यन्तं उपनिषत्खण्डार्थगीताभाष्यप्रभृतिग्रन्थाः प्रकाशिताः। इदानीं श्रीमज्जयतीर्थगुरुवर्यकृतटीकया श्रीराघवेन्द्रयतिवर्यरचितटिप्पण्या च साकं श्रीमध्वमुनीन्द्रनिर्मितं गीतातात्पर्यमर्पयितुं नितरां सन्तुष्यामः। सूर्यचन्द्रयोः सहकारेणैव लोकः बाह्यपदार्थानवलोकयति। श्रीमदाचार्यकृतं गीताभाष्यं गीतातात्पर्यं च सूर्यचन्द्राविव हार्दमज्ञानान्धकारं दूरीकृत्य आन्तरं सत्तत्वजातमाविष्कारयति इति संवर्णितोऽस्य महिमा प्राचीनैराचार्यैः।

ग्रन्थस्यास्य सम्पादनकार्ये अस्मत्प्रियशिष्यः विद्वान् डि. प्रह्लादाचार्यः नियुक्त आसीत्। तेन च हस्तलिखितग्रन्थपरिशीलनेन परिश्रमेण सम्पादनं कृतम्। अनया तस्य शास्त्रसेवया वयं परितुष्टाः। भगवतोऽनुग्रहेण सज्जनानां सहकारेण च पूर्णप्रज्ञविद्यापीठोपगृहीतशास्त्रग्रन्थप्रकाशनयोजना यशस्विनी भूयादित्याशास्महे।

श्री श्री विश्वेशतीर्थश्रीपादाः
श्री पेजावरमठः, उडुपि

PREFACE

We are glad to place in the hands of our readers this fourth publication in the Poornaprajna Vidyapeetha granthamālā series.

This volume contains Gitātātparyanirnaya of Sri Anandatirtha together with the commentary Nyāyadipikā of Sri Jayatirtha and the sub-commentary Bhāvadipa of Sri Raghavendratirtha.

Gitātātparyanirnaya with Sri Jayatirtha's Nyāyadipikā together with the sub-commentary Kiranavali of Tamraparni Srinivasacharya was published in 1905 by Sri T. R. Krishnacharya of Kumbhakonam. However, that book has been out of stock and no copies were available nearly for three decades. Therefore, there has been a great need of publishing Gitātātparyanirnaya again. When we undertook the publication of this book Sri V. Prabhanjana brought to our notice a sub-commentary of Sri Raghavendratirtha viz. Bhāvadipa on Nyāyadipika. We thought it would be helpful to the students and the scholars if this sub-commentary is published. This was not published earlier. Sri Tamraparni's Tippani being large, it was not possible for us to include both.

Vidwan Sri D. Prahladachar, M.A., Reader in Sanskrit, Bangalore University was requested to edit this work consulting the manuscripts and prepare a critical edition. He has taken pains to consult the manuscripts of Gitātātparya, Nyāyadipikā and Bhāvadipa available at our Vidyapeetha library and elsewhere, and has prepared this critical edition.

As stated in the prefaces to our earlier publications, we are anxious to publish all important Dvaita Vedanta works in this series. Our next publication viz. Chandogya Upanishad with Sri Raghavendratirtha's Khandartha will be released soon.

The printing of Seshachandrikā Volume II has commenced. After the completion of Khandarthas of remaining two Upanishads viz. Aitareya and Brihadaranya, we propose to take up Upanishadbhashyas and the commentaries thereon. We are distributing the printing work of our books to three presses now, and we hope to publish at least one volume every year. Our permanent fund has come up to Rs. One lakh now, and the sale position is also quite satisfactory. However, we will welcome interested philanthropists adding to our permanent fund so that we can undertake the publication of large works like Nyayamrita with important commentaries.

Sri Sri Pejawaraswamiji, our Kulapathi, is the guiding spirit behind us. He has blessed this publication with his foreword. We are grateful to him.

Our thanks are due to Sri D. Prahladachar for editing this volume and also supervising the printing.

Our thanks are due to Sri D. S. Krishnachar of Prabha Printing House, for the neat printing and good get up.

We hope this publication will be useful for the scholars and the students of Vedanta.

K. T. Pandurangi
Upakulapathi
Poornaprajna Vidyapeetha

27–3–1987
Bangalore

गीतातात्पर्यनिर्णयः

उपोद्घातः

श्रीमदाचार्यग्रन्थवैशिष्ट्यम्

द्वैतसिद्धान्तप्रतिष्ठापनाचार्यस्य भगवतः आनन्दतीर्थमुनेः अपूर्वं वैशिष्ट्य-मिदं तत्प्रणीतग्रन्थपरिचयवतां विदुषां लक्ष्यतामवश्यमेवार्जयति यदयं प्रत्नेन केनापि दार्शनिकेन अक्षुण्णवेदान्तवर्त्मचारी महादार्शनिकः स्वसिद्धान्त-स्थापनाय प्रवर्तितानां प्रस्थानत्रयव्याख्यानानाम् अपरासां च कृतीनां रचने असाधारणं कौशलं प्राकाशयदिति । प्रस्थानत्रयस्य भाष्यं विधायापि भाष्यलक्षणाभिज्ञः पूर्णप्रज्ञः न तावता पर्यतुष्यत् । पर्यमंस्त च जिज्ञासु-सन्देहसन्दोहसमुन्मूलनाय परभाष्यापादितविपर्ययपराकरणाय च ब्रह्मसूत्रादि-सारसर्वस्वोद्धरणपराः कृतयोऽस्यावश्यका इति । निरमासीच्च अत एव सूत्र-भाष्यमनु 'अनुभाष्यम्', इतिहासप्रस्थानसारपरं 'महाभारततात्पर्यनिर्णयं', पुराणप्रस्थानतत्त्वप्रकाशनपरं 'भागवततात्पर्यनिर्णयं', तथैव गीताभाष्यमनु गीतार्थसारसङ्ग्राहकं 'गीतातात्पर्यनिर्णयं' एवमन्यांश्च ग्रन्थान् ।

गीतातात्पर्यस्य वैशिष्ट्यम्

यथा चानुव्याख्याने ब्रह्मसूत्रभाष्यरचनेन गतार्थतामाशङ्क्य "स्वयं कृतापि तद्व्याख्या क्रियते स्पष्टतार्थतः" इति अनुव्याख्यानप्रणयनस्य सार्थक्यं प्रत्यपीपदत् तथाऽत्रापि 'गीतातात्पर्यमुच्यते' इति प्रतिज्ञयैव गीताभाष्यरचनानन्तरमपि गीतातात्पर्यप्रणयनस्य आवश्यकतां स्वयमेवावोच-द्भगवानाचार्यः । यथाऽह श्रीजयमुनिः — 'स्वयमेव गीताभाष्यस्य कृतत्वात् किं पुनरारम्भेणेत्यतः तात्पर्यमित्युक्तम् । व्याख्यातत्वेऽपि गीतायास्तदर्थस्य शिष्याणां बुद्ध्यारोहार्थं शब्दानुकरणाद्यन्तरेण पुनस्तात्पर्यमेवोच्यत इति भावः' इति । सुस्पष्टमिदमेतैर्वाक्यैर्यत् गीताभाष्य एव सङ्क्षेपतः सूचितस्य, तत्र तत्र निक्षिप्य रचितस्य वा, क्वचिच्च भाष्येऽनुक्तस्यैव गीतायास्तात्पर्यस्य स्फुटीकरणं अपव्याख्याननिरासेन स्वोक्तार्थस्य दृढीकरणं च गीतातात्पर्ये क्रियत इति ।

उद्देशश्चायं भगवतस्तात्पर्यकृतः सर्वथा सफल इति तु सुव्यक्तमेव अतिरोहितमतीनां विमर्शनशीलानां प्राज्ञानाम् । अथापि कतिपयानां तादृशानां निदर्शनानामत्र प्रदर्शनं सर्वथा नानौचित्यमावहतीति प्रत्ययेन तेषां निरूपणे किञ्चिदिव प्रयत्यते ।

गीताभाष्यस्यादौ 'महाभारतान्तर्गतत्वात् भगवद्गीतायाः तस्य प्रामाण्यादिसिद्धौ तस्या अपि तत् सेत्स्यति' इत्याशयेन महाभारतप्रामाण्यं साधयितुकामेन भगवता महाभारतसंहिता तावत् 'सर्ववेदार्थोपबृंहिता तदनुक्तकेवलेश्वरज्ञानदृष्टार्थयुक्ता च' इति समुपावर्णि । अनन्तरं च गीतेयं 'सर्वभारतार्थसङ्ग्रहात्मिका भारतपारिजातमधुभूता' चेति गीतायाः सर्वशास्त्रसारत्वं समासूचि । गीतातात्पर्ये चारम्भे गीतामवतारयितुकामेन आचार्येण 'स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मस्तद्विरुद्धः सर्वोऽप्यधर्मः भगवदधीनत्वात् सर्वस्येति बोधयति भगवान्नारायणः' इति गीताप्रतिपाद्यः सर्वशास्त्रसारः समग्राहि । गीताप्रतिपाद्यत्वेन अत्र सङ्गृहीताश्च 'स्वधर्मेणैव भगवदाराधनस्यैव कर्तव्यत्वं तदन्यस्य त्याज्यत्वं, विष्णुभक्तेः सर्वसाधनोत्तमत्वं, ज्ञानिनोऽपि मोक्षस्य भगवदधीनत्वं, सर्वस्माद् भगवतो भेदः, सर्वस्य तदधीनत्वं, भगवतः सर्वगुणपरिपूर्णत्वं, सर्वशास्त्राणां भगवत्परत्वम् इत्यादयः प्रमेयाः गीतायां निरूप्यन्त' इत्येतत् विपुलतया तत्तत्प्रमेयप्रतिपादकगीताश्लोकोदाहरणेन अत्यन्तसमीचीनतया प्रादर्शि । एवमादावेव गीतातात्पर्यस्य गीताभाष्योक्तस्पष्टीकरणपरत्वं समासूचयदाचार्यः ।

गीताया बह्वर्थगर्भितत्वप्रदर्शनमपि तात्पर्यकर्तुरभिप्रेतम् । एतच्च भाष्यानुक्तार्थवर्णनं तत्र तत्र कुर्वता तात्पर्येण स्पष्टमेव । 'नासतो विद्यते भावः' इति श्लोकव्याख्यानमत्र एकं निदर्शनम् । गीताभाष्ये हि असच्छब्दस्य प्रकृतिपरत्वं, सच्छब्दस्य ब्रह्मपरत्वं, 'असतः अभावः' इति पदच्छेदं च स्वीकृत्य न केवलमात्मा नित्यः किन्तु प्रकृतिः ब्रह्म च नित्यमिति आत्मनो नित्यत्वसाधने दृष्टान्तप्रदर्शनपरतया श्लोको व्याख्यातः । गीतातात्पर्ये तु सदसच्छब्दयोः सत्कर्मासत्कर्मपरत्वं भावाभावशब्दयोश्च सुखदुःखपरत्वं सप्रमाणं

प्रदर्श्य, भगवद्द्वेषिहननरूपस्वधर्मस्य सत्कर्मत्वात् सत्कर्मणः सकाशात् दुःखस्य असत्कर्मणश्च सकाशात् सुखस्य चाभावात् बन्धुहननादिरूपाद् युद्धात् परलोके दुःखशङ्कया युद्धत्यागो न कर्तव्य इति मनोज्ञा व्याख्या दर्शिता ।

अपूर्वस्यात्यन्तस्वरसस्य चार्थस्य निरूपणमाचार्यस्य अन्यद्वैशिष्ट्यम् । 'योगे त्विमां श्रृणु' इति प्रतिज्ञातज्ञानोपायनिरूपणार्थं प्रस्तुतं 'त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन' इति श्लोकं 'त्रैगुण्याख्यं विषं यापयन्त्यपगमयन्तीति त्रैगुण्यविषया वेदाः । तानाश्रित्य निस्त्रैगुण्यो भव' इति व्याचख्यावाचार्यः । आचार्यस्येयं क्लिष्टकल्पना तस्य व्याख्यानाकौशलमेव संसूचयतीति केचित् । किन्तु—

आश्रित्य वेदांस्तु पुमान् त्रैगुण्यविषहारिणः ।
निस्त्रैगुण्यो भवेन्नित्यं वासुदेवैकसंश्रयः ॥

इति स्मृतिं स्वव्याख्याने प्रमाणयतः आचार्यस्येयं कल्पना क्लिष्टेति केवलं प्रमाणपरिचयदरिद्राणां प्रतिभायात् । अपि च इममेव श्लोकं गीताभाष्ये 'वेदानां परोक्षार्थत्वात् त्रिगुणसम्बन्धि स्वर्गादि प्रतीतितोऽर्थ इव भाति । परोक्षवादी वेदोऽयं इति ह्युक्तम् । अतः प्रातीतिकेऽर्थे भ्रान्तिं मा कुर्वित्यर्थः ।' इति व्याख्यातुराचार्यस्य अक्लिष्टे व्याख्यानेऽपि शक्तिर्न कुण्ठिता ।

परमतविमर्शः

गीतातात्पर्यस्यापरोऽयं विशेषः यदाचार्यः ग्रन्थेऽस्मिन् परसिद्धान्तप्रक्रियाः तत्र तत्र विशेषतः कटाक्षयति । 'नासतो विद्यते' इति श्लोकस्य सांख्याभिमतसत्कार्यवादपरत्वं निराकुर्वन् स सत्कार्यवादस्यैवासामञ्जस्यं प्रकटयति । स्थितिकाले सदिति व्यावह्रियमाणमेव पदार्थस्वरूपं उत्पत्तेः प्राङ् नाशोत्तरं च नास्तीति खलु सर्वो लोकः प्रत्येति व्यवहरति च । अतः प्रागसतः जनिर्नेति कथम् ? अपि च यदि प्रागसन्नेव पृथुबुध्नोदराकारादिविशेषः न जायते तर्हि जायत इति वित्तिव्यवहारौ निर्विषयौ प्रसज्येयाताम् । न च अभिव्यक्तिरेव विषय इति वाच्यम् । असतो जन्मनोऽपरिहार्यत्वात् ।

प्रागसत्या एवाभिव्यक्तेर्जननस्याङ्गीकार्यत्वात् । अभिव्यक्तेरप्यभिव्यक्तौ अनवस्थाया दुष्परिहारत्वात् । नन्वेवमसतोऽप्युत्पत्तिसम्भवे अत्यन्तासतः शशविषाणादेरप्युत्पत्तिः स्यादिति चेन्न । असतो जन्मांगीकारेऽपि अत्यन्तासतस्तदनङ्गीकारात् । रूपभेदेन सदसत एव तदङ्गीकारात् । 'मृदेव घटः' इति कार्यकारणयोरभेदानुभवेन कारणस्य च उत्पत्तेः प्राक् सत्त्वेन कार्यस्यापि कारणरूपेण सत्त्वं सिद्ध्यति । मृत्पिण्डः पृथुबुध्नोदराकारादिमान् नेति कार्यकारणयोः भेदस्याप्यनुभवेन पृथुबुध्नोदराद्याकारेण कार्यस्य प्रागसत्त्वमपि स्वीकर्तव्यम् । एवमनुभवबलेन सदसतो जन्माङ्गीकारेण अत्यन्तासतो न जन्मापत्तिर्युज्यत इति सर्वथा सतो जन्माङ्गीकुर्वतां साङ्ख्यानां वादः सर्वथा अनुपपन्न इति ।

अयं श्लोकः विश्वस्य सदसद्विलक्षणत्वरूपमनिर्वचनीयत्वं प्रतिपादयतीति व्याख्यानमपि असतोऽप्रतीतिं निराकृत्य सदसद्विलक्षणे वस्तुनि प्रमाणाभावमुपपादयता, श्रुत्यादिभिः प्रमाणैः विश्वस्य सत्यतां च साधयता आचार्येण दूषितम् । एवम् 'अन्तवन्तः' इत्यत्र जीवदेहादीश्वरदेहस्यातिशयं प्रतिपादयता मुक्तानामपि देहसद्भावः, मोक्षेऽपि जीवेश्वरभेदः अनेकश्रुतिस्मृत्युदाहरणेन साधु समर्थितः । जीवेशाभेदपरतया भासमानानां च श्रुतीनामभेदपरता प्रत्याख्याता ।

अस्त्ययमाधुनिकानां केषाञ्चिदभिप्रायः यत् प्राचीना भाष्यकाराः सर्वेऽपि स्वाभिप्रायमेव गीताशयत्वेन निरूपयामासुस्तथा परमतनिरसनम् अप्रस्तुतमपि व्यसनितया चक्रुरिति । तदिदमापादनं श्रीमतो मध्वाचार्यस्य विषये परं असाध्विति विमर्शनशीलैः प्राज्ञैरङ्गीकर्तव्यमेव । यतोऽयमाचार्यः गीतातात्पर्यत्वेन स्ववर्णितं किमपि प्रमेयं गीताश्लोकाक्षरानुगुणं न समर्थयते इति न दृश्यते । एतच्च आदावेव गीतातात्पर्यं सङ्क्षेपतः उपवर्ण्य गीताश्लोकैरेव तत्समर्थनेन नितरां स्पष्टमेव । एवमेव परमतनिरसनपूर्वकं स्वमतसमर्थनं यदाचार्येण तत्र तत्र क्रियते नैतदपि काप्यसङ्गतम् । तथाहि—द्वितीयेऽध्याये जीवेश्वरैक्यनिरासः कृतो दृश्यते । न चायमसम्बद्धः । यतो ह्यर्जुनं प्रत्युप-

दिश्यमानेषु प्रमेयेषु अन्यतमं स्वधर्मस्य भगवदाराधनतया आचरणीयत्वम् । जीवेश्वरयोरुभयोरपि नित्यत्वेन ईश्वरस्यातिशयाभावात् किं तदाराधनेनेत्याशङ्कायां ईश्वरस्यातिशयः प्रदर्शितः 'अविनाशि तु' इत्यादिना । ईश्वरस्यात्राभिप्रेतोऽतिशयश्च सर्वथाऽविनाशित्वम् । जीवस्वरूपस्य नित्यत्वेऽपि तद्देहस्य नास्ति नित्यता । एवं च जीवस्य देहहान्याद्यमनित्यत्वमस्ति । ईश्वरस्य तु तदपि नास्ति । तद्देहस्याप्राकृतस्य नाशप्रसक्तेरेवाभावात् । ननु देहो नामानित्य एव । अतो नेश्वरदेहस्य नित्यत्वसम्भव इति शङ्कायां तामेतां शङ्कां स्वयमेव गीताचार्यो निराचकार 'अन्तवन्त इमे देहाः' इत्यत्र इमे इति विशेषणात् । तथा च जीवानामपि न सर्वे देहा अनित्याः । किन्तु प्रत्यक्षतः परिदृश्यमानाः प्राकृता एव देहाः । मुक्त्यवस्थायां जीवस्वरूपभूता देहा नित्या एव । एवं जीवदेहस्यैव नित्यत्वसम्भवे किमु वाच्यमीश्वरदेहस्य नित्यत्वमिति ईश्वरस्यातिशयः अनेकप्रमाणवाक्यान्युदाहृत्य प्रदर्शितः । तानि च प्रमाणानि गौणमोक्षपराणि, मुख्यमुक्तौ जीवेश्वरयोरैक्यात् तथाच ईश्वरस्यातिशयासम्भव इति प्राप्ते मुक्तावपि जीवेश्वरयोः भेदसमर्थनमावश्यकमापतितम् । जीवेशाभेदप्रतिपादकश्रुतिभिर्विरोधेन जीवेशभेदस्य मिथ्यात्वे च शङ्किते, तासां—'यत्र त्वस्य सर्वमात्मैवाभूत्', 'यद्वै तन्न पश्यति', 'न हि द्रष्टुः दृष्टेः विपरिलोपो विद्यते, अविनाशित्वात्', 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्', 'परमं ब्रह्म वेद ब्रह्मैव भवति', 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादीनां श्रुतीनां भेदाविरोधेन व्याख्याया एव साधुता संप्रदर्शिता ।

गीतोक्तसंन्यासस्वरूपम्

गीतायां विदुषामपि भ्रामिका उक्तयो विपुलाः । तत्र ज्ञानिनां कर्मसंन्यासोक्तिपरा उक्तयोप्यऽन्तर्भवन्ति । इतरैश्च कर्मसंन्यासो नाम सर्वथा कर्मत्याग एवेत्यभिप्रेतम् । तन्मतस्य गीतानाभिमतत्वप्रदर्शनपुरःसरं गीताभावः आचार्येण हृदयङ्गमं प्रकटितः । नात्र कर्मसंन्यासः सर्वथा कर्मत्यागो भवितुमर्हति । गीतायामेव तदसम्भावितत्वस्य स्पष्टमुक्तेः । किन्तु कर्मणो

ब्रह्मण्याधानपूर्वकं निष्कामकर्मकरणम् । कर्मणां ब्रह्मण्याधानमपि न कर्माकरणम् । 'ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः ।' इति कर्मकरणस्याप्युक्तत्वेन व्याघातप्रसङ्गात् । अपि तु मम कर्माणि तत्पूजात्मकानि तेनैव मम शुभार्थं कृतानि इति अनुसंधानम् । नचैवं कर्मणां भगवत्कृतत्वे जीवस्य अकर्तृत्वप्रसङ्गः । तथाच 'करोति' इति पुनर्व्याहतिर्भवेदेवेति वाच्यम् ।

जीवकर्तृत्वविचारः

अस्त्येव जीवस्य वस्तुतः अकर्तृत्वम् । परन्तु तन्न सर्वथा कर्तृत्वाभावः यतो हि नात्र अकर्तृत्वं सर्वथा कर्तृत्वाभावः । किन्तु स्वतन्त्रकर्तृत्वाभावः । भगवदधीनकर्तृत्वं तु अस्त्येव । पित्रा कारितं स्ववन्दनं यथा । शिशुकर्तृकमेवोच्यते तथा भगवता कारितमपि कर्म जीवकर्तृकमुच्यत इत्येव तात्पर्यम् ।

नन्वेवं तर्हि उत्तरत्र 'न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः । न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ॥' इति जीवस्य कर्तृत्वसामान्यनिषेधः कथमिति सन्देहे लोकदृष्टान्तेन गीताभावः आचार्यैर्मनोज्ञं निरूपितः — नायं श्लोकः सर्वथा जीवस्य कर्तृत्वनिषेधपरः । किन्तु राजपुत्राणां स्वपित्रा दत्तं पालकत्वं यथाऽस्ति तथैव परमात्मदत्तं क्रियास्वातन्त्र्यलक्षणं कर्तृत्वं, क्रियानिष्पन्नधर्मादिरूपकर्मणि स्वातन्त्र्यं चास्तीति शङ्कायां तन्निषेधार्थमेवायं श्लोक आगतः । जीवस्य हि कर्तृत्वं परतन्त्रमेव, न सर्वथा स्वतन्त्रम् । जनपदे निवसतां तद्वित्तभोजिनामपि आधिपत्यादाने 'न दत्ता राज्ञा जनपदाः स्वपुत्राणाम्' इति प्रयोगो यथा तथैव 'कर्मफलादिसंयोगिनामपि जीवानां स्वातन्त्र्यादानात् कर्तृत्वं न सृजति' इति युक्तम् एवेति ।

'स्वभावस्तु प्रवर्तते' इत्ययमपि भागः जीवस्येश्वरस्य च कर्तृत्वाभावपर इति आपाततो भाति । परन्तु आचार्यस्यात्र व्याख्या काचिदपूर्वैव—नात्र स्वभावपदेन प्रसिद्धवस्तु स्वभावः कथ्यते । अपि तु भगवान् स्वभावशब्दार्थः । स्वयमेव भवति भावयति इति व्युत्पत्तेः । 'स्वातन्त्र्याद् भगवान् विष्णुः

स्वभाव इति कीर्त्यते' इति स्मृतेश्च। नचेयं क्लिष्टा कल्पना। 'कर्मसंन्यासात् कर्मयोगो विशिष्यते' इति कर्मयोगं प्रशस्य, 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित्' इति कर्मणोऽनिवार्यतां च प्रतिपाद्य सपदि 'न कर्तृत्वं न कर्माणि' इत्यादिना 'स्वभावस्तु प्रवर्तते' इत्यनेन च जीवस्येश्वरस्य च सर्वथा कर्तृत्वनिषेधे गीतोपदेशकस्य व्याहतेरपरिहार्यत्वात्। अपि च भगवतः स्वाभाविकं कर्तृत्वं प्रतिपादयन्त्यः नैकाः श्रुतयः स्मृतयश्च भगवतः कर्तृत्वस्यैवाभावे विरुद्धाः स्युरित्यतोऽपि भगवतः स्वतन्त्रं स्वाभाविकं च कर्तृत्वं, जीवस्य तु परतन्त्रं कर्तृत्वं च श्रीकृष्णः अत्राभिप्रैतीति सुष्ठु साधयाञ्चकार श्रीमदाचार्यः।

गीतायां न कुत्रापि पुनरुक्तिः

गीतायां तत्र तत्रोक्तस्यैव पुनरुक्तिरस्तीत्याभाति। केचित् पुनरुक्तेः तावद्दोषत्वं नास्तीत्यभिमानेन वा पुनरुक्तिमेवालक्षयन्तो वा तत्परिहारे नैव प्रयतन्ते। श्रीमदाचार्यस्य इदमपरं व्याख्यानकौशलं यदस्मिन् सर्वशास्त्रोत्तमत्वेन प्रथिते गीताशास्त्रे न केवलं पुनरुक्तेरवकाशो यथा न स्यात्तथा व्याख्यायते अपि तु पुनरुक्तिवदाभासमाना भागाः वस्तुतः अतिमहत्त्वपूर्णप्रमेयाणां प्रतिपादका इति च प्रदर्श्यन्ते। तत्रैकं निदर्शनं, त्रयोदशेऽध्याये 'पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्' इति श्लोकः। पूर्वस्मिन् श्लोके 'कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते। पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते॥' इत्यत्र 'कार्यकारणकर्तृत्वे' इत्यनेनोक्तशरीरेन्द्रियसंबन्धात्मककार्यकारणसम्बन्धस्यैव उत्तरश्लोकस्थप्रकृतिस्थपदेनोक्तेः, 'पुरुषः सुखदुःखानां' इत्यादिनोक्तस्य सुखादिभोगस्यैव च 'भुङ्क्ते प्रकृतिजान् गुणान्' इत्यनेनोक्तेः पुनरुक्तिः स्पष्टं प्रतीयते। अत्रापरिहार्यामिव भासमानां पुनरुक्तिं परिहरन्ती तात्पर्योक्तिः—'कार्यकारणसम्बन्धं भोगं च मिथ्येति वदतां निराकरणायाह—पुरुषः प्रकृतिस्थो हि' इति। अस्या अभिप्रायस्तु—नायं श्लोकः कार्यकारणसम्बद्धो जीवः सुखदुःखादिभोक्तेति वक्तुमागतः। येन पौनरुक्त्यप्रसङ्गः। किन्तु कार्यकारणसम्बन्धस्य भोगस्य च मिथ्यात्वं

निराकर्तुमागतः । सति चैवं क्व पुनरुक्तिरिति । ननु निराकरणं प्रमाणोपन्यासमपेक्षते । न चात्र श्लोके कार्यकारणसम्बन्धस्य वा भोगस्य वा मिथ्यात्वनिरासकप्रमाणोपन्यासं पश्यामः । उक्तस्यैव पुनरभिधानमात्रेण कथं वा किमपि निरस्येत इत्यतः पुनस्तात्पर्यवाक्यं प्रवृत्तं 'हीत्यनुभवविरोधं दर्शयति इति । प्रसिद्धिवाचको हिशब्दः कार्यकारणसम्बन्धस्य भोगस्य चानुभवसिद्धत्वं तथा तन्मिथ्यात्ववादस्य अनुभवविरोधं दर्शयतीति नात्र श्लोके कथमपि पुनरुक्तेरवकाश इति ।

साक्षिप्रमाणम्

अस्मिन्नेवावसरे, भगवता प्रयुक्तस्य हीति शब्दस्य गाम्भीर्यं प्रकटयितुमुद्युक्तेन आचार्येण स्वसिद्धान्ते अप्रतिहततर्कशुद्धिः प्रदर्शिता । साक्ष्यनुभवो नियमेन यथार्थ इति हि तस्य सिद्धान्तः । सुखाद्यनुभवश्च साक्षिरूपः । तस्य च भ्रान्तित्वे साक्षिणो याथार्थ्यनियमो नास्तीति स्यात् । भ्रान्तित्वाभ्रान्तित्वग्रहणशीलस्य साक्षिणोऽपि भ्रान्तित्वे कुत्रापि भ्रान्तित्वमभ्रान्तित्वं वा न सिद्ध्येत् । तदसिद्धौ च तत्सिद्ध्यधीनः सर्वोऽपि व्यवहारः विलुप्येत । आत्मास्तित्वग्राहिणोऽनुभवस्यापि भ्रमत्वशङ्कया आत्माऽपि न सिद्ध्येत् । अपि च सुखदुःखादिविषयं ज्ञानं साक्षिरूपं आत्मस्वरूपम् । तस्य च मिथ्यात्वे नैरात्म्यवाद एवाङ्गीकृतः स्यात् । भ्रमस्य अविद्याकार्यत्वेन सुखादिज्ञानस्य भ्रमत्वे तस्याविद्याकार्यत्वमङ्गीकरणीयम् । तथाच सुखादिज्ञानस्वरूपस्यात्मनोऽप्यविद्याकार्यत्वप्रसङ्गः । नैतत् पुनर्वक्तव्यं यत् एवमादिभिरखण्ड्यैः निशितैश्च तर्कैः परपक्षान् खण्डयतोऽस्य आचार्यस्य अनुमानतीर्थ इत्याख्या अन्वर्थैवासीदिति ।

विशेषस्य स्वरूपं प्रकाराश्च

गीतातात्पर्यनिर्णये भगवत्पादैः निरूपितानां विषयाणां प्रस्तावसमये अवश्यमुल्लेखनीयः एको विषयः विशेषः । द्वैतसिद्धान्ते सामान्यपरिचयवतामपि नेदं ज्ञापनीयं यदयं 'विशेषः' आचार्योपज्ञः । प्रकरणेषु, उपनिषद्भाष्येषु,

अनुव्याख्याने च तत्र तत्र अभेदे भेदकार्यकारिणोऽस्य प्रमेयस्य समर्थनं, सर्वैरपि दार्शनिकैरस्य अवश्याङ्गीकर्तव्यत्वनिरूपणं च महता प्रबन्धेन साधु कृतमपि पुनरस्मिन् ग्रन्थे आचार्येणायं विषयः प्रस्तूयते। न चायमपि विषयः स्वीयप्रक्रियानिरूपणचापलेन आचार्येण गीतातात्पर्यनिरूपणपरे ग्रन्थेऽस्मिन् यथाकथञ्चिदायोजितः। विश्वरूपाध्याये 'द्रष्टुमिच्छामि ते रूपं' इत्यर्जुनेन भगवतः यत्किञ्चिद्रूपप्रदर्शने प्रार्थिते 'पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः, इत्यनन्तानि रूपाणि दर्शितानि। अपश्यच्च तान्यर्जुनः 'पश्यामि त्वां सर्वतोऽनन्तरूपम्' इत्युक्तया रीत्या। एकरूपप्रदर्शने प्रार्थिते अनन्तरूपाणां प्रदर्शनं च एकस्यैवानन्तरूपत्वं, तेषाञ्च रूपाणां परस्परमभेदं च सूचयति। अनन्तानां तेषां रूपाणमभेदे एकत्वमेव स्यात्। अनन्तत्वसङ्ख्या कथं घटत इति शङ्का अत्रावश्यमेव प्रादुर्भवेत्। अवश्यपरिहरणीयाया अस्याः शङ्कायाः परिहारार्थमेव 'विशेष' निरूपणं प्रास्तुवदाचार्यः। अत्र निरूपिताश्च अंशा अपूर्वा एव। अत्रोदाहृतप्रमाणानुसारेण विशेषो द्विविधः। नित्योऽनित्यश्चेति। चेतने तदात्मको विशेषः कश्चिन्नित्यः कश्चिच्च अभिव्यक्त्यपेक्षयाऽनित्यः। 'चेतनवस्तुस्वरूपमस्ति' इत्यत्र चेतनत्ववस्तुत्वस्वरूपत्वारितत्वविशेषाः नित्यमभिव्यक्ताः नित्याः। 'चेतनः करोति, भुङ्क्ते, गच्छति' इत्यत्र करणं, गमनं, भोजनं चेति विशेषाः कदाचिदभिव्यज्यमानाः अनित्या इति कथ्यन्ते। चेतने नित्या अनित्याश्च विशेषाः विशेषिणा चेतनेनात्यन्ताभिन्नाः। अचेतने तु यावद्द्रव्यभाविनो विशेषाः विशेषिणाऽत्यन्ताभिन्नाः। यथा 'चूतफलमस्ति' इत्यत्र चूतत्वफलत्वादिविशेषाः। अयावद्द्रव्यभावी च विशेषः विशेषिणा भिन्नाभिन्नः। यथा 'पीतं चूतफलम्' इत्यत्र कादाचित्काः पीतत्वादिविशेषाः। अत्रायमंशः स्पष्टीकृतो यच्चेतने विशेषाः विशेषिणा केवलमभिन्ना एव। अचेतने तु भिन्नाभिन्ना अपि विशेषाः संभवन्तीति। ननु चेतनेष्वपि भेदोऽभेदश्चानुभूत इति भेदाभेदावङ्गीकर्तव्याविति चेत्, सत्यम। किन्तु तौ भेदाभेदौ चेतने नैकप्रतियोगिकौ। 'अहं मदभिन्नः, घटादेश्च भिन्न इति भिन्नप्रतियोगिकावेव भेदाभेदौ भवतः। अचेतने तु एकप्रतियोकावपि तौ भवतः। यथा

एकैकतन्तोः पटेन भेदोऽभेदश्च। अत्रास्माभिः विशेषतो लक्षितव्यस्त्वयं विषयः यदाचार्यः ग्रन्थान्तरेषु विशेषं पदार्थस्य सामर्थ्यविशेषं निरूपयामास। अत्र तु पदार्थधर्मानेवेति।

प्रसङ्गवशादस्मिन्नेवावसरे आचार्येण विशिष्टवस्तुनः स्वरूपमपि विचारितम्। अस्त्यत्र विषये दर्शनेषु मतभेदः। अत एवास्य विचारस्य महत्त्वम्। केचित् विशिष्टं विशेष्येणात्यन्ताभिन्नमाहुः। अपरे च अत्यन्तभिन्नम्। गीतातात्पर्ये च आचार्येण विशेष्यविशिष्टयोरभेदः समर्थितः। न च नैयायिकमतप्रवेशः। नापि विशेष्यविशिष्टयोर्भेदसमर्थनपरोपाधिखण्डनमन्दारमञ्जरीविरोधः। विशेष्यविशिष्टयोर्भेदाभेदस्यैव आचार्येणात्राभिप्रेतत्वात्। केवलभेदवादस्यैवात्र निराकरणात्। मन्दारमञ्जर्यां च विशेष्यविशिष्टयोः केवलाभेदनिराकरणस्यैव चिकीर्षितत्वात्। तत्रैवान्ते स्पष्टं भेदस्याप्युक्तेश्च।

शब्दनिर्णयकोशः

गीतातात्पर्यनिर्णये आचार्यस्यापूर्वव्याख्यानपद्धतिपरिशीलनप्रसङ्गे अस्त्यवश्यमुल्लेखनीयः अपरोऽशः यदाचार्यः ग्रन्थेऽस्मिन् शब्दनिर्णयाख्यं कोशविशेषं तत्र तत्रोदाहरति। यद्यप्ययं कोशः इदानीमनुपलब्धः। तथाप्यत्यन्तसमुचितहृदयङ्गमव्याख्यानोपयोगिनोऽस्य महत्त्वमसाधारणम्। अत्रैकं निदर्शनं दशमेऽध्याये 'बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः' इति श्लोकः। अत्र बुद्धिर्ज्ञानमिति पर्यायशब्दप्रयोग इति भाति। आचार्यश्च शब्दनिर्णयमुदाहृत्य बुद्धिशब्दस्य अन्तःकरणार्थत्वमुपपाद्यापर्यायत्वं साधयति। 'बुद्धिर्बोधनिधित्वात् तदन्तःकरणमुच्यते' इति शब्दनिर्णयः अन्तःकरणस्य बुद्धिशब्दवाच्यत्वे बोधनिधित्वरूपं प्रवृत्तिनिमित्तमप्याह। श्रीमद्विजयतीर्थैरयं स्मृतित्वेनोक्तः। शब्दनिर्णय इति नाम्ना चायं स्मृतिरूपः कोश इति ज्ञायते।

एवमत्यन्तवैशिष्ट्योपेतस्यास्य ग्रन्थस्य टीकानिबन्धनकाराः श्रीमज्जयतीर्थश्रीमच्चरणा ये तावत् प्रायः समेषां श्रीमदाचार्यप्रणीतग्रन्थानां अप्रतिमटीका-

रचनेन टीकाकृत्पादा इत्येवमन्वर्थनाम्ना भूषिता भुवि प्रथिताश्च महानुभावाः। सैषा टीका न्यायदीपिकाख्या गीतोपदेष्टुः हार्दं समर्थयमानानां श्रीमदाचार्योपनिबद्धानां न्यायानां संप्रकाशनेन अन्वर्थनाम्नी। विना चैतां गीतातात्पर्यनिर्णयावगाहनं दुःशकमेवेति तु सर्वथा नातिशयोक्तिः।

अस्याश्च टीकाया द्वे टिप्पण्यौ प्रसिद्धे। एका श्रीमज्जयतीर्थीयानां, प्रायः सर्वासां टीकानां टिप्पणीरचयितृभिः टिप्पणीकारेष्वग्रगण्यैः प्रातःस्मरणीयैः श्रीमद्राघवेन्द्रतीर्थश्रीमच्चरणैः विरचिता भावदीपाख्या। अपरा च ताम्रपर्णीवंशविभूषणैः श्रीश्रीनिवासाचार्यैर्विरचिता किरणावल्याख्या। अनयोः भावदीपो यद्यप्यतिसंक्षिप्तस्तथापि विषमस्थलेषु न्यायदीपिकाभावं प्रस्फोरयन् टीकावाक्ययोजनादिकं च कुर्वन् अत्यन्तमुपकारकः। किरणावली तु किञ्चिद्विस्तरेण टीकावाक्यविवरणादिकं कुर्वन्ती अध्येतॄणां साहाय्यकारिणी।

किरणावलीसहितन्यायदीपिकायुतगीतातात्पर्यप्रकाशनं एतच्छतकस्य आदिमे दशके द्वैतसिद्धान्तग्रन्थप्रकाशनधुरन्धरेण श्रीमता टि. आर्. कृष्णाचार्येण विहितमपि एतद्ग्रन्थाध्ययनोत्सुकैः नेदानीमुपलभ्यते। एवं भावदीपोऽपि कतिपयवर्षेभ्यः प्राक् धारवाडस्थेन श्रीपञ्चमुखी आनन्दतीर्थाचार्येण प्रकाशितोऽपि विना न्यायदीपिकां प्रकाशितः। अतोऽस्य कदाऽप्यप्रकाशितस्य भावदीपसहितन्यायदीपयुतगीतातात्पर्यस्य प्रकाशनमावश्यकमिति मन्वानैः श्रीपूर्णप्रज्ञविद्यापीठस्य कुलपतिभिः गुरुवर्यैः श्रीपेजावरमठाधीशैः ग्रन्थस्यैतस्य सम्पादनेऽहमादिष्टः। विद्यापीठीयस्य निखिलकार्यजातस्यापि मुख्यतो निर्वाहकेभ्यः, मादृशान् असङ्ख्याकान् शिष्यान् सुतनिर्विशेषं परमप्रेम्णा परिपाल्य अध्यात्मविद्यां चोपदिश्य स्वीयकुलपतिपदस्य अक्षरशः सार्थकतामापादितवद्भ्यः ईदृशविशिष्टकार्यभारं मयि नियोज्य अनुगृहीतवद्भ्यश्च श्रीमद्गुरुचरणेभ्यः केवलं भक्तिपूर्वकप्रणतिततिसमर्पणेनाहमात्मानं धन्यं मन्ये। श्रीपूर्णप्रज्ञविद्यापीठस्य उपकुलपतयः मम प्राध्यापकाः विद्वन्मूर्धन्याः श्री कृ. त. पाण्डुरङ्गीमहाभागाश्च ग्रन्थसम्पादनसमयेऽत्युपयुक्तसूचनाभिः सम्पादनकार्येऽस्मिन् सम्यक्तामावाह-

यन्तः अत्यन्तमुपाकुर्वत। प्राचीनशास्त्रग्रन्थसम्पादनप्रकाशनादिषु दृढदीक्षाणां विद्यापीठीयैतद्योजनायाः मूलप्रेरकाणां, विशेषतो मे संशोधनादिकर्मणि सर्वदा मार्गदर्शकानां तेषामहमत्यन्तमधमर्णोऽस्मि।

एतद्ग्रन्थस्य सम्पादनसमये अधोनिर्दिष्टा मातृकाः पाठान्तरसंशोधनार्थमुपायुज्यन्त—

१. श्री कृ. त. पाण्डुरङ्गी महोदयैः स्वीयात् श्रीविद्याधीशग्रन्थभण्डारात् दत्ता न्यायदीपिका-गीतातात्पर्यनिर्णयाभ्यां सहिता—अत्र G. 1. इति निर्दिष्टा।

२. श्री गौडगेरी गोपालकृष्णाचार्यैः दत्ता न्यायदीपिकासहितगीतातात्पर्यनिर्णययुता – G. 2 इति निर्दिष्टा।

३. पूर्णप्रज्ञविद्यापीठीयग्रन्थालयस्थः भावदीपः।

४. श्री व्यासनकेरे प्रभञ्जनाचार्यैर्दत्ता भावदीपमातृका।

५. श्रीहृषीकेशतीर्थीयपाठानुसारेण श्रीमद्भिः बन्नञ्जे गोविन्दाचार्यैः सम्पादितः अखिलभारतमाध्वमहामंडलेन प्रकाशितः सर्वमूलान्तर्गतः गीतातात्पर्यनिर्णयः – अत्र क्वचित् A इति, क्वचिच्च अ इति निर्दिष्टः।

६. श्री टी. आर्. कृष्णाचार्यैः प्रकाशितः किरणावलीसहितन्यायदीपिकायुतगीतातात्पर्यनिर्णयः।

स्वीयमातृकाप्रदानेन ग्रन्थसम्पादनकार्येऽस्मिन् अत्यन्तमुपकुर्वद्भयो महनीयेभ्यः सर्वेभ्योऽपि मदीयाः हार्दाः कृतज्ञताः संसूचयामि।

—डि. प्रह्लादाचार्यः
सम्पादकः

॥ ॐ ॥

श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक

लक्ष्मीहयग्रीवाय नमः

श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः

गीतातात्पर्यनिर्णयः

श्रीराघवेन्द्रयतिकृतभावदीपसहित-

श्रीजयतीर्थविरचितन्यायदीपिकासहितः

॥ श्रीगुरुभ्यो नमः हरिः ॐ ॥

गीतातात्पर्यम्—

समस्तगुणसम्पूर्णं सर्वदोषविवर्जितम् ।
नारायणं नमस्कृत्य गीतातात्पर्यमुच्यते ॥

न्यायदीपिका—

इन्दिरावदनाम्भोजराजहंसाय विष्णवे ।
अमन्दानन्दसन्दोहसुन्दराकृतये नमः ॥ १ ॥

॥ श्री मध्वपतये नमः ॥

भावदीपः—

लक्ष्मीनारायणं नत्वा पूर्णबोधादिसद्गुरून् ।
गीतातात्पर्यटीकाया भावदीपं करोम्यहम् ॥

सकलत्राञ्जनसदेवतेन्दिरोपसर्जनकभगवन्नतिरूपं मङ्गलं ग्रन्थादावाचरति ॥ इन्दिरेति ॥ एतच्च न सौख्यातिशयाय, किन्तु तदनुग्रहार्थमेवेति

धर्मविज्ञानवैराग्यपरमैश्वर्यशालिनः ।
आनन्दतीर्थभगवत्पादान् वन्दे निरन्तरम् ॥ २ ॥

स पद्मनाभतीर्थार्कगोगणोऽस्तु दृशे मम ।
न तत्त्वमार्गे गमनं विना यदुपजीवनम् ॥ ३ ॥

प्रणम्य चरणद्वन्द्वं गुरूणां तत्कृपाबलात् ।
व्याकरिष्ये यथाबोधं गीतातात्पर्यनिर्णयम् ॥ ४ ॥

अथाशेषपुरुषार्थहेतुभूतामन्यैरन्यथा व्याख्यातां गीतां यथावद्व्याख्यातुकामो भगवानाचार्यः प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यादिप्रयोजनामिष्टदेवतानतिं शिष्टाचारपरम्परादिप्राप्तां शिष्यजनशिक्षार्थं ग्रन्थे निबध्नाति, ग्रन्थारम्भं च प्रतिजानीते ॥ समस्तेति ॥ अन्तरायपरिजिहीर्षादिमन्तो देवतान्तरनतिमाचरन्तो दृष्टाः । तत्किं नारायणप्रणामेनेत्यत उक्तम् ॥ समस्तेत्यादि ॥ नारायणस्यैव समस्तगुणसम्पूर्णत्वेनाशेषदोषदूरत्वेन निखिलप्रार्थितप्रदानसामर्थ्यादितरेषां तत्प्रसादासादितशक्तिमत्त्वात्तत्प्रणाम एव कर्तव्य इति भावः ।

भावेनोक्तममन्देत्यादि । 'अशरीरः प्रज्ञात्मा' इत्युक्तेः कथमशरीरस्य वदनाम्भोजराजहंसत्वमिति शङ्कानिरासायोक्तं सुन्दराकृतय इति । प्राकृतदेहनिषेधपरा श्रुतिरिति भावः ।

ग्रन्थकर्तृन्नमति ॥ धर्मेति ॥ गुरुत्वाद्बहुवचनम् । एवमग्रेऽपि । प्राचीनटीकाकर्तृनर्थयते ॥ स पद्मनामेति ॥ सूर्यकिरणसमूहो यथा लोकस्य ज्ञानाय भवति, तथैतेषां वाक्समूहो मम ज्ञानायास्तु । उत्तरार्धेऽप्यर्थद्वयं ज्ञेयम् । श्रीपद्मनामेति पाठे यच्छब्दश्रवणात् स गोगण इति योज्यम् । अक्षोभ्यतीर्थाख्यस्वगुरून् नत्वा चिकीर्षितं प्रतिजानीते ॥ प्रणम्येति ॥

॥ अथेति ॥ प्रतिग्रन्थव्याख्याऽऽरभ्यत इत्यारम्भार्थोऽथशब्दः । व्याख्याने बीजोक्तिरशेषेत्यादि । यथावदित्येतद्घटनायोक्तमन्यैरित्यादि । परिसमाप्त्यादीत्यादिपदेन प्रचयसङ्ग्रहः । परम्परादीत्यादिपदेन तदनुमितायाः

शास्त्रेषु भारतं सारं तत्र नामसहस्रकम् ।
वैष्णवं कृष्णगीता च तज्ज्ञानान्मुच्यतेऽञ्जसा ॥

सम्पूर्णमिति गुणानां प्रत्येकं पूर्णतामाह। विवर्जितमिति च दोषवर्जनस्य निःशेषताम्। समस्तगीतासु भगवद्गीतायाः प्राधान्यज्ञापनाय गीतेत्येवोक्तम्। "मुख्यस्य निर्विशेषेण शब्द" इति स्मृतेः। स्वयमेव गीताभाष्यस्य कृतत्वात् किं पुनरारम्भेणेत्यतस्तात्पर्यमित्युक्तम्। व्याख्यातत्वेऽपि गीतायास्तदर्थस्य शिष्याणां बुद्ध्यारोहार्थं शब्दानुकरणाद्यन्तरेण पुनस्तात्पर्यमेवोच्यत इति भावः।

नन्वनेकेषु ग्रन्थेषु विद्यमानेषु को विशेषो गीताया येन तस्या एव तात्पर्यमुच्यते। अपि च, भारतमध्यगतत्वाद्गीतायाः कुतस्तस्या एव पृथक् तात्पर्यमुच्यत इत्यतो भारतस्य सर्वशास्त्रोत्तमत्वाद्युक्तं तदन्तर्गतगीताया एव तात्पर्यकथनम्। भारतेऽपि गीताया उत्तमत्वात्तस्याः पृथक्तात्पर्यकथनं चोपपन्नमिति परिहारमभिप्रेत्य भारतस्य सर्वशास्त्रोत्तमत्वं, भारतेऽपि गीताया एव उत्तमत्वमेव कुत इत्यतस्तत्पुराणवचनेन साधयति ॥ शास्त्रेष्विति ॥ भारतेऽपि गीतानामसहस्रयोरुत्तमत्वं कुत इत्यत आह ॥ तदिति ॥ भारतज्ञानादप्याञ्जस्येन गीतादिज्ञानस्य मोक्षसाधनत्वाद्युक्तं भारतेऽपि गीतादेरुत्तमत्वमिति भावः।

गीतानामसहस्रसमानशास्त्रान्तरज्ञानस्याप्याञ्जस्येन मोक्षहेतुत्वात् को विशेषो गीतादेरित्यत आह ॥ नेति ॥

'प्रारिप्सितसमाप्त्यादिकामः स्वेष्टदेवतानतिं कुर्यात्' इति श्रुतेर्ग्रहः। निबन्धनस्य कृत्योक्तिः शिष्येति। शिष्यैरप्येतदवश्यं कार्यमिति ज्ञापनार्थमित्यर्थः।

समस्तपदेनापौनरुक्त्यमाह ॥ सम्पूर्णमिति ॥ सम्मतगीतास्विति ॥ वेणुगीताभ्रमरगीतागोपिकागीताभिक्षुगीतेत्यादिरूपास्वित्यर्थः ॥ स्मृतेरिति ॥ सूत्रभाष्योक्तस्मृतेरित्यर्थः।

॥ तस्या एवेति ॥ भारतस्य वा तदन्तर्गतग्रन्थान्तरस्य वा त्यागेनेति योज्यम्। नन्वित्यादिना कृतचोद्यस्य शास्त्रेष्विति श्लोकस्थपूर्वोत्तरार्धतात्पर्योक्त्योत्तरमाह भारतस्येत्यादिना।

न भारतसमं शास्त्रं कुत एवानयोः समम् ।
भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ॥
देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वितैः ।
व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतम् ॥
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥
स्वयं नारायणो देवैर्ब्रह्मरुद्रेन्द्रपूर्वकैः ।
अर्थितो व्यासतां प्राप्य केवलं तत्त्वनिर्णयम् ॥
चकार पञ्चमं वेदं महाभारतसंज्ञितम् ॥

इति ब्रह्माण्डे ।

भारतस्य सर्वशास्त्रोत्तमत्वमेव कुत इत्यत आह ॥ भारतमिति ॥ वेदपदेन वेदयन्तीति सर्वशास्त्राण्युच्यन्ते । भारतादेस्तुलाऽऽरोपणं नाम तत्प्रतिनिधेरारोपणम् । एतदेव कुत इत्यतो महाभारतशब्दार्थ-पर्यालोचनयैव ज्ञायत इत्याह ॥ महत्त्वादिति ॥ महत्त्वात्तत एव भारेण ततत्वाच्च महाभारतमित्यर्थः । किञ्च महाभारतशब्दनिर्वचन-ज्ञानादेव यदा सर्वपापक्षयो भवति तदा किं वाच्यं तस्य सर्वशास्त्रोत्त-मत्वमिति भावेनाह ॥ निरुक्तमिति ॥ निरुक्तं निर्वचनम् । अस्य महा-भारतशब्दस्य ।

भारतस्यैवं सर्वशास्त्रोत्तमत्वे किं निमित्तमित्यतः परमाप्तकृतत्वं दर्शयति ॥ स्वयमिति ॥

नन्वाप्तो नाम यथार्थदर्शी यथादृष्टार्थवादी च । तत्र व्यासस्य यथार्थदर्शित्वं कुतः ? भगवदवतारेष्वपि पृथ्वादिष्वज्ञानादिदर्शना-दित्यत उक्तम् ॥ स्वयमिति ॥

प्रतिनिधेः पाषाणादेः । महत्त्वं भारहेतुरित्याह ॥ महत्वात्तत एव भारेण ततत्वादिति ॥ महत्वाद्भारो महाभारः । निरुक्तत्वादेव महत आ

तत्र साक्षादिन्द्रावतारमुत्तमाधिकारिणमात्मनः प्रियतममर्जुनं क्षत्रियाणां विशेषतोऽपि परमधर्मे नारायणद्विट्तदनुबन्धिनिग्रहं

अस्तु व्यासस्य यथार्थदर्शित्वं साक्षान्नारायणावतारत्वेनाज्ञान-भ्रमसन्देहशून्यत्वात्। यथादृष्टार्थवादित्वं तु कुतः? तस्य प्रमादेनायथा-दृष्टवादित्वाभावेऽपि विप्रलिप्सया तत्सम्भवादित्यत आह ॥ ब्रह्मेति ॥ वक्तुर्विप्रलिप्सा श्रोतृणामयोग्यतायां सम्भवति। प्रकृते च ब्रह्मादीनां योग्यानामेव श्रोतृत्वेन भगवतो विप्रलम्भाभावाद्युक्तं यथादृष्टार्थवादि-त्वमिति भावः। अपहासेनायथादृष्टार्थवादित्वं किं न स्यादित्यत आह ॥ तत्त्वेति ॥ अपहासस्य प्रसङ्गदोषनिबन्धनत्वादत्र च तत्त्वनिर्णयस्य प्रसक्तत्वेन तदसम्भवान्नात्रापहासेनापि व्यासस्यायथादृष्टार्थवादित्व-मिति भावः। एवंभूतासरचितत्वस्य भागवतादिष्वपि साम्यात्को विशेषो भारतस्येत्यत उक्तम् ॥ केवलमिति ॥ नासुरमोहनाद्यर्थमन्य-त्रान्यदुच्यते। अन्यथाप्रतीतस्य गुह्यदर्शनभाषाभ्यामुक्तत्वात्। अन्यत्र क्वचिद्वृथामोहनार्थमन्यथा कथनादिति भावः। एवं परमाप्तिमूलत्वेनैव न भारतस्य सर्वशास्त्रोत्तमत्वं किन्तु वेदसंवादितया पञ्चमवेदत्वेनापीति भावेनाह ॥ पञ्चममिति ॥

एवं गीतातात्पर्यकथनस्य युक्ततां प्रसाध्य श्रोतृशेमुषीमनुकूल-यिष्यन्नादावेव अशेषगीताप्रतिपाद्यमर्थं सङ्क्षेपेण दर्शयति ॥ तत्रेति ॥

पञ्चमीसमासश्च ज्ञेयः। तेन महाभारेण ततत्वाद्व्याप्तत्वात्। महाभारोप-पदात् तनोतेर्डप्रत्यय इति भावः। निर्वचनमवयवार्थकथनम्। 'एष विष्णो-र्भगवतः कला भुवनपावनी' इत्यादि पृथुं प्रति ऋषिभिरुक्तं हृदि कृत्वा शङ्कते ॥ पृथ्वादिष्विति ॥ आदिपदेन बलरामकार्तवीर्यार्जुनादिग्रहः। 'आविवेश पृथुं देवः शङ्खी चक्री चतुर्भुजः' इति, 'पृथुहैहयादयो जीवास्तेष्वाविष्टो हरिः स्वयम्' इत्यादिवचनात्तेषां न साक्षादवतारत्वमस्तीति भावेन स्वयंशब्दार्थमाह ॥ साक्षान्नारायणेति ॥ गुह्येति ॥ भाषाद्वयं भारत-तात्पर्यद्वितीये व्यक्तम्। अन्यत्र पुराणेषु ॥

बन्धुस्नेहादधर्मत्वेनाशङ्क्य ततो निवृत्तप्रायं स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमो धर्मस्तद्विरुद्धः सर्वोऽप्यधर्मो भगवदधीनत्वात्सर्वस्येति बोधयति भगवान्नारायणः ।

तत्र गीतायाम् । इति कथ्यत इति शेषः । कृष्णस्याप्यर्जुनादविशेषात्कथं तद्बोधकत्वमित्यतो भगवान्नारायण इत्युक्तम् । आप्तसमस्तकामस्य भगवतः किमर्जुनबोधनेनेत्यत उक्तम् ॥ आत्मन इति ॥ प्रयोजनाभावेऽपि प्रीत्यतिशयवशान्मातुरपत्यपालनवत्तद्बोधनं युक्तमिति भावः । अर्जुनस्य भगवत्प्रियत्वमेव कुतः ? अपरोक्षज्ञानित्वात् "ज्ञानी प्रियतमोऽतो मे" इति स्मृतेरिति चेत्तदेव कुत इत्यत आह ॥ उत्तमेति ॥ एतदपि कुत इत्यत आह ॥ साक्षादिति ॥ साक्षादिन्द्रः पुरन्दरः । साक्षादवतारो नावेशमात्रमिति वा । अत्र देवत्वमेव वक्तव्यम् । इन्द्रावतारमिति स्वरूपकथनम् । अर्जुनबोधने का प्राप्तिरित्यत आह ॥ नारायणेति ॥ बान्धवादिनिग्रहस्याधर्मत्वात् किमुच्यतेऽधर्मत्वेनाशङ्क्येत्यत एतन्निग्रहस्य कैमुत्येन धर्मत्वमाह ॥ क्षत्रियाणामिति ॥ भागवतमात्रस्यैतादृशनिग्रहः परमधर्मः । अत्रैव नियुक्तानां क्षत्रियाणां तु विशेषतोऽपि परमधर्म इत्यर्थः । बान्धवादिनिग्रहः कथं परमधर्म इत्यतो बान्धवादीति वक्तव्ये नारायणद्विट्तदनुबन्धीत्युक्तम् । बान्धवादित्वेऽपि केषाञ्चिन्नारायणद्वेषित्वात् केषाञ्चित्तत्सम्बन्धित्वात् तन्निग्रहो धर्म एवेति भावः ।

नन्वयं धर्मश्चेच्छास्त्रोदित एव भवेत् । तथा च न शास्त्रविदुषाऽधर्मत्वेनाऽऽशङ्क्येत । शङ्क्यते च । अतो न धर्म इत्यत आह ॥ बन्धुस्नेहादिति ॥ न शास्त्रमुखेनेयं शङ्का । अपि तु स्नेहमात्रनिबन्धनैवेति

उपोद्घातः—॥ अनुकूलयिष्यन्निति ॥ सङ्क्षेपेणोक्ते प्रपञ्चं जिज्ञासवो भवन्तीति प्रपञ्चनेऽपि जिज्ञासाजननमत्रानुकूलनमिति भावः ॥ इति शेष इति ॥ नारायणपदानन्तरं इतिपदं कथ्यत इति पदञ्चाध्याहार्यमित्यर्थः ॥ इति स्मृतेरिति ॥ 'ज्ञानेनासौ बिभर्ति माम्' इति भागवतस्मृतेरित्यर्थः ॥ अत्र ज्ञानित्वे । 'नैव देवपदं प्राप्ता ब्रह्मदर्शनवर्जिताः ।' इति स्मृतेरिति भावः ॥

सर्वश्चैतदत्रैवावगम्यते ॥

भावः । ज्ञानिनः स्नेहमात्रेण सञ्जातया शङ्कया कथं स्वकीयपरमधर्मनिवृत्तिरित्यत उक्तम् ॥ निवृत्तप्रायमिति ॥ एवमाशङ्कया निवृत्तप्रायश्चेदेतद्युद्धकरणमेव बोधनीयं, भगवन्महिमादिकं किमर्थमुच्यत इत्यतो बोध्यार्थमाह ॥ स्वेति ॥ न केवलं युद्धादिस्वविहितवृत्तिमात्रं परमो धर्मः । येन तदेव बोध्यं स्यात् । अपि तु भक्त्यादिकमपि । तत्रार्जुनस्य धर्मैकदेशेऽधर्मशङ्कायामपि प्राप्तलोकोपकाराय समग्रधर्मो भगवता बोध्यते । तत्र भगवन्महिमाद्युक्तिस्तु भक्त्युत्पादनायेति भावः ।

ननु युद्धादिस्वविहितवृत्तिनिवृत्तोऽप्यर्जुनो न परमधर्मनिवृत्तः । भक्त्यादिमत्त्वात् । अतः किं बोध्यत इत्यत आह ॥ तदिति ॥ न भक्त्यादिकं प्रत्येकं परमधर्मः । येन तावता तस्य न परमधर्मनिवृत्तिः । किन्तु मिलितमेव । अतोऽन्यतमाभावेऽपि परमधर्मनिवृत्तेर्युक्तं तद्बोधनमिति भावः । तर्हि प्रकृत्यादिवर्णनं कोपयुज्यत इत्यतोऽस्तु स्वविहितवृत्तेर्धर्मत्वं, तद्विरुद्धस्याधर्मत्वं च । भगवद्भक्त्या तदाराधनस्य धर्मत्वं तद्विरुद्धस्याधर्मत्वं च कुत इत्याशङ्कानिवारणाय सर्वस्य भगवदधीनत्वहेतुं वक्तुं सर्वनिरूपणमिति भावेनाह ॥ भगवदिति ॥ सर्वस्य भगवदधीनत्वेन धर्माधर्मतया भगवन्नियतयोरेव तथाभावात्तस्य चैवं विधयोरेव तथा नियमनोपपत्तेरिति भावः ।

नन्वर्जुनस्य देवत्वादि कुतः । स्वविहितेत्यादेर्गीतातात्पर्यार्थत्वं च कुत इत्यत आह ॥ सर्वश्चेति ॥ अर्जुनो देव इत्याद्येतच्च सर्वं गीतायामेवावगम्यते । न च प्रमाणान्तरं तत्रान्वेषणीयम् । स्वविहितेत्यादिकं च सर्वं गीतायामवगम्यत एव । न तु तदर्थतया बलादुच्यत इत्यर्थः । तत्र तावन्नारायणद्विट्तदनुबन्धिनिग्रहं बन्धुस्नेहादधर्मत्वेनाऽऽशङ्क्य

अत्रैवेति ॥ द्विट्तदनुबन्धिनिग्रह एवेत्यर्थः ॥ केषाञ्चिदिति ॥ दुर्योधनादीनां । भीष्मद्रोणादीनां तदनुबन्धित्वादिति भावः ॥ शास्त्रविदुषा ॥ अर्जुनेनेत्यर्थः ॥ धर्मैकदेश इति ॥ युद्धरूपे । समग्रधर्मः स्वविहितवृत्तिभगवद्भक्त्यादिरूपः ॥ मिलितमेवेति ॥ भक्तिवैराग्यादिपूर्वकं स्वविहितवृत्तिः परमधर्म इत्यर्थः ।

अथ चेत्त्वं धर्म्यमिमं सङ्ग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥

इत्यादिना युद्धस्य स्वधर्मत्वम् ।

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ॥
श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
सर्वं गुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इत्यादिना स्वधर्मेणैव भगवदाराधनस्यैव कर्तव्यत्वं, तदन्यस्य त्याज्यत्वं च ।

ततो निवृत्तप्रायमर्जुनं भगवान्नारायणो बोधयतीत्येतावद्गीतायां स्फुटमवगम्यते । "यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे" इति प्रार्थनात्तस्य निवृत्तप्रायतावगमात् । साक्षान्निवृत्तौ तदनुपपत्तेः ।

नारायणद्विट्तदनुबन्धिनिग्रहस्य क्षत्रियाणां परमधर्मत्वं गीतायां केनावगम्यत इत्यत आह ॥ अथेति ॥ युद्धस्य उक्तविधस्येति शेषः । अवगम्यत इति सर्वत्रानुषज्यते ।

स्वविहितवृत्त्या भक्त्या भगवदाराधनमेव परमधर्मः । तद्विरुद्धः सर्वोऽप्यधर्म इत्येतत्केनावगम्यत इत्यत आह ॥ यत इति ॥

युद्धनिवृत्तिरपि परमधर्मविरुद्धत्वादधर्म एवेति तद्बोधनमपि कार्यमेवेत्यर्थः ॥ तथाभावात् ॥ धर्माधर्मभावादित्यर्थः । तद्विरुद्धमपि धर्मत्वेन नियमयति चेत् धर्मो भवत्येवेत्यत आह ॥ तस्य चेति ॥ हरेः स्वभक्त्यादिपूर्वकस्वविहितवृत्तितद्विरुद्धरूपयोरेव धर्माधर्मत्वेन नियमनोपपत्तिरित्यर्थः ॥ उक्तविधस्येति ॥

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

यत इत्यनेन स्वविहितवृत्त्या भक्त्या भगवदाराधनस्य कर्तव्यत्वमवगम्यते । भक्त्याऽर्चनस्यैवाभ्यर्चनत्वात् । स्वकर्मणेत्यनेन स्वविहितवृत्त्या भगवदाराधनस्यैव मुख्यतः कर्तव्यत्वम् । मोक्षसाधनस्यैव मुख्यकर्तव्यत्वात् । श्रेयानित्यनेन स्वविहितवृत्तेः कर्तव्यत्वमस्वविहितवृत्तेस्त्याज्यत्वं च । श्रेयस एव कर्तव्यत्वादश्रेयसस्त्याज्यत्वात् । सर्वेत्यनेन भक्त्या भगवदाराधनस्य कर्तव्यत्वम् । सर्वगुह्यतमतया, हितसाधनतया, भगवत्प्राप्तिसाधनतया च विहितस्य कर्तव्यत्वात् । सर्वधर्मानित्यनेन स्वविहितवृत्त्या भक्त्या भगवदाराधनस्यैव कर्तव्यत्वं, तदन्यस्य त्याज्यत्वं च । स्वविहितवृत्त्या भक्त्या भगवदाराधनस्यैव शरणागतित्वात् । सर्वधर्मपदेनैतद्विरुद्धस्य धर्माभासस्य विवक्षितत्वात् । सर्वपापगमनहेतुतया विहितस्य कर्तव्यत्वात् । तदर्थत्वेन निषिद्धस्य त्याज्यत्वात् ॥ स्वधर्मेण ॥ भक्त्या चेति संयोज्यम् । कर्तव्यत्याज्यत्वाभ्यां धर्माधर्मत्व इति भावः ।

ननु श्रवणादिरूपस्वविहितवृत्त्यैव परोक्षापरोक्षज्ञानसिद्धेस्तत्साधनस्यैव परमधर्मत्वान्न भक्तिः परमधर्मतया गीताभिमतेत्यत आह ॥ नाहमिति ॥

अभिमतैव गीतायां भक्तिः परमधर्मत्वेन । परोक्षापरोक्षज्ञानयोर्ज्ञानिनोऽपि मोक्षस्य गीतायामेव तदधीनत्वावगमात् । न चैवं श्रवणादिवैयर्थ्यम् । अन्यथा ज्ञानादेर्भक्त्यधीनत्वानुपपत्तिरिति वाच्यम् ।

भक्तिपूर्वं स्वविहितवृत्त्या क्रियमाणस्य भगवदाराधनस्येत्यर्थः । कर्तव्यत्वे हेतुश्चतुर्थपादेन लब्ध इति भावेनाह ॥ मोक्षेति ॥ ते हितमिति मामेवैष्यसीत्याभ्यां लब्धहेतू आह हितेत्यादिना ॥ त्याज्यत्वं चेति ॥ अवगम्यत इति योज्यम् । तद्व्यनक्ति भक्त्येत्यादिना । स्वधर्मेणेत्यनुवादेन शेषमाह ॥ भक्त्या चेति संयोज्यमिति ॥ भक्त्या भगवदाराधनमेव धर्मस्तद्विरुद्धस्त्वधर्म इत्येषोर्थोऽनेन कथं लब्ध

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥
(गी. ११-५३, ५४)

इत्यादिना विष्णुभक्तेरेव सर्वसाधनोत्तमत्वं परोक्षापरोक्षज्ञानयोर्ज्ञानिनोऽपि मोक्षस्य तदधीनत्वं च ।

'मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ (गी. ११-५५)

इत्यादिना भक्तस्यापि तत्कर्म विकर्मत्यागश्च ।

श्रवणादेर्ज्ञानादिसाधनत्वेऽपि भक्तेरेव तेभ्यः श्रवणादिसर्वसाधनेभ्य उत्तमत्वस्यात्र विवक्षितत्वादिति भावः ।

ननु न भक्त्या स्वविहितवृत्त्या भगवदाराधनं कर्तव्यं तद्विरुद्धं त्याज्यमिति गीताभिमतम् । तत्र भक्तिमतः कर्तव्यत्याज्याभाव[1]मात्रस्याभिमतत्वादित्यत आह ॥ मत्कर्मेति ॥

न भक्तस्य कर्तव्यत्याज्याभावो गीताभिमतः । तत्रैव भक्तस्यापि स्वविहितवृत्त्या भगवदाराधनस्य कर्तव्यतया तद्विरुद्धस्य त्याज्यतयाऽवगमादिति भावः । यदुक्तं स्वविहितवृत्तिरूपं मद्विषयं च कर्म मत्कर्म तदेव तत्कर्म । सङ्गवर्जितोस्वविहिताभगवद्विषयकर्मसङ्गवर्जितः । तदेव विकर्मोच्यते । भगवत्प्राप्तिहेतुतयोक्तमेव कर्म कर्तव्यम् । तदर्थत्वेन निषिद्धमेव त्याज्यमिति ।

इत्यत आह ॥ कर्तव्येति ॥ परमधर्मत्वेन भक्तिर्गीतायामभिमतेति कुत इत्यतो मूलं योजयति ॥ परोक्षेति ॥ ज्ञातुं द्रष्टुं चेत्युक्तपरोक्षापरोक्षयोः प्रवेष्टुं चेत्युक्तज्ञानिमोक्षस्य च भक्त्या त्वनन्ययेति भक्त्यधीनत्वावगमादित्यर्थः ॥ अन्यथेति ॥ ज्ञानस्य श्रवणाद्यधीनत्व इत्यर्थः । शङ्कोत्तरत्वेन मूलार्थमाह ॥ श्रवणादेरिति ॥ उत्तमत्वस्येति ॥ तथा च सूत्रं—"परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः" (ब्र. सू. ३-३-५४) इति ॥ तत्रेति ॥ सर्वधर्माननिति श्लोके

---

1. G. 1. त्याज्याभावस्य

कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् । (गी. ४-१५)

इत्यादिना ज्ञानिनोऽपि भगवत्कर्म ।

सुदुर्दर्शमिदं रूपं दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिणः ॥
(गी. ११-५२)

इष्टोसि मे दृढमिति ततो[1] वक्ष्यामि ते हितम् ।
(गी. १८-६४)

दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव । (गी. १६-५)

नन्वर्जुनस्य ज्ञानित्वे कथं तं प्रति स्वविहितवृत्त्या भगवदाराधनं विधीयते । ज्ञानिनस्तदभावस्य गीताभिमतत्वादित्यत आह ॥ कुर्विति ॥

न ज्ञानिनः स्वविहितवृत्त्याद्यभावो गीताऽभिमतः । तत्र 'एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः । कुरु कर्मैव' इति ज्ञानिनोऽपि स्वविहितवृत्त्यादेः कर्तव्यतयाऽवगमादिति भावः । स्वविहितं, भगवदर्थमेव पूर्वैः कृतं तदुभयमेव भगवत्कर्म ।

यदुक्तमर्जुनो भगवतोऽतिप्रियोपरोक्षज्ञान्युत्तमाधिकारी देवश्चेति तत्केनावगम्यत इत्यत आह ॥ सुदुर्दर्शमिति ॥

सुदुर्दर्शमित्यनेनापरोक्षज्ञानित्वमवगम्यते । देवैः सह पठितत्वेन देवत्वं च । इष्टोसीति प्रियतमत्वम् । दैवीति देवत्वम् । महात्मान

कर्तव्यस्य त्याज्यस्य चाभावोऽभिमत इत्यर्थः । हेयोपादेयाभावेन शरणागतिरेव तस्याभिप्राय इति शङ्कितुर्भावः । यद्वा तत्रेत्यस्य गीतायामित्यर्थ इति ज्ञेयम् । एतद्द्वयं मत्कर्मकृन्मत्परम इति श्लोके कथमवगम्यत इत्यतोऽनुवादव्याजेन व्यनक्ति यदुक्तमित्यादिना । गीतापदार्थमुक्त्वा तत्कर्मेति मूलपदस्यार्थमाह ॥ ॥ तदेव तत्कर्मेति ॥ कर्मधारय इत्युक्तं भवति । अस्मच्छब्दात्तद्भगवद्विषयं कर्मैव भक्तस्य कर्मेत्यर्थः । तदर्थत्वेन भगवदर्थत्वेन निषिद्धमेवेत्यर्थः ॥ तत्रेति ॥

---

1. A. 'ततो वक्ष्यामि ते हितम्' इति पाठः न दृश्यते ।

महात्मानस्तु मां पार्थ दैवीं प्रकृतिमाश्रिताः ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥ (गी. ९-१३)
दर्शयामास पार्थाय परमं रूपमैश्वरम् । (गी. ११-९)

इत्यादिनाऽर्जुनस्योत्तमाधिकारित्वमपरोक्षज्ञानित्वं च ।

'न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ।
यो मामजमनादिं च वेत्ति लोकमहेश्वरम् ।
असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ।
बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ।'
(गी. १०. २-४)

इत्यनन्यमनस्कतया भगवन्तं भजतां देवत्वमपरोक्षज्ञानित्वं चावगम्यते। तादृशभजनवतश्चार्जुनस्य तज्ज्ञायते । दर्शयामासेत्यपरोक्षज्ञानित्वम् । भगवदतिप्रियत्वं देवत्वं चेति संयोज्यम् । देवत्वेनैवोत्तमाधिकारित्वं चावगतम् ।

यदुक्तं सर्वस्य भगवदधीनत्वं तत्केनावगम्यते । तथात्वे च तस्य सर्वस्माद्भेदेन, सर्वस्य च सत्यत्वेन, तस्य सर्वोत्तमत्वेन, सर्वगुणपूर्णत्वेन, निर्दोषत्वेनानन्याधीनत्वेन, मोक्षप्रदत्वेन, सर्वशास्त्रप्रतिपाद्यत्वेन च भाव्यम् । सर्वस्य तदधीनतायाः साक्षात्परम्परया चैतत्सापेक्षत्वात् । तदेतत्सर्वं केनावगम्यत इत्यत आह ॥ नेति ॥

न मे विदुरित्यनेन पूर्णत्व[1]मवगम्यते । अहमादिरिति सर्वोत्तमत्वम् । यो मामिति निर्दोषत्वं, सर्वस्य तदधीनत्वं, तज्ज्ञानान्मोक्षश्च ।

गीतायामित्यर्थः । तद्व्यञ्जयन् मूलार्थमाह ॥ स्वविहितमिति ॥ अवगम्यत इति सर्वत्र योज्यमिति प्रागेवोक्तम् । तदुभयमित्यस्य स्वविहितं भगवदर्थं चेत्यर्थः ॥ इत्यनेनेति ॥ इत्यर्धेनेत्यर्थः । साक्षात्परम्परयेति ॥ निर्दोषत्वेनेत्यन्तस्य साक्षादपेक्षितत्वम् । अन्येषां तु परम्परया ॥ अभिन्ने निस्स्वरूपे स्वस्मादुत्तमे वस्तुनि स्वस्य सार्वज्ञसर्वशक्त्यादिगुणहीनत्वेन, जननमृत्यादिदोषवत्त्वे सार्वकालिके

---

1. G. 1, 'पूर्णमहिमत्वमवगम्यते' इति पाठः ।

'महर्षयः सप्त पूर्वे ।' (गी. १०-६)
'एतां विभूतिं योगं च ।' (गी. १०-७)
'अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ।'
(गी. १०-८)
'तेषामेवानुकम्पार्थमहमज्ञानजं तमः । [1]नाशयामि ।'
(गी. १०-११)
'तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।' (गी. १२-७)
'भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ।'
(गी. ५-२९)
'ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ।
यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ।' (गी. ७-२)

जन्मादीनां दोषत्वात् । सर्वपापक्षयस्य मोक्षत्वात् । बुद्धिरिति सर्वस्य तदधीनत्वम् । एतामिति तज्ज्ञानान्मोक्षः । निष्कम्पयोगस्य सायुज्यत्वात् । अहमिति सर्वस्य तदधीनत्वं तज्ज्ञानान्मोक्षश्च । अज्ञानजतमसः संसारत्वात् । तेषामिति तज्ज्ञानान्मोक्षः । भोक्तारमिति सर्वस्य तदधीनत्वं तज्ज्ञानान्मोक्षश्च । शान्तेर्मोक्षत्वात् । ज्ञानमिति सर्वशास्त्राणां तत्परत्वम् । भगवज्ज्ञानेनैव सर्वशास्त्राणां ज्ञातत्वोक्तेः ।

सार्वदैशिके च सर्ववस्तुनि नियमनायोगात्, अन्याधीनत्वे तदनुमतिं विना स्वेच्छाऽदिद्वाराऽन्यस्यैव मोक्षहेतुत्वे पुमर्थदानद्वारा शास्त्रप्रतिपाद्यत्वस्यापि विधिनिषेधज्ञापनस्योपास्त्यादिद्वारा नियमनस्याकार्यत्वादिति भावः ॥ सर्वस्य तदधीनत्वमिति ॥ 'लोकमहेश्वरम्' इत्यनेनेति भावः ॥ बुद्धिरितीति ॥ सर्वस्य तदधीनत्वमिति ॥ 'भवन्ति भावा भूतानां मत्त एव पृथग्विधाः' इति वाक्यशेषादिति भावः । सप्तर्षय इत्युपक्रम्य 'एतां विभूतिं योगं च मम यो वेत्ति

---

1. A. 'आत्मभावस्थः' इत्यधिकः पाठः ।

'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ।
मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।' (गी. ७-६, ७)
'इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।
राजविद्या राजगुह्यम् ।' (गी. ९-१, २)
'मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः ।
भूतभृन्न च भूतस्थः ।' (गी. ९-४, ५)
'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः ।' (गी. ११-४३)
'परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।' (गी. १४-१)
'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम् ।
सम्भवः सर्वभूतानां ततो भवति भारत ।' (गी. १४-३)
'ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।' (गी. १४-२७)
'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥

अहमिति सर्वस्य तदधीनत्वम् । मत्त इति सर्वोत्तमत्वम् । मयीति सर्वस्य तदधीनत्वम् । इदमिति तज्ज्ञानान्मोक्षः । राजेति सर्वशास्त्राणां तत्परत्वम् । भगवद्विद्यायाः प्राधान्योक्तेः । प्रधानानुसारित्वाच्चाप्रधानानाम् । मयेति सर्वस्य तदधीनत्वं निर्दोषत्वं च । ततेः प्रेरणार्थत्वात् । अव्यक्तपदेन चाकार्यत्वोक्तेः । न चाहमिति तस्यानन्याधीनत्वम् ।

तत्त्वतः । सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥' इति वाक्यशेषे श्रवणादाह ॥ निष्कम्पेति ॥ करणव्युत्पत्तिमुपेत्याह ॥ सर्वशास्त्राणामिति ॥ ज्ञानविज्ञानपदयोः शास्त्रार्थत्वेऽपि भगवत्परत्वं कथं लब्धमित्यत उक्तम् ॥

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥
यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ॥
इति गुह्यतमं शास्त्रमिदमुक्तं मयाऽनघ ।
एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत ॥'
(गी. १५. १६-२०)

'न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं ... ... ॥' (गी. ३-२२)

इत्यादिना सर्वस्माद्भगवतो भेदः, सर्वस्य तदधीनत्वं, [1]सर्वगुणपूर्णत्वं, सर्वशास्त्राणां तत्परत्वं तथा तज्ज्ञानादेव मोक्ष इत्यादि ।

भूतभृदिति सर्वस्य तदधीनत्वम् । तस्यानन्याधीनत्वं च । न त्वदिति सर्वोत्तमत्वम् । परमिति सर्वशास्त्राणां तत्परत्वम् । ज्ञायतेऽनेनेति ज्ञानशब्दोदितभगवच्छास्त्रस्य सर्वशास्त्रोत्तमत्वोक्तेः । अप्रधानस्य प्रधानानुयायित्वात् । ममेति सर्वस्य तदधीनत्वम् । ब्रह्मणो हीति सर्वस्य तदधीनत्वं तज्ज्ञानान्मोक्षश्च । द्वाविति सर्वस्माद्भगवतो भेदः, सर्वोत्तमत्वं, सर्वस्य तदधीनत्वं, सर्वशास्त्राणां तत्परत्वं तज्ज्ञानान्मोक्षश्च ।

भगवदिति ॥ 'यज्ज्ञात्वा' इत्यर्धेनोक्तेरित्यर्थः । यद्वा 'येनाश्रुतं श्रुतं भवति' इत्यादौ भगवज्ज्ञानेनैव सर्वस्य ज्ञातत्वोक्तेरिह च 'यज्ज्ञात्वा नेह भूयोऽन्यत्' इत्यादिना ज्ञातत्वोक्तेर्भगवत्परत्वं सर्वशास्त्राणां सिद्धमित्यर्थः ॥ प्राधान्योक्तिरिति ॥ राजविद्येत्यस्य प्रधानविद्येति व्याख्यानादिति भावः ॥ तज्ज्ञानान्मोक्षश्चेति ॥ सुखस्यैकान्तिकस्य प्रतिष्ठाऽहमित्युक्तेरिति भावः । अन्य इत्युक्तेराह

---

1. G. A. एतत्पूर्वं 'तस्यानन्याधीनत्वं, सर्वोत्तमत्वं' इति पाठः ।

'अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ।' (ऋ. मं. १, सू. १५६-१)

'पश्यन्नपीममात्मानं कुर्यात्कर्माविचारयन् ।
यदात्मनः सुनियतमानन्दोत्कर्षमाप्नुयात् ॥'
'भक्त्या प्रसन्नः परमो दद्याज्ज्ञानमनाकुलम् ।
भक्तिं च भूयसीं ताभ्यां प्रसन्नो दर्शनं व्रजेत् ॥
ततोऽपि भूयसीं भक्तिं दद्यात्ताभ्यां विमोचयेत् ।'

न मे पार्थेति पूर्णत्वम् । प्रथमाऽदिपदेनासत्यमप्रतिष्ठं त इत्यादि, द्वितीयेन जगत्सत्यत्वं गृह्यते ।

यदुक्तं ज्ञानिनोऽपि भगवत्कर्मेति तत्र श्रुतिं चोदाहरति ॥ अधेति ॥

अथ विष्णो ते स्तुतिर्यज्ञश्च हविष्मता ज्ञानिनाऽप्यर्घ्यः साध्यश्चेत्यर्थः । ज्ञानिनो मोक्षनियमात्किं कर्मणेत्यत आह ॥ पश्यन्नपीति ॥ सुनियतं वर्णाश्रमोचितम् । आप्नुयात् तेनेति शेषः । यद्यस्मात्तेनात्मनः क्लृप्तमानन्दोत्कर्षमाप्नुयात्तस्मादिति वा ।

यदुक्तं विष्णुभक्तेरेव सर्वसाधनोत्तमत्वमित्यादि तत्र श्रुतिं दर्शयति ॥ भक्त्येति ॥

ज्ञानं विना भक्तेरभावात्कथं भक्त्या ज्ञानमित्यत उक्तम् ॥ अनाकुलमिति ॥ प्रागल्पतयाऽऽकुलस्य सतोऽनाकुलत्वं भक्त्या भवतीति भावः ।

॥ भेद इति ॥ उत्तम इत्युक्तेरुक्तमुत्तमत्वमिति । बिभर्तीत्युक्तेराह ॥ सर्वस्य तदधीनत्वमिति ॥ 'लोके वेदे च प्रथितः' इत्युक्तेराह ॥ सर्वशास्त्राणामिति ॥ बुद्धिमान् कृतकृत्यश्चेत्युक्तेराह ॥ तज्ज्ञानान्मोक्षश्चेति ॥ असत्यमप्रतिष्ठं त इति ॥ तेनासत्यताऽदिवादिनां निन्दया जगत्सत्यत्वावगमादिति भावः ॥ यदुक्तमिति ॥ कुरु कर्मेत्यादिवाक्यमुदाहृत्य ज्ञानिनोपि भगवत्कर्मेति यदुक्तमित्यर्थः । ज्ञानिनापि राध्यः साध्यः ॥ मोक्षनियमादिति ॥ "अनियमः सर्वेषाम्" (ब्र. सू. ३-३-३५) इति सूत्रादिति भावः । यच्छब्दश्रवणादाह ॥ तेनेति शेष इति ॥ वर्णाश्रमोचितकर्मणेत्यर्थः ॥ तस्मादिति वेति ॥ कर्म

मुक्तोऽपि तद्वशो नित्यं भूयोभक्तिसमन्वितः ।
सा[1]ध्यानन्दस्वरूपैव भक्तिर्नैवात्र साधनम् ॥
ब्रह्मरुद्ररमादिभ्योऽप्युत्तमत्वं स्वतन्त्रताम् ।
सर्वस्य तदधीनत्वं सर्वसद्गुणपूर्णताम् ॥
निर्दोषत्वं च विज्ञाय विष्णोस्तत्राखिलाधिकः ।
स्नेहो भक्तिरिति प्रोक्तः सर्वोपायोत्तमोत्तमः ।
तेनैव मोक्षो नान्येन दृष्ट्यादिस्तस्य साधनम् ॥

मोक्षसाधनत्वाद्भक्तेस्तदनन्तरमभावाऽशङ्कां प्रसङ्गाद्वारयति ॥ मुक्तोऽपीति ॥ भूयसी भक्तिः भूयोभक्तिः । मुक्तौ मेशाभावात्साम्याद्वा न भक्तिर्युक्तेत्यत उक्तम् ॥ तद्वश इति ॥ मुक्तौ भक्तिसद्भावे सुखादिफलमपि स्यात् । अन्यथा तदनुपपत्तेः । फलाङ्गीकारे च वृद्ध्यादिप्राप्तिरित्यत आह ॥ साध्येति ॥ न मुक्तभक्तेः फलसद्भावः । तस्याः साधनत्वाभावात् । न चैतावताऽनुपपत्तिः । यः पूर्वतनभक्त्या साध्य आनन्दस्तत्स्वरूपत्वेन भक्तेः फलत्वात् । फलस्य च तदाऽनुभवादिति भावः ।

कीदृशी सा विष्णुभक्तिरित्यत आह ॥ ब्रह्मेति ॥ कथं भक्तेरेव ज्ञानादिसाधनत्वमुच्यते । श्रवणादेस्तत्साधनत्वश्रवणादित्यत आह ॥ सर्वेति ॥ तदेव विवृणोति ॥ तेनैवेति ॥ मोक्षो मोक्षादिः । अतिपरिपक्वभक्तियोग एव मोक्षसाधनं, न भगवद्दृष्टिः । सा तु तत्साधनत्वान्मोक्षसाधनत्वेनोच्यते । परिपक्वभक्तियोग एव दृष्टिसाधनं, न तु ध्यानम् । तत्तु तत्साधनमिति दृष्टिसाधनतयोच्यते ।

कुर्यादित्यनेन तस्मादित्यस्यान्वय इति भावः । साधनोत्तमत्वमित्यादीत्यादिपदेन परोक्षापरोक्षज्ञानयोर्ज्ञानिनोऽपि मोक्षस्य तदधीनत्वं चेति गृह्यते ॥ उच्यत इति ॥ 'भक्त्या प्रसन्नः परमो दद्याद्ज्ञानं' इत्यनेनोच्यत इत्यर्थः ॥ श्रवणादेरिति ॥ 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यः' इत्यादाविति भावः ॥ मोक्षादिरिति ॥

1. A. 'सान्द्रानन्द' इति पाठः ।

अधमाधिकारिणो मर्त्या मुक्तावृष्यादिकाः समाः ।
अधिकार्युत्तमा देवाः प्राणस्तत्रोत्तमोत्तमः ॥
नैव देवपदं प्राप्ताः ब्रह्मदर्शनवर्जिताः ।
तिरोहितं तथाप्येते शृण्वन्ति क्रीडयाऽथवा ॥
बहुवारतदभ्यासात्तिरोभावोऽपि नो भवेत् ॥
यथा व्यासानुशिष्टानां देवानां क्षत्रजन्मनाम् ।
पार्थानामतिरोधानं ज्ञानं सुस्थिरतां गतम् ॥'

एको भक्तियोग एव ज्ञानसाधनं, न तु श्रवणादि । तत्तु तत्साधनतया ज्ञानसाधनत्वेनोच्यत इति भावः ।

यदुक्तम् अर्जुनस्य देवत्वादुत्तमाधिकारित्वं, ततोऽपरोक्षज्ञानित्वमिति तत्रार्जुनस्य देवत्वोत्तमाधिकारित्वयोर्व्याप्तौ, उत्तमाधिकारित्वापरोक्षज्ञानित्वयोर्व्याप्तौ च श्रुतिमुदाहरति ॥ अधमेति ॥ मर्त्या मर्त्योत्तमाः । समा मध्यमाः । देवानामुत्तमाधिकारित्वं कुत इत्यतो ब्रह्मदर्शनाविनाभावादित्याह ॥ नैवेति । कथं तर्हि तेषां श्रवणाद्युपलभ्यत इत्यत आह ॥ तिरोहितमिति ॥ एवं चेन्न पुनः श्रोतव्यं पूर्ववत्, भूयस्तिरोभावप्राप्तेरित्यत आह ॥ बहुवारेति ॥ तदभ्यासात् श्रवणाद्यभ्यासात् । बहुवाराभ्यासेन ज्ञानस्यातिरोभावः क्व दृष्ट इत्यत आह ॥ यथेति ॥ अभ्यासप्रदर्शनार्थमुक्तं व्यासेति । प्रथमश्रवणाद्येवैतत्किं न स्यादित्यत उक्तं देवानामिति । देवत्वेन प्रागपि श्रवणाद्यस्त्येवेति भावः ।

ज्ञानमादिपदार्थः । 'दृष्ट्यादिस्तस्य साधनम्' इत्यत्रादिपदेन ध्यानं श्रवणमनने च ग्राह्ये । तस्येत्यनेन च भक्तिशब्दार्थतयोक्तो यः स्नेहः स चातिपरिपक्वः परिपक्वः अपरिपक्व इति त्रिविधोपि गृह्यत इत्युपेत्य दृष्ट्यादिमध्ये किं कस्य भक्तिरूपस्य स्नेहस्य साधनमित्यतस्तद्विवेकेन दर्शयन् कथं भक्तेरित्यादिनोक्तशङ्कां निराह ॥ अतिपरिपक्व इत्यादिना ॥ योग उपायः ॥ तत्साधनत्वादिति ॥ मोक्षसाधनातिपरिपक्वभक्तिसाधनत्वादित्यर्थः ॥ तत्साधनमिति ॥ दृष्टिसाधनपरिपक्वभक्तिसाधनमित्यर्थः । श्रवणादीत्यादिपदेन मननग्रहः । यदुक्तमिति ॥

'अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।
विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥'
(ऋ. ७-४०-५)

'एको नारायण आसीन्न ब्रह्मा न च शङ्करः ।
स मुनिर्भूत्वा समचिन्तयत्तत एते व्यजायन्त ।
विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्रा इति ।'

'एको नारायण आसीन्न ब्रह्मा नेशानः ।'

'वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शङ्करः ।'

'यं यं कामयते विष्णुस्तं ब्रह्माणं च शङ्करम् ।
शक्रं सूर्यं यमं स्कन्दं कुर्यात् कर्ताऽस्य न क्वचित् ॥'

'सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं
नैव चान्यत्र [1]सत्यम् ।
अवान्तरं तत्परत्वं तदन्यत्सर्वागमानां पुरुषार्थस्ततोऽतः ।'
[2]इति पैङ्गिश्रुतिः ।

यद्विष्णोर्ब्रह्मरुद्रादिसर्वोत्तमत्वमुक्तं तत्र श्रुतीरुदाहरति ॥ अस्येति ॥ अस्याभिलषितसेचकस्य आ समन्तादीशस्य विष्णोर्देवस्य

'सुदुर्दर्शमिदं रूपं' इत्याद्युदाहृत्योक्तमित्यर्थः । देवत्वादुत्तमाधिकारित्वमित्यनुवादः स्वकृतव्याख्यानानुरोधेनेति ज्ञेयम् । व्याप्तौ चेति ॥ ये देवास्तेऽधिकार्युत्तमा इति मूले व्याप्तिरभिमतेति भावः ॥ यद्विष्णोरिति ॥ 'न त्वत्समोऽस्ति' इत्याद्युदाहृत्योक्तमित्यर्थः । मीळ्हुषोऽभिलषितसेचकस्य । एषस्य आ समन्तादीशस्य । वयाः बन्धकः । प्रभरणे पूजायाम् । रुद्रियं, रुद्रशब्दाद्धः, रौद्रम् । विदे विविदे, विद्लृ लाभे, लेभ इत्यर्थः । यथा तथेति शेषोक्तिः ॥

---

1. A. 'दृष्टम्' इति पाठः ।
2. A. 'इति पैङ्गिश्रुतिः' इति नास्ति ।

'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।'
(ऋ. ७-९९-१)

'अनन्तगुणमाहात्म्यो निर्दोषो भगवान् हरिः ।
न समो वाऽधिको वाऽपि विद्यते तस्य कश्चन ।
नाऽसीन्न च भविष्यो वा परतः स्वत एव [1]च ।'
इत्यादिश्रुतेश्च ।

'यस्त्वात्मरतिरेव स्यात्' इत्यादि तु मुक्तविषयम् ।
'यस्त्वेवात्मरतो मुक्तः कार्यं तस्यैव नास्ति हि ।
तस्मात्कुर्वीत[2] कर्माणीत्याह कृष्णोऽर्जुनं स्मयन् ॥'
[3]इति स्कान्दे ।

हविर्भिः प्रभरणे क्रूरे बन्धको रुद्रो रौद्रं महिमानं लेभे यथा तथाश्विनौ युवामप्यन्नवद्वर्तनं प्राप्तौ स्थ इत्यर्थः । आसीज्जगदादौ । मुनिर्मौनी । समचिन्तयदेते जायन्तामिति । विश्वो वायुः । इदमग्रेऽस्य जगतोऽग्रे । सर्वोत्कर्ष इति श्रुतिः सर्वशास्त्राणां तत्परत्वे तज्ज्ञानान्मोक्षे च मानं भवति । सत्यं मुख्यम् । ततः विष्णुतः । विष्णो त्वं मितेः परोऽसि । मूर्त्यैव पूर्णोऽसि न तु कीर्त्यादिमात्रेण । अतस्ते महिमानं नान्ये प्राप्नुवन्तीत्यर्थः ।

यदुक्तं ज्ञानिनामपि कर्म कार्यं, तेनानन्दातिशयश्च भवतीति तदयुक्तम् । यस्त्विति ज्ञानिनस्तदुभयाभावस्योक्तत्वादित्यत आह ॥

यासिष्टमिति अन्नणाद्युवामित्यर्थः । इरावत् अन्नवत् । वर्तिः वर्तनम् । वृते-रिकारप्रत्ययो भावार्थ इति भावः । यासिष्टम् अयासिष्टम् । अडभावश्छान्दसः । प्राप्तौ स्थ इत्यर्थः । कथं समचिन्तयदित्यतः स्वयमाह एते वक्ष्यमाणा जायन्तामितीति । श्रौतपदार्थमाह ॥ सत्यं मुख्यमिति, ततो विष्णुत इति च ॥ मात्रया मात्रायाः मितेः । तन्वा वृधान मूर्त्यैव पूर्णोऽसि । अन्ये इति शेषोक्तिः । अन्वश्नुवन्ति, अशू व्याप्तौ, प्राप्नुवन्ति ॥ यदुक्तमिति ॥

---

1. A. 'वा' इति पाठः । 2. A. 'कुर्वेव' इति पाठः ।
3. A. 'इति च' इति पाठः ।

ज्ञानयोगेन साङ्ख्यानामित्यादि [1]तु बाह्यकर्मसङ्कोचापेक्षया।

'न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।' (गी. ३-५)

'शरीरयात्राऽपि च ते न प्रसिध्येदकर्मणः ॥' (गी. ३-७)

'एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥' (गी. १८-६)

'ज्ञानी च कर्माणि सदोदितानि
कुर्यादकामः सततं भवेत।'

'न सर्वकर्मणां त्यागः कस्यचिद्भवति क्वचित्।
त्यागिनो यतयोऽपि स्युः सङ्कोचाद्बाह्यकर्मणाम् ॥'

[2]इत्यादि।

यस्त्विति ॥ नानेन ज्ञानिनः कर्माद्यभावः सिद्ध्यति। अस्यात्मरतित्वादि विशेषणानां मुक्त एव मुख्यत्वेन पूर्वोत्तरवाक्यानुसारेण च मुक्तविषयतया ज्ञानिमात्रविषयत्वाभावादित्यर्थः। अत्र सर्वथा देहाद्यभिमानमुक्तत्वेनासंप्रज्ञातसमाधिस्थोऽपि मुक्त उच्यते। स्मृतिसमाख्यानाच्चैतन्मुक्तविषयमित्याह ॥ यस्त्विति ॥

तथापि न ज्ञानिनः कर्मकरणं [3]युक्तम्। ज्ञानयोगेनेति ज्ञानिनां कर्माभावोक्तेः। न चास्य मुक्तविषयत्वं वक्तुं शक्यते। ज्ञानेनैव ज्ञानिनां मुक्तिरित्युक्तेरित्यत आह ॥ ज्ञानेति ॥ न ज्ञानिनां

'पश्यन्नपीममात्मानम्' इत्यादिनोक्तमित्यर्थः ॥ पूर्वोत्तरेति ॥ 'स्थितप्रज्ञस्य का भाषा समाधिस्थस्य' इति श्लोकेऽत्र विवक्षितस्य मुक्तस्य प्रकृतत्वात्। 'नैव तस्य कृतेनार्थः' इत्युत्तरवाक्ये मुक्तलिङ्गश्रवणात्तदनुसारेण चेत्यर्थः। भाष्यानुसारादत्र मुक्तशब्दः समाधिस्थपर इत्याह ॥ अत्र सर्वथेति ॥ 'समाधिस्थोपि' इत्यपिपदादर्थद्वयपरः श्लोक इत्येके। 'ज्ञानयोगेन साङ्ख्यानाम्' इत्यस्य

---

1. G. A. 'च'। 2. G. A. इत्यादेः।
3. G 1, G 2 'उक्तम्'।

'उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः' इत्यादि चोत्पन्नज्ञानतिरोभावनिवृत्त्यर्थम् ।

कर्माङ्गीकारेऽप्येतद्वाक्यविरोधः । अस्य यतिविषयत्वात् । तेषामप्येतद्वाह्यकर्मसङ्कोचापेक्षयैव ज्ञानेन मोक्षमाह । न तु कर्माभावाभिप्रायेणेति भावः । ज्ञानिनां सर्वकर्माभाव एवास्यार्थः किं न स्यादित्यतो भगवतैव तदसम्भवस्योक्तत्वादित्याह ॥ न हीति ॥ नात्र ज्ञानिनः शरीरयात्रार्थकर्मत्यागो विवक्षित इति ब्रूमो येनासम्भवः स्यात् । किन्तु यज्ञादिकर्मत्याग एव । तस्यैव मोक्षविरोधित्वादिति चेन्न । कामादिरहितयज्ञादेरबन्धकत्वाभिप्रायेण भगवताऽभिहितत्वादित्याह ॥ एतानीति ॥ अज्ञविषयोऽयं विधिः किं न स्यादिति चेन्न । ज्ञानिन एव श्रुत्या तथाविधकर्मणो विहितत्वादित्याह ॥ ज्ञानीति ॥ उदितानि, श्रुत्यादौ कर्तव्यतयेति शेषः । तथाप्येतद्वाक्यस्योक्तार्थः कुत इति चेत्समाख्यानादित्याह ॥ नेति ॥

यदुक्तमर्जुनो ज्ञानीति तदयुक्तम् । उपदेक्ष्यन्तीत्यस्याज्ञत्वप्रतीतेरित्यत आह ॥ उपदेक्ष्यन्तीति ॥ नार्जुनस्य ज्ञानित्वेऽप्येतद्वाक्यस्य विरोधः । यत एतत्प्रागुत्पन्नज्ञानतिरोभावनिवृत्त्यर्थमेवोपदेशमाह । न तु प्रागप्राप्तज्ञानलाभार्थमित्यर्थः ।

उपोद्घातः सम्पूर्णः

एवं सङ्क्षेपतो गीतातात्पर्यमुक्त्वाऽथ विस्तरेण तद्विवक्षुः कतिपयश्लोकाधिकाऽद्याध्यायस्यातिरोहितार्थत्वात् सङ्ग्रहोक्त्यैव व्याख्याततां

तात्पर्यमाह ॥ ज्ञानेनैवेति ॥ साङ्ख्यानामित्यस्यार्थो ज्ञानिनामिति । शङ्कते ॥ नात्रेति ॥ यदुक्तमिति ॥ 'सुदुर्दर्शमिदं रूपम्' इत्यादिनाऽर्जुनो ज्ञानीति यदुक्तमित्यर्थः ॥ **इति संक्षेपेण गीतातात्पर्योक्तिः ॥**

सङ्ग्रहोक्त्यैवेति ॥ 'तत्र साक्षादिन्द्रावतारम्' इत्यादिनेति भावः ॥ दृष्ट्वेममित्यादिनेति ॥ पूर्वाध्याये 'दृष्ट्वेमं स्वजनं कृष्ण' इत्यादिना

प्रकर्षेण जानन्तीति प्रज्ञाः । तद्वादः प्रज्ञावादः । प्राज्ञमतविरुद्धवादं वदसि । कथं ? गतासून् ॥ ११ ॥

बन्धुस्नेहाद्धि त्वया स्वधर्मनिवृत्तिः क्रियते । तत्र देहनाशभयात् किं वा चेतननाशभयात् । देहस्य सर्वथा विनाशित्वान्न तत्र भये प्रयोजनम् । न च चेतननाशभयात् । तस्याविनाशित्वादेव । न तावत्परमचेतनस्य मम नाशोऽस्ति । एवमेव तवान्येषां च । 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' इत्यादिश्रुतेः ।

मन्वानोशोच्यानन्वशोचस्त्वमित्यादि व्याकुर्वेन् प्रज्ञावादपदार्थमाह ॥ प्रकर्षणेति ॥ तद्वादो न तदुपेक्षितः । अपि तु तद्वादविरुद्ध इत्यभिप्रेत्योक्तं विवृण्वन् वाक्यार्थमाह ॥ प्राज्ञेति ॥ ननु कथं विनशि[1]ष्यन्तोऽशोच्याः । येनाशोच्यानन्वशोचस्त्वमित्युच्यते । कथं च न योत्स्य इति वाक्यं प्राज्ञमतविरुद्धम् ? दृष्ट्वेममित्यादिनोपपत्तेरुक्तत्वादित्याक्षिपति ॥ कथमिति ॥ तत्राऽद्यचोद्यपरिहार[2]तयोत्तरार्धमुपादत्ते गतासूनिति ॥११॥

द्वितीयं चोद्यं परिहर्तुमनुवदति ॥ बन्धुस्नेहादिति ॥ बन्धुस्नेहनिमित्तात्तन्नाशभयादित्यर्थः । सत्यमित्यतो विकल्पासहत्वात्तत्प्राज्ञमतविरुद्धमिति भावेन बन्धुशब्दस्य शरीरविशिष्टचेतने प्रयोगाद्विकल्पयति ॥ तत्रेति ॥ आद्यं दूषयितुं देहिन इति श्लोकतात्पर्यमाह ॥ देहस्येति ॥ न तत्र भये प्रयोजनमिति ॥ देहनाशभयनिमित्तया स्वधर्महान्या प्रयोजनं नास्तीत्यर्थः ।

भयकम्पगाण्डीवस्रंसनादेर्युद्धनिवृत्तावुपपत्तेरुक्तत्वादित्यर्थः ॥ उत्तरार्धमुपादत्त इति ॥अर्थस्तु स्पष्टः । चशब्द उपमाऽर्थो ध्येय इति भावः ॥ सत्यमिति ॥ बन्धुस्नेहनिमित्तान्नाशभयात् 'न योत्स्ये' इत्येतत्सत्यमित्यर्जुनोक्तिपरिहारार्थं विकल्पयतीत्यन्वयः ॥ तदिति ॥ उक्तरूपमर्जुनवचनमित्यर्थः । एवमेवेत्यस्य

---

1. G. 1 म्रियमाणाः । 2. G. 2 परिहाराय ।

'स्वदेहयोगविगमौ नाम जन्ममृती पुरा ।
इष्येते ह्येव जीवस्य मुक्तेर्न तु हरेः क्वचित् ॥'

इति स्कान्दे ।

[परिहारो हि भये प्रयोजनम् । न चासौ सम्भवति । कौमारादीनामिव देहस्य सर्वथा विनाशित्वात् । प्रयोजनाभावेन च भयानुपपत्तौ न तेन स्वधर्मनिवृत्तिर्युक्तेत्यर्थः । भयस्यास्वाधीनत्वेन प्रयोजनापेक्षापूर्वत्वाभावात्कथमिति चेन्न । यदृच्छया भयोत्पत्तावपि प्रयोजनाभावपरामर्शेन तत्परिहारस्याभिप्रेतत्वात् ।]

द्वितीयनिरासाय न त्वेवेति श्लोकतात्पर्यमाह ॥ नेति ॥ अविनाशित्वेन भयप्राप्तेरेवायोगाद्भयेन स्वधर्मनिवृत्तिः सुतरामयुक्तेत्यर्थः । नन्वीश्वरनाशस्यानाशङ्कितत्वात्किमर्थं न त्वेवाहमित्युक्तिरित्यतो दृष्टान्तत्वेन श्लोकं व्याचष्टे ॥ न तावदिति ॥ प्रागभावश्चेति द्रष्टव्यम् । तावदितीश्वरस्य स्वरूपतो देहतश्च नाशाद्यभावं सूचयति । परमचेतनस्येति स्वतन्त्रचेतनत्वहेतुं सूचयति ॥ एवमेवेति ॥ चेतनमात्रत्वेन स्वरूपतो[1] नाशादिर्नास्तीत्यर्थः । ईश्वरस्य परमनित्यत्वचेतनत्वे कुतः प्रसिद्धे ? येनासौ दृष्टान्ततयोपादीयत[2] इत्यतः श्रुतिप्रसिद्धिं दर्शयति ॥ नित्य इति ॥ नित्यो नित्यानामित्यतिशयेन नित्यत्वमेवोच्यते, न तु विवक्षितार्थ इत्यतस्तत्स्मृत्या[3] विवृणोति ॥ स्वदेहेति ॥ विष्णोरपि जीव[4]वद्देहयोगादिसद्भावात्स्वदेहेत्युक्तम् । मुक्तेः पुरेति सम्बन्धः ।

परमचेतनत्वेनेति भ्रमनिरासायाह ॥ चेतनमात्रत्वेनेति ॥ अतिशयेन नित्यत्वमेवेति ॥ 'चेतनश्चेतनानाम्' इत्यत्रेति भावः ॥ विवक्षितेति ॥ स्वरूपतो

[ ] एतच्चिह्नान्तस्थः पाठः मातृकायामेव दृश्यते । किरणावलीकाराश्च चिह्नान्तर्गतं पाठमधिकं वदन्तो व्याख्यान्ति ।

1. V. स्वरूपनाशादिः । 2. G 1, G 2, उदीर्यते ।
3. G 1, G 2, स्मृत्यैव । 4. G 1, G 2, जीवदेह ।

ईश्वरस्यापि युद्धगतत्वान्मोहात्तस्याप्युभयविधानित्यत्वशङ्काप्राप्तौ तदपि निवार्यते ॥ न त्वेवाहं जातु नासमिति ॥ यद्यप्येषा शङ्काऽर्जुनस्य नास्ति । तथापि प्राप्तलोकोपकारार्थं भगवता निवार्यते । एकान्ते कथयन्नपि व्यासरूपेण तदेव लोके प्रकाशयिष्यति हि ॥ १२ ॥

अथवा[1] दृष्टान्ततां विना ईश्वरोऽपि[2] पक्षे निक्षिप्यत इति तत्प्राप्तिपूर्वकमाह ॥ ईश्वरस्येति ॥ तदपि उभयविधानित्यत्वमपि । नन्वत्रेश्वरस्य जीववत्स्वरूपनाशाद्यभाव एवोच्यते । तत्कथमुभयविधानित्यत्वं निवार्येत इत्युच्यत इत्यत आह ॥ न त्वेवेति ॥ तुशब्देनेश्वरस्य विशेषतो नाशाद्यभावो ज्ञायते । स चोक्तविध एवेति भावः ।

नन्वर्जुनस्य ज्ञानित्वाद्युद्धगतेऽपि भगवत्येतच्छङ्काऽभावादप्राप्तप्रतिषेधोऽयमित्यत आह ॥ यद्यपीति ॥ प्राप्तः योग्यः शङ्कावान् सज्जनश्च । अनेनैवेश्वरानित्यत्वस्याप्रस्तुतत्वादिति भाष्यविरोधोऽपि परिहृतः । एकान्ते कथ्यमानेनानेन कथं लोकोपकार इत्यत आह ॥ एकान्त इति ॥ व्यासरूपेण गीतायां निबध्य ॥ १२ ॥

यद्यत्रेश्वरस्योभयविधनाशाद्यभावो विधीयते कथं तर्हि देहिन इत्यत्र पूर्वोक्तानामीश्वरादीनां देहान्तरप्राप्तिरुच्यते । न चेश्वरातिरिक्तानाम् । तद्व्यावर्तकाश्रवणादित्यत आह ॥ ममेति ॥ न देहिन इत्यत्रेश्वरस्य देहान्तरप्राप्तिरुच्यते । अपि तु जीवानामेव । न चेश्वरव्यावर्तकाभावः । ईश्वरव्यावृत्त्यर्थमेव देहिन इति विशेषणस्य प्रयुक्तत्वात् । विष्णोर्भिन्नदेहाभावेन देहित्वाभावादिति भावः । ईश्वरस्यापि जीवदेहान्तरप्राप्तिसद्भवात्स्वकीयेत्युक्तम् । एवं चेत्कः श्लोकार्थ इत्यतस्त-

---

देहतश्च प्रागभावविनाशयोरभावरूपोऽर्थ इत्यर्थः ॥ उभयविधेति ॥ स्वरूपतो देहतश्चेत्यर्थः । प्रतीकग्रहणबलाच्छङ्कानिरासलाभ इति भावेनाह ॥ तुशब्देनेति ॥

1. G. 1, G. 2 अथ 2. G.1 G. 2 ईश्वरोपि वा

मम स्वकीयदेहान्तरप्राप्तिरपि नास्तीति दर्शयितुं देहिन इति विशेषणम् । भवदादीनां सा भविष्यतीत्यपि शोको न कर्तव्यः । देहस्येदानीमप्यन्यथात्वदर्शनात् ॥ १३ ॥

तददर्शनादिनिमित्तं सोढव्यमित्याह ॥ मात्रास्पर्शा इति ॥ विषयसम्बन्धाः ॥ १४ ॥

फलमाह ॥ यं हीति ॥ न केवलमव्यथामात्रेणामृतत्वं किन्तु पुरुषम् । "पुरु ब्रह्म गुणाधिक्यात्तज्ज्ञानात्पुरुषः स्मृतः" इति प्रवृत्ते । पुरुसरणात्पुरुष इत्यर्थः ॥ १५ ॥

माह ॥ भवदिति ॥ इदानीमेकस्मिन्नपि शरीरे कौमारादिरूपेणान्यथात्वदर्शनात् तत्र यथा शोकाभावस्तथैवेत्यर्थः ॥ १३ ॥

कौमारादिहानेन यौवनादिप्राप्तावप्यशोको युज्यते । तस्यैव पुनर्दर्शनादिसम्भवात् । देहान्तरप्राप्तौ तद्दर्शनाद्यसम्भवाच्छोक इत्याशङ्कापरिहाराय श्लोकमवतारयति ॥ तदिति ॥ दुःखमिति शेषः । सोढव्यमिति ॥ अनभिमानेन परिहर्तव्यमित्यर्थः । मात्रास्पर्शा इत्येतच्छब्दश्रवणेन भिन्नपदत्वशङ्कापरिहाराय व्याचष्टे ॥ विषयेति ॥ १४ ॥

ननु दुःखाभावस्य युद्धाकरणेऽपि सम्भवात् किं तत्कृत्वा दुःखाभावाय अभिमानपरित्यागेनेत्याशङ्क्य देहाद्यनभिमानेन भवन् दुःखपरित्यागः स्वयं[1] फलरूपोऽपि परमपुरुषार्थहेतुश्च भवतीति भावेन श्लोकमवतारयति ॥ फलमिति ॥ अनभिमानेन दुःखपरिहारस्येति शेषः । कथं व्यथापरिहारमात्रेणामृतत्वम् ? "तमेवं विद्वान्" इत्यादिश्रुतिविरोधादित्याशङ्कापरिहाराय पुरुषपदमवतारयति ॥ नेति ॥ कथमनेनैतच्छङ्कापरिहार इत्यतः स्मृत्यैव व्याचष्टे ॥ पुरु ब्रह्मेति ॥ अस्तु पुरुपदेन

लोकपदेन विवक्षितमर्थमाह ॥ प्राप्त इत्यादिना ॥ अनेनेति ॥ लोकस्य प्रसक्तिकथनेनार्जुनापेक्षयाऽप्रस्तुतत्वोक्तिविरोधो नेत्यर्थः ॥ सरणं गमनमिति ॥

---

1. G. 1, G. 2, V. स्वयमेव ।

न च युद्धात्परलोकदुःखमिति शोकः । असत्कर्मणः सकाशाद्भावो नास्ति, सत्कर्मणः सकाशादभावो[1] नास्तीति नियतत्वात् । 'सद्भाववाचिनः शब्दाः सर्वे ते सुखवाचकाः । अभाववाचिनः शब्दाः सर्वे ते दुःखवाचकाः' इति शब्दनिर्णये । 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते'

ब्रह्म । तज्ज्ञानात्पुरुष इत्येतत्कथं लभ्यत इत्यत आह ॥ पुरुसरणादिति ॥ सरणं गमनम् । तदेव ज्ञानमिति भावः ॥ १५ ॥

ननु पापमेवाश्रयेदस्मानित्यादिना बन्धुहननादिरूपाद्युद्धात् परलोकदुःखं शोकहेतुतयोक्तम् । अतः शोक इत्यत आह ॥ न चेति ॥ कुतो नेत्यतो हेतुतया नासत इति श्लोकं व्याचष्टे ॥ असदिति ॥ असत्कर्मण इति दृष्टान्तः । नियतत्वादित्यनेनोत्तरार्धतात्पर्यमुक्तं भवति । इदं च नारायणद्विट्तदनुबन्धिनिग्रहरूपत्वात् सत्कर्मैवेति भावः ।

ननु यथाऽसत्कर्मणा सुखं नास्त्येवं सत्कर्मणा दुःखं नास्तीति वक्तव्ये भावाभावयोरभाववर्णनं क्वोपयुज्यत इत्यतो भावाभावशब्दयोरेव सुखदुःखवाचित्वे प्रमाणमाह ॥ सद्भावेति ॥ सदसच्छब्दयोः सदसत्कर्मवाचित्वं कुत इत्यत आह ॥ सद्भाव इति ॥ अश्रद्धयेत्युत्तरवाक्यं चात्र ग्राह्यम् ।

सृ गताविति धातोः । ये गत्यर्थास्ते ज्ञानार्था इति भावः । 'नाभावो विद्यते सतः' इत्येतावता प्रकृतशङ्काऽपरिहारादाह ॥ दृष्टान्त इति ॥ उत्तरार्धेति ॥ 'उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः' इत्युत्तरार्धे सदसत्कर्मभ्यां सुखदुःखे न स्त इत्यनयोरर्थयोरन्तो निर्णयस्तत्त्वदर्शिभिर्दृष्ट इत्युक्त्या नैयत्यं लब्धमिति भावः । प्रकृतोपयोगमाह ॥ अश्रद्धयेति ॥ 'अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ' इत्यष्टादशे 'सच्छब्दः पार्थ युज्यते' इत्येतस्मात्किञ्चिदुपरितनं वाक्यं च ग्राह्यमित्यर्थः ॥ वेत्तेति ॥ विद ज्ञाने, वेदितेत्यर्थः । आगमशासनमनित्यमितीडत्र

---

1. A. अभावोऽपि

इति वक्ष्यमाणत्वात् । 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् ।' इत्यादेश्च । अन्तो निर्णयः ।

भावाभावशब्दपर्यायसदसच्छब्दयोः सुखादौ प्रयोगं प्रमाणं च दर्शयति ॥ असन्निति ॥ ब्रह्म दुःखीति वेद चेत्तर्हि स वेत्ता दुःख्येव भवति । ब्रह्म सुखरूपमिति वेद चेत्तर्हि वेत्तारं सुखिनं विदुरित्यर्थः । अन्तशब्दस्यानेकार्थत्वादिह विवक्षितार्थमाह ॥ अन्त इति ॥

असतः प्रागविद्यमानस्य भाव उत्पत्तिर्न विद्यते । सतो विद्यमानस्याभावो नाशो न विद्यत इत्यपव्याख्यां प्रत्याख्याति ॥ न चेति ॥ गीतानुसारेणाल्पाच्तरमित्याद्यतिक्रमः । किमेकप्रत्यक्षविरोधोऽथ सर्वप्रत्यक्षविरोधः ? नाद्यः । भ्रान्तित्वोपपत्तेः । न द्वितीयः । परबुद्धेरसिद्धेरित्यत आह ॥ सन्निति ॥ स्थितिकाले सत्त्वेन व्यवह्रियमाणमेव पदार्थं उत्पत्तेः प्राङ्नाशोत्तरं च नास्तीति सर्वलोको व्यवहरति । तेन सर्वलोकस्याविद्यमानविद्यमानयोरुत्पत्तिनाशव्यवहारेण तन्मूलं प्रत्यक्षमनुमातुं शक्यमिति भावः । ननु व्यवहारान्यथानुपपत्त्या तन्मूलज्ञानमेव सिद्ध्यति । न तु तस्य प्रत्यक्षतानियम इति चेत् । किमिदमनुमानादिज्ञानमुत भ्रमः ? नाद्यः । अनङ्गीकारात् । लिङ्गाद्यभावेऽपि भावाच्च । द्वितीयं निराचष्टे ॥ न चेति ॥ भ्रमत्वे बाधकेन भाव्यम् । न च तदत्रास्ति । अतो नायं भ्रम इति परिशेषात्प्रत्यक्षमेव व्यवहारमूलं सिध्यतीति भावः । नासत इत्येतद्वाक्यमेव विपर्यये मानमित्यत आह ॥ इदमिति ॥ सिद्धं घटितम् ।

न कृतः । ननु विद्यमानाविद्यमानयोरिति वक्तव्यम् । विद्यमानशब्दस्य 'अल्पाच्तरं पूर्वम्' इति सूत्रेण, तथा भावस्याभावापेक्षयाऽभ्यर्हितत्वेन 'अभ्यर्हितं पूर्वम्' इति सूत्रेण पूर्वनिपातेन भाव्यत्वादित्यत आह ॥ गीतानुसारेणेति ॥ उत्पत्तिनाशेति ॥ अविद्यमानस्योत्पत्तिव्यवहारेण विद्यमानस्य नाशव्यवहारेणेत्यर्थः ॥ किमिदमिति ॥ कण्ठव्यवहारमूलभूतं किमनुमानागमार्थापत्तिजं ज्ञानमुत भ्रम इत्यर्थः ॥ घटितमिति ॥ सदसत्कर्म-

न चाविद्यमानविद्यमानयोरुत्पत्तिनाशनिषेधकोऽयं श्लोकः । प्रत्यक्षविरोधात् । सन्निति व्यवह्रियमाणमेव पदार्थस्वरूपमुत्पत्तेः प्राङ्नाशोत्तरं च नास्तीति सर्वलोको व्यवहरति । न च विपर्यये

एतमेवार्थं ब्रह्मतर्केण साधयति ॥ आद्यन्तयोरिति ॥ उत्पत्तेः प्राङ्नाशोत्तरं चेत्यर्थः । निश्चितं प्रत्यक्षेणेति शेषः । आदावसत्त्वानङ्गीकारे बाधकमाह ॥ यदीति ॥ यद्यत्र कार्ये पृथुबुध्नोदराकारादिविशेषः प्रागसन्न जायते तर्ह्यत्र कार्ये जायत इति वित्तिव्यवहारयोः को विषयः? तौ निर्विषयौ प्रसज्येते इत्यर्थः । अभिव्यक्तिर्विषय इत्यत आह ॥ व्यक्ताविति । व्यक्तिर्विषय इति वदताऽपि नासतो जन्म परिहृतम् । प्रागविद्यमानव्यक्तेर्जन्मनोऽङ्गीकार्यत्वात् । अन्यथा व्यक्तेः[1] कादाचित्कत्वानुपपत्तेरिति भावः । प्राग्विद्यमानाया एव व्यक्तेरभिव्यक्तिः कदाचिद्भवति । अतोऽभिव्यक्तेः[2] कादाचित्कतेत्यत आह ॥ अनवस्थेति ॥ यदि व्यक्तेरपि व्यक्तिः तर्हि तस्याः प्रागसत्या एव जन्माङ्गीकार्यम् । अन्यथोक्तदोषात् । तस्या अपि प्राग्विद्यमानाया एव व्यक्तिश्चेत्तस्या अप्येवमित्यनवस्था स्यादित्यर्थः । विद्यमानस्य नाशानभ्युपगमेऽप्येवं बाधकं बोद्धव्यमित्याह ॥ एवमिति ॥ तथाहि । सतो नाशाभावे नष्ट इति प्रत्ययादेर्निर्विषयत्वं स्यात् । अनभिव्यक्तिविषयत्वं चेत्तस्याः पूर्वमपि भावे कादाचित्कत्वानुपपत्तिः । अभावेऽसत्कार्यतापातः । अनभिव्यक्तेरभिव्यक्तिश्चेत् पूर्ववदनवस्थेति ॥ सन् विनश्यतीति चोपसंहारो द्रष्टव्यः ।

नन्वेवमसतो जन्मोपपत्तेरत्यन्तासत एव स्यात् । किं विशेषो जायत इत्युक्त्ये[3]त्यत आह ॥ तथापीति ॥ यद्यप्येवमसतो जन्मोक्तम् । तथापि नात्यन्तासतः । किन्तु रूपभेदेन सदसत एवेति भावः । तत्कुत इत्यत आह ॥ अभेदेति ॥ भेदस्य चानुभवादिति सम्बन्धः । मृदेव घट इति कार्यकारणयोरभेदानुभवात् कारणस्य च प्रागपि सत्त्वात् कार्यस्यापि पूर्वं सत्त्वं सिध्यति । भेदानुभवादसत्त्वं चेत्यर्थः । अभेदानुभवो

---

1. G. 1 'वित्त्यादेः' इति पाठान्तरम् । 2. G. 1 'वित्त्यादेः' इति पाठान्तरम् ।
3. G. 2 'इत्युक्त्या विषयीक्रियते' इति पाठान्तरम् ।

किञ्चिन्मानम्[1] । इदं तु वाक्यमन्यथासिद्धम् । 'आद्यन्तयोः सर्वकार्यमसदेवेति निश्चितम् । यद्यसन्न विशेषोऽत्र जायते कोऽत्र जायते ॥ व्यक्तावपि समं ह्येतदनवस्थाऽन्यथा भवेत् । एवं नाशेऽपि बोद्धव्यमतोऽसन्नेव जायते ॥ तथाप्यभेदानुभवात्कार्यकारणयोः सदा । भेदस्य चाविशेषेण देहोऽगात्क्षितितामिति । व्यवहारो भवेद्यस्माद्बल्येवानुभवः सदा ।' इति[1] ब्रह्मतर्के ।

भ्रमः किं न स्यादित्यत आह ॥ अविशेषेणेति ॥ अभेदानुभवस्य भ्रमत्वे भेदानुभावस्यापि भ्रमत्वं स्यात् । विशेषाभावादिति भावः । अभेदानुभव एव नास्तीत्यत आह ॥ देह इति ॥ तस्मादभेदव्यवहारमूलमनुभवोऽनुमीयत इत्यर्थः । अनुभवसद्भावेऽपि कुत एतदित्यत आह ॥ बलीति ॥ अबाधितानुभवः स्वविषयस्थापने शक्त इत्यर्थः ।

यदपि सदसद्विलक्षणत्वं विश्वस्यानेन श्लोकेनोच्यत इति व्याख्यानं तन्निराचष्टे ॥ न चेति ॥ सदसद्विलक्षणं किञ्चिदपि न प्रामाणिकं, कुतो विश्वमित्यर्थः । नन्वसतो भावो भानं ख्यातिर्न विद्यते । सतोऽभावो बाधो न विद्यते । अतस्तदुभयवतो भ्रमविषयस्यार्थापत्त्या सदसद्विलक्षणत्वात्कथं सदसद्विलक्षणं किञ्चिदपि न प्रामाणिकमित्यत आह ॥ न चेति ॥ यद्भ्रमविषयस्य शुक्तिरजतादेः सद्वैलक्षण्यमुक्तं तदङ्गीक्रियत एव । ख्यात्यनुपपत्त्या यदसद्वैलण्यमुक्तं न तद्युक्तम् । तथाहि । असतः ख्यातिरनुपपन्नेति किमसत्त्वेनोत सत्त्वेन । आद्ये विकल्पयति ॥ असत इति ॥ द्वितीयं दूषयति ॥ यदीति ॥ प्रतीत एव

परत्वेनान्यथा योजितमित्यर्थः ॥ ताविति ॥ त्रित्तिव्यवहारावित्यर्थः । अतोसन्नेव जायत इत्यनन्तरं शेषमाह ॥ सन्विनश्यतीति चोपसंहारो द्रष्टव्य इति ॥ किमिति ॥ उक्त्या किमित्यर्थः ॥ रूपभेदेनेति ॥ कार्यरूपेणासतः कारणरूपेण सतो जन्मेत्यर्थः ॥ कुत एतदिति ॥ असतो जन्म सतो विनाश

---

1. G.A. प्रमाणम्

न च सदसद्विलक्षणं किञ्चिदस्तीत्यत्र किञ्चिन्मानम् । न चासतः ख्यात्ययोगात् सतो बाधायोगादुभयविलक्षणं भ्रान्तिविषयम् । असतः ख्यात्ययोगादिति वदतोऽसतः ख्यातिरभून्न वा । यदि नाभून्न तत्ख्यातिनिराकरणम् । यद्यभूत्तथापि । न चासतोऽसत्त्वेन, भ्रान्तौ सत्त्वेन च ख्यातिर्नास्तीत्यत्र किञ्चिन्मानम् । असद्व्यवहार-

धर्मिणि धर्मनिषेधस्य दृष्टत्वादसतोऽप्रतीतौ न तत्र प्रतीतत्वधर्मो निषेद्धुं शक्यत इति भावः । आद्यं पराह ॥ यदीति ॥ तथापि न तत्ख्याति-निराकरणं सम्भवति । व्याघातादिति भावः । द्वितीयेऽपि किं भ्रान्ताव-भ्रान्तौ वा असतः सत्त्वेन ख्यात्ययोगः ? द्वितीयोऽङ्गीकारपरास्तः । प्राचीनपक्षे दूषणान्तरं वदन्नाद्यं दूषयति ॥ न चेति ॥ प्राचीनपक्षे दूष-णान्तरमाह ॥ असदिति ॥ न केवलमसतोऽप्रतीतौ तद्धर्मनिराकरणानु-पपत्तिरपि तु न कोऽपि व्यवहारस्तत्र युज्यते । सर्वव्यवहाराणां प्रतीति-मूलत्वादिति भावः । असतो भ्रान्तौ सत्त्वेन प्रतीत्यभावे न मान-मित्युक्तम् । तद्भावोऽपि कुत इत्यत आह ॥ यदिति ॥ शुक्त्यादेर-धिष्ठानस्य योऽसद्रजतकाद्याकारस्तस्य सत्त्वेन प्रतीतेरेव भ्रान्तित्वात् । भ्रान्तावसतः सत्त्वेन प्रतीत्यनङ्गीकारे भ्रान्त्युच्छेदप्रसक्तेः साऽङ्गी-कार्येति भावः ।

भवेदेतद्यदि भ्रान्तौ प्रतीयमानाकारस्यासत्त्वं संप्रतिपन्नं स्यात् । नैतदस्ति । अनिर्वचनीयत्वाङ्गीकारात् । अनिर्वचनीयप्रतीतौ भ्रमत्वो-पपत्तेः । अतः कथं भ्रान्तावसतः सत्त्वेन प्रतीतिरित्यत आह ॥ अनिर्वच-नीयत्वेति ॥ अस्त्वनिर्वचनीयत्वं भ्रान्तौ प्रतीयमानाकारस्य । तथापि न भ्रान्तावसतः सत्त्वेन प्रतीतिर्निवारयितुं शक्यते । तथाहि । तदनिर्वच-नीयं रजतं किं भ्रान्तावनिर्वचनीयतयैव प्रतीयते सदिदमिति वा । नाद्यः । सदिदमिति प्रतीतिं विनाऽनिर्वचनीयमित्येव प्रतीतौ भ्रान्तित्वायोगात् ।

इत्येतदित्यर्थः ॥ भ्रमविषयस्येति ॥ शुक्तिरूप्यादेः ख्यातिबाधान्यथानुपपत्ति-रूपार्थापत्त्येत्यर्थः ॥ प्राचीनपक्ष इति ॥ असतोऽसत्त्वेन प्रतीतिर्नेति पक्षे

1. G.A. इति च ।

लोपप्रसङ्गाच्च । यदविद्यमानं रूपं तस्य सत्त्वेन प्रतीतेरेव भ्रान्तित्वाच्च । अनिर्वचनीयत्वपक्षेऽपि सदिदं रजतमित्यविद्यमानसत्त्वप्रतीतिं विना न हि भ्रान्तित्वम् । भ्रान्तिसत्त्वाङ्गीकारेऽप्यभ्रान्तं सदिदं रजतमित्यविद्यमानसत्त्वप्रतीतौ हि प्रवर्तते । तस्मादुभयविलक्षणं न किञ्चित्[1] । 'विश्वं सत्यम्[2]' । 'यच्चिकेत[3] सत्यमित्' । 'कविर्मनीषी परिभूस्स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः' इत्यादिश्रुतेश्च ॥ १६ ॥

अन्यथा बाधकज्ञानस्यापि भ्रमत्वप्रसङ्गात् । परिभाषामात्रस्यान्यथयितुमपि शक्यत्वात् । द्वितीये च तत्सत्त्वं सदसद्वा । नाद्यः, अनिर्वचनीयत्वविरोधात् । भ्रान्तित्वानुपपत्तेश्च । द्वितीये प्राप्तमसतः सत्त्वेन प्रतिभानमिति भावः । नानिर्वाच्यरजतस्य सत्त्वमसत् । किन्तु प्रातीतिकमतो नासतः सत्त्वेन प्रतीतिरित्यत आह ॥ भ्रान्तीति ॥ अस्तु तावदनिर्वचनीयस्य सत्त्वं प्रातीतिकम् । तथाऽप्यसतः सत्त्वेन ख्यातिर्दुष्परिहरा । तथाहि । तत्प्रातीतिकं सत्त्वं किं प्रातीतिकमित्येव प्रतीयत उत व्यावहारिकमिति ? नाद्यः । प्रवृत्त्यभावप्रसङ्गात् । द्वितीये तस्य व्यावहारिकत्वं सदसद्वा । नाद्यः । प्रातीतिकत्वविरोधात् । द्वितीये तु कथं नासतः सत्त्वेन ख्यातिरिति भावः । अतोऽसद्वैलक्षण्यसाधकार्थापत्तेर्दुष्टत्वान्न कस्यापि भ्रमविषयस्यानिर्वाच्यतेत्युपसंहरति ॥ तस्मादिति ॥

माऽस्तु भ्रमविषयस्यानिर्वाच्यताऽत्रोच्यत इति । विश्वस्य तु भविष्यति । तत्रासद्वैलक्षणस्य सङ्गतत्वात् । सद्वैलक्षण्यं तु बाधान्य-

---

मानाभावरूपदूषणान्तरमित्यर्थः ॥ चशब्दार्थमाह ॥ न केवलमिति ॥ तद्धर्मेति ॥ प्रतीतत्वरूपधर्मेत्यर्थः ॥ तद्भावोऽपीति ॥ असतस्सत्त्वेन प्रतीतिभावोऽपीत्यर्थः ॥ बाधकज्ञानस्यापीति ॥ श्रुतौ प्रतीतं रूपमनिर्वचनीयमेव न

---

1. G. क्वचित् ।

2. A. विश्वं सत्यं मघवाना युवोरिदापश्चन प्रमिनन्ति व्रतं वाम् ।

3. A. यच्चिकेत सत्यमित्तन्न मोघं वसु स्पार्हमुत जेतोत दाता ।

थाऽनुपपत्त्या सिद्ध्यतीत्यतः श्रुतिविरोधान्नेति भावेनाह॥ विश्वमिति॥ विश्वस्य सदसद्विलक्षणत्वं विरुद्धं चेति भावेनाह॥ विश्वमिति॥ यशस्विनाविन्द्राबृहस्पती युवयोर्विश्वं सत्यमेव। कुतः? युवयोः सत्यजगत्सृष्ट्यादिकर्म सर्वदेवता अपि जानन्ति यत इत्याहेत्यर्थः। बल्यादिभ्यः स्पृहणीयं वसु जेता इन्द्रादिभ्यो दाता। ईश्वरो यद्विश्वं चकार तत्सत्यमेव न मिथ्येत्यर्थः। सर्वज्ञो मनःप्रेरकः सर्वतो वरः स्वतन्त्रः परमेश्वरः पदार्थाननन्तकालेऽप्यबाधिततयैवाकरोदित्यर्थः॥ १६॥

एवं युद्धाकरणे कारणाभावमुक्त्वा तत्कर्तव्यं, तच्च भगवत्पूजात्वेन कार्यमिति वक्ष्यति। तत्रोभयोरपि नित्यत्वेन ईश्वरस्यातिशयाभावात्किं तत्पूजयेत्यत्रोक्तमविनाशीति। तत्रापि कस्यचिदविनाशित्वमेवोच्यते, न जीवादीश्वरस्यातिशयः। तज्ज्ञापकाश्रवणादित्यत आह॥ यद्यपीति॥ इति जीवादीश्वरस्यातिशयं तुशब्दो ज्ञापयतीत्यर्थः। नाशस्यानेकविधत्वं कथम्? कुतश्चेश्वरस्य तदभाव इत्यत आह॥ अनित्यत्वमिति॥

व्यावहारिकं सदपीति परस्य बाधकज्ञानोदयादिति भावः॥ अनिर्वचनीयत्वविरोधादिति॥ सत्यभूतसत्त्वाश्रयस्य सद्वैलक्षण्यायोगादिति भावः। मघवानावित्यस्यार्थो यशस्विनाविति। 'यशो वा व मघम्' इति कर्मनिर्णये यशोऽर्थकत्वे मघशब्दस्य श्रुत्युक्तेः। अच्छेन्द्राब्रह्मणस्पती' इत्यत्र ब्रह्मणस्पतिशब्दार्थो बृहस्पतिरित्युपेत्याह॥ इन्द्रबृहस्पती इति॥ इन्द्राबृहस्पतीति भाव्यम्। "देवताद्वन्द्वे च" इति पूर्वपदस्या नङुक्तेः। 'युवोरिदापश्चन प्रमिनन्ति व्रतं वाम्' इति शेषस्यार्थमाह॥ युवयोरित्यादिना॥ युवोः युवयोः। इदित्यस्यार्थ एवेति। व्रतमित्यस्यार्थसत्येत्यादि। आपश्चनेति पदद्वयार्थः सर्वदेवता अपीति॥ प्रमिनन्ति जानन्ति। 'तन्न मोघं वसु स्पार्हमुत जेतोत दाता' इति शेषस्यार्थोक्तिपूर्वमुपात्तपदानामर्थमाह॥ सर्वज्ञ इति॥ तत्कर्तव्यमिति॥ तद्युद्धकर्म कर्तव्यम्। पूजात्वेन कार्यमित्यनुपदमेव 'तस्माद्युध्यस्व' इत्यत्र वक्ष्यतीति वक्ष्यतिक्रिययोक्तेत्यस्यान्वयः॥

यद्यपि नित्यत्वं जीवस्याप्यस्ति । तथापि सर्वप्रकारेणाविनाशित्वं विष्णोरेवेति तुशब्दः ।

'अनित्यत्वं देहहानिर्दुःखप्राप्तिरपूर्णता ।
नाशश्चतुर्विधः प्रोक्तस्तदभावो हरेः सदा ॥
तदन्येषां तु सर्वेषां नाशाः केचिद्भवन्ति हि'।
इति महावाराहे ॥
'देशतः कालतश्चैव गुणतश्च त्रिधा ततिः ।
सा समस्ता हरेरेव न ह्यन्ये पूर्णसद्गुणाः ॥'
इति परमश्रुतिः ॥ १७ ॥

शरीरिणां तु देहहान्यादिनाशो विद्यत एव । 'येन सर्वमिदं

अनित्यत्वं स्वरूपनाशः । अत्र विष्णुवाचकाभावात्कथमुच्यते विष्णोरित्यतो येन सर्वमिदं ततमित्येतदेव तद्वाचकमिति भावेनैतच्छ्रुत्यैव व्याचष्टे ॥ देशत इति ॥ १७ ॥

अस्तु हरेः सर्वप्रकारेणाविनाशित्वम् । तथापि कथं तस्य जीवादतिशय इत्याशङ्कापरिहारायोच्यत अन्तवन्त इति । तत्रैकस्य शरीरिणो देहनाशमात्रमुच्यत इत्यन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ शरीरिणामिति ॥ ईश्वरः सर्वप्रकारेणाविनाशी । शरीरिणां तु नित्यत्वमात्रमेवास्ति । न तु सर्वप्रकारेणाविनाशित्वम् । देहहान्यादिसद्भावात् । अतोऽस्ति जीवादीश्वरस्यातिशय इति भावः ।

अस्त्वविनाशीति श्लोके भगवद्वाचकसद्भावः । तथापि येन सर्वमिदं ततं तदविनाशीति व्याप्तिरूपेणोक्तेः कथं विष्णोरेवेत्यवधार्यत इत्यत आह ॥ येनेति ॥ यद्यपि व्याप्तिरूपेणेदमुच्यते । तथापि सर्व-

---

उभयोः जीवेश्वरयोः ॥ अत्र जीवस्येति ॥ अत्र अविनाशि त्विति श्लोके जीवस्य प्रतिपाद्यतायाश्च निषेध्यतापरं भाष्यममुख्यार्थपरम् । चोऽप्यर्थः । अमुख्यार्थजीवादिपरमनुमतमिति न भाष्यविरोधोऽस्य मूलस्येत्यर्थः । जीवपरत्वेऽमुख्यत्वं कुत इत्यत आह ॥ तत्रेति । हरावित्यर्थः । तर्हि मुख्यार्थ-

ततम्' इति तस्यैव लक्षणकथनात् न जीवानां देशतो गुणतश्च पूर्णता । अनिच्छया देहहान्यादेरेव दुःखावाप्तिः सिद्धा । तस्माद-नाशिनोऽप्रमेयस्य विष्णोः पूजार्थं युध्यस्व । तत्प्रसादाधीनत्वाद्दुःख-

---

ततत्वस्य विष्णुलक्षणत्वेन तत्रैव पर्यवसानाद्युक्तमवधारणमिति भावः ।

कथमिदमीश्वरस्य लक्षणम् ? जीवानामपि कालतस्ततत्वेन तत्रातिव्याप्तेरित्यत आह ॥ नेति ॥ न केवलमत्र कालतस्ततिरुच्यते[1] । अपि तु देशतो गुणतश्च । न च सा जीवानामस्तीति भावः । अत्र जीवस्य प्रतिपाद्यतानिषेधपरं भाष्यममुख्यार्थपरं चानुमतमिति न तद्विरोधः । तत्र जीवेभ्योऽपि ततेराधिक्यात् । न त्वेवाहमिति पुनरुक्तेश्चेति ।

नन्वन्तवन्त इत्यत्र जीवस्य देहहानिरेवोच्यते । न तु नाशान्तरम् । अतः कथमादिपदप्रक्षेपेण व्याख्यानमित्यत आह ॥ अनिच्छयेति ॥ सत्यं देहहानिरेवात्रोक्तेति । तथापि दुःखप्राप्तिहान्योर-निष्टत्वेन तद्वतो दुःखप्राप्तिनियमादिति भावः ।

अस्त्वेवं जीवादीश्वरस्यातिशयः । ततश्च किमित्याशङ्कापरिहारा-योत्तरार्धं व्याचष्टे ॥ तस्मादिति ॥ सर्वप्रकारेणाविनाशित्वेन सातिशय-त्वादित्यर्थः । सातिशयत्वेऽपि कुतस्तत्पूजा कार्येत्यत आह ॥ तदिति ॥ न केवलं सर्वप्रकारेणाविनाशित्वात्तत्पूजाऽत्र कर्तव्येत्युच्यते । अपि तु सर्वप्रकारेणाविनाशित्वात्स एव स्वतन्त्रः । ततश्च तदधीनत्वं मुक्तेः । युद्धादिस्वकर्मणाऽऽराधितश्चेश्वरो मोक्षं ददाति । अतस्तत्पूजा कर्तव्ये-त्येवाभिप्रेतमिति भावः ।

विष्णुपर एवायं श्लोकोऽस्त्वित्यत आह ॥ न त्वेवाहमिति ॥ आदिपदप्रक्षे-पेणेति ॥ देहहान्यादीत्यादिपदेत्यर्थः ॥ कथञ्चिदिति ॥ स्वाभाविकनाश-नैमित्तिकनाशभेदेनार्थभेदकल्पनमित्यर्थः ॥ अत्रोच्यत इति ॥ तात्पर्य-

1. G. 1. ततिरेवोच्यते ।

*

निवृत्तेः सुखस्य च । 'ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः । तेषामहं समुद्धर्ता' इत्यादेः ।

जीवपक्षे नित्यस्योक्ता इत्युक्तत्वादनाशिन इति पुनरुक्तिः । 'अविनाशि' 'येन सर्वमिदं ततम्' इत्युक्तस्यैव 'अनाशिनोऽप्रमेयस्य' इति प्रत्यभिज्ञानाच्च ।

'इमे देहाः' इति विशेषणान्नित्यश्चिदानन्दात्मकः स्वरूपभूतो देहो मुक्तानामपि विद्यत इति ज्ञायते ।

अस्त्वीश्वरस्य सातिशयत्वान्मोक्षप्रदानशक्तिः । तथापि स्वकर्मणाऽऽराधितो हरिर्मोक्षं ददातीत्येतद्गीताभिमतमित्येतत्कुतः । मुक्तेर्ज्ञानभक्तिसाध्यताया गीताभिमतत्वादित्यत आह ॥ ये त्विति ॥ केवलकर्मणा मोक्षसिद्धेः गीतानभिमतत्वेऽपि भक्तिज्ञानसहितेन साभिमतैव । 'ये तु सर्वाणि' इति तथोक्तत्वात् । तादृशं च कर्मात्राभिप्रेतमिति भावः । 'मत्पराः' इत्यनेन भगवज्ज्ञानमुच्यते । अनन्ययोगः अनन्यभक्तिः ।

'अनाशिनोऽप्रमेयस्य' इति प्रकृतशरीरिविषयं किं न स्यादित्यत आह ॥ जीवेति ॥ जीवपक्षेऽनाशिनोऽप्रमेयस्येत्यत्र जीवो वाच्य इति पक्षे । ईश्वरग्रहणपक्षे स्फुटमर्थभेदसम्भवात् तद्विहाय कथञ्चिदर्थभेदकथनं न युक्तमित्यत्रोच्यते । भाष्ये तु मुख्यार्थे सिद्धे गौणमप्यर्थान्तरमुच्यत इत्यविरोधः । न केवलं जीवपक्षे पुनरुक्तेरीश्वरपरत्वं[1] अपि तु तज्ज्ञापकसद्भावाच्चेत्याह ॥ अविनाशीति । अविनाशीत्यत्र भगवता तावदीश्वर एव प्रतिपाद्य इति समर्थितम् । यदुक्तमविनाशित्वं तदेवात्र प्रत्यभिज्ञायते अनाशिन इति । यदपि सर्वततत्वमुक्तं तदेवाप्रमेयस्येति प्रत्यभिज्ञायते । अतोऽप्यत्रेश्वर एवोच्यत इति भावः ।

निर्णयाख्यैतद्ग्रन्थ इत्यर्थः ॥ भाष्ये त्विति ॥ न च नैमित्तिकनाश इत्याहेत्यादिना जीवस्वरूपार्थान्तरमुच्यत इत्यर्थः ॥ भगवतेति ॥ भाष्यकृतेत्यर्थः ॥

1. G. 1. विषयत्वं ।

'न वर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं
न च कालविक्रमः।
न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः।
श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः
सुरुचः सुपेशसः।
सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः'
प्रवालवैदूर्यमृणालवर्चसां परिस्फुरत्कुण्डलमौलि-
मालिनाम्।
भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभि-
र्महात्मनाम्।
विद्योतमानप्रमदोत्तमाभिः सविद्युदभ्रावलिभिर्यथा नभः॥
इति हि भागवते।

'चिदानन्दशरीरेण सर्वे मुक्ता यथा हरिः।
भुञ्जते कामतो भोगांस्तदन्तर्बहिरेव च[1] ॥'
इति परमश्रुतिः।

जीवस्य देहहानिसद्भावादीश्वरदेहस्य नित्यत्वादीश्वरस्य जीवादतिशय इति यद्व्याख्यानं न तद्गीताऽभिमतं भवितुमर्हति। देहस्यानित्यत्वनियमादित्यतो गीतायामेव इति विशेषणान्मुक्तदेहस्यापि नित्यत्वमनुज्ञायते। किमु हरेः। अन्यथा तद्विशेषणवैयर्थ्यात्। अतो युक्तमेव व्याख्यानमिति भावेनाह॥ इम इति॥ ननु मुक्तदेहस्यापि कथं नित्यत्वम्? देहस्यानित्यत्वनियमादित्यत आह॥ चिदिति॥ जडशरीरत्वमेवानित्यत्वे प्रयोजकम्। तच्च मुक्तदेहस्य चिदानन्दात्मकत्वेन ततो व्यावर्तमानमनित्यत्वमपि व्यावर्तयतीति भावः। चिदानन्दात्मकत्वं देहस्य कथमित्यत आह॥ स्वरूपेति॥ स्वरूपं[1] चिदानन्दात्मकमिति

1. A. वा

न च जीवेश्वरैक्यं मुक्तावपि।

'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥ (गी. १४.२)

'यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता।'

'एतमानन्दमयमात्मानमुपसङ्क्रम्य। इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्। एतत्साम गायन्नास्ते।'

'सर्वे नन्दन्ति यशसाऽऽगतेन सभासाहेन सख्या सखायः। किल्बिषस्पृत् पितुषणिर्ह्येषामरं हितो भवति वाजिनाय।'

भावः। मुक्तानां देह एव नास्ति। 'अशरीरं वाव सन्तम्' इत्यादेरित्यतो वाह॥ चिदिति॥ जडदेहाभावपरा श्रुतिरिति भावः। भिन्नदेहाभावपरा चेति भावेनाह॥ स्वरूपेति॥

ननु मुक्तानां नित्यचिदानन्दात्मकदेहसद्भाव एव कुत इत्यत आह॥ न वर्तत इति॥ अपरे दोषाः। सुपेशसः सुरूपाः। उन्मिषन्मणिप्रवेकनिष्काभरणाः स्फुरद्रत्नप्रवरहाराभरणाः। सुवर्चसः सुकान्तिमन्तः। अत्र जडाभावमुक्त्वा तेषां शरीरोक्तेरर्थाच्चिदानन्दात्मकदेहवत्त्वं ज्ञायते।

जडाभावमुक्त्वेति॥ न वर्तत इत्यादिनेति भावः॥ शरीरेति। 'श्यामात्रदाताः' इत्यादिनेति ज्ञेयम्॥ एतद्वाक्ययोरिति॥ 'यो वेद' इति, 'आनन्दमयम्' इति वाक्ययोः 'ब्रह्मविदाप्नोति परम्' इत्युक्तपरब्रह्मप्रकरणगतत्वादित्यर्थः॥ यशोरूपेणेति॥ यशोनामकरूपेणेत्यर्थः। 'तस्य नाम महद्यशः' इति श्रुतेः॥ ईश्वरेणेति॥ सख्येति योज्यम्। 'किल्बिषस्पृत्पितुपणिर्ह्येषामरंहितो भवति वाजिनाय' इति शेषार्थमाह॥ यतोऽसाविति॥ 'गायत्रं त्वो गायति शक्करीपु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां

---

1. G. 2. स्वरूपं च।

'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः'।

'परं ज्योतिरुप सम्पद्य स्वेन रूपेणाभिनिष्पद्यते।'

'स तत्र पर्येति जक्षन् क्रीडन् रममाणः[1]।' तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति।'

नन्वेतानि वाक्यानि गौणमोक्षपराण्येव मुख्यमुक्तौ जीवेश्वरयोरैक्येनैतदनुपपत्तेरित्यत आह ॥ न चेति ॥ कुतो नेत्यतो मुख्यमोक्षानन्तरमपि भेदस्य श्रुतिस्मृतिसिद्धत्वादित्याह ॥ इदमिति ॥ अत्रापुनरावृत्तिश्रवणान्मुख्यमोक्षत्वं ज्ञायते। न केवलं मुक्तानामीश्वराद्भिन्नतया व्यथाद्यभावमात्रमपि तु भिन्नतयैव परमानन्दानुभवोऽप्यस्तीति भावेनाह ॥ यो वेदेति ॥ एतद्वाक्ययोः परब्रह्मप्रकरणगतत्वान्मुख्यमोक्षपरत्वम्। अन्योन्यं सखायस्ते सर्वे मुक्ताः। स्वावगतेन यशोरूपेण ब्रह्मादिसभां सहमानेनेश्वरेण निमित्तेन नन्दन्ति। कथम् ? यतोऽसौ एषामनिष्टस्पर्धी दिव्यान्नदाता सन्निन्द्रियाय हितो भवतीत्यर्थः। अत्राप्यनिष्टाभावश्रवणान्मुख्यमोक्षविषयत्वम्।

कश्चिद्ब्रह्मा ऋचां सम्यगुच्चारणं कुर्वन्नास्ते। स्वयं चातिपुष्टिमान् कश्चिद्ब्रह्मा शक्करीषु छन्दोमतीषु ऋक्षु गायत्रं साम गायति। कश्चिद्ब्रह्मा पुराणविद्यां वदति। कश्चिद्ब्रह्मा विष्णोर्मूर्तिं ध्यायतीत्यर्थः। अस्य च ब्रह्मबाहुल्यप्रतिपादकत्वान्मुख्यमोक्षविषयत्वम्। जक्षन् भक्षयन् हसंश्च रममाणो रतिं प्राप्नुवन्।

विमित उ त्वः' इति शेषार्थमाह ॥ कश्चिदित्यादिना ॥ जक्षभक्षहसनयोरिति धातोः जक्षन्नित्यस्यार्थद्वयमाह ॥ भक्षयन् हसंश्चेति ॥ 'मनोजवेषु' इत्यस्यार्थो ज्ञानादिगुणेष्विति ॥ 'आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे' इति शेषार्थमाह ॥ तत्र केचिदिति ॥ श्रुत्वा विष्णुमिति ॥

---

1. 'स्त्रीभिर्वा यानैर्वा' इत्यधिकः पाठः।

'मुक्ताः प्राप्य परं विष्णुं तद्देहं संश्रिता अपि ।
तारतम्येन तिष्ठन्ति गुणैरानन्दपूर्वकैः ॥
भूपा मनुष्यगन्धर्वा देवाः पितर एव च ।
आजानेयाः कर्मदेवास्तत्त्वरूपाः पुरन्दरः ॥
शिवो विरिञ्च इत्येते क्रमाच्छतगुणोत्तराः ।
मुक्तावपि तदन्ये ये भूपाच्छतगुणावराः ॥
न समो ब्रह्मणः कश्चिन्मुक्तावपि कथञ्चन ।
ततः सहस्रगुणिता श्रीस्ततः परमो हरिः ॥
अनन्तगुणितत्वेन तत्समः परमोऽपि न ।'

परमसाम्यं नाम योग्यानन्दपूर्वत्वमेव । न तु सर्वसाम्यमिति भावेन मुक्ततारतम्ये च मानमाह ॥ मुक्ता इति ॥ देवा देवगन्धर्वाः । तत्त्वरूपाः तत्त्वाभिमानिनो बृहस्पत्यादयः । उक्तेभ्योऽन्ये ये मनुष्योत्तमास्ते भूपाच्छतांशोना इत्यर्थः । तारतम्यसद्भावे परस्परं विरोधः स्यादित्यत आह ॥ अक्षण्वन्त इति ॥ प्राप्ताक्षिकर्णफलाः परस्परविरोधशून्या मुक्ताः ज्ञानादिगुणेष्वसमा बभूवुः । तत्र केचित्क्षीरसागरमग्नाः । केचिदश्वत्थवनमुपवर्तमानाः । केचित्स्नातव्यहृदा इव गम्भीरा भगवन्तं ददृशुरित्यर्थः । इदं वाक्यं 'श्रुत्वा विष्णुं' इत्यागमेन मुख्यमुक्तिविषयतया व्याख्यातम् । अत एव ऋचां त्व इत्यस्य ऋत्विग्विषयत्व-

---

'श्रुत्वा विष्णुं कर्णफलं प्राप्तत्वात्कर्णसंयुताः ।
अक्षण्वन्तो दर्शनाच्च विष्णोर्मुक्तास्तु ये गणाः ॥
तारतम्यं च तेषां च श्रुतावुदितमञ्जसा ।
क्षीरसागरदघ्नास्तु केचित्तिष्ठन्ति मुक्तिगाः ॥
उपस्थिता ब्रह्मवनं[1] केचिदश्वत्थमण्डलम् ।
ऐरे हृदे केचिदपि देवा एव सदा हरिम् ॥

---

1. ब्रह्मव्रतं

'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः[1]।' 'कामस्य यत्राऽप्ताः कामाः तत्र माममृतं कृधि[2]' इत्यादि मोक्षानन्तरमपि भेदवचनेभ्यः।

न च 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्।' 'यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति।' 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते। अविनाशित्वात्। न तु तद्द्वितीयमस्ति। ततोऽन्यद्विभक्तं यत्पश्येत्।' 'परमं ब्रह्म वेद ब्रह्मैव भवति।' 'तत्त्वमसि', 'अहं ब्रह्मास्मि' इत्यादिश्रुति[3]विरोधः।

संज्ञानाशो यदि भवेत् किं मुक्त्या नः प्रयोजनम्।
मोहं मां प्रापयामास भवानत्रेति चोदितः॥

वर्णनं परास्तम्। तारतम्येऽपूर्तिः स्यादित्यत आह॥ कामस्येति॥ यत्रेच्छाविषयाः पर्याप्तास्तत्र लोके माममृतं कुर्वित्यर्थः।

तथापि न जीवेशभेदो युक्तः। तदभेदाभिधायकश्रुतिविरोधादित्यत आह॥ न चेति॥ कुतो न विरोध इति चेदर्थान्तरसम्भवात्।

नागभोगशयं मुक्ता ददृश्रेऽधिकमोदिनः।
सागरादिस्थितं विष्णुं पश्यन्ति क्वचिदेव हि॥'

इत्यैतरेयभाष्योक्तागमेनेत्यर्थः॥ अत एवेति॥ अस्य वाक्यस्यागमेनेत्थमर्थ उक्त इति व्याख्यानादेवेत्यर्थः। 'यत्र त्वस्य' इति वाक्यार्थं पश्चाद्विवरितुं संज्ञेत्यादिप्रमाणव्याख्येयवाक्यं स्वयमाह॥ प्रज्ञानघन इत्यादिना॥ मोहान्तं मोहाख्यनाशम्। इतीत्यन्तेनेति चोदित इत्यादिवाक्यसङ्ग्रहः। ऐहिकज्ञानं[4] वृत्तिज्ञानमित्यर्थः। एतद्विषयें मुक्तविषय इत्यर्थः। 'तमादेशमप्राक्ष्यः' इत्यादेरर्थो 'नारायणोऽयम्' इत्यादीति भावेनाह॥ आदिश्यत इतीति॥

---

1. A. 'आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे' इत्यधिकः पाठः।

2. A. 'इन्द्रायेन्दो परिस्रव' इत्यधिकः पाठः। 3. A. वाक्य

4. मुद्रितटीकापुस्तके 'भौतिकज्ञानम्' इति पाठो दृश्यते।

याज्ञवल्क्यः प्रियामाह नाहं मोहं ब्रवीमि ते ।
भूतजज्ञानलोपः स्यान्निजं ज्ञानं न लुप्यते ॥
न च ज्ञेयविनाशः स्यादात्मनाशः कुतः पुनः ।
स्वभावतः पराद्विष्णोर्विश्वं भिन्नमपि स्फुटम् ॥

प्रतीत एवार्थः किं न स्यादिति चेन्न । श्रुत्यन्तरेभ्य एवार्थान्तरस्यावगमादित्याह ॥ संज्ञेति ॥ "प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति । न प्रेत्य संज्ञाऽस्ति" इति याज्ञवल्क्यवाक्यानन्तरं तदभिप्रायमजानन्त्याः मैत्रेय्याश्चोद्यवाक्यम् — 'अत्रैव मा भगवान् [1]मोहान्तमापीपन्न प्रेत्य संज्ञाऽस्ति' इति । तदर्थं उच्यते संज्ञेति । यदि मोक्षे ज्ञानं नश्येत्तर्हि तस्यापुरुषार्थत्वं स्यात् । भवति चासौ पुरुषार्थः । अतस्तत्र ज्ञानाभाववचनं मोहकमेवेत्यर्थः । 'स होवाच । न वा अरे अहं मोहं ब्रवीमि' इत्यस्यार्थ इतीति । ज्ञानानाशकथनं कथं न मोहकमित्यत उच्यते —'अविनाशी वा अयमात्माऽनुच्छित्तिधर्मा' इति । तस्यार्थो भूतजेति । भौतिकज्ञानं लुप्यत इति मद्वाक्यार्थो न तु निजज्ञानमपीत्यतो न मद्वाक्यं मोहकमिति भावः । भूतजानाममुक्तानामेतद्विषये ज्ञानं लुप्यत इति वा । कुतो निजं ज्ञानंन लुप्यत इत्यत आह ॥ न चेति ॥ आत्मनाशः आत्मस्वरूपभूतज्ञाननाशः । आत्मातिरिक्तमपि यदा न नश्यति तदा किं वाच्यमतिप्रेमास्पदात्मस्वरूपज्ञानं न नश्यतीत्यर्थः । ज्ञेयानाशोऽपि कुत इत्याशङ्कापरिहाररूपं—'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति । तदितर इतरं जिघ्रति । यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्तत्केन कं जिघ्रेद्येनेदं सर्वं विजानाति तं च केन विजानीयात् । विज्ञातारमरे केन विजानीयात्' इति वाक्यं व्याख्यायते ॥ स्वभावत इति ॥ आत्मव्यतिरेकेण ज्ञेयसद्भाव एव घ्राणादिभोगस्येश्वरज्ञानस्यात्मज्ञानस्य च सम्भवा-

1. G. 1. 'अमूमुहत्'

अस्वातन्त्र्याद्भिन्नमिव स्थितमेव यदेदृशम् ।
तदा घ्राणादिभोगः स्यात् स्वरूपज्ञानशक्तितः ॥
तदाऽऽत्मानुभवोऽपि स्यादीश्वरज्ञानमेव च ।
यदाऽन्यन्न विजानाति नात्मानं नेश्वरं तथा ॥
पुरुषार्थता कुतस्तु[1] स्यात्तदभावाय को यतेत् ।
तस्मात्स्वभावज्ञानेन भिन्ना विष्णुसमीपगाः ॥
भुञ्जते सर्वभोगांश्च मुक्तिरेषा न चान्यथा ।
यन्न पश्येत् परो विष्णुर्द्वितीयत्वेन स स्वतः ॥
तद्द्वितीयं न भवति प्रादुर्भावात्मकं वपुः ।
प्रधानपुरुषाद्यन्यद्यत्तस्माद्भिन्नमीश्वरः ॥

दन्यथाऽसम्भवाज्ज्ञेयसद्भावोऽङ्गीकार्य इत्यर्थः । निर्विशेषाद्वैते कर्मकर्तृभावविरोधात् स्वज्ञानं च नोपपद्यते । यो ज्ञेयाभावे भोगाद्यसम्भव उक्तः सोऽप्यस्त्वित्यत आह ॥ यदेति ॥ अन्यद्गन्धादि । कथं भोगाद्यभावे पुरुषार्थताभाव इत्यत आह ॥ तदिति ॥ पुरुषेणार्थ्यो हि पुरुषार्थः । न हि भोगाद्यभावं पुरुषोऽर्थयते । तदर्थं यतते वा । अतो भोगाद्यभावरूपो मोक्षो न पुरुषार्थ इत्यर्थः । 'एतावदरे खल्वमृतत्वम्' इत्युपसंहारवाक्यं व्याक्रियते ॥ तस्मादिति ॥ भोगाद्यभावेऽपुरुषार्थत्वप्रसक्तेर्भोगाद्यङ्गीकार्यम् । भोगादिसम्भवाच्च भिन्ना विषयादयः । ततश्च स्वरूपज्ञानमिति भावः ।

'यद्वैतन्न पश्यति न तु तद्द्वितीयमस्ति' इत्यस्यार्थो यदिति । 'ततोऽन्यद्विभक्तं यत्पश्येत्' इत्येतद्व्याक्रियते ॥ प्रधानेति ॥ अन्यदवतारव्यतिरिक्तमीश्वरेण भिन्नतया दृष्टत्वात्प्रधानपुरुषादिकं भिन्नमेवेश्वरादित्युक्तम् । अभिन्नतया सर्वज्ञेनेश्वरेणादृष्टत्वाच्च भिन्नमित्युपपादकं 'पश्यन् वै तन्न पश्यति' इति । एतद्वाक्यं व्याक्रियते ॥ पश्यन्निति ॥

1. A. तत्

विभक्तत्वेन नियतं यस्मात्पश्यति सर्वदा ।
पश्यन्नेव यतो विष्णुस्तद्भेदं न पश्यति ॥
चेतनाचेतनस्यास्य नाभेदोऽस्ति ततोऽमुना ।
न हि ज्ञानविलोपोऽस्ति सर्वज्ञस्य परेशितुः ॥
ब्रह्माणि जीवाः सर्वेऽपि परब्रह्माणि मुक्तिगाः ।
प्रकृतिः परमं ब्रह्म परमं महदच्युतः ॥
नैव मुक्ता न प्रकृतिः क्वापि तद्विष्णुवैभवम् ।
प्राप्नुवन्त्यपि तज्ज्ञानान्निजं ब्रह्मत्वमाप्यते ॥
यद्यस्य परमेशत्वं[1] तदा स्यादुःखिता कुतः ।
दुःखी चेत्कुत ईशत्वमनीशो ह्येव दुःखभाक् ॥

प्रधानादीनां स्वतो भिन्नत्वेन दर्शनमीश्वरस्य भ्रमः किं न स्यादित्याशङ्का-परिहाररूपं—'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' इत्येतद्व्याक्रियते ॥ न हीति ॥ विपरिलोपो विपरीतत्वम् । अविनाशित्वादिति । नित्यत्वेन निर्दोषत्वादित्यर्थः ।

'परमं ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतिं व्याख्यातुं तदुपयुक्तमाह ॥ ब्रह्माणीति ॥ श्रुतिव्याख्यानं अपीति । यद्यपि परमं ब्रह्म वेद तथापि ब्रह्मैव भवति न परं ब्रह्म भवतीत्यर्थः । कुत इत्थं कल्प्यते ? परब्रह्म-ज्ञानेन परब्रह्मत्वं भवतीत्येवार्थः किं न स्यादित्यत आह ॥ यदीति ॥ यदि जीवस्य मुक्तौ परमेश्वरैक्यं स्यात्तर्हि संसारेऽपि तथा स्यात् । प्राग्भिन्नस्य पश्चादभेदानुपपत्तेर्नैतद्युज्यते । तथात्वे दुःखानुपपत्तेरिति भावः । कुतो न स्यादुःखितेत्यत आह ॥ दुःखीति ॥ परमेश्वरभूतस्याप्य-ज्ञानवशादुःखित्वमित्यत आह ॥ कुत इति ॥ सर्वज्ञस्यापि भ्रान्त्याऽज्ञान-मित्यत आह ॥ क्वेति ॥ भ्रमस्याधिष्ठानाज्ञानमूलत्वादज्ञानस्य च भ्रान्ति-मूलत्वाङ्गीकारेऽन्योन्याश्रयतेति भावः । 'अहं ब्रह्मास्मि' तत्त्वमसीति

---

1. A. परमेशित्वं

कुतः सर्वविदोऽज्ञत्वं क्व भ्रमोऽप्यज्ञतां विना।
तस्मान्नैवेश्वरो जीवस्तत्प्रसादात्तु मुच्यते ॥
अहेयत्वादहंनामा भगवान् हरिरव्ययः।
ब्रह्माऽसौ गुणपूर्णत्वादस्म्यसावसनान्मितेः ॥
असनादसिनामाऽसौ तेजस्त्वात्त्वमितीरितः।
सर्वैः क्रियापदैश्चैव सर्वैर्द्रव्यपदैरपि।
सर्वैर्गुणपदैश्चैव वाच्य एको हरिः स्वयम्।
युष्मत्पदैः प्रातियोग्यात्तद्युतैश्च क्रियापदैः ॥
अस्मत्पदैरान्तरत्वात् क्रियार्थैश्च तदन्वयैः।
परोक्षत्वात्तत्पदैश्च मुख्यवाच्यः स एव तु ॥
सर्वान् वेदानधीत्यैव प्रज्ञाधिक्येन हेतुना।
श्वेतकेतुरहङ्कारात्प्रायशो नास्मि मानुषः ॥

श्रुतिद्वयं व्याचष्टे ॥ अहेयत्वादिति ॥ असनान्मितेरिति ॥ स्वस्मिन् परिमितेर्निरासादित्यर्थः। विरोधिनां निरसनात्प्रमितिरूपत्वाच्चेति वा। त्विट् (त्विङ्) प्रकाशन इति धातोस्तेजस्त्वात्त्वमितीरितः। न केवलमेतच्छब्दवाच्यत्वं हरेरपि तु सर्वशब्दवाच्यत्वं चेत्याह ॥ सर्वैरिति ॥ सर्वशब्दवाच्यत्वेऽपि रूपविशेषनियमोऽस्तीत्याह ॥ युष्मदिति ॥

तत्त्वमसीति वाक्यं नाभेदपरम्। पूर्वोत्तरवाक्याननुसारित्वादिति भावेनाऽदित एव प्रकारान्तरेण व्याक्रियते। तत्र 'सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय' इत्येतद्व्याक्रियते ॥ सर्वानिति ॥ 'तं ह पितोवाच श्वेतकेतो यन्नु खलु सोम्यैवं महामना अनूचानमानी स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातं भवति' इत्येतद्व्याक्रियते ॥ अकृताचारमिति ॥ आदिश्यत इत्यादेशो नारायणः। ज्ञाते श्रुते मते च। अविज्ञातज्ञानादीनामिति ॥ अविज्ञाताश्रुतामतज्ञानश्रवणमननानामित्यर्थः। अविज्ञातान्यज्ञानादीनां

देवो वा केशवांशो वा नैषा प्रज्ञाऽन्यथा भवेत् ।
एवं महत्त्वबुद्ध्यैव दर्पपूर्णोऽभ्यगात्पितुः ॥
सकाशमाकृताचारं तं दृष्ट्वा स्तब्धमब्रवत् ।
पितोवाच कुतः पुत्र स्तब्धता त्वामुपागता ॥
प्रायो नारायणं देवं नैव त्वं पृष्टवानसि ।
यस्मिन् ज्ञाते त्वविज्ञातज्ञानादीनां फलं भवेत् ॥
प्राधान्यात्सदृशत्वाच्च तदधीनमिति स्फुटम् ।
तत्सृष्टं चेति विज्ञातं फलवद्धि भवेज्जगत् ॥
स्वातन्त्र्येणास्य विज्ञानं मिथ्याज्ञानमनर्थकृत् ।

यत्फलं तत्तदभावेऽपि भगवज्ज्ञानादिमात्रेणापि भवतीत्यर्थः । अविज्ञातान्यज्ञानादीनां जातानामपि यत्फलं तदपि भगवज्ज्ञानादौ जात एव जातं भवतीति च । परमात्मज्ञानादौ सत्यन्यदज्ञाताद्यपि ज्ञातादिवद्भवतीति वा । एवंविधत्वादीश्वरस्य तज्ज्ञाने स्वात्मनोऽत्यन्ताधमत्वज्ञानसम्भवेन केशवोऽस्मीत्याद्यभिमानायोगान्नासौ त्वया पृष्ट इति भावः । तत्राऽद्ययोजनाद्वये प्राधान्यं हेतुः । तृतीययोजनायां सादृश्यं हेतुः ।

जातमपि जगज्ज्ञानादि परमात्मज्ञानादौ सत्येव सफलमिति कथमित्यत आह ॥ तदधीनमिति ॥ भगवज्ज्ञानादि तावदेवं भवति । वशीकृतविश्वो जगत्सृष्ट्यादिकर्तेश्वर इति । एवं च भगवज्ज्ञानादौ सति जगत्तदधीनमिति ज्ञानादिकं दृढं भवति । ततश्च मोक्षादिफलं भवतीत्यर्थः ।

उपदेशविषय इत्यर्थः । तदभावेऽपि अन्यज्ञानाभावेऽपीत्यर्थः । 'यस्मिन्' इत्यादेरर्थान्तरमाह ॥ अविज्ञातान्येति ॥ एवमज्ञातस्यापीति ॥ भगवदधीनत्वादिनाऽज्ञातस्यापीत्यर्थः । ज्ञातादेरित्युक्त्यनुसारादाह ॥ ज्ञातादीति ॥ श्रुतं मतमित्यादिपदार्थः । इत्यत्रोक्तमित्यस्य दृष्टान्तमित्यनेनान्वयः । 'वाचारम्भणं'

यथा चैवैकमृत्पिण्डज्ञानादेः सदृशत्वतः ।
मृण्मयं तद्कार्यं च ज्ञातं मृदिति वै भवेत् ॥
यथैव मृत्तिकेत्यादिनित्यनामप्रवेदनात् ।
वाचारब्धमनित्यं तु ज्ञातं तन्मूलमित्यपि ॥

एवमज्ञातस्यापि जगतो ज्ञानादिना फलं किं न स्यादित्यतः का फलप्रत्याशा प्रत्युतानर्थ एव भवतीत्याह ॥ स्वातन्त्र्येणेति ॥ उक्तरीत्या भगवज्ज्ञानाद्यभावे जगतः स्वातन्त्र्येणैव ज्ञानादि प्राप्यते । तच्च मिथ्याज्ञानत्वादनर्थकृदित्यर्थः ।

सादृश्याद्भगवज्ज्ञानादौ सत्यन्यज्ज्ञातादिवद्भवतीत्यत्रोक्तं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्' इति दृष्टान्तं व्याचष्टे ॥ यथा चेति ॥ ज्ञातं ज्ञातादि । प्राधान्याद्भगवज्ज्ञानादिमात्रेणाज्ञातादेरप्यन्यस्य ज्ञानादिफलं भवति, भगवज्ज्ञानादौ सत्येव ज्ञातस्याप्यन्यस्य ज्ञानादेः फलं भवतीत्युभयत्रोक्तं 'वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इति दृष्टान्तं व्याचष्टे ॥ यथेति ॥ यस्मात्साङ्केतिकनामधेयस्य वाचाऽऽरम्भणं क्रियते अतस्तद्विकारोऽत एवाप्रधानम् । मृत्तिकेत्यादि संस्कृतं नाम नित्यम् । अत एव प्रधानम् । प्राधान्यान्मृत्तिकेत्यादिसंस्कृतज्ञानमात्रेण साङ्केतिकाज्ञानादावपि तत्फलं विद्वानिति व्यवहारविषयत्वादिकं भवति । संस्कृतनामज्ञान एव च साङ्केतिकनामज्ञानं सफलं भवति । तन्मात्रेण विद्वानिति व्यवहारविषयत्वाद्यभावादित्यर्थः ॥ तन्मूलमिति ॥ तत्प्रधानकत्वादित्यर्थः ।

'एवं सोम्य स आदेशो भवति' इति दार्ष्टान्तिकवाक्यं

इति श्रुत्यर्थमाह ॥ यस्मादित्यादिना ॥ सत्यमित्यस्यार्थो नित्यमिति ॥ इदानीं मूलार्थमाह ॥ प्राधान्यादित्यादिना ॥ तत्फलं साङ्केतिकज्ञानादिफलम् । तत्किमित्यत आह ॥ विद्वानितीति ॥ तन्मात्रेण साङ्केतिकज्ञानमात्रेणेत्यर्थः । एवं पुरुषोत्तमः प्रधान इत्यन्वयं तावदुपेत्य तदनन्तरं शेष-

एवं कारणभूतोऽसौ भगवान् पुरुषोत्तमः ।
प्रधानश्च स्वतन्त्रश्च तन्मूलमखिलं जगत् ॥
तदाधारं विमुक्तौ च तदधीनं सदा स्थितम् ।
स सूक्ष्मो व्यापकः पूर्णस्तदीयमखिलं जगत् ।
तस्मात्तदीयस्त्वमसि नैव सोऽसि कथञ्चन ॥

व्याचष्टे ॥ एवमिति ॥ प्रधानोऽतस्तज्ज्ञानादिनोक्तप्रकारद्वयेनान्यज्ञानादि-साफल्यं भवतीति शेषः । एवं सदृशश्चेति द्रष्टव्यम् । प्राधान्यमेवेश्वरस्य कुत इत्यतः सदेव सोम्येत्यादिना स्वातन्त्र्येण जगत्कारणत्वमुक्तम् । तदेवाह ॥ स्वतन्त्रः कारणभूत इति ॥ ईश्वरोऽहमिति भावाकरणे हेतु-तयेश्वरमाहात्म्यमुक्तम् । माहात्म्यान्तरं चोच्यते—'सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' इति । तदर्थमाह ॥ तन्मूलमिति ॥ माहात्म्यान्तरमुक्त्वा अभेदबुद्धिं मा कुर्वित्युच्यते — 'स एषोऽणि-मैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इति । तद्व्याचष्टे ॥ स इति ॥ व्यापकः पूर्ण इत्यात्मशब्दस्यार्थद्वयम् । पूर्णो गुणैः । नैव सोऽसीति । अतत्त्वमसीति विभज्य व्याख्यानान्तरम् ।

माह ॥ प्रधानोऽत इत्यादि ॥ उक्तेति ॥ अज्ञातान्यज्ञानादीनां यत्फलं तत्तद-भावेऽपि भवति । अज्ञातान्यज्ञानादीनां ज्ञातानामपि यत्फलं तदपि भगव-ज्ज्ञानादौ जात एव जातं भवतीत्युक्तप्रकारद्वयेनेत्यर्थः । प्रधानश्चेति चशब्दसमुच्चेयमाह ॥ एवं सदृशश्चेत्यपि द्रष्टव्यमिति ॥ कारणभूतोऽसावित्यं-शस्योपयोगमाह ॥ प्राधान्यमेवेति ॥ सादृश्यं च ब्रह्मजगतोरबाधितत्वादित्या-दिना व्यक्तमित्यन्यत्र तत्त्वनिर्णयादावुपपादितं चेति नात्रोपपादितमिति भावः । तथा च वाचारम्भणदृष्टान्तमृत्पिण्डमृण्मयदृष्टान्तयोर्द्वयोरपि यथाक्रमं एवं प्रधान एवं सदृशश्चेति दार्ष्टान्तिकमुक्तं भवति ॥ भावाकरण इति ॥ श्वेत-केतुनाऽहमीश्वरांश इति भावाकरणे जगत्कारणत्वस्वातन्त्र्यादिमाहात्म्यमुक्त-मुद्दालकेनेत्यर्थः ॥ व्याख्यानान्तरमिति ॥ तदीयस्त्वमसीति व्याख्याना-पेक्षयेति योज्यम् । तदित्यादिश्रुतीत्यस्यायमर्थः । तदुदाहृतवाक्यद्वयं व्याक्रियत

यथा पक्षी च सूत्रं च नानावृक्षरसा अपि ।
यथा नद्यः समुद्रश्च यथा वृक्षपरावपि ॥
यथा धानाः परश्चैव यथैव लवणोदके ।
यथा पुरुषदेशौ च यथाऽज्ञज्ञानदावपि ॥
यथा स्तेनापहार्यौ च तथा त्वं च परस्तथा ।
भिन्नौ स्वभावतो नित्यं नानयोरेकता क्वचित् ॥
एवं भेदोऽखिलस्यापि स्वतन्त्रात्परमेश्वरात् ।
परतन्त्रं स्वतन्त्रेण कथमैक्यमवाप्नुयात् ॥
स जीवनामा भगवान् प्राणधारणहेतुतः ।
उपचारेण जीवाख्या संसारिणि निगद्यते ॥
तदधीनमिदं सर्वं नान्याधीनः स ईश्वरः ।
जीवेश्वरभिदा चैव जडेश्वरभिदा तथा ।
जीवभेदो मिथश्चैव जडजीवभिदा तथा ॥
जडभेदो मिथश्चेति प्रपञ्चो भेदपञ्चकः ।
स नित्य एव नोत्पाद्य उत्पाद्यश्चेन्नशेदपि ॥
तस्मादनादिमानेव प्रपञ्चो भेदपञ्चकः ।

जीवेश्वरभेदे 'स यथा शकुनिः' इत्यादिनोक्तदृष्टान्तवाक्यानि व्याचष्टे ॥ यथेति ॥ यदपि 'जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' इति, 'स एष जीवेनात्मनाऽनुप्रभूतः' इति जीवेशाभेदाभिधायकवत्प्रतीयमानं वाक्यद्वयं तत् 'इत्यादिश्रुतिविरोध' इत्यादिपदगृहीतं व्याख्यायते ॥ स इति ॥ 'जीवापेतं वाव किलेदं म्रियते । न जीवो म्रियते' इत्यस्यार्थस्तदधीनमिति ।

इत्यन्वयः । प्राग्भाष्यकृताऽनुपात्तं कथं व्याख्यायत इत्यत उक्तम् ॥ इत्यादिश्रुतिविरोध इत्यादिपदगृहीतमिति ॥ स्थानान्तर इति ॥ 'प्रपञ्चोपशमं

विष्णोः प्रज्ञामितं यस्माद् द्वैतं न भ्रान्तिकल्पितम् ॥
अद्वैतः परमार्थोऽसौ भगवान् विष्णुरव्ययः ।
परमत्वं स्वतन्त्रत्वं सर्वशक्तित्वमेव च ॥
सर्वज्ञत्वं परानन्दः सर्वस्य तदधीनता ।
इत्यादयो गुणा विष्णोर्नैवान्यस्य कथञ्चन ।
अभावः परमद्वैते सन्त्येव ह्यपराणि तु ॥
'विकल्पो विनिवर्तेत कल्पितो यदि केनचित् ।
अद्वैतं ज्ञानिनां पक्षे न तस्माद्विद्यते क्वचित् ॥'

इत्यादिश्रुतिभ्योऽर्थान्तरस्यैवावगतत्वात् ।

'प्रपञ्चो यदि विद्येत निवर्तेत न संशयः' इत्यादिश्रुतिः भेदमिथ्यात्वाभिधायकवत्प्रतीयमाना प्रागादिपदगृहीता व्याख्यायते ॥ जीवेति ॥ विद उत्पत्ताविति धातुमाश्रित्य 'यदि विद्येत' इत्येतदुत्पाद्यश्चेदिति व्याख्यातम् । भ्रान्तिकल्पितत्वाद्भेदस्य कथमनादिनित्यतेत्याशङ्कानिवर्तकस्य 'मायामात्रमिदं द्वैतम्' इत्यस्यार्थो विष्णोरिति । भेदस्य सत्यत्वे कथमद्वैतं स्थानान्तरे कथ्यत इत्यत उक्तं अद्वैतं परमार्थत इति । अस्यार्थोऽद्वैत इति । अनेन परमार्थत इति तसिः प्रथमार्थ इत्युक्तं भवति । अद्वैतवाक्यं परमार्थो भगवानद्वैत इत्याहेत्यर्थः । किं तत्परमत्वमित्यत आह ॥ परमत्वमिति ॥ एवं परमत्ववतोऽद्वैतत्वं नाम किमित्यत आह ॥ इत्यादय इति ॥ सोऽयं परमद्वैते अभावः । तदिदं परमत्ववतोऽद्वैतत्वं तदेवाद्वैतश्रुत्यर्थ इत्यर्थः । सर्वाद्वैतमेवार्थः किं न स्यादित्यत आह ॥ सन्तीति ॥

बाधकाभावाच्च न भेदस्य कल्पितत्वमित्यर्थप्रतिपादकं विकल्प इति वाक्यम् । तस्यार्थो विकल्प इति । 'स आत्मा तत्त्वमसि' इत्यादि-

---

शिवमद्वैतं" इति श्रुत्यन्तर इत्यर्थः ॥ बाधकाभावाच्चेति ॥ स्थानान्तरोक्तेः श्रुत्यैव

एकपिण्डनामधेयेतिशब्दानां[1] वैयर्थ्यं[2] चान्यथा ।

न चैकविज्ञानेन सर्वविज्ञानं तत्पक्षे । न हि शुक्तिज्ञो रजतज्ञ इति व्यवहारः । नवकृत्वोऽपि भेद एव दृष्टान्तोक्तेश्च । तस्मादतत्त्वमसीत्येवोच्यते ।

वाक्यस्य भेदपरत्वसिद्ध्यर्थं 'यथा सोम्य' इत्यादिवाक्यस्य स्वोक्तमर्थमनङ्गीकृत्य अर्थान्तरताकल्पनायां उदाहृतश्रुतिविरोधो बाधकः । बाधकान्तरं चाह ॥ एकेति ॥ यथैकमृत्पिण्डविज्ञानेन सर्वं मृण्मयं विज्ञातं स्यात्, यतो नामरूपात्मकं मृण्मयं वागालम्बनमात्रं न तु पारमार्थिकं, मृत्तिकैव सत्या तथा परमात्मज्ञाने सति जगज्ज्ञानं भवति । ततोऽतिरेकेणाभावादित्यन्यथा व्याख्यानं न युज्यते । 'मृदा ज्ञातया सर्वं मृण्मयं विज्ञातं स्यात् । वाचारम्भणं विकारो मृत्तिकैव सत्या' इत्येतावता पूर्णत्वेनैकादिशब्दानां वैय्यर्थ्यात् । सर्वमृण्मयानामेकमृत्पिण्डातिरेकेणाभावाभावात् । नामधेयस्यापि विकारत्वादिति भावः ।

किञ्च वाचारम्भणवाक्ये यदि ईशेशितव्यादिप्रपञ्चस्य परमात्मन्यारोपिततया ततोऽतिरेकेणाभावो विवक्षितस्तर्हि प्रतिज्ञातं परमात्मज्ञानेन जगज्ज्ञानं न स्यात् । सत्यज्ञानेन मिथ्याज्ञानस्यानुपपत्तेः । विरोधात्तयोर्ज्ञानयोरित्याह ॥ न चेति ॥ ननु परमात्मज्ञानेन जगन्मिथ्येति ज्ञायत एव । अतः कथमुच्यते ब्रह्मण्यारोपितत्वे जगतः तज्ज्ञानेन जगज्ज्ञानानुपपत्तिरित्यत आह ॥ न हीति ॥ एवं चेत्परमात्मज्ञानेन प्रपञ्चाभावज्ञानं भवतीति वक्तव्यम् । न तु प्रपञ्चज्ञानं ब्रह्मज्ञानेन भवतीति । तथा लोके व्यवहाराभावादिति भावः । इतोऽपि नात्र प्रपञ्चस्य परमात्मातिरेकेणाभावो विवक्षित इत्याह ॥ नवकृत्व इति ॥

व्याख्यानबलादिति चार्थः । न केवल मायामात्रत्वादिति वार्थः । ननु नामधेयपदाभावे नामप्रपञ्चस्य वागालम्बनमात्रत्वलाभः कथमित्यत आह ॥ नामधेय-

---

1. A. शब्दादीनां　　2. A वैय्यर्थ्याच्च

*

ऐतदात्म्यमित्यैदात्मसम्बन्धि, तत्स्वामिकम् । त्वमपि तदैतदात्म्यमेवासि न सोऽसीति वा । तदिति लिङ्गसाम्यं चात्र ।

अविद्यमानमेवेश्वरं सृष्ट्यादिकं चाप्राप्तमेवात्मनो भिन्नत्वेन प्रापयित्वा तन्निषेधे कथं श्रुतेरुन्मत्तवाक्यत्वं न स्यात् । अनुवादोऽपि

किमतो यद्येवं वाचारम्भणश्रुतिर्भेदपक्षे युक्तेत्यत आह ॥ तस्मादिति ॥ तस्मात्पूर्ववाक्यानां भेदपरत्वादित्यर्थः ।

अतत्त्वमसीति भेदपरतया योजनायां 'ऐतदात्म्यमिदं सर्वम्' इति पूर्ववाक्यविरोधः स्यादित्यतस्तस्य श्रुत्योक्तमर्थं स्मारयति ॥ ऐतदात्म्यमिति ॥ अस्त्वेवमात्मसम्बन्धीति योजना । सम्बन्धश्च तादात्म्यमित्यतः स्वस्वामिभावसम्बन्ध एवेति भावेनाह ॥ तदिति ॥ तत्त्वमसीति पदविभागमभ्युपेत्यापि पूर्वोत्तरवाक्यानां भेदपरत्वात् भेदपरतया श्रुतिसिद्धमर्थान्तरं चाह ॥ त्वमपीति ॥ न सोऽसीति व्यावृत्तिकथनमात्रम् । इतोऽप्यैतदात्म्यपरामर्शोऽयमित्याह ॥ तदिति ॥ ऐतदात्म्यपरामर्शे तदितिपदस्यैकलिङ्गत्वं गुणः स्यात् । ततश्चैतदात्म्यपरामर्शोऽयमित्यर्थः । प्राचीनपक्षेपि तस्मादन्यदतदिति न लिङ्गवैषम्यम् ।

भवेदयमैतदात्म्यपरामर्शो भवतामनुगुणो यद्यैतदात्म्यपदेन तत्सम्बन्ध्युच्यते । न च तन्निश्चितम् । सर्वोऽपि ईशेशितव्यादिप्रपञ्चः परमात्मात्मक इत्यप्यर्थसम्भवादिति चेत् । तत्किमत्र ईशेशितव्यादिप्रपञ्चस्य साक्षात्परमात्माभेदोऽभिधीयत इति ते मतम् उत ईशेशितव्यादिप्रपञ्च एव परमात्मातिरिक्तो नास्तीति स्वरूपतो निषिध्यते ? नाद्यः । मिथ्यासत्ययोरभेदायोगात् । द्वितीयं दूषयति ॥ अविद्यमान-

---

स्यापीति ॥ श्रुतिसिद्धमिति ॥ 'तदीयस्त्वमसि' इति प्रागुदाहृतश्रुतिसिद्धमित्यर्थः । ननु 'अतत्त्वमसि' इति पक्षे असोऽसीति भाव्यमित्यत आह ॥ प्राचीनेति ॥ वस्तुपदाध्याहारेणातद्वस्त्वसीत्युपपत्तेर्न लिङ्गवैषम्यमित्यर्थः । शङ्कते भवेदिति ॥ तादृशवाक्याद्यभावेऽपीति ॥ अनुवादादिलिङ्गयत्तदादिशब्दोपेत-

यदिदं वदन्ति तन्न युज्यत इत्यादिवाक्यं परिहारे विशेषयुक्तिं च विना न दृष्टः। अतिप्रसङ्गश्चान्यथा। अभेदानुवादेन भेदोपदेशः किमिति न स्यात्।

सर्वशाखान्ते भेदोक्तेश्चैतदेव युक्तम्। 'नासंवत्सरवासिने प्रब्रूयात्[1] नाप्रवक्त्र इत्याचार्या आचार्याः।' 'अहं विश्वं भुवनमभ्यभवाम्।' 'अनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठतीति ब्रह्म-

---

मिति ॥ यद्येषा श्रुतिरीशेशितव्यादिप्रपञ्चं परमात्मातिरेकेण प्रतिषेधति तदोन्मत्तवाक्यवदप्रमाणं स्यात्। अविद्यमानस्यैवेशेशितव्यादिप्रपञ्चस्य स्वयमेव तदैक्षतेत्यादौ परमात्मातिरेकेण विहितत्वात्। न च वाच्यमत्र निषेद्धुं तदैक्षतेत्यादावीशेशितव्यादिप्रपञ्चोऽनूद्यत एव, अतो न दोष इति। ईशेशितव्यादिप्रपञ्चस्य श्रुतिं विनाऽऽत्मनो भिन्नत्वेनाप्राप्ततयाऽनुवादायोगादिति भावः।

इतोऽपि निषेधाय तदैक्षतेत्यादौ प्रपञ्चोऽनूद्यत इति न युज्यते। 'यदिदं वदन्ति तन्न युज्यते' इति वाक्येन, निषेधे विशेषयुक्त्या च हीनत्वात्। तद्विनाऽनुवादस्य क्वाप्यदृष्टत्वादित्याह ॥ अनुवादोऽपीति ॥ तादृशवाक्याद्यभावेऽपि निषेधायात्रानुवादः प्रपञ्चस्येत्यङ्गीकारे को दोष इति चेत् अदृष्टकल्पनेत्येकं दूषणम्। अपरं चाह ॥ अतिप्रसङ्गश्चेति ॥ कथमित्यत आह ॥ अभेदेति ॥ अन्यथेति सम्बध्यते। यद्येतादृशवाक्याद्यभावेऽप्यैतदात्म्यमित्यादौ निषेद्धुं तदैक्षतेत्यादिना परमात्मातिरिक्ततया प्रपञ्चोऽनूद्यत इति कल्प्यते तर्हि तदैक्षतेत्यादौ प्रपञ्चस्य परमात्मातिरेकेणाभावं निषिध्यातिरिक्तत्वेन भावं विधातुमैतदात्म्यमित्यादिना प्रपञ्चस्य परमात्मातिरेकेणाभावोऽनूद्यत इत्यपि स्यादविशेषादित्यर्थः।

इतश्च निषेधायायं प्रपञ्चस्य परमात्मातिरिक्ततया सद्भावानुवादो न भवतीत्येतदेव युक्तमित्याह ॥ सर्वेति ॥ अनुवादो भवन् शाखादावेव

---

1. A. 1. प्रब्रूयादिति नास्ति

विदो विदुः।' 'नमो विष्णवे महते करोमि।' पश्यन्त्यात्मन्यवस्थितम्।' इत्यादि।

न चेश्वरस्तद्भेदो वा प्रत्यक्षादिसिद्धः।

तत्पक्षे त्वैक्यादेरपि मिथ्यात्वात् स्वरूपस्य च सिद्धत्वाद्व्यर्थैव श्रुतिः।

भवेत्। तदन्ते तु निषेधः। न चात्र तदस्ति। भेदस्यैव शाखान्तेषूक्तत्वात्। अतोऽपि न भेदस्य निषेधाय श्रुतावनुवाद इत्यर्थः। शाखान्तेषु कास्ता भेदोक्तय इत्यत आह॥ नेति॥

यदुक्तमभेदानुवादेन भेदोपदेशः स्यादिति न तद्युज्यते। अभेदस्य श्रुतिं विनाऽप्राप्तत्वात्। किं नामेशेशितव्यादिप्रपञ्चस्य परमात्मभिन्नतयाऽनुवादेन तन्निषेध एव युक्तः। ईशेशितव्यादिप्रपञ्चस्य परमात्मभिन्नतायाः प्रत्यक्षादिप्राप्तत्वादित्यत आह॥ न चेति॥ अत्रेश्वरपदेन परमात्मोच्यते। परमात्मन एव प्रत्यक्षाद्यसिद्धत्वेन तत्प्रतियोगिकेशेशितव्यादिप्रपञ्चस्य भेदः सुतरां प्रत्यक्षाद्यसिद्धः। यदुच्यते श्रुतिसिद्धं परमात्मानं प्रतियोगीकृत्य प्रपञ्चस्य भेदः प्रत्यक्षादिना गृह्यत इति तन्न। तथासति प्रपञ्चभिन्नतया श्रुतावपि परमात्मनिरूपणप्रसङ्गात्। अन्यथा प्रत्यक्षादिनाऽपि तद्भेदस्य विषयीकर्तुमशक्यत्वात्। तथा चोन्मत्तवाक्यमेवेति भावः। ईश्वरस्यैव प्रत्यक्षादिनाऽसिद्धेरीशेशितव्यस्य च तदाकारेणासिद्धेः परमात्मनः सकाशादीश्वरादिरूपप्रपञ्चस्य भेदः सुतरां तेनासिद्ध इति वा।

इतोऽपि न परमात्मातिरिक्तप्रपञ्चनिषेधो युज्यत इत्याह॥ तत्पक्ष इति॥ यदि परमात्मातिरिक्तः सर्वोऽपि प्रपञ्चो मिथ्या स्यात् तदा सर्वश्रुतीनां वैयर्थ्यं स्यात्। तथाहि। 'एकमेवाद्वितीयम्' 'यः सर्वज्ञः'

वाक्यविशेषयुक्त्याद्यभावेऽपीत्यर्थः॥ परमात्मोच्यत इति॥ शुद्धब्रह्मेत्यर्थः॥ अन्यथेति॥ परमात्मनि जगद्भेदस्य श्रुत्या ग्रहण इत्यर्थः। ईश्वरपदस्य विशिष्टब्रह्मपरत्वमेत्रोपेत्यार्थमाह॥ ईश्वरस्यैवेति॥ असिद्धेरिति च्छेदः॥ तेनेति॥

लक्षितस्वरूपस्यापि न स्वरूपाद्विशेषः । निर्विशेषत्वोक्तेः । मिथ्याविशेषोक्तौ चाप्रामाण्यं श्रुतेः ।

मिथ्यात्वं च मिथ्यैव तेषाम् । अतः सत्यत्वं सत्यं स्यात् ।

उपाधिकृतभेदेऽप्युपाधेर्मिथ्यात्वे त्वप्राप्तमेवोपाधिभेदं प्रापयित्वा पुनर्निषिध्यत इति स एव दोषः । सत्योपाधिपक्षेऽपि हस्त-

---

इत्यादिश्रुतिरैक्यादिधर्मप्रतिपादिका उत आत्मस्वरूपप्रतिपादिका । आद्येऽप्यैक्यसार्वज्ञादिधर्माः किं स्वरूपातिरिक्ताः स्वरूपं वा । नाद्यः । तथात्वे मिथ्यात्वापातात् । द्वितीयस्तु तृतीयेऽन्तर्भवति । नाप्यसौ युक्तः । स्वरूपस्य स्वतः सिद्धत्वेन प्रतिपादनवैयर्थ्यादिति भावः ।

शुद्धस्वरूपस्याप्रतिपाद्यत्वेऽपि भेदाभावसार्वज्ञाद्युपलक्षितस्वरूपस्य प्रतिपाद्यत्वान्न श्रुतिवैयर्थ्यमित्यत आह ॥ लक्षितेति ॥ लक्षितस्यापि शुद्धाद्विशेषाभावेन तद्वदस्याप्यप्रतिपाद्यत्वान्न तत्प्रतिपादकत्वं श्रुतेर्युक्तमित्यर्थः । कुतः शुद्धाद्विशेषाभावो लक्षितस्येत्यत आह ॥ निर्विशेषत्वेति ॥ लक्षितमिति यदोक्तं तदैव तस्य निर्विशेषत्वमप्युक्तमेव । अन्यथा विशिष्टत्वापत्त्या मिथ्यात्वापातात् । अतस्तस्य न शुद्धाद्विशेष इति भावः । ननु भवतु धर्माणां मिथ्यात्वम् । तथापि श्रुतेस्तत्प्रतिपादकत्वे को दोष इत्यत आह ॥ मिथ्येति ॥

इतोऽपि नाऽत्मातिरिक्तस्य सर्वस्य मिथ्यात्वं युक्तमित्याह ॥ मिथ्यात्वमिति ॥ आत्मातिरिक्तस्य सर्वस्य मिथ्यात्वे तन्मिथ्यात्वं सत्यं मिथ्या वा । नाद्यः । आत्मातिरिक्तं सर्वं मिथ्येति पक्षक्षतेः । अतो मिथ्येत्येवाङ्गीकार्यमिति भावः । किमतो यद्येवमित्यत आह ॥ अत इति ॥ इतश्च नात्मविशेषाणां मिथ्यात्वमिति वाऽऽह ॥ मिथ्येति ॥

प्रत्यक्षादिनेत्यर्थः ॥ तृतीय इति ॥ स्वरूपप्रतिपादकेति पक्ष इत्यर्थः । पूर्वं शङ्कोत्तरत्वेन योजितमधुना श्रुतिवैय्यर्थ्यरूपयुक्त्यपेक्षया युक्त्यन्तरोक्तिपरत्वेन योजयति ॥ इतश्चेत्यादिना ॥ उक्तेति ॥ वैय्यर्थ्यरूपदोष इत्यर्थः । तन्निमि-

पादाद्युपाधिभेदेऽपि भोक्तुरेकत्वदृष्टेरेकेनैवेश्वरेण सर्वोपाधिगतं सुखं दुःखं भुज्येते[1]त्येवमादयो दोषाः समा एव ।

अचेतनानामनुभवाभावान्न तत्साम्यम् । अतो जीवेश्वरयोर्भेद एवेति सिद्धम् ॥ १८ ॥

न सार्वज्ञादिविशेषा असन्तो येन श्रुतेरप्रामाण्यं स्यात् । नापि शुद्धं लक्ष्यं वा ज्ञानस्वरूपं श्रुतिवेद्यमित्युच्यते । येनोक्तदोषः स्यात् । किं नामैकस्मिन्नेवात्मनि उपाधिभेदभिन्ने तन्निमित्तसार्वज्ञादिविशेषाश्च भवन्ति । तदुपाधिभेदभिन्नमौपाधिकविशेषविशिष्टस्वरूपं श्रुतिप्रतिपाद्य-मिति चेत्, किमसावुपाधिः मिथ्या सत्यो वा ॥ आद्ये दोषमाह ॥ उपाधीति ॥ उपाधिकृत एवात्मनि भेदो विशेषाश्चेत्यङ्गीकृत्योपाधेर्मिथ्या-त्वाङ्गीकारे तद्भिन्नस्वरूपस्य तन्निमित्तविशेषाणां च मिथ्यात्वं स्यात् । तथाच तदभिधायकश्रुतेरप्रामाण्यं स्यात् । नेह नानेत्यादौ निषेधाय मिथ्याभूतमपि तदुच्यते श्रुताविति चेत्तर्हि स्वयमेव मिथ्याभूतमुपाधि-भेदभिन्नस्वरूपं तन्निमित्तविशेषांश्च विधाय पुनस्तन्निषेधे श्रुतेरुन्मत्त-वाक्यत्वमेव स्यात् । निषेधाय तदनूद्यत इति चेन्न । उपाधिभेदभिन्न-स्वरूपस्य तन्निमित्तविशेषाणां च प्रत्यक्षाद्यप्राप्तत्वेनानुवादानुपपत्तेरिति भावः । द्वितीयं दूषयति । सत्येति ॥ यद्यप्यत्रापसिद्धान्तो वक्तुं शक्यः । तथापि तस्यातिस्फुटत्वेन दोषान्तरमेवोक्तम् । ब्रह्मातिरिक्तस्य सत्यत्व-मङ्गीकृत्यापि ब्रह्मण्युपाधिभेदमङ्गीकुर्वतां दूषणाय च । आदिपदेनोपाधेर-प्येकदेशसम्बन्ध इत्यादिवक्ष्यमाणसङ्ग्रहः । सत्योपाधिपक्षेऽपि दोषाः समा इत्यनेन मिथ्योपाधिपक्षेऽप्येते भवन्तीति सूचयति ।

त्तेति ॥ उपाधिनिमित्तेत्यर्थः । उपाधीति मूलवाक्यं खण्डशः शेषोक्त्या व्याचष्टे ॥ उपाधिकृत एवेत्यादिना भाव इत्यन्तेन ॥ दूषणाय चेति ॥ दोषा-न्तरमित्यन्वयः ॥ इत्यादिवक्ष्यमाणेति ॥ एकादशे । हन्तृशब्दार्थमाह ॥

---

1. A. 1. सर्वोपाधिगतं दुःखं प्रति प्रति भुज्येत

य एनं जीवं वेत्ति हन्तारं स्वातन्त्र्येण। अन्यथा 'मया हतांस्त्वं जहि' इत्यादिविरोधः।

चेतनं प्रति य एनमिति परमात्मनोऽपि समम् ॥ १९ ॥

नन्वेकत्वेऽप्याकाशस्य यथा महानसाकाशगतधूमानुभवस्तस्यैव न सर्वाकाशस्योपाधिभेदात्। तथाऽत्रापि स्यादित्यत आह ॥ अचेतनानामिति ॥ किं महानसाकाशसम्बन्धवत्त्वेऽपि धूमस्य सर्वाकाशसम्बन्धाभाववद्दुःखाश्रयत्वाभावोऽस्त्वित्युच्यते उत तदनुभवाभाववदनुभवाभावः। नाद्यः। अस्माकमनिष्टाभावात्। न द्वितीयः। आकाशस्याचेतनत्वेन अनुभवप्राप्तेरेवाभावेन दृष्टान्तवैषम्यादिति भावः। अयं चाभ्युपगमवादः। आकाशस्यान्तर्भेदवत्त्वात्। उपसंहरति ॥ अत इति ॥ १८ ॥

यदुक्तं सर्वप्रकारेणाविनाशित्वादीश्वरः स्वतन्त्र इति। तदयुक्तम्। 'अयमस्य देहवियोगकर्ता', 'अनेनायं देहाद्वियोजितः' इति जीवस्यापि स्वातन्त्र्यप्रतीतेरित्याशङ्कापरिहारायोच्यते "य एनमिति"। तत्र जीवस्य देहवियोगादौ कथमपि कर्तृत्वं नास्तीत्यन्यथाप्रतीतिनिरासायाह ॥ य एनमिति ॥ य एनं जीवं स्वातन्त्र्येण देहवियोगकर्तारं पश्यति, यश्चैनं जीवं जीवान्तरेण स्वातन्त्र्येण देहाद्वियोजितं पश्यति तौ न विजानीत इत्येवं व्याख्येयम्। न तु पारतन्त्र्येणापि जीवस्य हन्तृत्वादिकं पश्यन् न जानातीत्यर्थः। कुतोऽन्योऽर्थो न स्यादित्यत आह ॥ अन्यथेति ॥ जीवस्य पारतन्त्र्येणापि हन्तृत्वाभावे 'मया हतांस्त्वं जहि' इतीश्वराधीनतया जीवस्य हन्तृत्वोक्तिविरोधः स्यादित्यर्थः।

यदुक्तं जीवो नित्य इति न तद्युक्तम्। 'अयं जीवस्य हन्ता', 'अनेनायं जीवो हतः' इति व्यवहारेण चेतनस्यानित्यत्वावगमादित्याशङ्का-

---

देहवियोगकर्तेति ॥ हतशब्दार्थो देहाद्वियोजित इति ॥ मयेति ॥

'मया हतांस्त्वं जहि मा व्यथिष्ठा
युध्यस्व जेताऽसि रणे सपत्नान्।'

इत्येकादशोक्तिविरोध इत्यर्थः ॥ अयमेव श्लोक इति ॥ भाष्ये तथा योजित-

जीवेश्वरयोर्नित्यत्वे मन्त्रवर्णोऽप्यस्तीत्याह ॥ न जायते म्रियते इति ॥ अयं ना परमपुरुषो भूत्वा विद्यमान एव देहसम्बन्धरूपेणापि भविता न। मरणं तु देहवियोग इति सिद्धमेव। न हि घटादीनां मरणव्यवहारः। स्वरूपानाशः कैमुत्येनैव सिद्धः।

अयं जीवोऽप्यजो नित्यश्च। अन्यथा पुनरुक्तेः। शाश्वतश्च। न कदाचिदस्वातन्त्र्यादिकं जीवस्वरूपं जहाति।

परिहारायाप्ययमेव श्लोकः। तत्र प्रथमपक्षे य एनमिति पदं जीवविषयतया व्याख्यातम्। नेश्वरविषयतया। तत्र देहवियोगरूपहननस्य विवक्षितत्वात्। तत्र जीवस्यैव स्वातन्त्र्याभावादीश्वरस्य तद्भावात्। अस्मिन् पक्षे तु 'य एनं चेतनं हन्तारं पश्यति स न जानाति' इति चेतनं प्रति हननस्य विवक्षितत्वात्। चेतनहननस्य जीववदीश्वरेणाप्यकरणात् एनमिति पदमुभयोरपि वाचकमित्याह ॥ चेतनमिति ॥ १९ ॥

ननु जीवनित्यत्वादेः पूर्वमेवोक्तत्वात्किमुत्तरश्लोकेनेत्यत आह ॥ जीवेति ॥ नेदं भगवद्वाक्यं, येन पुनरुक्तिः स्यात्। किन्तु यदुक्तं स्वयं जीवेश्वरयोरुत्पत्तिविनाशराहित्यम्, ईश्वरस्य शरीरतोऽप्युत्पत्त्याद्यभावेन स्वातन्त्र्यं, जीवस्य स्वरूपतो जन्मादिशून्यस्यापि देहोत्पत्त्यादिनाऽस्वातन्त्र्यं तत्र प्रमाणत्वेन मन्त्रवर्णोऽयमुदाह्रियत इति भावः।

अत्रेश्वरप्रतिपादनाप्रतीतेः कथमेतदित्यतो नायं भूत्वेत्यत्र देहतोऽप्युत्पत्तिराहित्यश्रवणात्तस्य चेश्वरलिङ्गत्वात् पूर्वार्धस्तत्प्रतिपादक इति भावेनाह ॥ अयमिति ॥ एतेन वा शब्दादेव पूर्वत्र नञोऽनुकर्षसम्भवात् किं तदन्तरेणेति परास्तम्। अपि चात्र 'न म्रियते' इति देहवियोगाभावश्च श्रूयते। मरणशब्दस्य देहवियोग एव प्रसिद्धत्वाद्देहवियोगाभावस्य चेश्वरलिङ्गत्वात् तत्प्रतिपादकः पूर्वार्धे इति भावेनाह ॥ मरणमिति ॥ देहवियोग इव स्वरूपनाशेऽपि मरणशब्दस्य प्रसिद्धत्वात्

त्वादिति भावः ॥ एतेनेति ॥ 'ना परमपुरुषः' इति व्याख्यानेनेत्यर्थः ॥

'अल्पशक्तिरसार्वज्ञं पारतन्त्र्यमपूर्णता ।
उपजीवकत्वं जीवत्वमीशत्वं तद्विपर्ययः ॥
स्वाभाविकं तयोरेतन्नान्यथा स्यात्कथञ्चन ।
वदन्ति शाश्वतावेतावत एव महाजनाः ॥'

इति महाविष्णुपुराणे । पुराण्यणति गच्छतीति पुराणः ॥ २० ॥

सोऽर्थः किं न स्यादित्यतः स्वरूपनाशे मरणशब्दस्य प्रसिद्धिरेव नास्तीत्याह ॥ न हीति ॥ यदि मरणशब्दस्य न स्वरूपनाशोऽर्थः तर्हि ईश्वरस्वरूपानाशे नायं मन्त्रः प्रमाणं स्यात् । तदभिधायकशब्दान्तराभावात् । तथा च मरणशब्दस्य स्वरूपनाशेऽर्थे ग्राह्ये नैतद्बलात् पूर्वार्धस्येश्वरपरत्वसिद्धिरित्यत आह ॥ स्वरूपेति ॥ नात्रेश्वरस्य स्वरूपानाशो वक्तव्यः । येनैतत्पदस्य तत्परत्वं कल्प्यते । यस्य देहनाशोपि नास्ति तस्य स्वरूपानाशः किमु वाच्य इति कैमुत्येनैव सिद्धेरित्यर्थः ।

अत्र जीवस्योत्पत्त्याद्यभावादिकथनं न श्रूयत इत्युत्तरार्धस्तद्विषय इति भावेनाह ॥ अयमिति ॥ अत्रापीश्वर एव प्रतिपाद्यः किं न स्यादित्यत आह ॥ अन्यथेति ॥ 'न जायते' 'अजः' इति पौनरुक्त्यम् । ननु पुनरुक्तिभयेन पूर्वोत्तरार्धयोर्विषयभेदकल्पने शाश्वतोप्यन्य एव प्रसज्यते । नित्यपदेन पुनरुक्तेरित्यत आह ॥ शाश्वतश्चेति ॥ अयं जीव एवेति सम्बध्यते । तर्हि पुनरुक्तिरित्यत आह ॥ नेति ॥ न शाश्वतपदेन नित्यत्वमुच्यते । येन पुनरुक्तिः स्यात् । अपि तु जीवोप्यजो नित्यश्चेत्तर्हि ईश्वरवत्स्वातन्त्र्यादिमानपि स्यात् । तथा च न तत्पूजा कार्येति शङ्कानिरासाय तस्यास्वातन्त्र्याद्यहानमेवोच्यत इति भावः ।

जीवस्यास्वातन्त्र्यादिकं स्वरूपं, तच्च न जहाति, तेन च शाश्वत इत्युच्यत इत्येतत्कुत इत्यत आह ॥ अल्पेति ॥ तथापि पुराण इति पुनरुक्तिरित्यत आह ॥ पुराणीति ॥ नानेन पुराणपदेनानादित्वमुच्यते । येन पौनरुक्त्यं स्यात् । किन्तु जीवस्येश्वरवदजत्वादिसद्भावेऽपि कुतो

अविनाशिनं शरीरापायादिवर्जितम् । नित्यं स्वरूपतः । एनं परमेश्वरम् ।

'कर्तृत्वं तु स्वतन्त्रत्वं तदेकस्य हरेर्भवेत् ।
तच्चाव्ययं तस्य जानन् कथं कर्ता स्वयं भवेत् ॥'

इति परमश्रुतिः । अन्यथाऽविनाशिनं नित्यमिति पुनरुक्तिः ॥ २१ ॥

न स्वातन्त्र्यादीत्यतो देहोत्पत्त्यादिभावेन तद्वद्जत्वाद्यभाव एवोच्यत इति भावः ॥ २० ॥

यदुक्तं 'जीवे स्वातन्त्र्यं मन्यमानो न जानाति' इति तत्र 'नायं हन्ति' इति हेतुरुक्तः । अथ ज्ञानिनां तादृशाभिमानाभावश्च तत्र हेतुरुच्यते "वेदेति" । तत्राविनाशिनित्यपदयोः पौनरुक्त्यपरिहारायार्थभेदमाह ॥ अविनाशिनमिति ॥ जीवस्य समीपोक्तत्वादेनमित्यस्य जीवविषयत्वप्रतीतिनिरासायाह ॥ एनमिति ॥ समस्तश्लोकं श्रुत्यैव व्याचष्टे ॥ कर्तृत्वमिति ॥ जानन् अविनाशित्वादिहेतुनेति शेषः । कर्ता कर्तृत्वाभिमानी । जीवस्य समीपोक्तत्वात्तद्विषयोऽयं श्लोकः किं न स्यादित्यत आह ॥ अन्यथेति ॥ ईश्वरस्य शरीरापायरहितत्वात् तत्परत्वे शक्यते पुनरुक्तिपरिहारः । न तु जीवपरत्वे । तस्य देहनाशसद्भावात् । अतः पुनरुक्तिविरोधात् समीपोक्तमपि जीवं विहायेश्वरग्रहणं युक्तमिति भावः ॥ २१ ॥

अस्मिन् पक्षे नरान्तरभावादिति भावः ॥ हेतुरुक्त इति ॥ स्वातन्त्र्येण न हन्तीत्यत्रास्वातन्त्र्यरूपो हेतुरुक्त इत्यर्थः ॥ तादृशाभिमानाभाव इति ॥ हन्तृत्वहन्यमानत्वादौ स्वातन्त्र्याभिमानाभावश्च तत्र स्वातन्त्र्येण हननकर्तृत्वाद्यज्ञाने हेतुरुच्यत इत्यर्थः । ज्ञानी चेच्छत्रुं हन्ति हन्यते च तदा स ज्ञानी स्वस्य हनने स्वातन्त्र्यं न जानाति, स्वातन्त्र्यभ्रान्तिरूपाभिमानाभावादिति वा

जीवस्यापि शरीरसंयोगवियोगावेव जनिमृती यतस्ततो न दुःखकारणमित्याह ॥ वासांसीति ॥ २२ ॥

कारणतोऽपि नेश्वरस्यान्यथात्वमित्याह ॥ नैनं छिंदन्तीति ॥२३

अच्छेद्यत्वादिकं जीवस्यापि तत्सममित्याह ॥ अच्छेद्योऽयमिति ॥ नित्यं सर्वगते स्थितः अणुश्चायमिति सर्वगतस्थाणुः । सर्वगतो विष्णुः । तदधीनत्वादिकं तत्स्थत्वम् ।

नन्वस्त्वीश्वरविषये शोकाभावो, जीवविषये तु भविष्यति । जीवो नित्यस्तस्य देहयोगवियोगौ कौमारादिवदित्युक्तेऽपि सर्वलोकप्रसिद्धजनिमृतिसद्भावात् युद्धे च तत्प्राप्तेरियाशङ्कापरिहारत्वेन श्लोकमवतारयति ॥ जीवस्येति ॥ शरीरयोगवियोगयोः कौमरादिवच्छोककारणत्वाभावोऽङ्गीकृतश्चेत्तर्हि जनिमृती अपि न शोककारणं, यतः शरीरयोगवियोगावेव जनिमृती इत्यर्थः ॥ २२ ॥

अस्त्वीश्वरस्य स्वतो नाशाभावः । तथापि युद्धगतशस्त्रादिकारणविशेषेण च्छेदादिप्राप्तेः शोक इत्याशङ्कापरिहारत्वेन श्लोकमवतारयति ॥ कारणतोऽपीति ॥ अन्यथात्वं छेदादि ॥ २३ ॥

जीवविषयेऽप्येतदाशङ्कापरिहाराय श्लोकमवतारयति ॥ अच्छेद्यत्वेति ॥ ननु 'नित्यः सर्वगतः' इति नित्यत्वं पुनः किमर्थमुच्यते । अत्र सर्वगतवस्तुप्रतिपादनात् कथं चास्य जीवविषयत्वम् ? न चायमर्थ ईश्वरविषयः । जीवस्य समीपोक्तत्वादित्यत आह ॥ नित्यमिति ॥ नित्यं सर्वगतस्थाणुरित्यर्थः । कः सर्वगतः ? किं च तत्स्थत्वमित्यत आह ॥ सर्वगत इति ॥ नात्र नित्यत्वं सर्वगतत्वं चोच्यते । येन पुनरुक्तिरीश्वरविषयत्वं चाशङ्केत । किन्तु 'जीवस्यापीश्वरवदच्छेद्यत्वादिसद्भावे सर्व-

---

देहाद्यभिमानाभावादिति वाऽभिप्रायः ॥ समीपोक्तत्वादिति ॥ पुराणपदेनेति भावः । मूलं योजयति ॥ शरीरयोगवियोगयोरिति ॥ एतदाशङ्कापरिहारायेति ॥ जीवस्य कालतो बिम्बादिनाशनिमित्ततो वा नाशाभावेऽपि युद्धादिगत-

हेतुतोऽपि तत्स्थत्वान्न चलतीत्यचलः। नादेन शब्देन सह वर्तत इति सनातनः।

'नित्यं सर्वगते विष्णावणुर्जीवो व्यवस्थितः।
न चास्य तदधीनत्वं हेतुतोऽपि विचाल्यते ॥

साम्यम्, तथाच किं तत्पूजया' इत्यतो नित्यं तदधीनत्वाद्येवोच्यत इति भावः। सर्वगतस्थाणुत्वोक्त्या वैषम्यहेतुर्दर्शितः।

नन्वत्र सर्वगत इत्येव युक्तम्। न तु सर्वगतस्थ इति। सर्वगतस्यैवाचलत्वोपपत्तेः। अणौ तदनुपपत्तेरित्यत आह ॥ हेतुतोऽपीति ॥ नात्राचलपदेन क्रियाराहित्यमुच्यते। येन सर्वगत इत्येव पदविभागशङ्का। किन्त्वस्तु जीवस्येश्वराधीनत्वम्। तदपि कदाचिन्नश्यति। ततश्च सर्वसाम्यम्। तथाच न तत्पूजा कार्येत्यतः तदधीनत्वानाश एवोच्यत इति भावः। नित्यपदेनैवास्यार्थस्य सिद्धेः किमनेनेत्यत उक्तं हेतुत इति। नित्यमपि सर्वगतस्थत्वं वरादिकारणविशेषेण नश्यत्विति शङ्कानिराकरणान्नैतद्वैयर्थ्यमिति भावः। तथापि सनातन इति पुनरुक्तिरित्यत आह ॥ नादेनेति ॥ न सनातनपदेन नित्यत्वमुच्यते। येन पुनरुक्तिः स्यात्। अपि तु स्वातन्त्र्याभावे जीवस्य विधिनिषेधबद्धत्वं

शत्रादिकारणविशेषात्स्याद्विनाश इति शङ्कापरिहारायेत्यर्थः ॥ समीपोक्तत्वादिति ॥ पूर्वार्धोक्तत्वादित्यर्थः। नित्यं सर्वगते स्थितोऽणुश्चेत्यर्थोक्त्या गीतावाक्यस्य कथं योजनेत्यत आह ॥ नित्यमिति ॥ यद्वा सर्वगतस्थाणुरिति मूलवाक्यस्य नित्यपदसंयोजनेनार्थमाह ॥ नित्यमिति ॥ अन्यथा व्याख्यानव्याख्येययोर्वैरूप्यापत्तेरिति भावः ॥ वैषम्यहेतुर्दर्शित इति ॥ ईश्वरवज्जीवस्याच्छेद्यत्वादिसद्भावेऽपि न सर्वसाम्यमित्यत्र सर्वगतत्वाणुत्वरूपो हेतुर्दर्शित इत्यर्थः। अचल इत्युक्तं क्रियाराहित्यं सर्वगतस्य विशेषणं युक्तम्। गगनादौ सर्वगते चलनादृष्टेः। अतः सर्वगत इति पृथक्पदेन भाव्यमिति शङ्कते ॥ अत्रेत्यादिना ॥ अत एवेत्यस्य विवरणायोक्तम् ॥

निषेधविधिपात्रत्वात् सनातन इति स्मृतः ॥
इति महाविष्णुपुराणे । अच्छेद्योऽयमित्यादिपुनरुक्तिश्चान्यथा ।

यस्मिन्नयं स्थितः सोऽव्यक्ताचिन्त्यादिरूपः । एवं ज्ञातः परमेश्वरः सर्वदुःखनाशं करोतीति नानुशोचितुमर्हसि । तेषामहं समुद्धर्तेत्यादेः ।

हेत्वन्तरमुच्यत इति भावः । अत एवानूक्तहेतूपन्यासात्प्राक् अस्वातन्त्र्योक्तावप्यपौनरुक्त्यम् ।

नन्वच्छेद्य इति श्लोकः प्रकृतेश्वरविषय एव किं न स्यात् । किमनेन प्रतीतपदविभागत्यागादिनेत्यत आह ॥ नित्यमिति ॥ स्मृतिसमाख्यानाज्जीवविषय एवायं श्लोक इति भावः । इतोऽपि नायं श्लोक ईश्वरविषय इत्याह ॥ अच्छेद्य इति । 'नैनं छिन्दन्ति' इतीश्वरस्याच्छेद्यत्वादेरुक्तत्वात् 'अच्छेद्योऽयम्' इत्यच्छेद्यत्वादेः पुनरुक्तिप्रसङ्गोऽस्य श्लोकस्येश्वरविषयतायाम् । अतो नायं तत्पर इत्यर्थः ।

जीवस्य समीपोक्तत्वात् 'अव्यक्तोऽयम्' इत्यस्यापि तद्विषयत्वप्रतीतिनिरासायाह ॥ यस्मिन्निति ॥ यस्मिन्नयं स्थित इत्युक्त्या सर्वगतपदेनेश्वरस्यापि समीपोक्तत्वं सूचयति । यद्यत्रेश्वरः प्रतिपाद्यस्तर्हितस्मादित्युत्तरवाक्यमनुपपन्नं स्यात् । न हीश्वरस्याव्यक्तत्वादिज्ञाने युद्धगतशोकाभावो भवति । नाप्यस्मिन् पक्षे तस्मादिति परामर्शविषयोऽस्ति । यदि तस्य जीवविषयता तदा दूरोक्तत्वदोष इत्यत आह ॥ एवमिति ॥ नात्र युद्धगतशोको निवार्यते । नापि तस्मादिति परामर्शविषयाभावः । यतोऽत्राच्छेद्यत्वादिसाम्याज्जीवस्यापि स्वातन्त्र्येण किमीश्वरपूजयेत्यतः

हेतूपन्यासादिति ॥ सर्वगतस्थपदोक्तास्वातन्त्र्यरूपे साध्ये विधिनिषेधबद्धत्वरूपहेतूपन्यासादित्यर्थः ॥ अस्मिन् पक्ष इति ॥ पूर्वार्धस्येश्वरपरत्वपक्ष इत्यर्थः ॥

'न त्वेवाहं जातु नासं न त्वम्' इत्युभयोरपि प्रस्तुतत्वात् । देहिनः शरीरिणः देहीति विशेषितत्वाच्च जीवस्य तत्र तत्र । 'अविनाशि तु', 'येन सर्वमिदं ततम्', 'अनाशिनोऽप्रमेयस्य', 'न म्रियते', 'भूत्वा भविता न', 'अविनाशिनम्', 'अव्ययम्', 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयम्' इत्यादि परमात्मनश्च ।

सनातनत्वादिहेतुना ईश्वरस्यैव स्वातन्त्र्यमुक्तम् । अस्त्वीश्वरस्य स्वातन्त्र्यं, किं तावता तत्पूजयेत्यतो यस्मादीश्वर एव स्वतन्त्रोऽस्तस्यैव संसारशोकनाशकत्वं युज्यते । स च स्वकर्मणाऽव्यक्तत्वादिगुणयुक्तत्वेन ज्ञात एव सर्वसंसारदुःखनाशं करोति । तस्मात् युद्धादिस्वकर्मणाऽव्यक्तत्वादिरूपेण तं ज्ञात्वा संसारशोकं परिहरेत्येवोच्यत इति भावः ।

भवेदयमत्रार्थोऽभिप्रेतो यदि स्वकर्मणा भगवज्ज्ञानं, ज्ञातो भगवान् सर्वदुःखनाशं करोतीति गीताभिमतं स्यात् । तदेव कुत इत्यत आह ॥ तेषामिति ॥ अत्र मां ध्यायन्त इत्यनेनैव ज्ञानं लभ्यते ।

एवमेतत्प्रकरणं जीवेश्वरपरतया व्याख्याय अथास्योभयपरत्वे युक्तिं चाह ॥ न त्वेवेति ॥ नन्वेकः प्रसङ्गादेवोपक्रान्तः । प्रकरणं त्वेकविषयमेव किं न स्यादित्यतः सर्वत्रोभयलिङ्गसद्भावादुभयविषयं प्रकरणमित्याह ॥ देहिन इति ॥ अस्तूपक्रमवशादुभयोः प्राकरणिकत्वं तथापि यद्वाक्यं यद्विषयतया व्याख्यातं तस्य तद्विषयता कुत इत्यतो यद्वाक्यं यद्विषयतया व्याख्यातं तत्र तल्लिङ्गसद्भावात्तस्य तद्विषयत्वं युक्तमिति वाऽऽह ॥ देहिन इति ॥

नन्वस्तु तत्र तत्र जीवः प्रतिपाद्यः । देहित्वादिविशेषणानां जीवादन्यत्र निरवकाशत्वात् । अविनाशित्वादीनां तु जीवेऽपि सम्भवात् कथं तद्वाक्यस्येश्वरविषयत्वनिश्चय इत्यत आह ॥ न हीति ॥ ईश्वरेऽपि

सनातनत्वादिहेतुनेति ॥ जीवस्य विधिनिषेधबद्धत्वप्रतिबिम्बत्वहेतुनेत्यर्थः । तस्मादिति परामर्शविषयमाह ॥ यस्मादित्यादिना ॥ तस्मादित्यस्यार्थमाह ॥

न हि जीवेन ततं सर्वम् । न च मुख्यतोऽप्रमेयोऽसौ । न चाविनाशिनं नित्यमिति नित्यत्वातिरिक्तमविनाशित्वं तस्य । न चाव्यक्तत्वमविकार्यत्वं च मुख्यम् । न च 'भूत्वा भविता वा न' इति देहस्याप्यनुत्पत्तिः । परमात्मनस्तु देहवियोगादिकमपि नास्तीति 'अविनाशि तु' इत्यादि विशेषणम् ।

तत्सम्भवः कथमित्यत आह ॥ परमात्मन इति ॥ न च तत्र तत्र भाष्यविरोधः शङ्कनीयः । अत्र च मुख्ययैव वृत्त्यार्थमङ्गीकृत्य पौनरुक्त्यादिशङ्कोन्मूलनं विना केवलामुख्यार्थग्रहणे बाधकानामुक्तत्वात् । भाष्ये पुनर्मुख्यार्थमपरित्यज्यैवार्थान्तरस्योक्तत्वादिति ॥

तथापि नैतेषां वाक्यानामुक्तार्थता युक्ता । असङ्गतत्वादित्यतो 'नासतः' इत्यन्तानां सङ्गतेरुक्तत्वात् 'अविनाशि तु' इत्यादीनां सङ्गतिं

तस्माद्युद्धादीत्यादिना ॥ तेषामित्यस्य लाभमाह ॥ मामिति ॥

'ये तु सर्वाणि कर्माणि मयि सन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ॥'

इति पूर्वार्धे श्रवणात् द्वादशाध्याय इति भावः । अथेत्यर्थान्तरेऽथशब्दः । एक इति भगवद्रूपः । जीवस्यानादिनित्यत्वे दृष्टान्तत्वेनोपक्रान्त इत्यर्थः ॥ न च तत्र तत्रेति ॥ 'अविनाशि तु' इत्यस्य वेदादिपरत्वमुक्तं भाष्ये । अनाशिन इत्यस्य जीवपरत्वं, अविनाशिनमित्यस्य देहयोगरहितमित्यादिना जीवपरत्वमुक्तमतस्तद्विरोध इत्यर्थः ॥ पौनरुक्त्यादिशङ्केति ॥ ऐक्योक्तावप्यनुक्तविशेषणोपादानान्नेश्वरैक्ये पुनरुक्तिरित्यादिना पुनरुक्तिवैयर्थ्यशङ्कयोरुन्मूलनं भाष्ये कृतम् । अत्र तु मुख्यार्थग्रहणेन व्याख्याने तादृशशङ्कैव नेति न तदुन्मूलनं कार्यमिति भावः ॥ बाधकानामिति ॥ 'न च जीवानां देशतो गुणतश्च पूर्णता । न हि जीवेन ततम्' इत्यादिनोक्तत्वादित्यर्थः । अर्थान्तरस्य वेदादिरूपस्येत्यर्थः ॥ सङ्गतेरुक्तत्वादिति ॥ सङ्गततया प्रति-

यस्मादेवम्भूतस्तस्मात् स एव स्वतन्त्रस्तदधीनमन्यत्सर्वम् । अतः स एव सर्वपुरुषार्थदः । अतस्तत्पूजा सत्कर्मैव । अतस्तदर्थं युध्यस्व । अन्येषां त्वन्तवन्त एव देहाः । प्राकृतदेहिनश्च । अतोऽस्वतन्त्रत्वान्न हन्तुं तेषां सामर्थ्यम् । नित्यत्वान्न हन्यते च । तस्माद्धन्ता हत इति मन्यमानौ न विजानीतः । यस्मादयमेव परमेश्वरः शरीर-

---

दर्शयन् 'अविनाशि तु' इत्यस्य श्लोकस्य 'नासतः' इत्यनेन सङ्गतिं साक्षादसम्भवादवतारक्रमेणाह ॥ यस्मादिति ॥ एवम्भूत इति ॥ सर्वप्रकारेणाविनाशीत्यर्थः । अस्य श्लोकस्योक्तप्रकारेण 'अनाशिनः' इति वक्ष्यमाणेनापि सङ्गतिरित्याह ॥ अतस्तदर्थमिति ॥ अथवा 'नासतः' इत्येतच्छेषत्वेनापि 'अनाशिनः' इत्यस्य सङ्गतिरित्यनेनोक्तम् । 'अन्तवन्तः' इत्यस्योक्तरीत्या 'अनाशिनः' इत्यनेन सङ्गतौ सिद्धायां 'नायं हन्ति' इत्यनेनापि सङ्गतिरित्याह ॥ अन्येषामिति ॥ प्राकृतदेहिनश्च । जीवा इति शेषः । अनेन 'शरीरिणः' इत्यस्योपयोगमाचष्टे । नित्यत्वादित्यनेन 'नित्यस्य' इत्यस्य । अत एवास्य 'न त्वेवाहम्', 'देहिनोऽस्मिन्' इत्यनेन गतार्थताऽपि परिहृता भवति । 'नायं हन्ति' इत्यत्र हेतुतया प्रकृतानुवादोऽयमित्याश्रयणात् । अत एवोक्तं 'नित्यस्योक्ताः' इति । 'नायं हन्ति' इत्यस्य 'य एनम्' इत्यनेन सङ्गतिमाह ॥ तस्माद्धन्तेति ॥ एतेन 'नायं हन्ति' इत्येतत्पुनरुक्तम् । जीवा-

---

श्लोकमवतारितत्वादिति भावः ॥ इत्येतच्छेषत्वेनेति ॥ नासत इत्यस्यासत्कर्मसत्कर्मभ्यां सुखदुःखे न स्त इति व्याख्यानादिह च तत्पूजा सत्कर्मैवेत्युक्त्वाऽतस्तदर्थे युद्धस्वेत्युक्तेरिति भावः ॥ उक्तरीत्येति ॥ 'न च जीवानां देशतो गुणतश्च पूर्णता अनिच्छया देहहान्यादेर्दुःखावाप्तिश्च सिद्धा । तस्मादनाशिनोप्रमेयस्य पूजार्थं युध्यस्व' इति प्रागुक्तदिशेत्यर्थः ॥ इत्यस्येति ॥ उपयोगमाचष्ट इत्यनुकर्षः । अत एवेत्युक्तं हेतुं व्यनक्ति ॥ नायमित्यादिना ॥ प्रकृतेति ॥ न त्वेवेति श्लोकप्रकृतजीवनित्यत्वस्य देहिनोऽस्मिन्निति प्रकृत-

वियोगरूपेणापि न म्रियते, तत्संयोगरूपेणापि न जायते जीववत्कदाऽपि, अतः स एव स्वतन्त्रत्वात्सर्वस्य हन्ता । जीवस्तु तेन शरीरे हन्यमाने स्वयं न हन्यत इत्येतावत् । अत एवमविनाशित्वादेः

स्वातन्त्र्यादेरुक्तत्वात् । न च 'य एनम्' इत्येतदुपपादनायोक्तानुवादोऽयं, प्रमाणानुपन्यासेनोपपादनायोगादित्येतदपि परास्तम् । 'नायं हन्ति' इत्येतत्प्रकृतम् 'अन्तवन्तः' इत्यपेक्ष्य प्रवृत्तमित्युक्तत्वात् । मन्त्रवर्णस्य जीवेश्वरनित्यत्वोपपादकत्वमुक्तम् । 'नायं हन्ति' इत्येतदुपपादकत्वेनापि सङ्गतिरित्याह ॥ यस्मादयमेवेति ॥ एतेन मन्त्रवर्णस्य जीवेश्वरनित्यत्वमात्रोपपादकत्वेऽधिकविशेषणोक्तेरनुपयोग इत्येतदपरिहृतम् । जीववदित्यनेन 'पुराणः' इत्यस्योपयोगं दर्शयति । 'न हन्यते' इत्यस्य पूर्वार्धप्रकृतेन परमेश्वरस्यैव स्वातन्त्र्यमित्यनेन सङ्गतिमभिप्रेत्य तद्घटनाय तात्पर्यमाह ॥ जीवस्त्विति ॥ अनेनास्य गतार्थता परिहृता भवति ।

'वेदाविनाशिनम्' इतीश्वराविनाशित्वादेः 'कथं स पुरुषः' इत्यनेन साक्षात्सङ्गतेरभावादवतारक्रमेण तामाह ॥ अत एवमिति ॥ एतेनेश्वराविनाशित्वादेः प्रागेवोक्तत्वात्पुनरुक्तिरित्यपि परास्तम् । 'कथं स पुरुषः' इत्येतदुपपादकस्वातन्त्र्योपपादनायोक्तानुवादोऽयमित्याश्रित-

---

प्राकृतदेहप्राप्तिमात्रस्य चेह शरीरण इति नित्यस्येत्यनुवादादित्यर्थः ॥ अत एवेति ॥ अनुवादादेवेत्यर्थः ॥ उक्तत्वादिति ॥ अन्तवन्त इत्यादिनोक्तत्वादित्यर्थः ॥ आदिपदेन नित्यत्वग्रहः । इत्येतत्प्रवृत्तमित्यन्वयः ॥ अधिकविशेषणोक्तेरिति ॥ 'न जायते म्रियते', 'अजो नित्यः' इत्येतावता पूर्तेरिति भावः ॥ गतार्थतेति ॥ न हन्यत इत्यनेनेति ज्ञेयम् । स्वतन्त्रेश्वरेण हन्यमाने शरीरे न हन्यत इति व्याख्यानादिति भावः ॥ अवतारक्रमेणेति ॥ अविनाशित्वानादित्वनित्यदेहत्वादिना स्वातन्त्र्यावतारस्तेन च सर्वकर्तृत्वावतारस्तेन च कं घातयतीत्यस्येत्येवमवतारक्रमेणेत्यर्थः । एतेनेत्युक्तं व्यनक्ति ॥

*

स्वातन्त्र्यात् सर्वकर्तारं परमात्मानं यो वेद स कथं घातयति हन्ति वा । वाससो जरावत् स्वशरीरजरादावस्वातन्त्र्यदर्शनात् सर्वत्रास्वातन्त्र्यं ज्ञातव्यं जीवस्य । ईश्वरस्य तु देहस्यापि च्छेदादेरभावात् स्वातन्त्र्यम् ।

त्वात् । 'वासांसि' इत्येतस्य प्रकृतेनेश्वरस्वातन्त्र्येणापि सङ्गतिमाह ॥ वासस इति ॥ नैनमित्यस्य प्रकृतेनेश्वरस्वातन्त्र्येणपि संगतिमाह ॥ ईश्वरस्येति ॥ ज्ञातव्यमिति सम्बन्धः ।

यद्वा तथापि नास्य प्रकरणस्योभयविषयत्वं युक्तम् । उभयप्रतिपादनस्य प्रसङ्गाननुगुणत्वात् । युद्धविधानस्यैव प्रकृतत्वादतो नोभयप्रतिपादनं प्रसङ्गानुगुणम् । युद्धं कर्तव्यं, तच्चेश्वरस्यैव स्वतन्त्रत्वेन मोक्षप्रदानसमर्थत्वात्तत्पूजात्वेन कार्यमित्यत्राभिप्रेतम् । तत्रेश्वरस्य नित्यत्वप्रतिपादनं युद्धविधानाय शोकनिवारणार्थमुपयुज्यते । तस्य सर्वप्रकारेणाविनाशित्वादिप्रतिपादनं च तत्पूजाविधानार्थं तस्य मोक्षदत्वसामर्थ्यसमर्थनाय स्वातन्त्र्योपपादकतयोपयुज्यते । जीवस्य नित्यत्ववर्णनं युद्धविधानाय शोकनिवारणार्थमुपयुज्यते । तस्य देहनाशादिवर्णनमपि शोकनिवारणाय परमेश्वरस्यैव स्वातन्त्र्यसिद्ध्यर्थं जीवस्यास्वातन्त्र्यप्रदर्शनायोपयुज्यते—इति भावेन सर्ववाक्यान्यभिप्रेतार्थे योजयति ॥ यस्मादेवम्भूत इति ॥ सर्वप्रकारेणाविनाशीत्यर्थः । यस्मादेवम्भूत इत्यविनाशित्वित्यभिमते प्रमेये योज्यम् । अतस्तत्पूजेति नासत इति । अतस्तदर्थमित्यनाशिन इति । अन्येषामित्यन्तवन्त इति । प्राकृतदेहिन इति शरीरिण इति । अत इति नायं हन्तीति । नित्यत्वादिति न हन्यत इति । तस्मादिति य एनमिति । यस्मादिति न म्रियत इति । तत्संयोगेति नायं भूत्वेति । जीवस्त्विति न हन्यत इति । अत एवमिति वेदेति । वासस इति वासांसीति । ईश्वरस्येति नैनमिति । यद्यप्येतद्व्याख्यानत

कथमित्यादिना ॥ इत्याश्रितत्वादिति ॥ इत्यादेर्मूले श्रवणादित्यर्थः । आदिपदेन सर्वकर्तृत्वस्य ग्रहः ॥ तद्भावोक्तेरिति ॥ प्रथमस्कन्धे नवमेऽध्याये

नैनं छिन्दन्तीति च्छेदनाद्यभावः साक्षादेव दर्शयितुं शक्यते स्वदेहस्येति वर्तमानापदेशः । छेदादिकं त्वीश्वरो मोहाय मृषैव दर्शयति ॥ २४ ॥

सर्वगतश्चेत्परमात्मा किमिति तथा न दृश्यत इत्यतो वक्ति ॥ अव्यक्तोऽयमिति ॥ कथमेतद्युज्यते ? अचिन्त्यशक्तित्वात् । न च

एव सिद्धं, तथापि विप्रकीर्णतयोक्तं न मन्दबुद्धावारोहतीति पिण्डीकृत्योक्तम् ।

अत्र 'नैनं छिन्दन्ति' इति वर्तमानप्रयोगः कालान्तरच्छेदाद्यनुज्ञार्थ इत्यन्यथाप्रतीतिनिरासायाह ॥ नैनमिति ॥ न कालान्तरच्छेदाद्यनुज्ञार्थं वर्तमानप्रयोगः । किन्तु मम देहे छेदादिकं नास्तीति तत्र युक्तितया छेदादिप्राप्तिसद्भावेऽपीदानीं तदभावस्य प्रत्यक्षत एव दर्शयितुं शक्यत्वसूचनार्थमेवेति भावः । अत्रेश्वरस्वरूपस्यैव छेदाद्यभावः कथ्यते न तु तद्देहस्यापि । देहस्य 'निशितशरैर्विभिद्यमानत्वचि' इति तद्भावोक्तेः । अतः स्वदेहस्येति कथमुच्यत इत्यतोऽभिप्रायमाह ॥ च्छेदेति ॥ मृषा प्रदर्शनं किमर्थमित्यत आह ॥ ईश्वर इति ॥ कुतो मृषा, परमार्थत एव किं न स्यादित्यतो वाऽह ॥ ईश्वर इति ॥ स्वतन्त्रस्य परमार्थतस्तदयुक्तमित्यर्थः ॥ २४ ॥

'अव्यक्तोऽयम्' इतीश्वरविषयमित्युक्तम् । तत्रेश्वरस्याव्यक्तत्वादिकथने का सङ्गतिरित्यतः 'सर्वगतस्थाणुः' इति परमात्मनः सर्वगतत्वमभिहितम् । तत्रेश्वरस्य देहोऽस्ति न वा ? आद्ये देहिनः सर्वत्र वर्तमानस्य सर्वत्र दर्शनं स्यात् । द्वितीये शरीरच्छेदादिनिरासो न युक्त इत्याशङ्कानिरासायाद्यपदमवतारयति ॥ सर्वेति ॥ देहित्वेऽव्यक्तत्वं कथं युज्यत इत्याशङ्क्य तत्परिहारत्वेनाचिन्त्यपदं व्याचष्टे ॥ कथमिति ॥ अचिन्त्यशक्तेः प्रतिबन्धे नाशे वा सति प्रतीतिप्रसङ्ग इत्याशङ्कापरिहारायाविकार्यपदं व्याचष्टे ॥ न चेति ॥ नन्वेकेनैव शब्देन पूर्तेः किमर्थं

भीष्मस्तुतौ च्छेदादिभावोक्तेरित्यर्थः ॥ शरीरच्छेदादिनिरास इति ॥ नैनमिति

सा शक्तिः कदाचिदन्यथा भवति । अविकार्यत्वात् । यानि यान्यस्य रूपाणि तानि सर्वाण्यप्येवम्भूतानीति दर्शयितुम् 'एनम्', 'अयम्' इत्यादि पृथग्वचनम् । जीवे तु सर्वजीवेष्वनुगमार्थम् ।

सर्वं चैतच्छ्रुतिसिद्धम् ।

'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः ।
ज्ञानज्ञानः सुखसुखः स विष्णुः परमाक्षरः ॥'

इति पैङ्गिश्रुतिः ।

नैनमित्यत्र प्रति प्रत्येनमिति वचनम् । 'अव्यक्तोऽयम्' इत्यत्र प्रतिविशेषणम् 'अयम्' इति वचनं च किमर्थमित्यत आह ॥ यानीति ॥ आदिपदेन नञो ग्रहणम् । अनेन प्रतिविशेषणमपि वीप्सारूपेण 'एनम्' इत्यादिबहुशब्दयोजनां सूचयति । एवं चेज्जीवस्य बाहुल्याभावात् 'अच्छेद्योऽयम्' इति पृथग्वचनं व्यर्थमित्यत आह ॥ जीवे त्विति ॥ जीवे पृथग्वचनमिति शेषः ।

नन्वीश्वरस्य देहवत्त्वं, तस्य च देहस्य छेदादिराहित्यमेवम्भावश्च सर्वरूपाणामित्येतत्कुत इत्यत उक्तम् 'उच्यते' इति पदं व्याचष्टे ॥ सर्वमिति ॥ कास्ताः श्रुतय इत्यत आह ॥ सदिति ॥ छेदादिदोषरहितो देहो यस्यासौ सद्देहः । सुखगन्धः पुण्यगन्धः । सुखात्मकगन्धो वा । ज्ञानज्ञान इत्यादेरतिशयितज्ञानादिमानित्यर्थः ।

श्लोक इति भावः ॥ प्रतिविशेषणमपीति ॥ न छिन्दन्ति, न दहतीत्युक्तच्छेदाभावदाहाभावादिप्रतिविशेषणमप्येनमितिपदं वीप्सारूपेणैनमेनमित्येवंरूपेण बह्वेतच्छब्दयोगेन तथा अयमयमिति बह्विदंशब्दयोगेन योजनां सूचयतीत्यर्थः । 'ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परमाक्षरः' इति श्रुतिशेषे पदद्वयस्यार्थमाह ॥ ज्ञानज्ञान इत्यादेरिति ॥ श्रुतीति ॥ 'अरूपमव्ययम्', 'अशरीरः प्रज्ञात्मा' इत्यादिश्रुतिविगानादेवेत्यर्थः । 'स च' इति पृथगारम्भाद्वाक्यसमाप्त्यर्थमाह ॥ अस्तीतिसम्बन्ध इति ॥ विशेषपदा-

'अदेहो देहवांश्चैव प्रोच्यते परमेश्वरः ।
अप्राकृतशरीरत्वाददेह इति कथ्यते ॥
शिरश्चरणबाह्वादिविग्रहोऽयं स्वयं हरिः ।
स्वस्मान्नान्यो विग्रहोऽस्य ततश्चादेह उच्यते ॥
स्वयं स्वरूपवान्यस्माद्देहवांश्चोच्यते ततः ।
शिरश्चरणबाह्वादिः सुखज्ञानादिरूपकः ॥
स च विष्णोर्न चान्योऽस्ति यस्मात्सोऽचिन्त्यशक्तिमान् ।
देहयोगवियोगादिस्ततो नास्य कथञ्चन ॥
गुणरूपोऽपि भगवान् गुणभुक् च सदा श्रुतः ।
अहमित्यात्मभोगो यत्सर्वेषामनुभूयते ॥'
अभिन्नेऽपि विशेषोऽयं सदानुभवगोचरः ।

नन्वीश्वरस्य देहसद्भावे श्रुतिविप्रतिपत्तेस्तत्सन्देह एव स्यात्कुतो निश्चयस्तद्भावस्येत्यतः श्रुत्यन्तरेण तद्व्यवस्थां दर्शयति ॥ अदेह इति ॥ स्वरूपवान् स्वरूपभूतदेहवान् ॥ सुखज्ञानादिरूपकः ॥ अस्तीति संबन्धः । ततश्च देहवानुच्यत इत्यनुषज्यते । देहदेहिनोरैक्यमन्यत्रादृष्टं कथं युज्यत इत्यत आह ॥ स चेति ॥ ननु सुखज्ञानादिरूपो देहो विष्णोरनन्यश्चेत् तदा तस्य सुखादिगुणरूपत्वं प्रसज्यते । न च तद्युज्यते । 'आनन्दभुक्' इत्यादावानन्दभोक्तृत्वस्योक्तत्वात् । एकस्य च भोक्तृभोग्यभावादर्शनादित्यत आह ॥ गुणेति ॥ दृष्टोप्ययमभिन्ने भोक्तृ-भोग्यभावः किंनिमित्त उपपद्यत इत्यत आह ॥ अभिन्नेऽपीति ॥ अस्ति । तेनाभिन्नेऽपि भोक्तृभोग्यभाव उपपद्यत इति शेषः । विशेषसद्भाव एव कुत इत्यत आह ॥ अयमिति ॥

नन्तरमस्तीत्यादिपदाध्याहारेण योजनामाह ॥ अस्तीत्यादिना ॥ विशेषित इति ॥ विशेषवत इत्यर्थः ॥ भेदपरम्परयेति ॥ विशेषविशेषिणोर्भेदः स्वाश्रयाभ्यां

'विशेषोऽपि हि नान्योऽतः स च स्वस्यापि युज्यते ।
नानवस्था ततः क्वापि परमैश्वर्यतो हरेः ।
युक्तायुक्तत्वमपि हि यदधीनं सदेष्यते ॥
प्रमाणावगते तत्र कुत एव ह्ययुक्तता ।'

इत्यादि परमश्रुतिः ।

'गुणाः श्रुताः सुविरुद्धाश्च देवे
सन्त्यश्रुता अपि नैवात्र शङ्का ।
चिन्त्या अचिन्त्याश्च तथैव दोषाः
श्रुताश्च नाङ्गैर्हि तथा प्रतीताः ॥'

इत्यादि च ऋग्वेदे सौपर्णशाखायाम् ।

नन्वयं विशेषो विशेषितोऽन्योऽनन्यो वा ? आद्ये भेदपरम्परयाऽनवस्था । द्वितीये विशेषविशेषिभावव्यवहारायोगः । तत्रापि विशेषाङ्गीकारेऽनवस्थेत्यत आह ॥ विशेषोऽपीति ॥ विशेषो विशेषितोऽनन्य इति न भेदपरम्परयाऽनवस्था । स एव विशेषो यथाऽभिन्नेऽपि वस्तुनि भोक्तृभोग्यभावनिर्वाहकः तथा विशेषितो भेदरहितस्यापि स्वस्य विशेषत्वं, विशेषिणो विशेषित्वं च निर्वहतीति न विशेषपरम्परयाऽप्यनवस्थेत्यर्थः । इतोऽप्येकस्यैव हरेर्भोक्तृभोग्यभावो युक्त इत्याह ॥ परमेति ॥ अभिन्नस्यैव स्वस्य भोक्तृभोग्यभावेऽनुपपत्तिं परिहर्तुं हरेरैश्वर्यं कुत इत्यत आह ॥ युक्तेति ॥ युक्तायुक्तत्वं वस्तुनोरिति शेषः । तत्र ईश्वरे । तर्हीश्वरे दुःखित्वाद्यपि कल्प्यतामयुक्त्यभावादित्यत उक्तम् । प्रमाणेति ॥ एकस्यैव भोक्तृभोग्यत्वादिकं प्रमाणावगतत्वाद्विरुद्धमप्यैश्वर्यबलादङ्गीकार्यं नान्यत् । तस्याप्रामाणिकत्वादिति भावः ।

विशेषविशेषिभ्यां भिन्नः । सोऽपि भेदः स्वाश्रयभूतभेदिभ्यां भिन्न इत्येवं भेदपरम्परयेत्यर्थः । तत्रेत्यनुवादः ईश्वर इति व्याख्या । एवेत्यनेनापौनरुक्त्यायाऽह ॥ एकत्वसङ्ख्यायोगीति ॥ अन्वयमुखेनानुवदति ॥ किञ्चन नानेति ॥

'एकमेवाद्वितीयं' तत्, 'नेह नानास्ति किञ्चन।'
'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति।'
'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति।
एवं धर्मान् पृथक् पश्यंस्तानेवानुविधावति॥'
'मत्स्यकूर्मादिरूपाणां गुणानां कर्मणामपि।
तथैवावयवानां च भेदं पश्यति यः क्वचित्॥
भेदाभेदौ च यः पश्येत्स याति तम एव तु।
पश्येदभेदमेवैषां बुभूषुः पुरुषस्ततः॥
अभेदेऽपि विशेषोऽस्ति व्यवहारस्ततो भवेत्।
विशेषिणां विशेषस्य तथा भेदविशेषयोः॥

एकस्यैव भोक्तृभोग्यभावादिगुणा एवेश्वरस्य प्रामाणिका न दुःखादिदोषा इत्यत्र श्रुत्यन्तरं चाह॥ गुणा इति॥ कथं न दोषाः श्रुताः? 'जनितोत विष्णोः' इत्यादौ प्रतीतेरित्यत आह॥ अज्ञैरिति॥

प्रकृतगुणानां भगवताऽभेदे, सर्वाण्यपि रूपाण्येवंविधानीत्यत्र च श्रुतीराह॥ एकमिति॥ एकम् एकत्वसङ्ख्यायोगि। एवेत्यवयवादि-भेदनिराकरणम्। अद्वितीयं समाभ्यधिकरहितम्। किञ्चन नानेति रूपावयवगुणकर्मभेदः। तर्हि भेदाभेदौ स्यातामित्यत आह॥ मृत्योरिति॥ मृत्योः मृत्युं तम आप्नोति। नानेवेति भेदाभेदौ। भेददर्शने कोऽनर्थ इत्यत आह॥ यथेति॥ यथा पर्वतेषु दुर्गे शिखरे वृष्टमुदकम् अधो विधावति एवं गुणादीन् भिन्नान् पश्यन् तान् दृष्टाननु तेषामेव दर्शना-नन्तरमधो विधावतीत्यर्थः।

सर्वाद्वैतपराः श्रुतय एता इत्यतस्ताः स्मृत्यैव व्याचष्टे॥ मत्स्येति॥ अत्यन्ताभेदे व्यवहारभेदः किंनिमित्त इत्यत आह॥ अभेदेऽपीति॥ यद्यभिन्नेषु गुणादिविशेषेषु विशेषो वर्तते तर्हि विशेषिणां विशेषस्य तथा-

---

श्रुतय एता इति॥ एकमेवेत्यादयः श्रुतय इत्यर्थः। अभेदविशेषयोरिति पद-

विशेषस्तु स एवायं नानवस्था ततः क्वचित् ।
प्रादुर्भावादिरूपेषु मूलरूपेषु सर्वशः ॥
न विशेषोऽस्ति सामर्थ्ये गुणेष्वपि कदाचन ।
मत्स्यकूर्मवराहाश्च नृसिंहवटुभार्गवाः ।
राघवः कृष्णबुद्धौ च कल्किव्यासैतरेयकाः ॥
दत्तो धन्वन्तरिर्यज्ञः कपिलो हंसतापसौ ।
शिंशुमारो हयास्यश्च हरिः कृष्णश्च धर्मजः ॥
नारायणस्तथेत्याद्याः साक्षान्नारायणः स्वयम् ।
ब्रह्मरुद्रौ शेषविपौ शक्राद्या नारदस्तथा ॥
सनत्कुमारः कामभवोऽप्यनिरुद्धो विनायकः ।
सुदर्शनाद्यायुधानि पृथ्वाद्याश्चक्रवर्तिनः ॥

भेदविशेषयोः भेदोऽभेदो वा । आद्येऽनवस्था । द्वितीये व्यवहारविशेषायोगः । तत्रापि विशेषाङ्गीकारेऽनवस्थैवेत्यत आह ॥ विशेषिणामिति ॥ विशेषिणां विशेषस्य तथाभेदविशेषयोः भेदाभावान्न भेदपरम्परयाऽनवस्था । न च व्यवहारविशेषानुपपत्तिः । यतस्तत्र विशेषोऽङ्गीक्रियते । न चैवं विशेषपरम्परयाऽनवस्था । य एव विशेषोऽभिन्नेष्वपि गुणगुण्यादिषु व्यवहारभेदनिर्वाहकः स एव विशेषो विशेषविशेष्यादिव्यवहारभेदनिर्वाहक इत्यङ्गीकारादित्यर्थः । मत्स्यादीनामभेदेऽपि इन्द्रार्जुनादिवत्तारतम्यमपि नास्तीत्याह ॥ प्रादुर्भावेति ॥

के ते मत्स्यादयः प्रादुर्भावा इत्यत उक्तमेव विवृणोति ॥ मत्स्येति ॥ ब्रह्मादयोऽपि भगवदवतारत्वेनान्यत्रोच्यन्ते । ते हि किमत्रादिशब्देन गृहीता उतानवतारा एवेत्यपेक्षायामाह ॥ ब्रह्मेति ॥ तर्ह्यवतार-

---

विभागः ॥ विशेषविशेष्यादीति ॥ अयं विशेषोऽयं विशेषीत्यादिव्यवहारेत्यर्थः ॥ लक्ष्मणेत्यादि ॥ रामावतारे शेषसनत्कुमारानिरुद्धाः लक्ष्मणभरतशत्रुघ्नत्वेन, कृष्णावतारे बलप्रद्युम्नानिरुद्धत्वेन, शेषो नरत्वेन, शक्रादयोऽर्जुनादित्वेन च

इत्याद्या विष्णुनाऽऽविष्टा भिन्नाः संसारिणो हरेः ।
तेष्वेव लक्ष्मणाद्येषु त्रिष्वेवं च बलादिषु ॥
नरार्जुनादिषु तथा पुनरावेश उच्यते ।
स्वल्पस्तु पुनरावेशो धर्मपुत्रादिषु प्रभोः ॥
एतज्जानाति यस्तस्मिन् प्रीतिरभ्यधिका हरेः ।
सङ्करज्ञानिनस्तत्र पातस्तमसि च ध्रुवम् ॥'

इत्यादि महावाराहे ॥ २५ ॥

तिष्ठतु तावदयं विस्तारः । यावन्मोक्षं जीवस्य जन्ममरणे स्वयमेव मन्यसे, न तु नियमेन । तथापि तावन्मात्रेणापि ज्ञानेन शोचितुं नार्हसि ।

'नित्यं सनातनं प्रोक्तं नित्यं नियतमेव च ।'

इति शब्दनिर्णये । अत्र तु नियतम् । 'जातस्य हि ध्रुवः' इति प्रकाशनात् ॥ २६ ॥

त्वोक्तेः का गतिरित्यत आह ॥ विष्णुनेति ॥ आवेशविशेषवत्तया तदुक्तिरित्याशयः । साक्षादवतारा एव किं न स्युरित्यत आह ॥ संसारिण इति ॥ तेष्वेवेति ॥ शेषसनत्कुमारानिरुद्धशक्रयमाश्विषु लक्ष्मणभरतशत्रुघ्नबलप्रद्युम्नानिरुद्धनरार्जुनयुधिष्ठिरनकुलसहदेवत्वेन जातेष्वित्यर्थः । अर्जुनादिचतुर्षु नैकप्रकारावेश इत्याह ॥ स्वल्प इति ॥ अवताराणामनवतारत्वेनानवताराणामवतारत्वेन ज्ञानं सङ्करज्ञानम् ॥ २५ ॥

एवं स्वयं युक्तीरुक्त्वा शोको न कार्य इत्युक्तम् । तत्र देहनाशस्यावश्यम्भावित्वं यदुक्तं तन्नास्माभिः साध्यमपि तु भवतोऽपि सिद्धम् । तेनैव शोको न कार्य इत्युच्यते 'अथेति' । तत्र मुक्तस्यापि जननमरणसद्भावं पराकुर्वन्नेव श्लोकं व्याचष्टे ॥ तिष्ठत्विति ॥ 'अथ च' इत्यस्यार्थस्तिष्ठत्विति । तथापीत्यनूद्य तावन्मात्रज्ञानेनापीति व्याख्यानम् ।

जातास्तेष्वित्यर्थः ॥ स्वयमिति ॥ कृष्णेन जीवचितो नित्यत्वाद्देहनाशस्यावर्ज-

तस्मान्नात्राश्चर्यबुद्धिः कर्तव्या ॥ २७ ॥

किं तर्ह्याश्चर्यो भगवानेवेत्याह ॥ आश्चर्यवदिति ॥ आश्चर्यमेव सन्तमेनमाश्चर्यवत्पश्यति । न पुनरनाश्चर्यम् । 'गगनं गगनाकारं सागरं सागरोपमम्' इत्यादिवत् ।

नित्यपदस्य नियमवाचित्वे मानाभावात्कथं नियमेनेति व्याख्येत्यत आह ॥ नित्यमिति ॥ एवं नित्यपदस्योभयार्थत्वे नियमार्थग्रहणे को हेतुरित्यत आह ॥ अत्र त्विति ॥ एतच्छ्लोकार्थविवरणात्मकोत्तरश्लोके नित्यपदस्य ध्रुव इति विवृतत्वादित्यर्थः ॥ २६ ॥

जननमरणनियमोऽत्र शोकनिवारणे हेतुतयोक्तः स्फुटं प्रतीयते । प्रागभिप्रेते जीवस्यास्वातन्त्र्ये च हेतुतयाऽभिमत इति भावेनाऽह ॥ तस्मादिति ॥ तस्माज्जननादिनियमवत्त्वादेव । अत्र जीवे स्वातन्त्र्यबुद्धिश्च न कार्येत्यर्थः ॥ २७ ॥

यदि जीवे नाश्चर्यबुद्धिः कार्या तर्हि कुत्रासौ कार्या? ईश्वर इत्युक्तमिति चेत्सत्यम् । किं ततोऽन्यत्रापि क्वचिदित्याशङ्क्य तत्परिहारत्वेनोक्तोपसंहाररूपं श्लोकमवतारयति ॥ किं तर्हीति ॥ नन्वत्राश्चर्योऽन्य एव, ईश्वरस्तु तत्सदृश एव, न स्वयमाश्चर्य इति प्रतीतेः कथमाश्चर्यो भगवानेवेत्युच्यत इत्यत आह ॥ आश्चर्यमिति ॥ आश्चर्यवदित्यनेन नेश्वरस्यानाश्चर्यत्वमभिप्रेयते किन्त्वाश्चर्यस्यैव सत आश्चर्योपमत्वमुच्यत इति भावः । एवमपि भगवदितरस्य स्वातन्त्र्यमङ्गीकार्यम् । तस्यैव स्वतन्त्र-

---

नीयत्वात् जीर्णपातस्य समीचीनलाभेन समाधानादित्यादियुक्तीरुक्त्वेत्यर्थः । अथ चेदिति श्लोके शोको न कार्य इत्यत्र को हेतुरुक्त इत्यतस्तं वदन् स हेतुरन्यत्रापि प्रवर्तत इति मूलार्थमाह ॥ जननमरणनियमोऽत्रेति ॥ अथ चेदिति श्लोक इत्यर्थः । यद्वाऽत्रेति अथ चेदिति श्लोके तद्विवृत्तिपरोत्तरश्लोकद्वये चेत्यर्थः ॥ प्रागिति ॥ 'नित्यः सर्वगतस्थाणुः' इत्यादावित्यर्थः ॥ इत्युक्तमिति ॥ नैनमिति श्लोके ईश्वरस्य तु देहस्यापि च्छेदादेरभावात् स्वातन्त्र्य-

'आश्चर्यो भगवान् विष्णुर्यस्मान्नैतादृशः क्वचित् ।
तस्मात्तद्गोचरं ज्ञानं तद्गोचरवदेव तु ॥'

इति ब्रह्मतर्के । अनाश्चर्यवदप्यसुरादयः पश्यन्तीति कश्चिदिति विशेषणम् ॥ २९ ॥

देही कुतोऽवध्यः ? यस्मादयमीश्वरः सर्वस्य जीवस्य सूक्ष्मे स्थूले च देहे रक्षकत्वेनावस्थितः, अत एवावध्यः । न स्वसामर्थ्यं कस्यापि ।

तायामाश्चर्यवदित्युक्त्यसम्भवात् । स्वोपमायाः क्वाप्यदर्शनात् । तथाच भगवानेवेत्यवधारणायोग इत्यत आह ॥ गगनमिति ॥ इतिवत्स्वोपमाभिधानमुखेन भगवदितरस्य स्वातन्त्र्याभावे तात्पर्यमत्रेति भावः । सागरं सागरसमूहः ।

प्रतीत एवार्थः किं न स्यादित्यतः स्वोक्तार्थे स्मृतिसम्मतिमाह ॥ आश्चर्य इति ॥ तद्गोचरमित्यनेन 'आश्चर्यवत्' इत्येतत्क्रियाविशेषणमित्युक्तं भवति । ननु भगवानाश्चर्य एव चेत्तर्हि सर्वेषामप्याश्चर्यत्वात् 'कश्चित्' इति विशेषणं व्यर्थम् । न हि स्तम्भः कस्यचिदेव स्तम्भ इत्यत आह ॥ अनाश्चर्यवदिति ॥ यद्यपीश्वरः सर्वेषामाश्चर्य एव । तथापि विपरीतदर्शिनां बहूनां भावाद्यथावद्दर्शिनः कस्यचिदेव भावादाश्चर्यतया दर्शनं विवक्ष्य कश्चिदिति विशेषणं युक्तमिति भावः ॥ २९ ॥

आक्षिपति ॥ देहीति ॥ जीवो नित्य इत्युक्तम् । तत्र किं स्वत एव नित्योऽथेश्वरसामर्थ्येन ? नाद्यः । सर्वं परमेश्वराधीनमित्यभिमतविरोधात् । न द्वितीयः । नित्यस्य स्वाभाविकत्वेनेश्वराधीनत्वानुपपत्तेरिति भावः । एतत्परिहाराय देहीति श्लोकं व्याचष्टे ॥ यस्मादिति ॥ देहे

मित्युक्तमित्यर्थः । क्वचिदिति । स्वातन्त्र्यबुद्धिः कार्येत्यनुषङ्गः ॥ उक्तेति ॥ ईश्वरेति विहितस्वातन्त्र्योपसंहाररूपमित्यर्थः । तेन नैनमित्यादिना न पौनरुक्त्यमिति भावः ॥ प्रतीतेरिति ॥ वतिप्रत्ययेनेति भावः । सागरसमूह इति ॥ वृद्धाच्छ इति छप्रत्ययो नाश्रितोऽणप्रत्यय एवाश्रित इति

'द्रव्यं कर्म च कालश्च स्वभावो जीव एव च।
यदनुग्रहतः सन्ति न सन्ति यदुपेक्षया ॥'

इति हि भागवते।

'तत्र तत्र स्थितो विष्णुर्नित्यं रक्षति नित्यदा।
अनित्यदैवानित्यं च नित्यानित्ये ततस्ततः।
भावाभावनियन्ता हि तदेकः पुरुषोत्तमः ॥'

इति पाद्मे ॥ ३० ॥

जित्वा स्वर्गं महीं च। 'ये युध्यन्ते प्रधनेषु शूरासः' इति श्रुतेः ॥ ३७ ॥

रक्षकत्वेन स्थितश्चेत् प्रलयादौ नाशः स्यादित्यत उक्तम् ॥ सूक्ष्म इति ॥ सूक्ष्मदेहपदेन लिङ्गशरीरं चैतन्यशरीरं चोच्यते। नित्यत्वादेः स्वाभाविकत्वात्कथमीश्वराधीनत्वमित्यत आह ॥ द्रव्यमिति ॥ स्वाभाविकत्वेऽपि नित्यत्वादेरीश्वराधीनत्वं युज्यते। स्वभावस्यापि भगवदधीनतया स्मृतिसिद्धत्वादिति भावः। जीवसत्ताया भगवदधीनत्वे चेयं स्मृतिः प्रमाणम्। तथापि जीवे स्थित्वा तद्रक्षक ईश्वर इति विशेषः कुत इत्यत आह ॥ तत्रेति ॥ ततः तदधीने। ततस्तस्मात्तन्नियन्तृत्वात्। भावाभावयोरपि नित्यानित्याबहिर्भावात् ॥ ३० ॥

'यद्वा जयेम' इत्युक्तस्य पक्षद्वयेऽप्यहानिः परिहार उच्यते 'हतो वेति'। तत्र 'हतो वा प्राप्स्यसि स्वर्गम्' इत्यत्रेव 'जित्वा वा भोक्ष्यसे महीम्' इत्यत्रापि महीमात्रं न स्वर्ग इत्यन्यथाप्रतीनिरासायाऽऽह ॥ जित्वेति ॥ 'युद्धे मृत एव स्वर्गं प्राप्स्यसि, जित्वा महीमेव भोक्ष्यसे' इति प्रतीत एवार्थः किं न स्यादित्यत आह ॥ य इति ॥ ये शूराः युद्धेषु प्रयुध्यन्ति, ये च तत्र म्रियन्ते, ये च सहस्रसङ्ख्यातधन-

---

भावः। ततस्तत इत्यत्र ततः कारणात् ततो हरेरित्युपेत्याह ॥ ततस्तदधीन इति ॥ इत्युक्तस्येति ॥ इत्यर्जुनेनोक्तस्य जयसन्देहस्येत्यर्थः। आज्जसेर-

सम्यक् ख्यातिर्ज्ञानं साङ्ख्यम् । युज्यतेऽनेनेति योगस्तदुपायः ।

'सम्यक्तत्त्वदृशिः साङ्ख्यं योगस्तत्साधनं स्मृतम् ।'

इति शब्दनिर्णये ।

'ब्रह्मतर्कस्तर्कशास्त्रं विष्णुना यत्समीरितम् ।
अक्षपादकणादौ च साङ्ख्ययोगौ च हैतुकाः ॥
बौद्धपाशुपताद्यास्तु पाषण्डा इति कीर्तिताः ।
मीमांसा त्रिविधा प्रोक्ता ब्राह्मी दैवी च कार्मिकी ॥
ब्रह्मतर्कं च मीमांसां सेवेत ज्ञानसिद्धये ।
वैदिकज्ञानवैरूप्यन्नान्यत्सेवेत पण्डितः ॥'

दक्षिणादातारः तानेवायं प्रेतोऽपि गच्छतादिति यमं प्रति प्रेतस्य स्वर्गप्रार्थनाज्जयेऽपि स्वर्गप्राप्तिः श्रूयते । अतो न प्रतीत एवार्थ इति भावः ॥ ३७ ॥

उक्तमुपसंहृत्य प्रकरणान्तरमारभ्यते 'एषेति'। तत्र साङ्ख्ययोगशब्दौ दर्शनविशेषपराविति प्रतीतिनिरासाय तदर्थं सप्रमाणकमाह ॥ सम्यगिति ॥ अत्रोक्तयोः साङ्ख्ययोगयोर्बुद्ध्या युक्त इति प्रशस्तत्वादितरयोर्निन्दितत्वान्न तावत्रोक्ताविति भावः । इतोऽपि न साङ्ख्यपदेनात्र प्रसिद्धसाङ्ख्यं विवक्षितमित्याह ॥ साङ्ख्यस्येति ॥ अत्र साङ्ख्यपदेन प्रसिद्धसाङ्ख्यग्रहणे साङ्ख्योक्तमभिहितमित्युक्तं स्यात् । न च तद्युक्तम् । अत्र

सुगिति भावेनाह ॥ शूरा इति ॥ प्रधनेषु युद्धेषु ये तनुत्यजः । 'ये वा सहस्रदक्षिणास्तांश्चिदेवापि गच्छतात्' इति श्रुतिशेषार्थमाह ॥ ये च तत्रेत्यादिना ॥ जयेऽपीति ॥ 'ये युध्यन्ते तानयं गच्छतात्' इति श्रवणादिति भावः ॥ उक्तमिति ॥ 'न त्वं नेमे' इत्यादिना यज्जीवतत्त्वस्वरूपमुक्तं तत् एषेति प्रथमपादेनोपसंहृत्य ज्ञानोपायनिरूपणप्रकारान्तरमारभ्यते आरम्भप्रतिज्ञा क्रियते द्वितीयपादेनेत्यर्थः । अनयोरपि निन्दितत्वे को विशेष इत्यत आह ॥ अत्रोक्तयोरिति ॥ न त्वैहिक इति ॥ ऐहिकफले न हेतुत्व-

इत्यन्यसाङ्ख्ययोगयोर्निषिद्धत्वान्नारदीये। साङ्ख्यस्य निरीश्वरत्वादुक्तत्वाच्चेश्वरस्य। साङ्ख्यैर्योगैश्च विहितहिंसाया अप्यनर्थहेतुत्वाङ्गीकारात्। अत्र तु युद्धविधानाच्च मोक्षार्थत्वेनैव 'कर्मबन्धं प्रहास्यसि' इति। परमसाङ्ख्ययोगयोश्चोक्तार्थत्वेनैव न विरोधः ॥ ३९ ॥

'प्रारम्भमात्रमिच्छा वा विष्णुधर्मे न निष्फला।
न चान्यधर्मकरणाद्दोषवान् विष्णुधर्मकृत् ॥'

इत्याग्नेये।

'स्वोचितेनैव धर्मेण विष्णुपूजामृते क्वचित्।
नाप्रवृत्तिः प्रवृत्तिर्वा यत्र धर्मः स वैष्णवः ॥

'न जायते' इत्यादावीश्वरस्योक्तत्वात्, साङ्ख्यस्य निरीश्वरत्वात्। अतश्च नात्र साङ्ख्यं शास्त्रविशेष इत्यर्थः। इतोऽपि नात्र साङ्ख्ययोगशब्दौ प्रसिद्धशास्त्रपरावित्याह ॥ साङ्ख्यैरिति ॥ अत्र पूर्वोत्तरप्रकरणयोः। साङ्ख्यादिभिः पारत्रिकानर्थहेतुत्वमेव हिंसाया अङ्गीक्रियते। न त्वैहिके। अत्र पुना राज्यार्थमेव हिंसा विधीयते। अतो न विरोध इत्यत आह ॥ मोक्षेति ॥ साङ्ख्ययोगशब्दयोः सोपपत्तिकमर्थान्तरं चाह ॥ परमेति ॥ पूर्वोत्तरप्रकरणोक्तार्थप्रतिपादकत्वादित्यर्थः। न विरोधोऽत्र तदुक्तग्रहण इति शेषः ॥ ३९ ॥

योगः स्तूयते नेहेति। तत्र योगातिक्रमे नाशः प्रत्यवायश्च नास्तीत्यन्यथाप्रतीतिनिरासाय पूर्वार्धं स्मृत्यैव व्याचष्टे ॥ प्रारम्भेति ॥ तमेव विष्णुधर्मं स्मृत्या दर्शयति ॥ स्वोचितेनेति ॥ प्रवृत्तिर्हितकरणमप्रवृत्तिर्निषिद्धपरित्यागश्चान्यविषये नानुष्ठीयत इत्यर्थः। तस्मिन् धर्मेऽधि-

---

मङ्गीक्रियत इत्यर्थः ॥ अत्र पुनरिति ॥ राज्यार्थमिति पदविभागः ॥ सोपपत्तिकमिति ॥ विरोधाभावलक्षणोपपत्तिसहितं पूर्वोत्तरप्रकरणोक्तार्थप्रतिपादकत्वरूपं धर्मान्तरमित्यर्थः। तेन ज्ञानोपायावेव साङ्ख्ययोगशब्दार्थौ नान्यौ पूर्वोत्तरोक्तार्थविरोधादिति भावः। निषिद्धपरित्यागशब्दार्थमाह ॥ अन्य-

एनं धर्मं च देवाद्या वर्तन्ते सात्त्विका जनाः ।
एष कार्तयुगो धर्मः पाञ्चरात्रश्च वैदिकः ॥
तत्प्रीत्यर्थं विनाऽन्यस्मै नोदबिन्दुं न तण्डुलम् ।
दद्यान्निराशी च सदा भवेद्भक्तश्च केशवे ॥
नैतत्समेऽधिके वाऽपि कुर्याच्छङ्कामपि क्वचित् ।
जानीयात्तदधीनं च सर्वं तत्त्ववित्सदा ॥
यथाक्रमं तु देवानां तारतम्यविदेव च ।
एष भागवतो मुख्यस्त्रेतादिषु विशेषतः ॥
एष धर्मोऽतिफलदो विशेषेण पुनः कलौ ।
एवं भागवतो यस्तु स एव हि विमुच्यते ॥
त्रैविद्यस्त्वपरो धर्मो नानादैवतपूजनम् ।
तत्रापि विष्णुर्ज्ञातव्यः सर्वेभ्योऽभ्यधिको गुणैः ॥
समर्पयति यज्ञाद्यमन्ततस्त्वेव विष्णवे ।
त्रैविद्यधर्मा पुरुषः स्वर्गं भुक्त्वा निवर्तते ॥
पुनः कुर्यात्पुनः स्वर्गं याति यावद्धरेर्वशे ।
सर्वान् देवान् प्रविज्ञाय तत्कर्मैव सदा भवेत् ॥
सम्यक्तत्त्वापरिज्ञानादन्यकर्मकृतेरपि ।
स्वर्गादिप्रार्थनाच्चैव रागादेश्चापरिक्षयात् ॥

कारिकालप्रमाणान्याह ॥ एनमिति ॥ तमेव विवृणोति ॥ तदिति ॥ कार्तयुगत्वे त्रेतादिषु न फलप्रदोऽनध्यायाधीतवेदवदित्यत आह ॥ त्रेतेति ॥ कार्तयुगत्वोक्तिस्तत्र प्राचुर्येण संभवाभिप्रायेणेति भावः । किमस्य फलं यत्त्रेतादिष्वधिकं स्यादित्यत आह ॥ एवमिति ॥ कथं स एव मुच्यते ? त्रैविद्यस्यापि मोक्षसद्भावादित्यतः त्रैविद्यधर्मस्वरूपमुक्त्वा तद्वतो

विषय इति ॥ देवतान्तरविषयतया नानुष्ठीयत इत्यर्थः ॥ तद्वत इति ॥ त्रैविद्यधर्मवतः ॥ अर्थतः सिद्धमिति ॥ स्वर्गगमनावधिरेव न नित्यनिरयप्राप्तिरि-

सदा विष्णोरस्मरणात् त्रैविद्यो नाप्नुयात्परम् ।
क्रमेण मुच्यते विष्णौ कर्माण्यन्ते समर्पयन् ॥
यदि सर्वाणि नियमाज्जन्मभिर्बहुभिः शुभैः ।
परं विष्णुं न यो वेत्ति कुर्वाणोऽपि त्रयीक्रियाः ॥
नासौ त्रैविद्य इत्युक्तो वेदवादी स उच्यते ।
वादो विवादः संप्रोक्तो वादो वचनमेव च ॥
वेदोक्ते विष्णुमाहात्म्ये विवादात्पठनादपि ।
अथवा निरर्थकात्पाठाद्वेदवादी स उच्यते ॥
वेदवादरतो न स्यान्न पाषण्डी न हैतुकी ।
तेभ्यो याति तमो घोरमन्धं यस्मान्न चोत्थितिः ॥
अनारम्भमनन्तं च नित्यदुःखं सुखोज्झितम् ।
वव्रं यद्वेदगदितं तत्र यान्त्यसुरादयः ॥ ४० ॥

मोक्षाभावमाह ॥ त्रैविद्य इति ॥ त्रैविद्यस्यापि भगवज्ज्ञानादिसद्भावात्तस्यैव मोक्षहेतुत्वात्कथमसौ स्वर्गं भुक्त्वा निवर्तेत इत्यत आह ॥ सम्यगिति ॥ किं तस्य कदापि न मोक्ष इत्यतः स्वर्गगमनावधिकथनेनैवार्थतः सिद्धमर्थं स्फुटमाह ॥ क्रमेणेति ॥ अन्ते समर्पयन् त्रैविद्यो यदि नियमात् प्रत्येकं सर्वाणि समर्पयतीत्यर्थः । त्र्य्युक्तकर्मकरणमात्रेण त्रैविद्यो भवेत्किं भगवत्सर्वोत्तमत्वज्ञानादिनेत्यत आह ॥ परमिति ॥ वेदवादित्वस्य भागवतत्रैविद्ययोरपि साम्यादस्यैव किमुच्यत इत्यतो न वेदानुसारित्वं वेदवादित्वमत्राभिप्रेतमिति भावेनाह ॥ वाद इति ॥ विवादात्पठनादिति ॥ विवादपूर्वकपठनादित्यर्थः । अस्त्वेवं वेदवादित्वं

त्युक्त्यार्थात् क्रमेण मोक्षं प्रतिपद्यत इति सिद्धमित्यर्थः ॥ अस्यैव ॥ भागवतस्यैव मोक्ष इति त्रैविद्यस्यैव स्वर्गगमनावधित्वं किमुच्यत इति वाऽर्थः । यद्वाऽस्यैव त्र्य्युक्तकर्मकारिण एव वेदवादित्वम् 'वेदवादी स उच्यते' इत्यनेन किमुच्यत इत्यर्थः । अभिप्रेतमित्यनन्तरं येन भागवतत्रैविद्ययोरेव वेदवादित्वा-

बुद्धिर्निर्णीततत्त्वानामेका विष्णुपरायणा ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥'

इति ब्रह्मवैवर्ते ॥ ४१ ॥

अव्यवसायबुद्धिः केषाम् । यां वाचमविपश्चितः प्रवदन्ति तयाऽपहृतचेतसां बुद्धिः व्यवसायात्मकत्वेन समाधाने न वर्तते ।

'यथा वस्तु तथा ज्ञानं तत्साम्यात्सममीरितम् ।
विषमं त्वन्यथाज्ञानं समाधानं समस्थितिः ॥

तथापि तेन मोक्षादिसिद्धेः कथं भागवतस्यैव मोक्ष उक्त इत्यतः पाषण्डादिवत्तस्य निषिद्धत्वान्न मोक्षसाधनत्वमिति भावेनाह ॥ वेदेति ॥ न केवलं मोक्षसाधनत्वाभावोऽपि तु तमःसाधनत्वं चास्तीत्याह ॥ तेभ्य इति ॥ 'अनारम्भमनन्तं च' इति तमसि दुःखानुभवानुवृत्तेराद्यन्तशून्यत्वमुच्यते । 'यस्मान्नैवोत्थितिः' इति तत्प्राप्तानामपुनरावृत्तिरुच्यते । तमसः पुनरावृत्तिराहित्यं कुत इत्यत आह ॥ वव्रमिति ॥ स्वगतानां गमनं वारयतीति वा, सदा वृणोतीति वा वरमानन्दं वारयतीति वा वव्रम् । 'वव्रमनन्तम्' इत्यादिवेदगदितम् ॥ ४० ॥

एवंविधश्चेदयं वैष्णवो धर्मः तर्हि किमिति कैश्चिदेवैकमत्येनानुष्ठीयते, परस्परविरुद्धतया बहुभिर्नानुष्ठीयत इत्यत आह ॥ बुद्धिरिति ॥ केषाञ्चिदेव बुद्धेर्निर्णीतत्वात्तावन्त एवैकमत्येन विष्णुपरायणाः । बहूनामनिर्णीतबुद्धित्वात्परस्परविरोधेन न विष्णुपरत्वमिति भावः । अनेन व्यवसायेति श्लोकोपि व्याख्यातो भवति ॥ ४१ ॥

यद्यव्यवसायात्मकबुद्धित्वमेव वैष्णवधर्मराहित्ये निमित्तं तर्ह्यव्यवसायबुद्धिस्त्याज्या स्यात् । त्यागश्च कारणपरित्यागेन स्यात् । केन कारणेनाव्यवसायबुद्धिर्भवतीति पृच्छति ॥ अव्यवसायेति ॥ तत्परिहाराय 'याम्' इति श्लोकान् योजयति ॥ यामिति ॥ समाधान

पात इति योज्यम् । अपौनुरुक्त्यायार्थभेदमाह ॥ अनारम्भमित्यादिना ॥ कारणपरित्यागेनेति ॥ अव्यवसायबुद्धेर्यत्कारणं तत्परित्यागेनेत्यर्थः । तथेत्य-

*

न तद्भवत्यसद्वाक्यैर्विषमीकृतचेतसाम् ।
स्वर्गादिपुष्पवाद्येव वचनं यदचेतसाम् ॥
न मन्यन्ते फलं मोक्षं विष्णुसामीप्यरूपकम् ।
फलदं च न मन्यन्ते तं विष्णुं जगतः पतिम् ॥
भोगैश्वर्यानुगत्यर्थं क्रियाबाहुल्यसन्तताम् ।
बहुसंसारफलदामन्ते तमसि पातनीम् ॥
यां वदन्ति दुरात्मानो वेदवाक्यविवादिनः ।
तया सम्मोहितधियां कथं तत्त्वज्ञता भवेत् ॥' इति च ।
'इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे सुकृते तेऽनुभूत्वा
इमं लोकं हीनतरं वा विशन्ति ॥'

इति चाथर्वणी श्रुतिः ।

'वेदवादरतो न स्यान्न पाषण्डी न हैतुकी' इति हि भागवते ।

इति निश्चयस्य तत्त्वविषयतया दार्ढ्यमुच्यते । समाधानाभावे च न विष्णुधर्मानुष्ठानमिति वाक्यशेषः ।

स्मृत्यैव श्लोकान् व्याचष्टे ॥ यथेति ॥ तथा तथाविषयीकारि । तत्साम्यादिति ॥ वस्तुसाम्यादित्यर्थः । असतां वाक्यं कुतो वैषम्यहेतुरित्यत आह ॥ स्वर्गेति ॥ यद्यस्मात् । नान्यदस्तीत्यस्यार्थद्वयमाह ॥ न मन्यन्त इति ॥ अनुगतिः प्राप्तिः । क्रियाबाहुल्यसन्तताम् एतत्प्रतिपादिकाम् । जन्मेत्यस्यार्थो बह्विति । अन्त इत्यभिप्रायमात्रम् । नान्यदस्तीत्याद्यर्थे श्रुतिं चाह ॥ इष्टेति ॥ अन्यच्छ्रेयो भगवज्ज्ञानादि । सुकृते सुकृतप्राप्ये । अनुभूत्वा । भोगानिति शेषः । वेदवादरतत्वमुक्तार्थतया निषिद्धमित्यत्र प्रमाणान्तरं चाह ॥ वेदेति ॥ इष्टापूर्तं वरिष्ठं मन्यमानाः

नन्तरं शेषमाह ॥ विषयीकारीति ॥ अन्त इति-कस्य पदस्यार्थ इत्यत आह ॥ अन्त इतीति ॥ उक्तार्थेति ॥ भगवदर्पणबुद्ध्या निष्कामकर्मानुष्ठानरूपोक्तविरुद्धतया यामिमामित्यादिना निषिद्धमित्यर्थः । इमं भूतलं हीनतरं नरकं

'ये न जानन्ति तं विष्णुं याथातथ्येन संशयात् ।
जिज्ञासवश्च नितरां श्रद्धावन्तः सुसाधवः ॥
निर्णेतॄणामभावेन केवलं ज्ञानवर्जिताः ।
ते याज्ञिकाः स्वर्गभोगक्षये यान्ति मनुष्यताम् ॥
यैर्निश्चितं परत्वं तु विष्णोः प्रायो न यातनाम् ।
ब्रह्महत्यादिभिरपि यान्त्याधिक्ये चिरं न तु ॥
विशेष एव तेषां तु तदन्येषां विपर्ययः ।
ये तु भागवताचार्यैः सम्यग्यज्ञादि कुर्वते ॥
बहिर्मुखा भगवतोऽनिवृत्ताश्च विकर्मणः ।
दक्षिणातर्पितानां तु ह्याचार्याणां तु तेजसा ॥
यान्ति स्वर्गं ततः क्षिप्रं तमोऽन्धं प्राप्नुवन्ति च ।
तदन्ये नैव च स्वर्गं यान्ति विष्णुबहिर्मुखाः ॥'

इति नारदीये ॥ ४२-४४ ॥

केचन स्वर्गभोगानन्तरमिमं लोकं विशन्ति । केचन हीनतरं विशन्तीत्युक्तम् । तत्स्मृत्या विवृणोति ॥ य इति ॥ संशयात् संशयेन । विषयीकुर्वन्तीति शेषः । श्रद्धादिसद्भावे कथं तत्त्वज्ञानाभावः ? 'श्रद्धावान् लभते ज्ञानम्' इत्यादेरित्यत आह ॥ निर्णेतॄणामिति ॥ तत्त्वज्ञानरहितश्रद्धादिकमेवैतत्फलप्रदं चेत्तर्हि कियान् विशेषस्तत्त्वज्ञानिनां भवतीत्यत आह ॥ यैरिति ॥ आधिक्ये चिरं नेति ॥ ब्रह्महत्यादेरप्यधिकपापाचरणेऽप्यल्पकालं यातनां यान्ति । न तु चिरमित्यर्थः । यज्ञादिमात्रेण भगवद्द्वेषिणामपि स्वर्गसिद्धेः किं जिज्ञासादिनेत्यत आह ॥ तदन्येषामिति ॥ विपरीतनिश्चयानामश्वमेधादिभिरपि न स्वर्ग इत्यर्थः । दुर्योधनादीनां द्वेषिणामेव स्वर्गादिदर्शनात् कथमेतदित्यत आह ॥ ये त्विति ॥ तथापि द्वेषिणां स्वर्गप्राप्तिसद्भावात् कथं तदन्येषां विपर्यय इत्युक्तमित्यत आह ॥ तदन्य इति ॥ भागवताचार्यवर्जिततद्द्वेष्यभिप्रायेण तदुक्तमिति भावः । अनेन 'इमं लोकम्' इत्यक्ष-

त्रैगुण्याख्यं विषं यापयन्त्यपगमयन्तीति त्रैगुण्यविषयाः ।
'आश्रित्य वेदांस्तु पुमान् त्रैगुण्यविषहारिणः ।
निस्त्रैगुण्यो भवेन्नित्यं वासुदेवैकसंश्रयः ॥' इति ।
'सत्त्वं साधुगुणाद्विष्णुरात्मा सन्ततिहेतुतः ।'

इति च । सन्ततविष्णुस्मरणं नित्यसत्त्वस्थत्वम् । परमात्मा मम स्वामीति ज्ञानमात्मवत्त्वम् । तेनैक्यज्ञानं निवारयति । विरुद्धयोगक्षेमेच्छावर्जितः । अन्यथोत्थानादेरप्ययोगात् ॥ ४५ ॥

विषयम् । प्रमूढत्वमज्ञत्वमेव । हीनतरमिति त्ववैष्णवाचार्यवद्भगवद्द्वेषिविषयम् । तेषां प्रमूढत्वं मिथ्याज्ञानित्वमित्युक्तं भवति ॥ ४२-४४ ॥

प्रतिज्ञातो ज्ञानोपाय उच्यते ॥ 'त्रैगुण्येति' । तत्र वेदानां त्रैगुण्यविषयत्वात् तान् परित्यज्य निस्त्रैगुण्यो भवेत्यन्यथाप्रतीतिनिरासायाह ॥ त्रैगुण्येति ॥ यापयन्तीत्यस्य प्रापयन्तीत्यन्यथाप्रतीतिनिरासायाह ॥ अपगमयन्तीति ॥ प्रतीत एवार्थः किं न स्यादित्यतः स्वोक्तार्थे स्मृतिसम्मतिमाह ॥ आश्रित्येति ॥ सत्त्वस्थत्वं सात्त्विकत्वं, आत्मवत्त्वं मनस्वित्वमित्यन्यथाप्रतीतिनिरासाय सत्त्वात्मशब्दार्थं स्मृत्यैवाऽऽह ॥ सत्त्वमिति ॥ सन्ततिः सम्यग्व्याप्तिः । सत्त्वं विष्णुश्चेत् तत्स्थत्वं स्वाभाविकं किं विधीयत इत्यत आह ॥ सन्ततेति ॥ न तदाधारतयाऽवस्थानमात्रमत्र विवक्षितमिति भावः । आत्मा विष्णुश्चेत्तद्वत्त्वं स्वाभाविकं न विधेयमित्यत आह ॥ परमात्मेति ॥ न तु तत्सम्बन्धमात्रमिति भावः । सत्त्वस्थपदेनैवास्यार्थतः प्राप्तत्वात्किं पुनरुच्यत इत्यत आह ॥ तेनेति ॥ सततं विष्णुस्मरणमात्रविधावैक्येनापि तत्स्मरणं प्राप्यते । अत आत्मवत्त्वकथनेन तन्निवार्य यथावत्स्मरणप्रकार उच्यत इति भावः । अप्राप्तप्राप्तिर्योगः । प्राप्तपरिरक्षणं क्षेमः । तदुभयं सर्वेथा

वेत्यर्थः ॥ तदुक्तमिति ॥ तदन्येषां विषय इत्युक्तमित्यर्थः ॥ स्वाभाविकं विधीयत इति ॥ तच्चायुक्तमित्यत आहेति योज्यम् । किं विधीयत इति पाठे

'उद्रेकात्पातृराहित्यादनत्वाच्चाखिलस्य च ।
प्रलयेऽप्युदपानोसौ भगवान् हरिरीश्वरः ॥
प्रकृतिर्ह्युदरूपेण सर्वमावृत्य तिष्ठति ।
प्रलयेऽतो लयं प्राहुः सर्वतः सम्प्लुतोदकम् ॥' इति च ।
'यावत्प्रयोजनं विष्णोः सकाशात्साधकस्य च ।
धर्ममोक्षादिकं तावत्सर्ववेदविदो भवेत् ॥
वेदार्थनिर्णयो यस्माद्विष्णोर्ज्ञानं प्रकीर्तितम् ।
ज्ञानात्प्रसन्नश्च हरिर्यतोऽखिलफलप्रदः ॥' इति च ।

सर्वतः संप्लुतोदकेऽप्युद्रिक्तः पालकवर्जितः कालाद्यनश्च यो विष्णुस्तस्माद्यावत्फलं तावत्सर्ववेदेषु विशेषज्ञस्यैव भवतीत्यर्थः । सर्वे

त्याज्यमित्यन्यथाप्रतीतिनिरासायाऽह ॥ विरुद्धेति ॥ न केवलं शास्त्रविरुद्धविषययोगक्षेमपरित्यागमात्रमत्र विवक्षितम् । अपि तु तदिच्छात्यागोऽपीति भावेनेच्छेत्युक्तम् । प्रतीत एवार्थः किं न स्यादित्यत आह ॥ अन्यथेति ॥ उत्थानादीनामप्यप्राप्तप्राप्तिरूपत्वेन योगत्वात् । ततश्च 'योगमातिष्ठोत्तिष्ठ' इत्यादिविरोध इति भावः ॥ ४५ ॥

त्रैगुण्यनिवृत्त्यर्थं वेदाश्रयणं कार्यमित्यत्र युक्तिरुच्यते 'यावानिति'। तत्रोदपानशब्दं, सर्वतः संप्लुतोदकशब्दं च स्मृत्यैव व्याचष्टे ॥ उद्रेकादिति ॥ सर्वकार्याणां प्रलये लीनत्वात् कथं सर्वतः संप्लुतोदकशब्दार्थतया प्रलयो गृह्यत इत्यत आह ॥ प्रकृतिरिति ॥

समस्तश्लोकं स्मृत्या व्याचष्टे ॥ यावदिति ॥ साधकस्य सम्भवतीति शेषः । वेदज्ञानेन कुतो विष्णुः फलं ददातीत्यत आह ॥ वेदेति ॥ अस्तु वेदार्थज्ञानं नाम विष्णुज्ञानम् । तथापि कुतो भगवान् फलं ददातीत्यत आह ॥ ज्ञानादिति ॥

वाक्यद्वयसिद्धं श्लोकार्थमेकीकृत्य दर्शयति ॥ सर्वत इति ॥ नन्वत्र कश्चिदुद्रिक्तत्वादिगुणः श्रूयते । स विष्णुरिति कुतः ? अन्योपि किं न

तु यथाश्रुतमेव ॥ अस्येति ॥ तद्वशत्वस्येत्यर्थः ॥ योगमातिष्ठोत्तिष्ठेत्यादि-

हि विष्णोरन्ये प्रलयकाले नोद्रिक्ताः। ये चोद्रिक्ता मुक्ता रमा च तेऽपि न पालकवर्जिताः। विष्णुपाल्यत्वात्। न च मुक्ताः कालादिचेष्टकाः। न चोद्रिक्तत्वं तेषां तद्वत्। अतः उदपानो विष्णुरेव। प्रलये विशेषतोऽपि।

'आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनाऽस। तम आसीत्तमसा गूळ्हमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।' 'आपो वा इदमग्रे सलिलमासीत्' 'सलिल एको द्रष्टाऽद्वैतो भवति।' इत्यादिश्रुतिभ्यः ॥ ४६ ॥

स्यादित्यत आह॥ सर्वे हीति॥ मुक्तानां रमायाश्चोद्रिक्तत्वात् कथमुद्रिक्तत्वेन विष्णुत्वनिश्चय इत्यत आह॥ ये चेति॥ मुक्तानामुद्रिक्तत्वेऽपि पालकवर्जितत्वाभावेनोदपानत्वासम्भव इति भावः। मुक्तानामुदपानत्वासम्भवे हेत्वन्तरं चाह॥ न चेति॥ रमायाः सर्वाभिमानित्वेन कालादिचेष्टकत्वादसङ्ग्रहः। किञ्चोद्रिक्तत्वं तेषामङ्गीकृतमेव न तु मुख्यतोस्त्यतो न तेषामुदपानत्वमित्याह॥ न चेति॥ अनेन रमाया अपि चेष्टकत्वमनुमतमेवेति ज्ञायते। उद्रिक्तत्वादेरन्यत्रासम्भवेऽपि किमित्यत आह॥ अत इति॥ किञ्चोद्रिक्तत्वाद्येवान्यत्र न सम्भवति। किमुत सर्वतः सम्प्लुतोदके। अतोऽप्युदपानो विष्णुरेवेत्याह॥ प्रलय इति॥

मास्त्वन्येषामसम्भवात् सर्वतः सम्प्लुतोदकेऽप्युदपानत्वम्। विष्णोरपि तत्सम्भवः कुत इति चेत्परिशेषादिति ब्रूमः। श्रुतिभ्यश्चेत्याह॥ आनीदिति॥ तदेकं ब्रह्म वायुप्रेरणां विना स्वसामर्थ्येनैव कालादिकं प्रेरयति स्म। तस्मादन्यदुत्तमं वस्तु किञ्चन नाऽस। अपि तु तदेवोद्रिक्तमास। अपरं तमः प्रकृतिरस्मिन् सर्वस्मिन् देशेऽविज्ञातं सलिलं

विरोध इति॥ चतुर्थाध्यायोक्तगीतावाक्यविरोध इत्यर्थः॥ असङ्ग्रह इति॥ न च मुक्ता इति वाक्य इति योज्यम्। पर इति श्रवणादुक्तमपरमिति।

कर्माधिकारिण एव त्वदादयो जीवाः, फलं तु मदायत्तमिति भावः। मा कर्मफलहेतुर्भूर्नेश्वरोऽहमिति भावं कुरु। 'एष उ एव शुभाशुभैः कर्मफलैरेनं संयोजयति न स्वयं संयुक्तो भवति। यदेनं कर्मफलैः संयोजयति न स्वयं संयुक्तो भवति तस्मादन्य एवासौ भगवान् वेदितव्यः' इति पैङ्गिश्रुतिः॥ ४७॥

भूत्वाऽसीत्। तेन सलिलेन प्रलये सर्वं गूढमासीदित्यर्थः। अस्याग्रे सलिले समन्तात्पालकवर्जितो भगवानासीदित्यर्थः। अद्वैतः सर्वोद्रिक्तः॥ ४६॥

ऐक्यभावनं न कार्यमित्यत्र हेतुरुच्यते 'कर्मणीति'। तत्रार्जुनस्य कर्मकरणे किञ्चित्सामर्थ्यमस्ति, न तु फलापादन इत्येवोच्यते। तत्कथमनेन सर्वजीवानामीश्वराभेदाभावः साध्यत इत्यत आह॥ कर्मेति॥ नात्र त इत्युर्जुन एव गृह्यते। अपि तु सर्वजीवाः। तेषां फलापादनासामर्थ्यमुक्त्वा ईश्वरे तत्सामर्थ्यमभिप्रेयते। तेनात्रोक्तैवाभेदाभावे युक्तिरिति भावः। नन्वत्रास्त्वेतावदभिप्रेतम्। तथापि प्रतिज्ञाया अभावादभेदाभावे युक्तिरियमुक्तेति कथं ज्ञायत इत्यत आह॥ मा कर्मेति॥ फलहेतुरीश्वरः स मा भूर्मनसेत्यर्थः। अत्र श्रुतिं चाह॥ एष इति॥ स्वयं जीवः॥ ४७॥

सर्वमिदमित्यस्य वचनव्यत्ययेनार्थोक्तिरस्मिन् सर्वस्मिन्निति। अप्रकेतमविज्ञातम्। आः इत्यस्यार्थ आसीदिति। इदमग्र इत्यस्यार्थोऽस्याग्र इति। प्रपञ्चस्याग्र इत्यर्थः। आप इत्यस्यार्थः पालकवर्जित इति। बहुवचनं शब्दस्वाभाव्यात्। अकारदैर्घ्यं छान्दसम्। आङ्पूर्वको वा। प्रकृतानुगुणतयाऽर्थमाह॥ सर्वोद्रिक्त इति॥ सर्वापेक्षयोद्रिक्त इत्यर्थः। त इत्युपलक्षणमिति भावेनाह॥ सर्वे जीवा इति॥ प्रतिज्ञाया अभावादिति॥ ऐक्यभावना न कार्येति प्रतिज्ञाया अभावादित्यर्थः। तदविनाभावयुक्तेरिति भावः। भावनाभावप्रतिज्ञालाभार्थमाह॥ मनसेत्यर्थ इति॥ इत्युक्तमिति॥ दूरेणेति

सङ्गं फलस्नेहम् ॥ ४८ ॥

बुद्धौ जातायामपि विष्णुमेव शरणमन्विच्छ—
'अज्ञानां ज्ञानिनां चैव मुक्तानां शरणं हरिः ।
तं ये स्वैक्येन मन्यन्ते सर्वभिन्नं गुणोच्छ्रयात् ॥
कृपणास्ते तमस्यन्धे निपतन्ति न संशयः ।
न तेषामुत्थितिः क्वापि नित्यातिशयदुःखिनाम् ।
गुणभेदविदां विष्णोर्भेदाभेदविदामपि ।
देहकर्मादिषु तथा प्रादुर्भावादिकेऽपि वा ॥
स्वोद्रिक्तानां तदीयानां निन्दां कुर्वन्ति येऽपि च ।
सर्वेषामपि चैतेषां गतिरेषा न संशयः ॥'

इति नारदीये ॥ ४९ ॥

कर्माकरणे स्नेहो माऽस्त्वित्युक्तम् । किं तर्हीत्यत उच्यते 'योगस्थः' इति । तत्र कर्मसङ्गं त्यक्त्वा कर्माणि कुर्विति व्याहतमित्यत आह ॥ सङ्गमिति ॥ न सङ्गपदेन कर्मसम्बन्धोऽभिधीयते । येन व्याहतिः । अपि तु फलस्नेह एवेति भावः ॥ ४८ ॥

ज्ञानात्कर्माधममित्युक्तम् । तर्हि ज्ञानस्योत्तमत्वात् ज्ञानावस्थायामीश्वरैक्यभावनं युक्तमित्याशङ्कापरिहारायोच्यते बुद्धाविति । तत्रैतच्छङ्कापरिहारः कथमुक्त इत्यत आह ॥ बुद्धाविति ॥ अस्मिन्नेवार्थे स्मृतिसम्मतिं दर्शयंस्तयैवोत्तरपादमपि व्याचष्टे ॥ अज्ञानामिति ॥ फलहेतुपदव्याख्यानं 'तं ये स्वैक्येन' इत्यादि पूर्ववत् । कृपणाः कृपाविषयाः । तत्र हेतुमाह ॥ तमसीति ॥ ४९ ॥

पूर्वार्ध इति योज्यम् । पूर्ववदिति ॥ मा कर्मफलहेतुर्भूरित्यत्रेव मनसा मन्यन्त इति योज्यमित्यर्थः । तथाचैक्यभावनां ये कुर्वन्तीत्यर्थलाभ इति भावः । यद्वा फलहेतुपदेन कथमैक्यभावनालाभः । येन तस्येदं व्याख्यानमित्यत आह ॥ पूर्ववदिति ॥ मा कर्मफलहेतुर्भूरितिवदित्यर्थः । फलहेतुरीश्वरः । ये

यथावद्विष्णुं ज्ञात्वा तदर्थत्वेन कर्मकरणमित्येतत्कर्मकौशलमेव योगः । भगवज्ज्ञानमेव बुद्धिः ॥ ५० ॥ ५१ ॥

निर्वेदं नितरां लाभम् ।

बुद्धिमोहो यदा न स्यादन्यथाज्ञानलक्षणः ।
श्रोतव्यश्रुतसाफल्यं तदा प्राप्नोति मानवः ॥

नन्वस्तु ज्ञानस्याधिक्यं, ततश्च किमित्यतः 'तस्मात्' इति ज्ञानसाधनमापाद्यमित्युक्तम् । तत्रास्तु ज्ञानसाधनापादनम् । किं फलस्नेहरहितकर्मणेत्याशङ्कायां फलस्नेहरहितकर्मैव ज्ञानसाधनमिति वक्तव्यम् । किमर्थमत्र कर्मकौशलस्य ज्ञानसाधनत्वमुच्यत इत्यतः फलस्नेहराहित्यादियुक्तकर्मैव कर्मकौशलपदेनोच्यत इति भावेनाह ॥ यथावदिति ॥ 'योगस्थः' इत्यत्र भगवज्ज्ञानस्यापरिगृहीतत्वादत्रापि न तदभिप्रेतमित्यत आह ॥ भगवदिति ॥ एतच्छ्लोकार्थविवरणात्मकोत्तरश्लोके 'बुद्धियुक्तः' इति भगवज्ज्ञानस्यापरोक्षज्ञानसाधनत्वेन गृहीतत्वादत्र पूर्वत्रापि तदभिमतमिति भावः ॥ ५० ॥ ५१ ॥

कियत्पर्यन्तमवश्यं कर्तव्यानि मुमुक्षुणैवं कर्माणीत्यत उच्यते यदेति । तत्र निर्वेदपदेन वैराग्यमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ निर्वेदमिति ॥ एतच्छ्लोकद्वयं स्मृत्यैव व्याचष्टे ॥ बुद्धीति ॥ श्रोतव्यश्रुतपदं सर्वकर्मोपलक्षकम् । समाधानेन श्रुत्यर्थज्ञाननिश्चलत्वेनापरोक्षज्ञानं भवति । अनेन 'समाधावचला' इति समाधौ सत्यपरोक्षज्ञानं

मनसा फलहेतवो भवन्तीत्यर्थः । फलहेतुरीश्वरोऽहमिति मन्यमाना इति पूर्ववदित्यर्थः । कृपाया अविषयास्त इत्यर्थः । यद्वा कृपां प्रति विषयाः शोच्या इत्यर्थः । भाष्यमवतारयितुं बुद्धियुक्त इति श्लोके तस्मादित्युत्तरार्धमवतारयति ॥ नन्विति ॥ योगाय युज्यस्वेत्यस्यार्थो ज्ञानमापाद्यमिति ॥ राहित्यादीत्यादिपदेन भगवज्ज्ञानादिग्रहः । इत्यत्रेति ॥ श्लोके त्यागसमत्वयोरेव योगशब्दार्थत्वेनोक्त्या भगवज्ज्ञानस्य योगशब्दार्थत्वेनापरिग्रहादित्यर्थः ॥ अत्रापि ॥ बुद्धियुक्त इति श्लोकेऽपीत्यर्थः ॥ अपरोक्षेति ॥ मनीषिपदोक्तापरोक्षेत्यर्थः ॥ पूर्वत्रेति ॥

श्रुतिमार्गं प्रपन्ना तु तदर्थज्ञाननिश्चला ।
समाधानेन तु पुनरापरोक्ष्याच्च निश्चला ॥
विष्णौ प्राप्स्यति तद्योगं मुक्तो भूत्वा तदश्नुते ।

इति च । श्रुतौ विशेषेण प्रतिपन्ना ॥ ५२ ॥ ५३ ॥

का भाषा? कथं भाष्यते? कैर्गुणैः? समाधिस्थस्य विषमबुद्धिवर्जितस्य ॥ ५४ ॥

'सर्वकामनिवृत्तिस्तु जानतो न कथञ्चन ।
अनिषिद्धकामितैवातो ह्यकामित्वमितीर्यते ॥
अपरोक्षदृशोऽपि स्याद्यदा नास्त्यपरोक्षदृक् ।
क्वचिद्विरुद्धकामोऽपि यथाऽयुध्यद्गुरो हरिम् ॥

तेन विष्णावचलेति व्याख्यातं भवति । तद्योगं भगवद्योगम् । भगवद्योगस्य सर्वेषामपि विद्यमानत्वात् को विशेष इत्युक्तं विवृणोति ॥ मुक्त इति ॥ तदश्नुते ब्रह्माप्नोतीत्यर्थः । अत्रापि यदा तदेति सम्बध्यते । नन्वत्र 'श्रुतिविप्रतिपन्ना' इति श्रुतिविरुद्धत्वमुच्यते । तत्कथं श्रुतिमार्गं प्रपन्नेति व्याख्येत्यत आह ॥ श्रुताविति ॥ ५२ ॥ ५३ ॥

प्रकृतज्ञानिलक्षणादिप्रश्नः क्रियते स्थितेति ॥ तत्र 'का भाषा' इत्येतदन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ केति ॥ ननु ज्ञानीति भाष्यत इति सिद्धत्वात्किं प्रश्नेनेत्यत आह ॥ कैरिति ॥ 'समाधिस्थस्य' इत्यस्य समाधिं कुर्वतो ज्ञानिनो लक्षणादि पृच्छतीत्यन्यथाप्रतीतिनिरासार्थमाह ॥ समाधीति ॥ ५४ ॥

ज्ञानिलक्षणमुच्यते प्रजहातीति ॥ तत्र ज्ञानिनः सर्वकामप्रहाणं नाम निषिद्धानिषिद्धसर्वकामप्रहाणमित्यन्यथाप्रतीतिनिरासाय तत्स्मृत्यैव व्याचष्टे ॥ सर्वेति ॥ कुतो न ज्ञानिनः सर्वकामनिवृत्तिः, यतः सर्वशब्दसङ्कोचः क्रियत इत्यत आह ॥ अपरोक्षेति ॥ ज्ञानिनः कदाचि-

---

एतच्छ्लोकार्थविवरणपूर्वकं बुद्धिमोहतरणपदोक्तं ज्ञानफलमुच्यते ॥ श्रुतीति ॥ योगस्थ इति श्लोकेऽपीत्यर्थः ॥ अत्रापि यदा तदेति सम्बन्ध इति ॥ श्रुतिमार्गमिति

अतोऽनभिभवो यावद् दृशस्तावन्निगद्यते ।
स्थितप्रज्ञस्तथाप्यस्य कादाचित्क्यपि या दृशिः ॥
नियमेनैव मोक्षाय भवेद्योग्या भवेद्यदि ।
अयोग्या भक्तिजाता चेत्क्रमान्मुक्त्यै भवेत्तथा ॥

इति च । आत्मनि विष्णौ । आत्मना विष्णुना । तत्प्रसादादेव तुष्टः ॥ ५५ ॥

रसो रागः ॥ ५९ ॥

न्निषिद्धकामनिवृत्तिरपि नास्ति । कुतः सर्वकामनिवृत्तिरित्यर्थः । तर्हि ज्ञानस्याभिभवकाले ज्ञानिलक्षणाभावाज्ज्ञानित्वाभावः प्रसज्यत इत्यतः सत्यमित्याह ॥ अत इति ॥ निषिद्धकामराहित्यस्य ज्ञानानभिभवकाल एव सत्त्वादित्यर्थः । ननु यदि कदाचिद् दृशिरभिभूयते तर्हि सा न मोक्षसाधनं स्यात् । कादाचित्कतया दौर्बल्यादित्यत आह ॥ तथापीति ॥ योग्या स्वबिम्बविषया । 'आत्मन्येवात्मना' इत्यात्मशब्दौ जीवमनःपरावित्यन्यथाप्रतीतिनिरासायाह ॥ आत्मनीति ॥ कुतो न जीवादिपरावित्यत आह ॥ तुष्ट इति ॥ अत्रात्मस्थित्यादिना तुष्ट्यभिधानाज्जीवस्थित्यादिना तदसम्भवान्न तत्परावात्मशब्दाविति भावः ॥ ५५ ॥

एतादृशं चेज्ज्ञानं तत्किं सर्वे न साधयन्तीत्यतो निराहारत्वेनेन्द्रियजयस्तेनैव ज्ञानमित्यतिदुःसंपादत्वं ज्ञानस्योच्यते 'विषया' इति । तत्र रसशब्दस्यापूर्वमर्थमाह ॥ रस इति ॥ ५९ ॥

वीतरागेत्यादिना रागादिराहित्यं ज्ञानिलक्षणमुक्तम् । जिज्ञासुना च तत्साध्यम् । कारणफलपरिज्ञाने च रागादित्यागो भवति । अतो रागादिपरिहाराय तत्कारणफले उच्येते 'ध्यायत' इति । तत्र संमोह-

---

स्मृतावपीत्यर्थः । तुष्टपदस्य मूलेऽनुवादो व्यर्थ इत्यतस्तस्य कृत्यमाह ॥ कुतो न जीवादिपरावित्यादिना ॥ कारणफलपरिज्ञाने चेति ॥ परम्परया नरकाद्यनर्थफलपरिज्ञाने च भीत्या तत्कारणरागादित्यागबुद्धिर्भवति । तत्त्यागश्च परम्परया ध्यानादितत्कारणत्यागेन भवति । तत्त्यागश्च तज्ज्ञाने सति भवत्यतो रागादि-

संमोहान्मिथ्याज्ञानात् ज्ञातमप्यन्यथा स्मर्यते। वाक्यार्थानामन्यथास्मरणान्निर्णीतं ज्ञानमपि नश्यति ॥ ६३ ॥

शान्तिर्भगवन्निष्ठा। 'शमो मन्निष्ठता' इति हि भागवते ॥६६॥

'देवेभ्योऽन्ये यदा ब्रह्म पश्यन्त्यन्यन्न दृश्यते।
निशायामिव सुव्यक्तं यथाऽन्यैर्ब्रह्म नेयते ॥

स्मृतिविभ्रमपदाभ्यां विपरीतज्ञानमेवोच्यते। अतः कथं हेतुहेतुमद्भाव इत्यत आह ॥ संमोहादिति ॥ अत्र संमोहपदेन परवित्तापहरणाद्यधर्मे धर्मबुद्धिरित्यादिमिथ्याज्ञानमुच्यते। स्मृतिविभ्रमपदेन च परवित्तापहरणादेरधर्मत्वाभिधायकश्रुत्याद्यर्थस्य पूर्वं स्वयं ज्ञातस्याप्यन्यथास्मरणमुच्यते। तयोश्च हेतुहेतुमद्भावस्सम्भवतीति भावः। स्मृतिभ्रंशाद्बुद्धिनाश इति दुर्घटम्। चेतनस्य बुद्ध्यविनाभावित्वेन बुद्धेर्नाशायोगादित्यत उक्तं विवृण्वन्नाह ॥ वाक्येति ॥ निर्णीतं केवलवाक्यसापेक्षतां विनापि निश्चितम्। न तु ज्ञानमात्रमिति भावः ॥ ६३ ॥

इन्द्रियजये जाते मनसः स्वतोऽपि प्रायो विषयागतिलक्षणेन प्रसादेन मोक्षलाभादस्मावापाद्य इत्युक्तम्। तदनापादने दोषश्चोच्यते नास्तीति। तत्र भावनायाः शान्तिसाध्यत्वात् 'न चाभावयतः शान्तिः' इति कथमुच्यत इत्यतो न शान्तिपदेनात्र चित्तनिरोध उच्यते। अपि तु भगवन्निष्ठबुद्धित्वम्। तच्च भावनासाध्यं भवतीति भावेन शान्तिशब्दार्थं सप्रमाणकमाह ॥ शान्तिरिति ॥ ६६ ॥

पिण्डीकृत्योक्तलक्षणमुच्यते या निशेति। तत्र सर्वप्रेरकाणां देवानामपि ज्ञानित्वाज्ज्ञानिनां परमात्मेतरादर्शने लोकयात्रोच्छेदः स्यादित्यतस्तद्वाक्यं देवेतरज्ञानिविषयतया स्मृत्यैव व्याचष्टे ॥ देवेभ्य इति ॥ 'यथाऽन्यैः' इत्यनेन पूर्वार्धतात्पर्यमुक्तं भवति। यथाज्ञैर्ब्रह्म न

कारणफले द्वाभ्यामाहेत्यर्थः। निर्णीतमित्यनुवादः केवलेत्यादि व्याख्या ॥ उक्तलक्षणमिति ॥ प्रजहातीति श्लोकचतुष्टये विक्षिप्योक्तं लक्षणं पिण्डी-

आश्चर्यवस्तुदृग् यद्वद् व्यक्तमन्यन्न पश्यति ।
ऐकाग्र्याद्वा सुखोद्रेकाद्देवाः सूर्यवदेव च ॥
प्रायशः सर्ववेत्तारस्तत्रापि ह्युत्तरोत्तरम् ।'

इति ब्रह्मतर्के ॥ ६९ ॥

'भुञ्जानोऽपि हि यः कामान् मर्यादां न तरेत् क्वचित् ।
समुद्रवद्धर्ममयीं नासौ कामी स मुच्यते ॥
केति कुत्सितवाची स्यात्कुत्सितं मानमेव तु ।
कामो मोक्षविरोधी स्यान्न सर्वेच्छा विरोधिनी ॥'

इति च । न च सर्वेच्छाभावे जीवनं भवति ।

'शान्तिर्मोक्षो यतो ह्यत्र विष्णुनिष्ठा भवेद् ध्रुवा ।'

इति च ॥ ७० ॥

ज्ञायत इत्यर्थः ॥ सूर्यवदिति ॥ सूर्यो यथा स्वतेजसा सर्वं प्रकाशयत्येवं स्वज्ञानेन सर्वं विषयीकुर्वन्तीत्यर्थः ॥ ६९ ॥

एवं ज्ञानी सर्वत्रोदासीनश्चेत्कथं विषयभोगस्तस्येत्यत उच्यते आपूर्यमाणमिति । तत्स्मृत्यैव व्याचष्टे ॥ भुञ्जान इति ॥ धर्ममयीं धर्माख्याम् । विषयभोक्ता न कामी कथमुच्यत इत्यत उक्तस्य 'न कामकामी' इत्यस्यार्थो नासाविति । ननु कामाभावे विषयभोगासम्भवात् कथं ज्ञानिनः कामाभावो मोक्षसिद्ध्यर्थमुच्यत इत्यतोऽत्र कामपदेन निषिद्धेच्छैवात्राभिप्रेता । तस्या एव मोक्षविरोधित्वात् । नेच्छामात्रं तस्य मोक्षाविरोधित्वादित्याह ॥ केति ॥ कुत्सितेयमिति मानं यद्विषये सैवेच्छा काम इत्यर्थः । इतश्च 'न कामकामी' इत्यत्र नेच्छामात्रनिषेध इत्याह ॥ न चेति ॥ ननु शान्तिशब्दस्य भगवन्निष्ठावाचित्वात् कथं स मुच्यत इति व्याख्येत्यतो भगवन्निष्ठासम्बन्धादेव मोक्षोऽपि शान्तिशब्दाभिधेय इति स्मृत्यैवाह ॥ शान्तिरिति ॥ ७० ॥

पूर्वश्लोकोक्तं प्रपञ्चयते विहायेति । तत्र कामपदेन यदीच्छा गृह्यते तर्हि निःस्पृह इति पुनरुक्तिः । यदि विषयास्तर्हि विषयत्यागे किं

निषिद्धस्पृहाभावमात्रेण सर्वविषयान् विहाय ।
'अस्वरूपे स्वरूपत्वमतिरेव ह्यहङ्कृतिः ।
त्याज्या सर्वत्र ममता ज्ञात्वा सर्वं हरेर्वशे ॥'
इति च ॥ ७१ ॥

ब्राह्मी ब्रह्मविषया । ज्ञानिनामप्यन्तकालेऽन्यमनसां प्रारब्धकर्मभावाज्जन्मान्तरम् । प्रारब्धकर्मनाशकाले नियमेन भगवत्स्मृति-

---

भक्षयति । निःस्पृहत्वं च कथं युज्यते । सर्वकामनिवृत्तिरिति वचनविरोधात् । जीवनाद्यभावप्रसङ्गाच्चेत्यत आह ॥ निषिद्धेति ॥ सर्वकामपदेन विषयाणां ग्रहणान्न पुनरुक्तिदोषः । नापि चरणासम्भवः । अत्र निःस्पृह इत्यनेन विषयाणां स्वरूपतो हानमन्तरेण स्पृहाभावमात्रेण हानस्याभिप्रेतत्वात् । नापि स्मृतिवचनादिविरोधः । निःस्पृह इति निषिद्धविषयस्पृहाभावस्य विवक्षितत्वादिति भावः । ननु ज्ञानिनामप्यहं ममेति प्रत्ययप्रयोगदर्शनात् कथं तस्योच्यते निरहङ्कारत्वादीत्यतो नाहमित्यादिज्ञानादिमात्रमहङ्कारादीति भावेन स्मृत्यैवाहङ्कारादिशब्दार्थमाह ॥ अस्वरूप इति ॥ ममता मदधीनमिति भावना ॥७१॥

उक्तलक्षणमुपसंह्रियते एषेति । तत्र ब्राह्मीति ब्रह्मधर्मभूतेति प्रतीतिनिरासायाह ॥ ब्राह्मीति ॥ ननु 'क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' इत्यादेर्ज्ञानमात्रेण सर्वकर्मणां क्षयाज्ज्ञानानन्तरमेव मोक्षसद्भावेन 'स्थित्वाऽस्याम्' इत्यन्तकाले भगवत्स्मृत्यादिविधानं ब्रह्मप्राप्त्यर्थं किमिति क्रियत इत्यत आह ॥ ज्ञानिनामिति ॥ ज्ञानिनामपि यद्यन्तकाले भगवत्स्मरणादि नास्ति तर्हि जन्मान्तरमेव भवति । न ब्रह्मप्राप्तिरतस्तदर्थमन्तकाले तत्स्मरणादिविधानं युक्तमेव । न च ज्ञानिनः क्षीणकर्मत्वाज्जन्मान्तरायोगः । ज्ञानमात्रेणाप्रारब्धकर्मनाशेऽपि येषामन्तकालेऽपि न भगवत्स्मरणं तेषां प्रारब्धकर्मभावादिति भावः ।

कृत्योच्यत इत्यर्थः । इति वचनविरोधादिति ॥ सर्वकामनिवृत्तिस्तु ज्ञानतो न कथञ्चनेति प्रागुक्तवचनविरोधादित्यर्थः ॥ उक्तेति ॥ प्रजहातीत्यादिनोक्त-

भवति । ततो मोक्षश्च । 'यं यं वाऽपि स्मरन् भावम्' इति हि वक्ष्यति । बाणं शरीरम् ।

'अभावाज्जडदेहस्य विष्णुर्निर्वाण उच्यते ।
भिन्नदेहाभावतो वा स सहस्रशिरा अपि ॥'

इति च ॥ ७२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये द्वितीयोऽध्यायः ॥ २ ॥

यदि मोक्षार्थं साक्षादन्तकाल एव भगवत्स्मृत्याद्यपेक्षितं तर्हि तस्य दुःसम्पादत्वेन कस्यापि मोक्षो न स्यात् । अतः साक्षादन्तकालस्मरणं नात्र भगवतोऽभिप्रेतमित्यत आह ॥ प्रारब्धेति ॥ न मोक्षार्थमन्तकाल-स्मरणापेक्षायां कस्यापि मोक्षप्रसङ्गः । प्रारब्धकर्मण एवान्तकालस्मरण-प्रतिबन्धकत्वेन तन्नाशेऽन्तकाले स्मरणनियमात् । तद्भावे च मोक्ष-नियमादिति भावः । नन्वन्तकालस्मरणादेव मोक्षो नान्यथेति भगवदभि-मतमिति निश्चयो यदि भवेत्तदैवमर्थकल्पना भवेत् । स एव कुत इत्यत आह ॥ यं यमिति ॥ 'शान्तिर्मोक्षोऽथ निर्वाणम्' इत्यादेर्निर्वाणशब्दस्य मोक्षेऽपि प्रसिद्धेर्ब्रह्म निर्वाणमिति कथं सामानाधिकरणम् । न च ब्रह्म निर्वाणं चेति योजना । ब्रह्मप्राप्त्यतिरिक्तमोक्षानिरूपणादित्यत आह ॥ बाणमिति ॥ बाणशब्दस्य शरीरवाचित्वान्निर्वाणपदेन कार्यब्रह्मव्यावृत्त्यर्थं ब्रह्मणोऽशरीरत्वमेवोच्यते । न मोक्ष इति भावः । ननु कथमशरीरत्वं

ज्ञानिलक्षणमित्यर्थः ॥ दुःसम्पादनत्वेनेति ॥ कष्टसाध्यत्वेनेत्यर्थः । ईषद्दुःसुषु कृच्छ्राऽकृच्छ्रार्थेषु खलिति खलन्तः ॥ तद्भावे चेति ॥ स्मरणाभावे चेत्यर्थः ॥ कार्यब्रह्मेति ॥ विरिञ्चव्यावृत्त्यर्थमित्यर्थः । तस्यापि 'स एनान् ब्रह्म गमयति' इत्यादौ 'कार्यं बादरिः' इति सूत्रोक्तदिशा नपुंसकब्रह्म-

ब्रह्मणः । सहस्रशीर्षेत्यादिविरोधादित्याशङ्कां स्मृत्यैव परिहरति ॥ अभावादिति ॥ ७२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां द्वितीयोऽध्यायः ॥ २ ॥

शब्दवाच्यत्वात् परब्रह्मप्राप्तेरेव मोक्षरूपत्वादिति भावः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
द्वितीयोऽध्यायः ॥ २ ॥

॥ अथ तृतीयोऽध्यायः ॥

हरिः ॐ। ज्ञानं योगश्चोक्तौ। तत्र कर्मयोगं विशेषतः प्रपञ्चयत्यनेनाध्यायेन।

'दूरेण ह्यवरं कर्म' इति प्रश्नबीजम् ॥ १ ॥ २ ॥

पूर्वाध्यायसङ्गतत्वेनैतदध्यायार्थं दर्शयितुं पूर्वाध्यायप्रतिपाद्यमाह ॥ ज्ञानमिति ॥ 'एषा तेऽभिहिता' इत्यन्तेन ज्ञायत इति ज्ञानमीश्वरादिस्वरूपं निरूपितम्। ततोऽध्यायपरिसमाप्तिपर्यन्तं तत्स्वरूपज्ञानोपायश्चोक्तः पूर्वाध्याय इत्यर्थः। तत्सङ्गतत्वेनैतदध्यायार्थमाह ॥ तत्रेति ॥ तयोर्ज्ञानयोगयोर्मध्ये योगोऽपि द्विविधो भवति। कर्मध्यानयोगभेदात्। तत्र प्रागुक्तमेव कर्मयोगं प्रपञ्चयत्यनेनाध्यायेन भगवानित्यर्थः ॥ ननु 'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा' इत्यादिना पूर्वत्रापि कर्मयोगस्य प्रपञ्चितत्वात् किमनेनाध्यायेनेत्यत उक्तम् ॥ विशेषत इति ॥ नन्वत्रापि 'इन्द्रियाणि पराणि' इत्यादिना ज्ञानस्याप्युक्तेः कथं कर्मयोगं प्रपञ्चयतीत्युच्यत इत्यतो वाऽह ॥ विशेषत इति ॥ प्राचुर्येणेत्यर्थः।

ननु कर्मणः सकाशाद्बुद्धेर्ज्यायस्त्वं प्राक् कुत्रोक्तम्? यद्बीजोऽयं 'ज्यायसी चेत्कर्मणः' इत्यर्जुनप्रश्न इत्यत आह ॥ दूरेणेति ॥ १-२ ॥

हरिः ॐ ॥ इत्यन्तेनेत्यस्य निरूपितमित्यन्वयः। न त्वेवाहमित्यादिना ग्रन्थेनेत्यपि योज्यम्। कर्मणि ल्युडिति भावेनाह ॥ ज्ञायत इति ॥ ईश्वरादीत्यादिपदेन प्राधान्येन प्रकृतस्य जीवस्य प्रासंगिकवेददेशकालादेश्च ग्रहः। ईश्वरस्यापि युद्धगतत्वेन येषामनित्यत्वशंका तान्प्रति तस्यापि नत्वेवाहमित्यादिना प्राधान्येन प्रकृतत्वाद्योगे त्विमां शृण्विति प्रतिज्ञापूर्वं त्रैगुण्यविषया वेदा इत्यादिनेश्वरज्ञानोपायस्यैवोक्तत्वादीश्वरादीति स्वशब्देन तस्योक्तिः। अत एव तत्स्वरूपज्ञानोपायश्चोक्त इत्युक्तम् ॥ कर्मध्यानयोगेति ॥ कर्मरूपज्ञानोपाय-

*

ज्ञानप्रचुरो योगो ज्ञानयोगः । कर्मप्रचुरोऽन्यः ।
'साङ्ख्या ज्ञानप्रधानत्वाद्देवाश्च यतयस्तथा ।
मुख्यसाङ्ख्यास्तत्र देवा ज्ञानमेषां महद्यतः ॥
बहुकर्मकृतोऽप्येते ततोऽपि बहुवेदनात् ।
मुख्यसाङ्ख्या इति ज्ञेयास्तदन्ये कर्मयोगिनः ॥
ज्ञानिनोऽप्यतिबाहुल्यात्कर्मणः कर्मयोगिनः ।
नोभयं तद्विना कश्चित्पुमान् हि पुरुषार्थभाक् ।

'लोकेऽस्मिन्' इति परिहारवाक्ये केषाञ्चिदधिकारिणां ज्ञानमेव केषाञ्चित् कर्मैवानुष्ठेयमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ ज्ञानेति ॥ नात्र ज्ञानयोगपदेन ज्ञानमात्रं विवक्षितं, कर्मयोगपदेन च कर्ममात्रमुच्यते । किन्तु प्रत्येकमुभयम् । तर्ह्युभावपि ज्ञानकर्मयोगाविति वक्तव्यौ । कथं कश्चिज्ज्ञानयोगः कश्चित्कर्मयोग उच्यत इति चेन्न । एकैकत्र ज्ञानकर्मणोः प्राचुर्याभिप्रायेणाल्पजलमिश्रेऽपि क्षीरे क्षीरशब्दप्रयोगवत् प्रयोगोपपत्तेरिति भावः ।

साङ्ख्यानां ज्ञानमेव योगिनां कर्मैवेति प्रतीत एवार्थः किं न स्यादिति चेत्तथाऽङ्गीकारे स्मृतिविरोधः स्यादिति भावेनाह ॥ साङ्ख्या-इति ॥ देवानां बहुकर्मसद्भावात्कथं मुख्यसाङ्ख्यत्वमित्यत आह ॥ बह्विति ॥ ततोऽपि कर्मणोऽपि । गृहस्थादीनामपि किं केवलकर्मैवेत्यपेक्षायामाह ॥ ज्ञानिनोऽपीति ॥ तर्हि कथं कर्मयोगिन इत्यत आह ॥ अतीति ॥ साङ्ख्यानां केवलं ज्ञानमेव योगिनां केवलं कर्मैवेति किं न स्यादित्यत आह ॥ नोभयमिति ॥ साङ्ख्यानां ज्ञानेन योगिनां कर्मणा पुरुषार्थो भवतीति श्रुत्यादौ श्रूयते । न चैकैकेन पुरुषार्थो युज्यते । अतो नैकैकग्रहणं युक्तमिति भावः । कर्माभावे कुतो न पुरुषार्थ इति चेत्किं कर्मपदेन कर्ममात्रं विवक्ष्यते अथ यज्ञादिकर्म वा । आद्यं

ध्यानरूपज्ञानोपायभेदादित्यर्थः । नोभयं विनेत्यादि निषेधस्य प्रसक्तिमाह ॥ सांख्यानां ज्ञानेनेति ॥ तरति शोकमात्मवित् अपाम सोमममृता अभूमेत्यादि-

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ॥
न च ज्ञानं विना कर्म पुरुषार्थकरं भवेत् ।"

इति ब्रह्मवैवर्ते ।

निष्ठा पर्यवसितिर्मुक्तिः ।

"ज्ञानिनो मोक्षनियमस्तथापि शुभकर्मणा ।
आनन्दवृद्धिरन्येन ह्रासो ज्ञानं तु कर्मणा ॥"

दूषयति ॥ न हीति ॥ द्वितीयं दूषयति ॥ न चेति ॥ ज्ञानमात्रं कर्म विना संसारनिवृत्तिसाधनमपि न सम्पूर्णपुरुषार्थकरमिति भावः । तर्ह्यस्तु केवलं कर्मैव पुरुषार्थकरमित्यत आह ॥ न चेति ॥ 'न कर्मणा न प्रजया' इत्यादिश्रुतिविरोधादिति भावः । अनेन 'न कर्मणामनारम्भात्' इत्यादेश्च तात्पर्यमुक्तं भवति । भवेदत्र ज्ञानकर्मणोः समुच्चयकल्पनं, यद्यत्र साङ्ख्ययोगादेः पुरुषार्थहेतुत्वमुच्येत । एकैकस्य पुरुषार्थसाधनत्वाभावोक्तेः न च तदत्रोच्यत इत्यत आह ॥ निष्ठेति ॥ ष्ठा गतिनिवृत्ताविरयतो निष्ठा पर्यवसितिः । गतेरिति शेषः । कथमनेन चोद्यपरिहार इत्यत आह ॥ मुक्तिरिति ॥ अत्र निष्ठापदेन गतिपर्यवसितिवाचिना संसारगतिपर्यवसानं मुक्तिरभिप्रेतेत्यर्थः । नन्वेवं ज्ञानकर्मभ्यां मोक्ष इत्यङ्गीकारे 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' इत्यादिश्रुतिविरोधः स्यादित्यत आह ॥ ज्ञानिन इति ॥ ज्ञानकर्मभ्यां

श्रुतौ ज्ञानयोगेन सांख्यानामित्यादिस्मृतौ चेत्यर्थः ॥ न हीतीति ॥ कर्ममात्राभावोऽसंभवीति भावः ॥ न संपूर्णेति ॥ मुक्तौ स्वयोग्ययावदानंदानुभवरूपेत्यर्थः । तस्य ज्ञानोत्तरकर्मसचिवज्ञानसाध्यत्वादिति भावः । तदेव वाक्यमन्यथाऽपि योजयति ॥ तर्ह्यस्त्विति ॥ अनेनेति ॥ न च ज्ञानं विनेत्यादिकथनेनेत्यर्थः । अस्मिल्लोके संसारे ज्ञानेन सांख्यानां कर्मणा योगिनां निष्ठा नितरां स्थितिर्न तु मुक्तिरिति भ्रांतः शंकते ॥ भवेदत्रेत्यादिना ॥ न च तदत्रेति ॥ समुच्चयस्य पुरुषार्थहेतुत्वमित्यर्थः ॥ चोद्येति ॥ भवेदित्यादिना

इति परमश्रुतेः 'न कर्मणा न प्रजया धनेन' इत्यादिविरोधो न ।

अन्यथा 'न कर्मणामनारम्भात्' इत्याद्युभयसमवाक्यशेषविरोधश्च । समत्वं च 'न हि कश्चित्' इत्यादेः । 'नान्यः पन्था' इत्यपि ज्ञानमृते न मोक्ष इत्येवाऽऽह ॥ ३ ॥ ४ ॥

'कर्तृत्वं द्विविधं प्रोक्तं विकारश्च स्वतन्त्रता ।
विकारः प्रकृतेरेव विष्णोरेव स्वतन्त्रता ॥'

इति पैङ्गिश्रुतेः 'कार्यते ह्यवशः' इत्यत्रावशो विष्णुवशः । 'अः इति ब्रह्म, इत्यादि श्रुतेः ॥ ५-८ ॥

मोक्षसिद्ध्यङ्गीकारेऽपि नैतच्छ्रुतिविरोधः । कर्मरहितज्ञानमात्रस्य मोक्षसाधनत्वाभिधानात् । अस्माभिरपि तदङ्गीकारात् । कर्मणस्तु ज्ञानमात्रेणैव सिद्धे मोक्षे सुखाधिक्यहेतुत्वेनाङ्गीकारात् । ज्ञानादेव मोक्षः कर्मणा आनन्दवृद्धिरित्येतत् कुत इति चेत् ज्ञानिन इति श्रुतेरेवेति भावः ।

इतश्च 'ज्ञानयोगेन' इत्यत्र कर्मापि संयोज्यम् । न ज्ञानमात्रमित्याह ॥ अन्यथेति ॥ अन्यथा ज्ञानमात्रेणैव पुरुषार्थाङ्गीकारे । कर्मयोगिनामपि प्रकृतत्वात्तेषां कर्मानारम्भे पुरुषार्थासम्भवाभिधायकमेतद्वाक्यं किं न स्यादित्यत उक्तम् ॥ उभयेति ॥ न केवलमेतत्कर्मयोगिविषयमपि तूभयविषयमित्यर्थः । कुतोऽस्योभयविषयत्वं ज्ञायत इत्यत आह ॥ समत्वं चेति ॥ मोक्षे कर्मणा आनन्दवृद्धिर्भवतीत्ययुक्तम् । 'नान्यः पन्था' इति श्रुतौ कर्मणो मोक्षसम्बन्धस्यैव निराकरणादित्यत आह ॥ नान्य इति ॥ ज्ञानायोगमेवेयं श्रुतिर्व्यवच्छिनत्ति । न तु कर्मसम्बन्धं निराकरोति । तथात्वे 'ज्ञानिनो मोक्षनियमः' इति श्रुतिविरोधादिति भावः ॥ ३ ॥ ४ ॥

कार्यत इत्यत्र स्वतन्त्रकर्तुरन्यस्याप्रतीतेः प्रकृतिगुणानामेव स्वतन्त्रकर्तृत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ कर्तृत्वमिति ॥ अत्र गुणानां विकारकर्तृत्वमेवोच्यते । न तु स्वतन्त्रकर्तृत्वम् । अवश

'कर्मणा बध्यते जन्तुः' इत्यादिकमप्यवैष्णवकर्मविषयमित्याह ॥ यज्ञार्थादिति ॥

'ज्ञो नाम भगवान् विष्णुस्तं यात्युद्देश एष यः ।
स यज्ञ इति सम्प्रोक्तो विहिते कर्मणि स्थितः ॥'

इति बर्कश्रुतिः ॥ ९ ॥

'जननात्परसस्यादेः पर्जन्यो मेघसन्ततिः ।
स यज्ञात्कर्मणः सोऽपि समस्तं कर्म केशवात् ॥
स नित्योऽप्यक्षरततिरूपाद्वाक्याद्धि गम्यते ।
वाक्यमुच्चार्यते भूतैस्तान्यन्नात्तच्च मेघतः ॥

इति विष्णोः स्वतन्त्रकर्तृत्वोक्तेः । अवशपदेन स्वानधीनत्वं गृहीत्वा गुणानां स्वतन्त्रकर्तृत्वमेव किं न गृह्यत इति चेन्न । 'कर्तृत्वम्' इति श्रुतिविरोधादिति भावः । श्रुतिरिति कुत्रचित्पाठः । तत्रान्यथाप्रतीतिनिरासाय श्रुत्यैव व्याख्यातं विष्णोः स्वतन्त्रकर्तृत्वमत्र न प्रतीयत इत्यत उक्तम् ॥ अवश इति ॥ अवशपदं कथं विष्णुवशत्वं वक्तीत्यत आह ॥ अः इति ॥ ५-८ ॥

ननु 'कर्मणा बध्यते जन्तुः' इत्यादेः कर्मणो बन्धकत्वात्कथं 'कुरु कर्म' इति विधीयत इत्याशङ्कापरिहाराय श्लोकमवतारयति ॥ कर्मणेति ॥ अयज्ञार्थं कर्म बन्धकमित्येवात्र प्रतीयते, न त्ववैष्णवं कर्म बन्धकमित्यतो यज्ञशब्दार्थं श्रुत्यैवाह ॥ ज्ञ इति ॥ नात्र यज्ञ पदेन प्रसिद्धयज्ञ उच्यते । अपि तु यातो विषयीकृतो ज्ञानरूपत्वाज्ज्ञो भगवान् येनोद्देशेन स एवेत्यर्थः । य एष उद्देश इति योजना ॥ ९ ॥

कर्म कर्तव्यमित्यत्र हेत्वन्तरमुच्यते 'अन्नादिति'। अत्र कथमन्नस्य पर्जन्याद्देवविशेषादुत्पत्तिः । कथं च तस्य यज्ञादुत्पत्तिः । कथं चान्नादिति परम्पराया एवोक्तत्वात् चक्रमित्युच्यत इत्याशङ्कां परिहर्तुं

कृतचोद्येत्यर्थः ॥ स्वानधीनमिति ॥ जीवानधीनमित्यर्थः ॥ ज्ञानरूपत्वादिति ॥ स्वरूपस्यैव सर्ववस्तुज्ञत्वादित्यर्थः । इगुपधज्ञाप्रीकिरः क इति कर्तर्येव कप्रत्ययविधानात् ॥ हेत्वंतरमिति ॥ सहयज्ञा इत्यादिश्लोकचतुष्टयोक्तार्थवाद-

तस्मात्सर्वगतो विष्णुर्नित्यं यज्ञे प्रतिष्ठितः ।
एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
स पापो विश्वहन्तृत्वान्नरके मज्जति ध्रुवम् ॥
वाचिको मानसो यज्ञो न्यासिनां तु विशेषतः ।
वनस्थस्याक्रतुर्यज्ञः क्रत्वादिर्गृहिणोऽखिलः ॥
शुश्रूषाद्यात्मको यज्ञो विहितो ब्रह्मचारिणः ।
विद्याभयादिदानं च सर्वेषामपि सम्मतम् ॥

ब्रह्माक्षरशब्दयोरन्यार्थकल्पनां च निराकर्तुं स्मृत्यैव व्याचष्टे ॥ जनना-दिति ॥ परं जन्यं यस्यासौ तथोक्तः ॥ यज्ञादिति ॥ यज्ञसमाराधित-देवताया भवतीत्यर्थः । यज्ञो देवतोद्देशेन द्रव्यपरित्यागः । कर्म तदितरक्रिया । वाक्याज्जायते । कथं नित्यो जायते? गम्यते अवगम्यत इत्यर्थः । वेदेन यथावदवगत एवेश्वरः सत्कर्म कारयतीति भावः । यत एवं परम्परया यज्ञाभिव्यङ्ग्यस्तस्मात् । भगवतो यज्ञे प्रतिष्ठितत्वाद्य-ज्ञानुष्ठानेन चक्रप्रवृत्तौ भगवदभिव्यक्तिनिमित्तं च सुकृतं भवति, न केवलं भूतस्थितिहेतुत्वनिमित्तमिति भावः ॥ चक्रं नानुवर्तयतीति ॥ कर्म न करोतीत्यर्थः ।

विश्वस्य चक्रान्तर्भावात्कर्माकरणेन चक्राप्रवृत्तौ विश्वहन्तृत्वं चेत् गार्हस्थ्येतराश्रमानुष्ठानं प्रसज्येत । कर्मणां यज्ञदानतपोरूपेण त्रैविद्या-दाश्रमान्तरे च यज्ञाद्यभावादित्यत आह ॥ वाचिक इति ॥ वाचिकः स्वाध्यायादिः । मानसो ध्यानादिः ॥ विशेषत इति ॥ सर्वसाधारण्येऽपि अन्येषामन्येऽपि सन्त्येषामयमेवेत्यर्थः । अन्येषां यज्ञान्तरमाह ॥ वनस्थस्येति ॥ अक्रतुः पश्वालम्भनहीनः । शुश्रूषाद्यात्मक इत्यादि-पदेनाग्निपूजा । विद्याभयादीत्यादिपदेन स्वभोक्तव्यान्नदानम् । अन्न-

रूपहेतुश्चक्रप्रवर्तकत्वरूपहेत्वंतरमित्यर्थः ॥ अन्यार्थकल्पनां चेति ॥ ब्रह्माक्षर-शब्दयोर्वेदपरब्रह्मार्थताकल्पनमित्यर्थः ॥ स्मृत्युक्त योगं शब्दारूढं दर्शयति ॥ परमिति ॥ उत्तममित्यर्थः । परपदांतलोपो निरुक्तत्वादिति भावः ॥ हेत्वंत-

गृहिणो वित्तदानं तु वनस्थस्यान्नपूर्वकम् ।
सर्वैः कार्यं तपो घोरमिति सर्वे त्रिकर्मिणः ॥'

इति नारदीये ।

ब्रह्माक्षरशब्दार्थयोर्व्यत्यासे 'तस्मात्सर्वगतं ब्रह्म' इति प्रत्यभिज्ञाविरोधश्चक्राप्रवेशश्च ॥ १४ ॥ १५ ॥ १६ ॥

पूर्वकं विद्याभयादिदानम् । स्वभोक्तव्यादधिकमापाद्यान्नदानमिह विवक्षितम् । अन्नं तु मूलफलादि ।

'ब्रह्माक्षरसमुद्भवम्' इत्यत्र ब्रह्मपदेन वेदोऽक्षरपदेन ब्रह्मोच्यत इत्यपव्याख्यानं हेत्वन्तरेण प्रत्याख्याति ॥ ब्रह्मेति ॥ यद्यत्र ब्रह्मपदेन वेदोऽक्षरपदेन ब्रह्मोच्यते तर्हि उपरि ब्रह्मणः 'तस्मात्सर्वगतं ब्रह्म' इति ब्रह्मपदेन प्रत्यभिज्ञा न स्यात् । यत्पदेन यन्न प्रकृतं तस्य तत्पदेन कारणविशेषं विना परामर्शादर्शनात् । न च तत्र वेदपरामर्शः । तस्य यज्ञे प्रतिष्ठितत्वोक्तेरनुपयुक्तत्वादिति भावः । दोषान्तरं चाह ॥ चक्रेति ॥ वेदात्कर्मणामुत्पत्त्यभावाद्ब्रह्मणो वेदस्योत्पत्त्यभावात् भूतेभ्यो ब्रह्मणो जननाभावादर्थान्तरकल्पने वेदादेश्चक्राप्रवेशः स्यात् । व्यक्त्यर्थाङ्गीकारे बहूनां पदानाममुख्यार्थतापात इति भावः ॥ १४ ॥ १५ ॥ १६ ॥

कर्म कर्तव्यमित्यत्र युक्त्यन्तरमुच्यते ॥ यस्त्विति ॥ तत्र सन्तोषस्तृप्तिरापूर्तिरित्यादेस्तृप्तिसन्तोषशब्दयोरेकार्थत्वात 'आत्मतृप्तः'

रेणेति ॥ व्याख्यानरूपस्मृतिविरोधापेक्षया प्रत्यभिज्ञाविरोधरूपहेत्वंतरेणेत्यर्थः ॥ अनुपयुक्तत्वादिति ॥ स्वपक्षे तूक्त उपयोग इति भावः ॥ उत्पत्त्यभावादिति ॥ वेदस्य नित्यत्वादिति भावः ॥ भूतेभ्य इति ॥ चक्रसिध्यर्थमक्षरं भूतोद्भवमिति वाच्यम् । न ह्यक्षरशब्दितं ब्रह्म भूतैरुत्पद्यत इत्यर्थः ॥ अर्थांतरकल्पन इति ॥ परमेश्वरवाक्यभूताद्वेदाख्यात् ब्रह्मणः पुरुषाणां कर्मणि प्रवृत्तिः । ततः कर्मनिष्पत्तिः । ततः पर्जन्यः । ततोऽन्नम् । ततो भूतानि । भूतानां च कर्मप्रवृत्तिरित्येवं कल्पन इत्यर्थः । आदिपदेन परब्रह्मग्रहः । नन्वक्षरं भूतसंभवमित्येवास्तु । संभवशब्देन व्यक्तिर्गृह्यतामित्यत आह ॥ व्यक्त्यर्थेति ॥

तृप्तिसन्तोषशब्दयोः पर्यायत्वेऽपि परमात्मना तृप्तः, परमात्मनि तृप्त इति विशेषः ।

'विष्णुप्रसादाद्रतिमान् तृप्तो विष्णुप्रसादतः ।
विष्णावेवातितृप्तश्च मुक्तोऽसौ विध्यगोचरः ॥' इत्याग्नेये ।
'रतिरानन्द उद्दिष्टस्तृप्तिस्तु कृतकृत्यता ।
प्रीतिस्तु द्विविधः स्नेहः कर्मजो निज एव च ॥'

इति शब्दनिर्णये ।

'सन्तोषस्तृप्तिरापूर्तिः प्रीतिः पर्यायवाचकाः ।'

इत्यभिधाने ॥ १७ ॥ १८ ॥

इत्युक्तत्वात् 'आत्मन्येव च सन्तुष्टः' इति पुनरुक्तिरित्यत आह ॥ तृप्तीति ॥ विशेषोऽर्थ इति शेषः । कुत एवमर्थकल्पनेत्यतः श्लोकं स्मृत्यैव व्याचष्टे ॥ विष्णिवति ॥ एवं तृप्तिसन्तोषशब्दयोरेकार्थत्वमङ्गीकृत्य विग्रहभेदेनार्थभेद उक्तः । अथ तृप्तिसन्तोषशब्दयोरेवार्थभेदाच्च न पुनरुक्तिरिति भावेन तयोरर्थभेदे प्रमाणमाह ॥ रतिरिति ॥ आनन्दः स्वरूपभूतः । कर्मज उपकारादिजातः । रतितृप्तिप्रीतिशब्दानां भिन्नार्थत्वे किमायातं तृप्तिसन्तोषशब्दयोरर्थभेदे इत्यतः प्रीतिसन्तोषशब्दयोः पर्यायत्वात् तृप्तिप्रीतिशब्दयोरर्थभेदे तृप्तिसन्तोषशब्दयोरर्थभेदः सिद्ध एवेति भावेन तत्पर्यायत्वे प्रमाणमाह ॥ सन्तोष इति ॥ पर्यायवाचकाः पर्यायेण वाचकाः ॥ १७ ॥ १८ ॥

ननु मुक्तस्य कार्यं न विद्यत इत्युक्त्वा 'तस्मादसक्तः' इत्युच्यते । तत्र कर्मकरणे हेतोरनुक्तत्वात् 'तस्मात्' इति किं परामृश्यत इत्यत आह ॥ यस्मादिति ॥ यथा मुक्तस्य प्रयोजनाभावात्कार्याभावः एवं मुमुक्षोरपि कर्मणा प्रयोजनाभावात्कार्याभावः किं न स्यादित्यत उच्यते ॥ असक्त इति ॥ तत्र कर्मणैव मोक्षप्राप्तिरुच्यत इत्यन्यथाप्रतीति-

---

अर्थभेदाच्चेति ॥ कृतकृत्यत्वप्रीतिरूपार्थभेदाच्चेत्यर्थः । कर्मैवाचरन्नित्यर्थाभिप्रायेणाह ॥ कर्मणैव मोक्षेत्यादिना ॥ उक्तत्वादिति ॥ सहयज्ञा इत्यादि न

यस्मादमुक्तस्य कार्यमस्त्येव तस्मादसक्तः। असक्त आचरन्नेव यस्मात्परमाप्नोति। मुक्तस्यैव कार्यं नास्तीत्येवकारार्थोऽपि 'यस्तु' इति तुशब्देनावगतः। 'तस्मात्कर्म समाचर' इत्युपसंहारविरोधश्चान्यथा।

'ब्रह्मनिष्ठा ब्रह्मरता ब्रह्मज्ञानसुतर्पिताः।
पाण्डवानां च मुक्तानामन्तरं किञ्चिदेव हि॥'

निरासाय तद्व्याचष्टे॥ असक्त इति॥ कर्माऽचरन्नेवेत्येवार्थो न तु कर्मैवाचरन्निति भावः। तस्मादमुक्तस्य कर्मणा फलसद्भावादस्त्येव तस्य कार्यमिति वाक्यशेषः।

नन्वमुक्तस्य कार्यमस्तीत्यनुक्तत्वात्कथं तस्मादिति तत्परामर्शः स्यादिति चेन्न। मुक्तस्यैव कार्यं नास्तीत्युक्त्याऽमुक्तस्य कार्यमस्तीति प्राप्तत्वात्। ननु मुक्तस्यैव कार्यं नास्तीत्येवकाराभावात् कथममुक्तस्य कार्यसद्भावप्राप्तिरित्यत आह॥ मुक्तस्यैवेति॥ एवकाराभावेऽपि तदर्थावधारणस्य तुशब्देनावगतत्वात् तेनामुक्तस्य कार्यसद्भावः प्राप्यत इति भावः।

केचित्तु 'यस्तु' इति वाक्यं ज्ञानिमात्रविषयतया व्याकुर्वते। न तद्युक्तम्। 'यस्त्वेवात्मरतो मुक्तो' 'विष्णुप्रसादाद्रतिमान्' इत्यादिस्मृत्या मुक्तिविषयतया गृहीतत्वात् ज्ञानिनामपि कार्यसद्भावस्योक्तत्वाच्चेत्यभिप्रेत्य दोषान्तरं चाह॥ तस्मादिति॥ यद्यत्र ज्ञानिमात्रस्य कार्याभावोऽभिप्रेतः स्यात्तर्ह्यर्जुनं प्रति 'तस्मादसक्तः' इत्युपसंहारवाक्ये कर्मविधानं विरुद्धं स्यात्। तस्यापि ज्ञानित्वादिति भावः।

अर्जुनस्य ज्ञानित्वे प्रमाणाभावेनाज्ञत्वात् कर्माधिकारित्वमेवातस्तं प्रति कर्मविधानं न विरुद्धमित्यत आह॥ ब्रह्मेति॥ ये तेषामिति योज्यम्। मुक्तविषयत्वेऽप्यस्यार्जुनं प्रति कर्मविधानं विरुद्धम्।

कर्मयोगेन योगिनामित्यादिना वेति भावः। पूर्वोत्तरार्धयोस्संगतत्वायाह॥ तेषामिति योज्यमिति॥ हेत्वंतरमुच्यत इति॥ आचारापेक्षया लोक-

इति भविष्यत्पर्ववचनाच्च नार्जुनस्यामुख्याधिकारिता। आत्मरतिरेव स्यादित्येवशब्देन मुक्तानामेभ्यो विशेषो दर्शितः। एषां कदाचिद्दुःखाभासस्यापि भावात् ॥ १९ ॥

'सहैव कर्मणा सिद्धिमास्थिता जनकादयः।
ज्ञाननिष्ठा अपि ततः कार्यं वर्णाश्रमोचितम् ॥' इति च।
'अज्ञानां ज्ञानदं कर्म ज्ञानिनां लोकसङ्ग्रहात्।
अद्धैव तुष्टिदं मह्यं सा मुक्तानन्दपूर्तिदा ॥ २० ॥ २१ ॥
'ममैव केवलं नास्ति केनाप्यर्थस्तथाप्यहम्।
कर्मकृल्लोकरक्षार्थं तस्मात्कुर्वीत मत्परः ॥"

इति कृष्णसंहितायाम्।

पाण्डवानामेतद्वचनबलात् ब्रह्मरतत्वादिमुक्तलक्षणवत्तया मुक्तसाम्यादित्यत आह ॥ आत्मेति ॥ न पाण्डवानां मुक्तानां चातिसाम्यम्। 'आत्मरतिरेव' इति मुक्तानामरतिव्यावर्तकैवशब्देन पाण्डवेभ्यो विशेषप्रतीतेरित्यर्थः। मुक्तानां दुःखाभावेऽपि कथं पाण्डवेभ्यो विशेष इत्यत आह ॥ एषामिति ॥ १९ ॥

ननु ज्ञानादेव मोक्षसिद्धेः कथमसक्तः कर्माऽचरन्नेव परमाप्नोतीत्युक्तमित्यत उच्यते ॥ कर्मणैवेति ॥ तत्र कर्मणैव मोक्ष उच्यत इत्यन्यथाप्रतीतिनिरासाय तत्स्मृत्यैव व्याचष्टे ॥ सहैवेति ॥ कार्यं कर्म ज्ञानिनामपीति शेषः। कर्म कर्तव्यमित्यत्र हेत्वन्तरमुच्यते ॥ लोकेति ॥ तत्र लोकसङ्ग्रहसम्भवेऽपि तेन प्रयोजनाभावात्कथं ज्ञानिनो लोकसङ्ग्रहार्थं कर्म विधीयत इत्यतो लोकेत्यादिश्लोकान् स्मृत्यैव व्याचष्टे ॥ अज्ञानमिति ॥ सा तुष्टिः ॥ २० ॥ २१ ॥

किञ्च प्रयोजनमात्ररहितेनापि मया केवलानुग्रहेण लोकसङ्ग्रहार्थं कर्म क्रियते, अतो मुक्तावानन्दवृद्धिप्रयोजनवता ज्ञानिना तत्कर्तव्यमिति किं वक्तव्यमित्युक्तं 'न मे पार्थ' इति। अस्यार्थो ममैवेति ॥ नन्वीश्वरः

'रक्षया वाऽथ सृष्ट्या वा संहृत्यादेर्न तु क्वचित् ।
अर्थो विष्णोस्तथाप्येष स्वभावात्सर्वकर्मकृत् ॥
मत्तो नृत्तादिकं यद्वत्कुर्यात्सुखविशेषतः ।
परमानन्दरूपत्वात् कुर्याद्विष्णुस्तथैव तु ॥'

इति बर्कश्रुतिः ॥ २२-२६ ॥

'नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलम् ।
तथापि मत्कृता पूजा तत्प्रसादेन नान्यथा ॥
तद्भक्तिस्तत्फलं मह्यं तत्प्रसादः पुनः पुनः ।
कर्मन्यासो हरावेवं विष्णोस्तृप्तिकरः सदा ॥

प्रयोजनाभावेऽपि लोकरक्षादि करोतीति न युज्यते। प्रयोजनाभावे प्रवृत्त्ययोगादित्याशङ्कां श्रुत्यैव परिहरति ॥ रक्षयेति ॥ प्रयोजनाभावेऽपीश्वरस्य कर्तृत्वस्वभाववत्त्वात् रक्षादिकर्मकरणं युक्तमित्यर्थः । ननु तादृशस्वभावत्वेन प्रवृत्तिरचेतनेष्वेव दृष्टा। यथा दहनपवनादीनां प्रयोजनं विना स्वभावादेव दहनगमनादिप्रवृत्तिः । चेतनप्रवृत्तेः प्रयोजनहीनाया अदर्शनात्कथमीश्वरस्यापि प्रयोजनानुद्देशेन प्रवृत्तिरित्यत आह ॥ मत्त इति ॥ २२-२६ ॥

अज्ञवदाग्रहेण ज्ञानिनामपि कर्म कार्यं चेद्विद्वदविद्वत्कर्मणोरविशेषप्रसङ्ग इत्यतः 'सक्ताः' इति सक्त्यसक्तिपूर्वकत्वविशेष उक्तः प्रपञ्च्यते 'प्रकृतेरिति'। विद्वदविद्वत्कर्मविशेषमुक्त्वा विद्वत्कर्मकरणं विधीयते 'मयि' इति । तत्र कर्माणि संन्यस्य युध्यस्वेति व्याहतमित्यतः तत्स्मृत्यैव व्याचष्टे ॥ नाहमिति ॥ 'नाहं कर्ता' इति निर्ममत्वम् । 'हरिः कर्ता तत्पूजा कर्म चाखिलम्' इति हरौ कर्मन्यासः । हरिरेव

संग्रहरूपहेत्वंतरमित्यर्थः । इत्यस्येत्यस्येति द्वयमपि समानाधिकरणम् (?) ॥ सक्त्यसक्तिपूर्वकत्वविशेष उक्त इति ॥ सक्ता इति श्लोक इति ज्ञेयम् । संन्यस्येत्यस्य त्यक्त्वेत्यर्थं मत्वाऽऽह ॥ व्याहतमिति ॥ निर्ममत्वमिति ॥ नाहं

यस्मात्स्वतन्त्रकर्तृत्वं विष्णोरेव च नान्यगम् ।
तदधीनं स्वतन्त्रत्वं स्वावरापेक्षयैव तु ॥
जीवस्य विकृतिर्नाम कर्तृत्वं जडसंश्रयम् ।
पुमान् दोग्धा च गौर्दोग्ध्री स्तनो दोग्धेतिवत् क्रमात् ॥'

इति ब्रह्मतर्कवचनादीश्वरजीवप्रकृत्यादीनां कर्तृत्वमकर्तृत्वं च विभागेन ज्ञातव्यं सर्वत्र ।

कर्ता चेत्कथं तत्पूजेत्यादिनिरूपणं युक्तमित्यत आह ॥ तथापीति ॥ यद्यपि हरिरेव कर्ता, तथापि तत्प्रेरणेनैव ममापि कर्तृत्वात् तत्पूजेत्यादिनिरूपणं युक्तमिति भावः । तद्भक्तिरिति निराशीस्त्वम् । तत्फलं पूजाफलम् । कर्मन्यासो निर्ममत्वादियुक्तः विष्णोस्तृप्तिकर इत्यनेन 'ये मे मतम्' इत्यादेस्तात्पर्यमुक्तं भवति । एवं निर्ममत्वादियुक्तेन हरौ कर्मन्यासेन कुतो विष्णोस्तृप्तिरित्यत आह ॥ यस्मादिति ॥ यस्मादेवमर्थस्थितिः तस्मात्तथा भावनं विष्णोस्तृप्तिकरं भवत्येव । यथार्थज्ञानप्रियत्वाद्विष्णोरिति भावः ।

स्वतन्त्रकर्तृत्वमेव कर्तृत्वम्, अतः कथं जीवादेः कर्तृतोच्यत इत्यतः परतन्त्रादिकर्तरि कर्तृशब्दप्रयोगं दर्शयति ॥ पुमानिति ॥ ननु क्वचिदीश्वर एव कर्ता न जीवादिरित्युच्यते । क्वचिज्जीव एव कर्ता नेश्वरादिरिति । क्वचिच्च प्रकृतिरेव कर्त्री नेश्वरादिरिति । अतः कथमीश्वर एव कर्ता, नाहम्, अहं तु तदधीनकर्तेति कर्मन्यासाद्युपपद्यत इत्यत आह ॥ इतीति ॥ यत्रेश्वरादीनां कर्तृत्वमुच्यते तत्रेश्वरस्य स्वतन्त्रकर्तृत्वमित्यादि विभागेनैव ज्ञातव्यम् । यत्रेश्वरादीनामकर्तृत्वमुच्यते

कर्तेत्यनेन निर्ममत्वं व्याख्यातमित्यर्थः । मत्कृता पूजेत्यनन्तरं शेषमाह ॥ तत्पूजेत्यादिनिरूपणं युक्तमिति ॥ तद्भक्तिरित्यनेन निराशीस्त्वं व्याख्यातमित्यर्थः । कर्मन्यास इत्यस्य विशेषणमाह ॥ निर्ममत्वनिराशीस्त्वयुक्तः इति ॥

'क्वचित्स्वभावः प्रकृतिः क्वचिच्च त्रिगुणात्मिका ।
क्वचित्प्रकृष्टकर्तृत्वाद्भगवान् प्रकृतिर्हरिः ॥'

इति शब्दनिर्णये ।

"स्वभावतस्त्रिधा जीवा उत्तमाधममध्यमाः ।
उत्तमास्तत्र देवाद्या मर्त्यमध्यास्तु मध्यमाः ॥

तत्रेश्वरस्य परतन्त्रकर्तृत्वमस्वकीयं नास्तीत्यादि विभागेनैव ज्ञातव्यं, न तु यत्र कर्तृत्वमुच्यते तत्र सर्वेषां स्वतन्त्रकर्तृत्वमेव । यत्राकर्तृत्वमुच्यते तत्र सर्वेषां सर्वथा कर्तृत्वराहित्यं ज्ञातव्यम् । स्वतन्त्रकर्तृत्वं विष्णोरेवेत्यादिवचनादेवेत्यर्थः ।

'प्रकृतेः' इत्यादि व्याकरिष्यन् तत्रस्थप्रकृतिशब्दादीन् स्वभावादिपरतया व्याख्यातुं तदर्थत्वे प्रमाणं तावदाह ॥ क्वचिदिति ॥ स्वभावो जीवस्य । मयीत्यादिवाक्यव्याख्यानरूपाया 'यस्मात्स्वतन्त्रकर्तृत्वम्' इत्यादिस्मृतेः 'प्रकृतेः' इत्यादिवाक्यव्याख्यानोपयोगित्वात् व्यत्यासेन व्याख्यानम् ।

प्रकृतेरित्यादावीश्वरादित्रयस्य कर्तृत्वाभिधानात् पुनर्जीवस्याकर्तृत्वाभिधानात् कर्तृत्वादिविभागस्य स्मृतावुक्तत्वात् प्रकृतेरित्याद्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ स्वभावत इति ॥ अत्र 'स्वभावतः'

इत्यादि विभागेनेति । यत्र जीवस्यैव कर्तृत्वमुच्यते तत्र पराधीनकर्तृत्वं, यत्र प्रकृतेरेव कर्तृत्वमुच्यते कार्यते ह्यवशः कर्म सर्वैः प्रकृतिजैर्गुणैरित्यादौ तत्र विकाररूपकर्तृत्वमिति ध्येयमित्यर्थः । नास्तीत्यादि विभागेनेति ॥ यत्र जीवस्याकर्तृत्वमुच्यते कर्तृत्वं न कर्माणि इत्यादौ तत्र स्वकीयं स्वतन्त्रकर्तृत्वं नास्ति, यत्र तु प्रकृतेः कर्तृत्वं नेत्युच्यते तत्र ज्ञानेच्छापूर्वककर्तृत्वं नास्तीत्येवंरूपेण ज्ञेयमित्यर्थः । प्रकृतेरित्यादिव्याख्यानपरं स्वभावत इत्यादिस्मृत्यनन्तरं यस्मादिति स्मृतिः पठनीया । व्याख्येयगीतावाक्यानुसारादित्यत आह ॥ मयीत्यादीत्यादिना ॥ उपयोगित्वादिति ॥ यस्मादिति स्मृत्युक्तत्रिविधकर्तृत्वस्य प्रकृतेरिति वाक्येऽभिमतत्वादिति भावः । व्याख्यानोपयोगं व्यनक्ति ॥ प्रकृतेरित्यादाविति ॥ अहंकारेत्युत्तरार्धेनेति योज्यम् । इत्यादीत्यस्य पीठिका-

अधमा असुराद्याश्च नैषामस्त्यन्यथाभवः ।
शरीरमात्रान्यथात्वे स्वजातिं पुनरेष्यति ॥
उत्तमा मुक्तियोग्यास्तु सृतियोग्यास्तु मध्यमाः ।
अपरेऽन्धतमोयोग्याः प्राप्तिः साधनपूर्तितः ॥
पूर्त्यभावेन सर्वेषामनादिः संसृतिः स्मृता ।
नैव पूर्तिश्च सर्वेषां नित्यकालहरीच्छया ॥
अतोऽनुवर्तते नित्यं संसारोऽयमनादिमान् ।
अतोऽधमानां जीवानां मिथ्याज्ञानादयोऽखिलाः ।
स्वाभाविकगुणा ज्ञेया मध्यमर्त्येषु मिश्रिताः ॥

इत्यादि साक्षाद्व्याख्यानाय पीठिकारचनम् । देवादीनामन्यथाभावसद्भावात्कथं देवत्वादिः स्वभाव इत्यत आह ॥ नैषामिति ॥ जयादीनामन्यथाभावदर्शनात्कथं नास्तीत्यत आह ॥ शरीरेति ॥ देवत्वादेः स्वाभाविकत्वेऽपि देवा एवोत्तमा इत्यादि कुत इत्यत आह ॥ उत्तमा इति ॥ फलस्योत्तमत्वादिना देवादीनामुत्तमत्वादिसिद्धिरिति भावः । देवादीनां मुक्त्यादियोग्यत्वे किमर्थं ते संसारे वर्तन्त इत्यत आह ॥ प्राप्तिरिति ॥ स्वयोग्यफलस्येति शेषः । पूर्त्यभावेन साधनस्येति शेषः । साधनपूर्तितः प्राप्तिश्चेत् नित्यं संसारानुवृत्तिर्न स्यात् । अनादित्वात् संसारस्येतः पूर्वमेव साधनपूर्तिसम्भवेन सर्वचेतनानां परिसमाप्तेरित्यत आह ॥ नैवेति ॥ नित्यकाले संसारोऽनुवर्ततामिति हरीच्छया अनादिमान् यद्यपीति शेषः । स्वभावतस्त्रिधा जीवाश्चेत् किं तत इत्यत आह ॥ अत इति ॥ देवत्वादेः स्वाभाविकत्वात्तदनुसारिगुणाश्च स्वाभाविका इत्यर्थः । मिश्रिताः स्वाभाविका इत्यादि योज्यम् । ततश्च किमित्यत

रचनमित्यन्वयः । कार्यते ह्यवशः कर्मेत्यादिना साक्षाद्व्याख्यानायेत्यर्थः ॥ जयादीनाम् ॥ जयविजयादीनां हिरण्याक्षरावणादित्वादिरूपेणान्यथाभावदर्शनादित्यर्थः । मिश्रिता इति ॥ स्वाभाविकतत्त्वज्ञानमिथ्याज्ञानोभयरूपा गुणा इत्यर्थः ॥ इत्यादि योज्यमिति ॥ तत्वज्ञानं स्वाभाविकं, भक्तिः

तत्त्वज्ञानं विष्णुभक्तिरित्याद्या देवतादिषु ।
कार्यते ह्यवशः कर्म सर्वस्तैः प्राकृतैर्गुणैः ।
स्वाभाविकगुणानेतान् हेतुं कृत्वैव विष्णुना ॥
कर्मसु क्रियमाणेषु कर्ताऽहमिति मूढधीः ।
मन्यते तत्त्वविद्विष्णोर्गुणा इच्छादयस्तु ये ॥
स्वाभाविकेषु जीवस्य कामाद्येषु सदैव तु ।
प्रेरकत्वेन वर्तन्ते स्वातन्त्र्यं मम न क्वचित् ॥
इति मत्वा न सक्तः स्यात्प्रीतोऽस्य भवति प्रभुः ।
स्वभावगुणसंमूढा ज्ञानादिगुणवत्तरम् ॥

आह ॥ कार्यत इति ॥ अवशो विष्णुवशः । प्राकृतैः स्वाभाविकैः । किञ्चात इत्यत आह ॥ स्वाभाविकेति ॥ अनेनाविद्वत्कर्माभिधायकस्य 'प्रकृतेः' इत्यस्यार्थ उक्तो भवति ॥ स्वाभाविकगुणान् हेतुं कृत्वेति ॥ यस्योत्तमगुणास्तानपेक्ष्य सत्कर्म कारयतीत्यादि । विष्णुना विष्णोरिच्छादिगुणैः । अनेन प्रकृतेर्गुणैरित्यस्यार्थद्वयमुक्तं भवति । उपादानतया सत्त्वादयः प्रकृतिगुणाश्चात्राभिमताः । कर्ता स्वातन्त्र्येणेति शेषः ।

एवमविद्वान् करोति चेत् कथं विद्वानित्यत आह ॥ तत्त्वेति ॥ अनेन तत्त्वविदित्यस्यार्थ उक्तो भवति । अविदुषामहङ्कारे को हेतुरित्यत आह ॥ स्वभावेति ॥ स्वभावगुणानामुत्तमत्वे तेष्वपरप्रेरिता एवैत इति संमूढाः । मिश्रादित्वे तैः संमूढाः । ज्ञानादिगुणसद्भावे ज्ञानादिगुणवत्तरं स्वातन्त्र्येण प्रतिजानत इति योज्यम् । अभावे स एव दोषः ।

स्वाभाविकीत्येवं योज्यमित्यर्थः ॥ ततश्चेति ॥ मिथ्याज्ञानादिगुणानां स्वाभाविकत्वतश्चेत्यर्थः ॥ किञ्चात इति ॥ अतश्च किमित्यर्थः ॥ इत्यादीति ॥ यस्य मध्यमगुणास्तानपेक्ष्य सदसत्कर्मणी कारयति यस्याधमा गुणास्तानपेक्ष्यासत्कर्म कारयतीत्यर्थः ॥ विष्णुनेत्यनुवादः विष्णोरित्यादिव्याख्या ॥ तैः संमूढा इति ॥ मिश्रगुणैस्संमूढाः ॥ अभाव इति ॥ ज्ञानादेरिति योज्यम् । विपरिणामेनार्थ-

स्वातन्त्र्येणैव कर्तारं चाऽत्मानं प्रतिजानते ।
तान् गुणान् कर्म तच्चैव विष्णवधीनं न ते विदुः ।
तेष्वयोग्येषु तत्त्वज्ञस्तत्त्वं नातिप्रकाशयेत् ॥
वदेद्विवादरूपेण नोपदेशात्मना क्वचित् ।
सभ्यरूपेण वा ब्रूयात्पृष्टेऽव्यक्तिकृदेव वा ॥
बुद्ध्वाऽप्यसौ यतो नित्यं स्वभावानुगचेष्टितः ।
स्वभावं यान्ति भूतानि निग्रहः किं करिष्यति ॥'

इत्यादि प्रकाशसंहितायाम् ॥ ३५ ॥

परमेश्वराद्देवेभ्यश्चार्वाक्तनं प्रेरकं पृच्छति ॥ अथ केनेति ॥३६॥

तान् गुणान् विष्णवधीनान्न विदुः सद्भावे । अभावे न सन्तीति न विदुरिति ज्ञेयम् । ते ज्ञानिना बोध्यन्तामित्यत आह ॥ तेष्विति ॥ अयोग्याश्चेन्न प्रकाशयेत्, अन्यथा परीक्ष्य प्रकाशयेदिति भावः ॥ अव्यक्तिकृदिति ॥ स्ववचनं यथा तत्त्वव्यक्तिकृन्न भवेत्तथेत्यर्थः । अनेन प्रकृतेरिति व्याख्यातं भवति । मन्दानित्यस्यार्थोऽयोग्येष्विति । अयोग्येषु तत्त्वं कुतो न वक्तव्यमित्यत आह ॥ बुद्ध्वेति ॥ मनोनिग्रहे स्वभावानुगतचेष्टोपरतिः स्यादित्यत आह ॥ स्वभावमिति ॥ एतेन सदृशमिति व्याख्यातं भवति ॥ ३५ ॥

"तयोर्न वशमागच्छेत्" इत्युक्ते पृच्छ्यते 'अथ' इति । तत्र 'प्रकृतेः' इत्यादौ भगवतः प्रेरकत्वस्योक्तत्वात्, स्वयं देवत्वेन देवानां प्रेरकत्वस्यापि ज्ञातत्वात्, 'इन्द्रियस्य' इति कामाद्यधमानां प्रेरकाणां च कथितत्वात् सिद्धप्रश्नोऽयमित्यत आह ॥ परमेश्वरादिति ॥

माह ॥ विष्णवधीनानिति ॥ स्वभावेति ॥ स्वभावानुगतिचेष्टिताया उपरतिरित्यर्थः । प्रश्नकरणे प्रसक्तिं दर्शयति ॥ तयोरित्यादिना ॥ उक्तत्वादिति ॥ प्रकृष्टकृतिमत्त्वहेतुना हरेरपि प्रकृतिशब्दार्थत्वोक्तेरिति भावः । सिद्धप्रश्नत्व-

"अखिलप्रेरको विष्णुर्ब्रह्माद्यास्तदवान्तराः ।
असुरा अशुभेष्वेव कामादेरभिमानिनः ॥
तत्र कामः कालनेमिः सर्वं धूममलोल्बवत् ।
शुभमध्याधमजनं क्रमादावृत्य तिष्ठति ॥
महाशनस्य तस्येदं नालं तेनानलोऽग्निवत् ।
भुञ्जान इन्द्रियाविष्टो ज्ञानास्त्रेणैव दह्यते ॥"

इति ब्रह्मतर्के ।

अर्वाक्तनं बलवन्तमिति शेषः । प्रश्नवाक्ये नैतदुच्यत इत्यत आह ॥ अथेति ॥ आनन्तर्यवाचिनाऽथशब्देन परमेश्वराद्देवेभ्यश्चानन्तरमित्यर्थो ज्ञायत इति भावः ॥ ३६ ॥

'काम एषः' इत्यादिपरिहारवाक्यमुक्तार्थेऽपि संवादरूपस्मृत्यैव व्याचष्टे ॥ अखिलेति ॥ तत्रेति 'कामः' इत्यस्य व्याख्यानम् । कामः प्रबल इति योज्यम् । 'अशुभेषु' इत्यनेनैव 'वैरिणम्' इत्येतद्व्याख्यातं भवति । कथं कामोऽशुभप्रेरकेषु प्रबल इत्यत आह ॥ सर्वमिति ॥ अग्न्यादर्शगर्भान् यथा धूमाद्यावृणोति तथेत्यर्थः ॥ क्रमादिति ॥ शुभजनं धूमोऽग्निमिव किञ्चिदावृणोतीत्यादि द्रष्टव्यम् । कामश्च तदपेक्षितं दत्त्वा जेतव्य इत्यत आह ॥ महाशनस्येति ॥ महदपि दीयतामित्यत आह ॥ तस्येति ॥ अनेन 'धूमेन' इत्यादि व्याख्यातं भवति । तर्हि कथं जेतव्य इत्यतस्तदधिष्ठानं तावदाह ॥ भुञ्जान इति ॥ एतेन 'इन्द्रियाणि' इत्यस्यार्थ उक्तो भवति । अस्त्विदमधिष्ठानं, किमायुधं तद्वधायेत्यत

निरासायाह ॥ इति शेष इति ॥ नैतदिति ॥ कामाद्यधमप्रेरकेष्वेव बलवत्प्रेरकप्रश्नो न तूत्तममध्यमप्रेरकेश्वरदेवेष्वित्येतदित्यर्थः ॥ उक्तार्थेऽपीति ॥ परमेश्वरादित्याद्युक्तार्थेऽपीत्यपिशब्दः । श्लोकव्याख्यानसमुच्चयेऽपिशब्दः ॥ काम इत्यस्येति ॥ परिहारश्लोकस्येत्यर्थः ॥ इत्यादीति ॥ आदिशब्दादादर्पणे

*

ज्ञानावरणरूपेणेदमावृणोतीत्यावृतं ज्ञानमिति पुनराह । न केवलं दुष्पूरो नालमिति मन्यते चेत्यनलः ।

"अग्नेरप्यनलः कामो यन्नालमिति मन्यते ।"

इति च ॥ ३७-४१ ॥

"सर्वेभ्यः प्रवरा देवा इन्द्राद्या इन्द्रियात्मकाः ।
तेभ्यो मनोभिमानी तु रुद्रस्तस्मात्सरस्वती ॥
बुद्ध्यात्मिका ततो ब्रह्मा महानात्मा वरः स्मृतः ।
अव्यक्तरूपा लक्ष्मीश्च वराऽतोऽतो हरिः स्वयम् ॥
न तत्समोऽधिको वेति ह्यानुपूर्वी प्रकीर्तिता ।
यथाक्रमप्रबोधेन नाश्याः कामादिशत्रवः ॥
प्राप्यते च परं स्थानं विष्णोरतुलमञ्जसा ।" इति च ।

आह ॥ ज्ञानेति ॥ अनेन 'इन्द्रियाणि' इत्यादेस्तात्पर्यमुक्तं भवति । ननु 'धूमेन' इति कामस्य सर्वावरणत्वमुक्तं, तत्पुनः किमर्थम् 'आवृतं' इत्युच्यत इत्यत आह ॥ ज्ञानेति ॥ पूर्वं ज्ञानोत्पत्तिप्रतिबन्धकत्वेनाऽवरणत्वं कामस्योक्तम्, इदानीं तूत्पन्नज्ञानस्यापरोक्षज्ञानसाधनत्वप्रतिबन्धकतयाऽऽवरणत्वमुच्यते । अतो न पौनरुक्त्यमिति भावः । 'दुष्पूरेणानलेन' इति पुनरुक्तमित्यत आह ॥ न केवलमिति ॥ कामो नालमिति मन्यते चेति कुत इत्यत आह ॥ अग्नेरिति ॥ ३७-४१ ॥

'इन्द्रियाणि' इत्यत्रेन्द्रियादिमात्राज्जीवस्य परमत्वमुच्यते अथवा 'इन्द्रियाणि मनो बुद्धिः' इत्यादिना इन्द्रियमनोबुद्धीनामुक्तं प्रपञ्च्यत इत्यन्यथाप्रतीतिनिरासाय तत्स्मृत्यैव व्याचष्टे ॥ सर्वेभ्य इति ॥ सर्वेभ्योऽर्थाद्यभिमानिभ्यः । 'ततो ब्रह्मा' इत्यादि तु 'बुद्धेरात्मा महान् परः । महतः परमव्यक्तम् अव्यक्तात् पुरुषः परः । पुरुषान्न

मलं कल्मषं यथाऽधिकमावृणोति अधमं जनं गर्भमुल्बमिवात्यंतमावृणोतीति द्रष्टव्यमित्यर्थः ॥ इन्द्रियाणीत्यादेरिति ॥ इत्यादेः श्लोकद्वयस्येत्यर्थः । आदि-

न च "इन्द्रियेभ्यः परा ह्यर्थाः", "रुद्रोऽहङ्कृतिरूपकः" इत्यादिविरोधः।

'सर्वाभिमानिनो देवाः सर्वेऽपि ह्युत्तरोत्तरम्।
आधिक्यं वक्तुमेवैषां पृथक् स्थानमुदीर्यते॥
आधिक्यक्रम एवात्र शास्त्रतात्पर्यमिष्यते।
स्थानेषु त्ववरेषां च परे सन्ति न चेतरे॥
तथापि पितुरर्थो यः पुत्रस्याप्युपचर्यते।
अव्यक्तादिपदार्थानां सर्वे तदभिमानिनः॥' इति च।

परं किञ्चित्' इति श्रुतिव्याख्यानम्। परमात्मनोऽत्र बुद्धिपरत्वमात्रोक्तावप्यन्यत्रोक्तमत्र संयोज्यमिति ज्ञापयितुमुदाहृतम्।

यदुक्तमर्थाभिमानिभ्योऽपीन्द्रियाभिमानिनामुत्तमत्वं न तद्युक्तम्। 'इन्द्रियेभ्यः परा ह्यर्थाः' इति श्रुतिविरोधात्। नापि रुद्रस्य मनोऽभिमानित्वं युक्तम्। 'रुद्रोऽहङ्कृतिरूपकः' इति वाक्यविरोधात्। एवं सरस्वत्या बुद्ध्यभिमानित्वं च न युक्तम्। विज्ञानाभिमानित्वोक्तिविरोधादित्यत आह॥ न चेति॥ कुतो न विरोध इत्यत आह॥ सर्वेति॥ तर्हि श्रीरव्यक्तस्य, ब्रह्मा महत इत्यादिपृथगभिमन्यमानस्थानोक्तिः लक्ष्म्यादीनां शास्त्रेषु कथमित्यत आह॥ उत्तरेति॥ अव्यक्तादीनां क्रमेणाधिकत्वात् तदभिमानित्वोक्त्याभिमानिनामप्युत्तरोत्तराधिक्यं ज्ञापयितुं पृथगभिमन्यमानस्थानान्युच्यन्त इत्यर्थः। किमर्थमुत्तरोत्तराधिक्यं ज्ञाप्यमित्यत आह॥ आधिक्येति॥ सर्वेऽपि सर्वाभिमानिन इत्युक्तस्यापवादमाह॥ स्थानेष्विति॥ अधमानामुक्तेष्वभिमन्यमानस्थानेष्वभिमानित्वेनोत्तमा वर्तन्ते। न तूत्तमाभिमन्यमानत्वेनोक्तस्थानेष्वधमा इत्यर्थः। एवं चेदव्यक्ताभिमानित्वं सरस्वत्यादीनां पुराणादौ कथमुच्यत इत्यत आह॥ तथापीति॥ उपचर्यते, यस्मादिति शेषः।

पदार्थमाह॥ एवं सरस्वत्या इति॥ विज्ञानाभिमानित्वेति॥ न चेतरदित्यस्यार्थो

"यत्र ह क्व च पुत्रस्य तत्पितुर्यत्र वा पितुस्तत् पुत्रस्येत्येतत्तदुक्तं भवति।" इत्यादिश्रुतेश्च।

"बहुवाचिनां तु शब्दानां लिङ्गप्रकरणादिभिः।
प्रवृत्तिहेतोश्चाधिक्यान्निर्णयोऽर्थेषु गम्यते॥"

इति शब्दनिर्णये।

'लिङ्गादिसाम्यं यत्र स्यात् प्रयोगाधिक्यमेव तु।
निर्णायकं भवेत्तत्र तेन स्यात्सुबहुश्रुतः॥'

इति ब्रह्मतर्के॥ ४२॥ ४३॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये तृतीयोऽध्यायः॥ ३॥

अत्र श्रुतिं चाह॥ यत्रेति॥ यस्मिन् वस्तुनि पुत्रस्य स्वाम्यमस्ति तस्मिन् वस्तुनि पितुः स्वाम्यमस्त्येव। यस्मिन् वस्तुनि पितुः स्वाम्यमस्ति तस्मिन् पुत्रस्य स्वाम्यमुपचारेणास्तीत्येतत् तत्र आपा इति चोद्ये समाधानमुक्तं भवतीत्यर्थः। अनेनेन्द्रादिभ्य इन्द्रियाभिमानिभ्योऽधमानां उत्तमानां सौपर्ण्यादीनां चार्थाभिमानित्वात्सौपर्ण्यादिविवक्षया इन्द्रियेभ्योऽर्थानामुत्तमत्वं श्रुतिराह। इदं तु वाक्यं शिवसुतविवक्षयाऽर्थेभ्य इन्द्रियाणामुत्तमत्वं वक्तीत्यविरोधः। रुद्रादीनां च मनोऽहङ्काराद्यभिमानित्वादुभयोक्तेरविरोध इत्युक्तं भवति।

ननु सर्वेऽपि सर्वाभिमानिनश्चेदव्यक्तादिशब्दार्थनिर्णयो न युज्यते। सर्वेषामप्यर्थतयाऽन्यतरापोहानुपपत्तेरित्याशङ्कां स्मृत्यैव परिहरति॥ बह्विति॥ क्वचिल्लिङ्गप्रकरणादिसाम्ये कथं निर्णय इत्याशङ्कां च स्मृत्यैव परिहरति॥ लिङ्गेति॥ ४२॥

इति श्रीमदानन्दतीर्थविरचितगीतातात्पर्यनिर्णयस्य टीकायां
जयतीर्थमुनिविरचितायां न्यायदीपिकायां
तृतीयोऽध्यायः॥ ३॥

न तूत्तमाभिमन्यमानत्वेनेत्यादि । इत्येतदुक्तं भवतीत्यंशस्यार्थमाह ॥ अस्तीत्येतदिति ॥ तदित्यस्य प्रतिपदं तत्रेति ॥ तस्यार्थ आपा इति चोद्य इति । ऐतरेये आपा इत्याप इति खण्डे रमादेव्या देवानां आप इति नाम कथमिति कृतचोद्ये देवानां भगवत्पुत्रत्वात् पितुर्भगवत आप इति नामवाच्यत्वात्पुत्राणामपि तदेव नामेति समाधानमनेन वाक्येनोक्तं भवतीत्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते तृतीयोऽध्यायः ॥ ३ ॥

॥ अथ चतुर्थोऽध्यायः ॥

हरिः ॐ ॥ उक्तयोर्ज्ञानकर्मणोरुभयोर्विशेषविस्तरात्मकोऽयमध्यायः ।

“ब्रह्मरुद्रेन्द्रसूर्याणां यदुक्तं विष्णुना पुरा ।
पञ्चरात्रात्मकं ज्ञानं व्यासोऽदात् पाण्डवेषु तत् ॥
तेषामेवावतारेषु[1] सेनामध्येऽर्जुनाय च ।
प्रादाद्गीतेति निर्दिष्टं सङ्क्षेपेणायुयुत्सवे ॥
यथा कुर्वन्ति कर्माणि यथा जानन्ति देवताः ।
सर्वे कार्तयुगाश्चैव नृपाश्च मनुपूर्वकाः ॥
ज्ञातव्यं चैव कर्तव्यं यथा सर्वैर्मुमुक्षुभिः ।
त्रेतादित्रिषु जातैश्च गीतायां तदुदाहृतम् ॥
पाण्डवाद्याः क्षेमकान्ताः करिष्यन्ति च जानते ।
तथैव तेन गीताया नास्ति शास्त्रं समं क्वचित् ॥

उक्तार्थसङ्गतत्वेन एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ उक्तयोरिति ॥ ज्ञानकर्मणोर्मध्येऽन्यतरस्येति प्रतीतिनिरासाय उभयोरित्युक्तम् । कर्मणोऽतीताध्याये विवृतत्वात् किमनेनेत्यतो विशेषेत्युक्तम् । उक्तकर्मयोगे रुचिजननाय पूर्वानुष्ठितोऽयं धर्म इत्युच्यते “इममिति” । तत्तात्पर्यं स्मृत्यैवाह ॥ ब्रह्मेति ॥ गीता पञ्चरात्रसङ्क्षेपश्चेत्तर्हि तस्याः सर्वोत्तमशास्त्रत्वहानिरित्यतः शब्दत एव संक्षेपो नार्थत इत्याह ॥ यथेति ॥ सर्वपञ्चरात्रार्थत्वे गीतायाः पञ्चरात्रादधमत्वमात्रं

हरिः ॐ ॥ विवृतत्वादिति ॥ न कर्मणामनारंभादित्यादिना कर्माकरणं विनिन्द्य नियतं कुरु कर्मेत्यादिना विवृतत्वादित्यर्थः । अर्थसंक्षेपं बुद्ध्वा

---

1. A. तेषामेव च वार्ष्णेयः

वेदार्थपूरकं ज्ञेयं पञ्चरात्रं यतोऽखिलम् ।
तत्सङ्क्षेपश्च गीतेयं तस्मान्नास्याः समं क्वचित् ॥"

इति ब्रह्मवैवर्ते ॥ १ ॥ ३ ॥

"जानन्तोऽपि विशेषार्थज्ञानाय स्थापनाय वा ।
पृच्छन्ति साधवो यस्मात्तेन पृच्छसि पार्थिव ॥"

इत्याग्नेयवचनान्नार्जुनो भगवन्तं न जानाति ॥ ४ ॥ ५ ॥

आत्ममायया आत्मेच्छया । प्रकृतिं स्वामधिष्ठाय स्वभावम् ।

मास्तु । तावता सर्वशास्त्रोत्तमत्वं कथमित्यत आह ॥ वेदेति ॥ सर्वशास्त्रेभ्योऽतिशयेन वेदार्थपूरकपञ्चरात्राशेषार्थत्वेन गीतायाः सर्वशास्त्रोत्तमत्वं युक्तमिति भावः ॥ १ ॥ ३ ॥

इदानीन्तनत्वाद्भगवतो विवस्वतः प्राचीनत्वात् कथं तदुपदेष्टृत्वमिति पृच्छति "अपरमिति" । तत्रार्जुनस्य भगवदज्ञानित्वप्रतीतेः प्रागुक्तानुपपत्तिरित्यत आह ॥ जानन्तोऽपीति ॥ नैवं प्रश्नेनार्जुनो भगवन्तमनादिनित्यं न जानातीति कल्प्यम् । जानन्तोऽपीति वचनात् प्रश्नस्य विशेषज्ञानाद्यर्थत्वोपपत्तेरिति भावः । स्थापनाय ज्ञातस्य दृढीकरणाय ॥ ४ ॥ ५ ॥

जन्मान्यतीतानि चेत्तर्हि न जननमरणराहित्यं भवतः । तथाच "अविनाशि तु" इत्युक्तविरोध इत्यत उच्यते "अजोऽपि" इति । तत्र "आत्ममायया" इत्येतदज्ञानवशादित्यन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ आत्मेति ॥ नात्रात्ममाययेत्यज्ञानवशादित्युच्यते । सर्वमानविरोधात् । अपि तु अवतारे परप्रेरणानिवारणाय महामायेत्यादिना मायापदोदितस्वेच्छानिबन्धनत्वमेवोच्यत इत्यर्थः । 'प्रकृतिं स्वामधिष्ठाय' इत्येतत्

शंकते ॥ पञ्चरात्रसंक्षेपश्चेदिति ॥ प्रागुक्तानुपपत्तिरिति ॥ साक्षाद्विद्यावतारमुत्तमाधिकारिणमात्मनः प्रियतममर्जुनमित्यनेनोक्तस्य तथा पार्थानामतिरोधानं ज्ञानं सुस्थिरतां गतमित्युक्तस्य ज्ञानित्वस्य चानुपपत्तिरित्यर्थः । भवत इति

"देवस्यैष स्वभावोऽयम्" इत्यादिश्रुतेश्च[1]। अत एव स्वशब्देन विशेषणम्—"प्रकृतिं स्वामवष्टभ्य" इत्यादिषु । "मयाऽध्यक्षेण प्रकृतिः" इत्यादिषु तु न स्वशब्दः। "प्रकृतिं विद्धि मे पराम्"

प्राकृतशरीरलाभेनेत्यन्यथाप्रतीतिनिरासायानूद्य प्रकृतिपदं व्याचष्टे॥ प्रकृतिमिति॥ नात्र प्राकृतशरीरलाभोऽभिधीयते। श्रुत्यादिविरोधस्योक्तत्वात्। किन्तु 'अवतरसि चेत् प्रयोजनेन भाव्यम्। तथाच नानवाप्तमित्युक्तविरोधः' इत्याशङ्कापरिहाराय प्रयोजनाभावेऽप्यवतारादिकं तादृशस्वभावत्वाद्युज्यत इत्येवोच्यत इति भावः। भवेदयमर्थो यदि हरेरवतारादि प्रयोजनं विना स्वभावादेवेति सिद्धं स्यात्तदेव कुत इत्यत आह॥ देवस्येति॥ स स्वभावश्च अयं देव एव न तु ततो भिन्न इत्यर्थः।

अस्तु विष्णोः स्वभावादेव व्यापारः। तथाप्यत्र प्रकृतिपदं कुतः स्वभाववाचीत्यत आह॥ अत एवेति॥ यतोऽत्र प्रकृतिपदं स्वभाववाच्यत एव स्वामिति विशेषणं प्रयुक्तम्। केवलमन्यार्थत्वे स्वाधीनत्वस्य ममेत्यसाधारणशब्देनाभिधानं विनोभयसाधारणमेतन्न स्यादित्यर्थः। एतमेव न्यायमन्यत्राप्यतिदिशति॥ प्रकृतिमिति॥ इत्यादिषु च स्वशब्देन विशेषणमत एवेत्यर्थः। यदि प्रकृतिपदं स्वभाववाचि तर्हि 'मयाऽध्यक्षेण प्रकृतिः', 'प्रकृतिं विद्धि' इत्यत्रापि किं स्वभाववाचीत्यपेक्षायामाह॥ मयेति॥ अतः स्वभावादन्यैव तत्र प्रकृतिरिति शेषः। अन्यत्वे हेत्वन्तरं चाह॥ प्रकृतिमिति॥ अत्राऽऽदिपदेन 'मया' इत्यस्य सङ्ग्रहः। 'मयाऽध्यक्षेण' इत्यत्राधीनतया सम्बन्धित्वप्रतीतेः 'प्रकृतिं' इत्यत्र 'मे' इति षष्ठ्या सम्बन्धित्वप्रतीतेश्चेति योज्यम्। सम्बन्धित्वेन प्रतीतेरन्या

षष्ठ्यंतम्। तवेत्यर्थः॥ श्रुत्यादिविरोधस्योक्तत्वादिति॥ द्वितीये अंतवत इम इत्येतद्व्याख्यावसरे उक्तत्वादित्यर्थः। यद्वा नैनं छिंदन्तीत्यादिव्याख्यावसरे सदेह इत्याद्युदाहरणादिति भावः। एष सृष्ट्यादीच्छारूपो व्यापारो देवस्य स्वभाव इत्यर्थमुपेत्यायमित्यस्यार्थमाह॥ स स्वभावश्चायं देव एवेत्यादि॥ अन्यार्थत्व इति॥ प्रसिद्धप्रकृतिमात्रार्थत्व इत्यर्थः॥ नानिष्टमिति पदविभागः।

---

1. A. इत्यादिश्रुतेः

इत्यादिषु सम्बन्धित्वेन प्रतीतेरन्या । अत्र तु स्वशब्दः स्वरूपवाची । स्वभाव इत्यत्रापि स्वाख्यो भावः स्वभावः । भावशब्दस्तु सम्बन्ध्याशङ्कानिवृत्तये[1] । स्वस्वभाव इति तु स्वस्वरूपमितिवदुपचारत्वाशङ्कां निवर्तयति ।

"स्रष्टृत्वादिस्वभावत्वात् स्वेच्छया विष्णुरव्ययः ।
सृष्ट्यादिकं करोत्यद्धा स्वयं च बहुधा भवेत् ॥"

इति नारायणश्रुतिः ॥ ६ ॥ ७ ॥ ८ ॥

चेदत्रापि स्वामिति सम्बन्धित्वेन प्रतीतेरन्या स्यादित्यत आह ॥ अत्रेति ॥ भवेदिदं यदि स्वशब्दः सम्बन्धवाच्येव स्यात् । न चैवम् । अत्र स्वशब्दस्य मुख्यतः स्वरूपवाचित्वादिति । बाधकाभावात् स्वरूपवाच्येव न तु सम्बन्धवाचीति भावः । स्वशब्दस्य स्वरूपवाचित्वं कुत्र दृष्टमित्यतः स्वभावपदगतस्वशब्दस्य तद्दृष्टमिति भावेनाह ॥ स्वभाव इति ॥ स्वभावपदगतस्य स्वेति शब्दस्यान्यत्वमात्रापादने नानिष्टम् । अर्थद्वयाङ्गीकारात् । अन्यैवेत्यापादनमयुक्तम् । स्वशब्दस्य स्वरूपवाचित्वस्यापि भावेन 'मे' इतिवदितराव्यावर्तकत्वादिति भावः । ननु स्वभावस्य स्वरूपत्वमयुक्तम् । स्वस्य भावो हि स्वभाव इत्यत आह ॥ स्वभाव इति ॥ रूढिबलेनेदमेव निर्वचनं, नान्यदिति भावः । स्वभावपदगतस्वशब्दस्य स्वरूपवाचित्वे तेनैव पूर्तेः भावशब्दो व्यर्थ इत्यत आह ॥ भावेति ॥ यदि स्वशब्दमात्रं प्रयुज्यते तदा स्वशब्दस्य स्वीयेऽपि प्रयोगात् तदाशङ्का स्यात् । तां निवारयितुं भावशब्दः प्रयुज्यते । भावशब्दयुक्तस्वशब्दस्य स्वरूप एव प्रतीतिजनकत्वादिति भावः ।

नन्वत्र प्रकृतिपदं स्वभाववाचकं चेत्तर्हि स्वां प्रकृतिमित्युक्ते स्वस्वभावमित्युक्तं भवति । स्वशब्दद्वयं च स्वरूपवाचीत्युक्तम् । तथाच पुनरुक्तिरित्यत आह ॥ स्वेति ॥ यथा अस्वरूपेऽप्युपचारेण स्वरूपपदप्रवृत्तेस्तत्परिहाराय स्वस्वरूपमित्युच्यते । न च तत्र स्वरूपवाचिस्वशब्दद्वयसद्भावेऽपि पुनरुक्तिदोषः । एवमस्वभावेऽप्युपचारेण स्वभावपदप्रवृत्तेस्तदाशङ्कानिवारणाय स्वस्वभाव इत्युच्यते । अतो न पुनरुक्तिदोष इत्यर्थः ।

अजोऽपीति श्लोकत्रयं श्रुत्यैव व्याचष्टे ॥ स्रष्टृत्वादीति ॥६॥७॥८॥

---

1. A. सम्बन्ध्याशङ्कां निवर्तयति

"येषां गुणानां ज्ञानेन मुक्तिरुक्ता पृथक् पृथक् ।
वेदेषु चेतिहासेषु सा तु तेषां समुच्चयात् ॥
एवमेव शमादीनां नान्यथा तु कथञ्चन ॥"

इति ब्रह्मवैवर्तवचनात् "जन्म कर्म च" इत्यादिषु न तावन्मात्रेण मोक्षः ॥ ९ ॥

"मयं प्रधानमुद्दिष्टं प्राधान्यं यैर्हरेर्मतम् ।
भगवन्मयास्ते विज्ञेयास्ते मुच्यन्ते न चापरे ॥"

इति च । मयि भावो मद्भावः ॥ १० ॥

तथैव भजामि तदनुसारिफलदानरूपेण । अन्यदेवतायाजिनामपि मत्समर्पणेन वैष्णवमार्गानुवर्तनेनैव सम्यक् फलं भवति ।

एवं स्वभावादेवावतारादिव्यापारमुक्त्वा तज्ज्ञानफलमुच्यते 'जन्मेति' । तत्रेश्वरजन्मकर्मज्ञानमात्रेण मोक्षो भवतीत्यन्यथाप्रतीतिं निराचष्टे ॥ येषामिति ॥ समुच्चयादेव भवतीति ज्ञातव्यमिति शेषः । शमादीनां समुच्चयादेव ज्ञानं भवतीति ज्ञातव्यम् । पृथक्पृथग्ज्ञानसाधनत्वोक्तावपीत्यर्थः । उक्तो ग्राह्य इति शेषः ॥ ९ ॥

एतज्ज्ञानस्य मोक्षसाधनत्वं कुत इत्यत उच्यते 'वीतेति' । तत्र 'मन्मयाः', 'मद्भावमागताः' इत्येतदन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ मयमिति ॥ यद्यपि भगवान् प्रधानो येषां ते भगवन्मया इति साक्षादर्थः तथापि सर्वेषां भगवान् प्रधानो भवति । ज्ञानिनां को विशेष इत्यतः 'प्राधान्यं यैर्हरेर्मतम्' इत्युक्तम् । 'मद्भावमागताः' इत्यस्यार्थः 'ते मुच्यन्ते' इति । मद्भावपदं कथं मोक्षवाचकमित्यत आह ॥ मयीति ॥ मयि भावः सायुज्यादिः ॥ १० ॥

त्रैविद्यानामपि मोक्षसद्भावात् को विशेषस्त्वामुपाश्रितानामित्यत उच्यते 'ये यथा' इति । तत्र नमन्तं नमतीत्याद्यन्यथाप्रतीतिनिरासायाऽऽह ॥ तथैवेति ॥ न ज्ञानिनां त्रैविद्यानां च फलसाम्यम् । सेवानुसारेणैव मम फलदत्वात् । सेवायाश्च वैषम्यादिति भावः । त्रैविद्यानामन्यदेवतायाजित्वात् कथमुच्यते तां प्रपद्यन्त इतीत्यतो देवता यजन्तो

"अन्यदैवतपूजाऽपि यस्मिन्नन्ते समर्पिता ।
स्वर्गादिफलहेतुः स्यान्नान्यथा तं भजेद्धरिम् ॥"

इत्याग्नेये ॥ ११ ॥ १२ ॥

"सत्त्वसत्त्वाधिकरजोरजोभिस्तमसा तथा ।
वर्णा विभक्ताश्चत्वारः सात्त्विका एव वैष्णवाः ॥"

इति च । कर्मविभागं "शमो दमः" इत्यादिना वक्ष्यति ।

"वैष्णवाः सात्त्विका एव तामसा एव चापरे ।
दौर्लभ्यसुलभत्वेन तेषां वर्णादिभिन्नता ॥" इति च ।

यदि कर्मणां सिद्धिमाकाङ्क्षन्तो भवन्ति तर्हि मम वर्त्मानुवर्तन्त एव । अन्यथा कर्मफलाभावादित्युच्यते 'मम' इति । तत्र त्रैविद्या अपि चेद्भगवद्वर्त्मानुवर्तन्ते तर्हि भागवतत्रैविद्यभेदो न स्यादित्यतः श्लोकं व्याचष्टे ॥ अन्येति ॥ मत्समर्पणेन अन्त इति शेषः । अत्र स्मृतिसंमतिं चाह ॥ अन्येति ॥ ११ ॥ १२ ॥

भगवद्भजनं विना कुतो न फलमित्यतस्तस्य पितृत्वाद्युज्यत इत्युच्यते 'चातुर्वर्ण्यं' इति। अत्र गुणानां त्रित्वात् कथं चातुर्वर्ण्यस्य गुणविभाग इत्याशङ्क्यां स्मृत्यैव परिहरति ॥ सत्त्वेति ॥ राजससात्त्विकेषु सात्त्विको ब्राह्मणः। सत्त्वमधिकं यतो रजसस्तद्वान् क्षत्रियः। समसत्त्वरजोवान् वैश्यः। रजोपेक्षयाऽधिकतमोवान् शूद्र इत्यर्थः। अनेन सत्त्वप्रधानत्वं ब्राह्मणादीनामुक्तम्। तस्यापवादमाह ॥ सात्त्विका एवेति ॥ वैष्णवा एव सात्त्विकाः सत्त्वप्रधानाः। न ब्राह्मणत्वादिप्रयुक्तं सात्त्विकत्वादीत्यर्थः ।

कर्मविभागः कीदृश इत्यत आह ॥ कर्मेति ॥ यदि वैष्णवा एव सात्त्विकास्तर्हि ब्राह्मणाः सात्त्विकाः इत्याद्युक्तिः किंनिमित्तेत्याशङ्क्यां स्मृत्यैव परिहरति ॥ वैष्णवा इति ॥ अपरे द्वेषिणः। वैष्णवानां शूद्रादिषु दौर्लभ्यात् ब्राह्मणादिषु सौलभ्यात् ब्राह्मणा एव सात्त्विका इत्यादिरूपेण सात्त्विकत्वादीनां वर्णाश्रमभेदेन भिन्नतोच्यत इत्यर्थः। यथा सात्त्विक-

---

मत्समर्पणेनेत्येतदनुवादपूर्वमन्तपदाध्याहारमाह ॥ मत्समर्पणेन अन्त इति शेष इति ॥ राजसास्तु नरास्तत्र विप्रा इत्यन्तिमाध्यायतात्पर्यानुरोधादाह ॥ राजस-

"स्वाभाविको ब्राह्मणादिः शमाद्यैरेव भिद्यते ।
योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम् ॥
विष्णुभक्तिश्चानुगता सर्ववर्णेषु विश्पतिम् ।
आरभ्य हीयतेऽथापि भेदः स्वाभाविकस्ततः ॥"

इति नारदीये ।

"कर्ताऽपि भगवान् विष्णुरकर्तेति च कथ्यते ।
तस्य कर्ता यतो नान्यः स्वतन्त्रत्वात् परात्मनः ॥"

त्वादिकं न वर्णमात्रलक्षणं तथा शमादिकमपि न वर्णमात्रलक्षणम् । किन्तु स्वाभाविकवर्णलक्षणमित्यत्र स्मृतिमाह ॥ स्वाभाविक इति ॥ नन्वस्वाभाविकं ब्राह्मणत्वादिकं कीदृशमित्यत आह ॥ योनीति ॥ अयमिति प्रसिद्धः ।

स्वाभाविकब्राह्मणस्यैव शमादिकम् । स्वाभाविकक्षत्रियस्यैव शौर्यादीत्याद्युक्तम् । तत्रापवादमाह ॥ विष्ण्विति ॥ शमपदोदिता विष्णुभक्तिः न केवलं ब्राह्मणस्यैव, अपि तु सर्ववर्णेष्वनुगतेत्यर्थः । उपलक्षणं चैतत् । दमादिकमप्येवं द्रष्टव्यम् । क्षत्रिये शमवति राष्ट्रविप्लवः स्यादित्यतो नायं शमः प्रसिद्धः । अपि तु विष्णुभक्तिरिति शम इति वक्तव्ये तदर्थ एवोक्तः । शमादीनां क्षत्रियादिष्वपि सद्भावे कथमयं ब्राह्मणोऽयं नेति स्वाभाविकवर्णभेदज्ञानमित्यत आह ॥ विश्पतिमिति ॥ ब्राह्मणे शमादीनां बाहुल्यात् क्षत्रियादिषु क्रमेणाबहुलत्वात् शमादीनां बाहुल्याबाहुल्यतोऽयं ब्राह्मणोऽयं नेति स्वाभाविको वर्णभेदो ज्ञातव्य इत्यर्थः ।

यथा भवान् सर्वस्य कर्ता एवं भवतोऽप्यन्यः कर्ताऽस्ति किमित्य-

सात्त्विकेष्विति ॥ न वर्णमात्रलक्षणमिति ॥ किन्तु सात्त्विकत्वं वैष्णवलक्षणं तामसत्वं भगवद्द्वेषिलक्षणमिति योज्यम् ॥ स्वाभाविकेति ॥ स्वरूपतो यो ब्राह्मणादिर्न तु योनिकृत इत्यर्थः ॥ प्रसिद्ध इति ॥ सर्वव्यापारोपशमरूपो वा भगवदेकनिष्ठतारूपो वेत्यर्थः । तर्हि क इत्यत आह ॥ अपि तु विष्णु-

इति च। अपिशब्दो गुणसमुच्चयार्थः। कर्ता मे नास्तीत्यपि विद्धीति। जीवाभेदनिवृत्त्यर्थं मामिति विशेषणम् ॥ १३-१६ ॥

कर्मापि नः मत्त इति बोद्धव्यमित्यादि ॥ १७ ॥

कर्मणि जीवे। अस्वातन्त्र्यादकर्म। कर्मविधिफलयोरभावात्

पेक्षायामुच्यते "तस्येति"। तत्र कर्तारमप्यकर्तारं विद्धि, कर्तृत्वस्य मायिकत्वादित्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ कर्तेति ॥ एवंविधकर्तृत्वाकर्तृत्वयोरविरुद्धत्वात् कर्तारमप्यकर्तारं विद्धीत्यत्रापि-शब्दो व्यर्थ इत्यत आह ॥ अपीति ॥ तत्प्रकारं दर्शयति ॥ कर्तेति ॥ १३॥

सर्वकर्तृत्वे भगवतः कर्मलेपः स्यादित्यत उच्यते "न मामिति"। तत्र मामित्यस्य सिद्धत्वात् "इति माम्" इति पुनरस्मच्छब्दः किमर्थ इत्यत आह ॥ जीवेति ॥ स्वस्येश्वराभेदाभिप्रायेण स्वात्मानमुद्दिश्य "न मां कर्माणि लिम्पन्ति" इत्यादि यो जानातीत्यन्यथप्रतीतिः स्यात्। तन्निराकरणार्थम् इति मां योऽभिजानाति, न स्वात्मानमिति भावेन मामिति विशेषणं प्रयुक्तमित्यर्थः ॥ १३-१६ ॥

"तत्ते कर्म प्रवक्ष्यामि" इति प्रतिज्ञातमुच्यते "कर्मणः" इति। तद्दुर्गमार्थत्वाद्व्याचष्टे ॥ कर्मेति ॥ मत्त एव भवतीति बोद्धव्यम्। असमानपदस्थस्य रेफोत्तरस्य नस्य णत्वं दृष्टं "ब्रह्म ण इन्द्र उपयाहि विद्वान्" इत्यादौ। आदिपदेन "योद्धव्यं च" इत्यादेरपि पूर्ववद्योजनां सूचयति ॥ १७ ॥

एतद्बोधनं स्तूयते "कर्मणि" इति। तत्र पूर्वार्धं दुर्गमार्थत्वा-द्व्याचष्टे ॥ कर्मणीति ॥ कर्मविधिफलयोरभावात् अकर्मेत्यनेन तद्भावा-

---

भक्तिरिति ॥ एवंविधेति ॥ भिन्नाधिकरणकर्तृत्वाकर्तृत्वयोरित्यर्थः। मामित्य-नुक्तौ कथमभेदशंका, तदुक्तौ तु कथं तन्निरास इत्यतो द्वयमपि व्यनक्ति स्वस्येत्यादिना ॥ ननु रषाभ्यां नो णः समानपद इति सूत्रे समानपदे एकस्मिन्नेव पदे रेफषकाराभ्यां परस्य नस्य णत्वं भवतीत्युक्तेरिह च कर्मशब्दनशब्दयो-रेकपदस्थत्वाभावात्कथं णत्वमित्यत आह ॥ असमानपदस्थस्येति ॥ हे इन्द्र नो ब्रह्म उपयाहीत्यत्र ब्रह्मपदात्परस्य नस्य णत्वं दृष्टम्। तद्वदत्रेत्यर्थः। छान्दसं णत्वमिति भावः ॥ इत्यादेरिति ॥ द्वितीयपादादेरपि विकर्म णः नः मत्तः

अकर्मणि विष्णौ स्वातन्त्र्यात्सर्वकर्मकर्तृत्वम् ।

"करोऽस्मिन् मीयत इति कर्म जीव उदाहृतः ।
विधिशब्देनामितत्वात् अकर्म भगवान् हरिः ॥"

इति नारदीये । कर इति सकारान्तोऽदृष्टवाची । क्रियावाची वा । तदधीनत्वात् । प्रसिद्धश्च जीवे कर्मशब्दः पञ्चरात्रे । कृत्स्नफलवत्त्वात् कृत्स्नकर्मकृत् ॥ १८ ॥

अनिराश्रयो भगवदाश्रयत्वात् । मुक्तस्य स्वातन्त्र्याभिमानात् ॥ १९-२३ ॥

जीवः कर्मेति सूचितम् । जीवेश्वरयोरेवं व्युत्पत्त्या कर्माकर्मपदवाच्यत्वं कुत इत्यत आह ॥ कर इति ॥ अमितत्वादविषयीकृतत्वादित्यर्थः । कोऽयं करो नामेत्यत आह ॥ कर इति ॥ करशब्दस्य हस्तादिवाचित्वमेव दृष्टं, नादृष्टादिवाचित्वमित्यत उक्तम् ॥ सकारान्त इति ॥ हस्तादिवाचिनोऽयं सकारान्तोऽन्य एवेति भावः । कर्मविधिवाची चेति द्रष्टव्यम् । अत एव कर्मविधीत्याद्युक्तम् । अनेन विधिशब्देनामितत्वम् अकर्मपदेन कथमुच्यत इति परास्तम् । अकर्तरि जीवे कथं करो मीयत इत्यत आह ॥ तदिति ॥ नाकर्तरि क्रियादर्शनं विरुद्धं, स्वातन्त्र्येणाकर्तृत्वेऽपि भगवदधीनकर्तृत्वादिति भावः । अत एव पूर्वमस्वातन्त्र्यादित्याद्युक्तम् । कर्मशब्दस्य जीवे विद्वद्रूढिं च दर्शयति ॥ प्रसिद्धश्चेति ॥ ननु ज्ञानिनः स्वातन्त्र्येण पारतन्त्र्येण वा कृत्स्नकर्माकरणात् कथं कृत्स्नकर्मकृत्त्वमुच्यत इत्यत आह ॥ कृत्स्नेति ॥ स्वयोग्याशेषकर्मफलमोक्षस्य नियतत्वादिति भावः ॥ १८ ॥

न केवलं कर्तृत्वाभिमानपरित्यागेन कृत्स्नकर्मकृत्त्वादि । अपि तु कामादिपरित्यागेनापि भाव्यमित्युच्यते—यस्येत्यादिश्लोकपञ्चकेन । तत्र निराश्रय इत्यन्यथा पदविभागप्रतीतिनिरासायाह ॥ अनिराश्रय

भवतीत्यादिरूपेणेत्यर्थः ॥ सकारान्त इतीति ॥ करः कर्मविधिरस्मिन् जीवे मीयते विषयीक्रियते इत्यर्थे निरुक्तत्वादुपपदटिलोपः । माङ् मान इत्यतः कनिन्नित्युक्तं भवति ॥ अनेनेति ॥ करःशब्दस्य कर्मविधिवाचित्वकथनेनेत्यर्थः ॥ करो मीयत इति ॥ कर्मविधिर्मीयते ज्ञायत इत्यर्थः । भाष्योक्तदिशा श्लोकावतारिकामाह ॥

कथमभिमानत्यागः। ब्रह्मार्पणमित्यादि। ब्रह्मण्यर्पणं ब्रह्मार्पणम्। ब्रह्मणो हविः। ब्रह्मणोऽग्नौ। ब्रह्मणः कर्म। समाधिना सह। समाधिरपि तदधीन इत्यर्थः।

"एकः स्वतन्त्रो भगवांस्तदीयं त्वन्यदुच्यते।"

इति भारते ॥ २४ ॥

दैवं विष्णुमेव यज्ञ इत्युपासते। स्वभोग्यत्वात् स्वयमेव यज्ञः।

इति ॥ प्रतीतप्रकारेणैव पदविभागः किं न स्यादित्यत आह ॥ भगवदिति ॥ ज्ञानिनोऽपि भगवदाश्रयत्वेन "अज्ञानां ज्ञानिनां चैव" इत्यादावुक्तत्वात् निराश्रयत्वानुपपत्तेर्न प्रतीतप्रकारेण पदविभाग इत्यर्थः। नन्वत्र ज्ञानिनः शरीरसम्बन्धसद्भावात् कथं मुक्तत्वमुच्यत इत्यत आह ॥ मुक्तस्येति ॥ १९-२३ ॥

ननु कुत्र स्वातन्त्र्याभिमानत्यागो विवक्षितः? तस्य चार्थस्य स्वातन्त्र्यायोगात् किमधीनत्वं ज्ञातव्यम्? किञ्च यज्ञार्थत्वमिति पृच्छति "कथमिति"। तत्परिहारायोत्तरप्रघट्टकमवतारयति ॥ ब्रह्मेति ॥ अत्रार्पणादीनां ब्रह्मैक्यमुच्यते, नाभिमानपरित्यागप्रकार इत्यन्यथाप्रतीतिनिरासायाह ॥ ब्रह्मणीति ॥ प्रतीतार्थ एव किं न स्यादित्यतः स्वोक्तार्थे स्मृतिसम्मतिमाह ॥ एक इति ॥ अनेन हविरादिषु स्वस्य स्वातन्त्र्यमनिरूप्य ब्रह्माधीनतां ज्ञात्वा होमादिकरणं स्वातन्त्र्याभिमानपरित्यागः। ब्रह्मार्पणं तु यज्ञार्थत्वमित्युक्तं भवति ॥२४॥

तत्प्रपञ्चयते "दैवम्" इत्यादिना ॥ तत्र पूर्वार्धे कस्यचिद्देवस्योपासनमेवोच्यते न तु ब्रह्मार्पणबुद्ध्या यजनम्। अतो नायमर्धः पूर्वसङ्गत इत्यत आह ॥ दैवमिति ॥ भगवन्तं यज्ञ इत्युपासत इत्यनेन

न केवलमिति ॥ अज्ञानां ज्ञानिनां चैवेत्यादाविति ॥ अज्ञानां ज्ञानिनां चैव मुक्तानां शरणं हरिरित्यादौ द्वितीयाध्याये तात्पर्ये ॥ तस्य चार्थस्येति ॥ स्वातन्त्र्याभिमानविषयस्यार्थस्येत्यर्थः ॥ अनिरूप्येति ॥ अविज्ञाप्येत्यर्थः। अविज्ञायेति चार्थः ॥ तत्प्रपंच्यत इति ॥ यज्ञार्थमुक्तरूपहोमाद्याचरणमित्यर्थः ॥ पूर्वसंगत इति ॥ प्रपञ्चरूपपूर्वसंगतिमापन्नेत्यर्थः ॥ पूर्वसंगतत्वेनेति ॥ यज्ञ-

ब्रह्माख्याग्नौ क्रियायज्ञं तेनैव यज्ञाख्येन विष्णुना समर्पयन्ति ॥ २५ ॥

तत्पूजात्वेन श्रोत्रादिसंयमं कुर्वन्ति । तत्पूजात्वेन विषयान् भुञ्जते ॥ २६ ॥

तत्पूजात्वेने[1]न्द्रियसंयमं कुर्वन्ति । यज्ञेनैवेति सर्वत्राप्यन्वीयते ।

"तेनैव तं पूजयेद्वा विहितैर्वाऽन्यसाधनैः ।
स एव विष्णोर्यज्ञः स्यान्मानसो वा सबाह्यकः ॥"

इति ब्रह्मवैवर्ते ॥ २७-३१ ॥

"श्रोत्रादीनि" इत्यादिषु इज्यानुक्तेरिज्योऽन्य इति शङ्कां निवारयति—"वितता ब्रह्मणो मुखे" इति ।

"सर्वयज्ञैः परं ब्रह्म याज्यं विष्ण्वाख्यमव्ययम्"

इति च ॥ ३२ ॥

भगवानेव यज्ञः, तस्य तथोपासनमेव यज्ञकरणमित्युक्तं भवति । कथं भगवतो यज्ञत्वम् ? येन तथोपासनं यज्ञकरणं स्यादित्यत आह ॥ स्वेति ॥ स्वरूपमेवानन्दादिहविः स्वयमेवाग्निर्भगवान् भुङ्क्ते, अतोऽयं यज्ञ इत्यर्थः । "ब्रह्माग्नौ" इत्येतद्दुर्गमार्थत्वात् पूर्वसङ्गतत्वेन व्याचष्टे ॥ ब्रह्मेति ॥ यज्ञाख्येनेत्यस्य सर्वं तदधीनं ज्ञात्वेत्यर्थः ॥ २५ ॥

ननु "श्रोत्रादीनि" इत्यादौ श्रोत्रादिहविषः संयमाख्याग्न्यादौ होम एवोच्यते, न तु तस्य ब्रह्मार्पणम् । अतो नैतत्पूर्वसङ्गतमित्यत आह ॥ तदिति ॥ अत्रापि ब्रह्मार्पणस्य "एवं बहुविधाः" इति वक्ष्यमाणपर्यालोचनया विवक्षितत्वावगमात् नासङ्गतिरिति भावः ॥ २६ ॥

॥ इन्द्रियादिसंयममिति ॥ कर्मेन्द्रियाणां प्राणापानादीनां च संयममित्यर्थः । नन्वत्र क्रियायज्ञ एव यज्ञेनैवेत्यभिमानत्यागोक्तेः कथं दैवमित्यादि पूर्वसङ्गतमित्यत आह ॥ यज्ञेनैवेति ॥ स्वयमेव यज्ञ इत्याद्यपूर्वार्थोऽयं कुत इत्यत आह ॥ तेनैवेति ॥ २७-३१ ॥

"ब्रह्मणो मुखे" इत्यस्य वेदादावित्यन्यथाप्रतीतिनिरासायाह ॥

भेदोक्तिपरत्वेनेत्यर्थः । यद्वा ब्रह्मार्पणमिति पूर्वसंगतत्वेनेत्यर्थः । एवमग्रेऽपि ।

---

1. A. तत्पूजात्वेनैवेन्द्रियादिसर्वसंयमं ।

सर्वं कर्म आखिलम् आ समन्तादल्पं ज्ञाने परिसमाप्यते। ज्ञाने जाते पूर्यते।

"समाप्तविद्यान् धनुषि श्रेष्ठान् यान् सप्त मन्यसे।" इतिवत् समाप्तिशब्दोऽत्र पूर्तिवाची। "ज्ञानासिनाऽऽत्मनः। छित्त्वैनं संशयं योगमातिष्ठ॥" इति पुनर्योगकथनात्॥ ३३॥

"ज्ञानं तेऽहं सविज्ञानम्" इति वक्ष्यमाणत्वात् स्वयमेवोपदेक्ष्यति॥ ३४॥

श्रेयेति॥ इति शङ्का स्यात् तामिति शेषः। प्रतीत एवार्थः किं न स्यादित्यत उक्तार्थे स्मृतिसम्मतिमाह॥ सर्वेति॥ ३२॥

द्रव्यमयाद्यज्ञात् ज्ञानयज्ञस्योत्तमत्वे हेतुरुच्यते "सर्वमिति"। तत्र सर्वाखिलशब्दयोरेकार्थत्वप्रतीतेः ज्ञानानन्तरं कर्म नास्तीत्यन्यथाप्रतीतेश्च निरासायाह॥ सर्वमिति॥ पूर्यते सफलं भवतीत्याशयः। समाप्तिशब्दस्य पूर्तिवाचित्वादर्शनात् कथमत्र पूर्तिवाचित्वमित्यत आह॥ समाप्तेति॥ धनुर्विद्याविषये सम्पूर्णविद्यान् कृष्णसात्यकियुक्तपञ्चपाण्डवान् सप्त श्रेष्ठान् मन्यस इत्युद्योगपर्वणि धृतराष्ट्रं प्रति सञ्जयवचनम्। अस्तु पूर्तावपि समाप्तिशब्दप्रयोगः। तथाप्यत्र पूर्तिवाचित्वं कुतः? प्रतीतार्थ एव किं न स्यादित्यत आह॥ ज्ञानेति॥ पुनर्योगकथनात् ज्ञानानन्तरमपि कर्मानुष्ठानकथनात्॥ ३३॥

ज्ञानस्य कर्मणोऽधिकत्वमुक्त्वा तदापादनं विधीयते "तदिति"। तत्र स्वयं ज्ञानोपदेशार्थैव प्रवृत्तत्वात् "न त्वेवाहम्" इति ज्ञानस्योपदिष्टत्वाच्च कथम् "उपदेक्ष्यन्ति ते ज्ञानम्" इत्युच्यत इत्यत आह॥ ज्ञानमिति॥ उपदेक्ष्यन्तीति निश्चितत्वाभिप्रायेण। परोक्षतयोपदेक्ष्याम इत्येवोच्यमानत्वात् न ज्ञानोपदेशार्थं प्रवृत्तत्वविरोधः। न च ज्ञानस्योपदिष्टत्वविरोधः। सङ्क्षेपेणोपदिष्टत्वेऽपि "ज्ञानं तेऽहं" इत्यादिना पुनरुपदेक्ष्यमाणत्वादिति भावः॥ ३४॥

धनुषीत्येतद्विषयसप्तमी विद्योपलक्षणमिति भावेनाह॥ धनुर्विद्याविषय इति॥ प्रतीत एवार्थ इति॥ ज्ञानानन्तरं कर्म नैवेत्येवंरूपः॥ उक्त्वेति॥ श्रेयान्

*

आत्मनि व्याप्ते मयि। अथो तस्मात् व्याप्तत्वादेव ॥३५-४०॥
आत्मवन्तं परमात्मभक्तम् ॥ ४१ ॥ ४२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये चतुर्थोऽध्यायः ॥ ४ ॥

ज्ञानं स्तूयते "यत्" इति। तत्र स्वस्मिन्, मयि चेत्यन्यथा-प्रतीतिनिरासायाह ॥ आत्मनीति ॥ ईश्वरमन्तरेण सर्वभूताधारत्वस्यान्यत्रानुपपत्तेर्न प्रतीत एवार्थ इत्यर्थः। एवं चेत् "अथो" इति समुच्चयवाची शब्दो व्यर्थ इत्यत आह ॥ अथो इति ॥ ३५-४० ॥

ज्ञानफलमुच्यते "योग" इति। तत्र "आत्मवन्तं" इत्यात्मा जीवश्चेत् स्वसम्बन्धोक्तिरयुक्ताऽनुपयुक्ता च। परमात्मा चेत्सर्वेषामपि तद्वत्त्वसाम्यात् को विशेषो ज्ञानिन इत्यत आह ॥ आत्मेति ॥ ४१-४२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां चतुर्थोऽध्यायः ॥ ४ ॥

द्रव्यमयाद्यज्ञादित्यनेनोक्तत्वेत्यर्थः। अथो इति पदं समुच्चयार्थमिति भ्रांत्याऽऽह ॥ एवं चेदिति ॥ तद्वत्त्वेति ॥ परमात्मवत्त्वसाम्यादित्यर्थः। हरेः सर्वांतर्यामित्वादिति भावः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
चतुर्थोऽध्यायः ॥ ४ ॥

॥ अथ पञ्चमोऽध्यायः ॥

हरिः ॐ ॥ योगसंन्यासयोर्लक्षणं स्पष्टयत्यनेनाध्यायेन । "योगसंन्यस्तकर्माणं" इत्यादौ न्यासशब्दः सर्वकर्मत्यागविषय इत्याशङ्क्य योगसंन्यासयोर्भिन्नपुन्निष्ठत्वाभिप्रायेण पृच्छति — संन्यासमिति ॥ १ ॥

एकपुंयोग्यावेतौ, तयोर्मध्ये[1] योग एव विशिष्ट इति परिहाराभि-

हरिः ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ योगेति ॥ पूर्वं समुच्चितः कर्मयोगो निरूपितः । स च योगसंन्यासभेदेन द्विविधः । द्विविधयोश्च स्वरूपं सङ्क्षेपेण "कुरु कर्माणि", "सङ्गं त्यक्त्वा" इत्यादावुक्तम् । तदेवानेनाध्यायेन स्पष्टयतीत्यर्थः ।

प्रश्नवाक्यं साभिप्रायमवतारयति ॥ योगेति ॥ "योगसंन्यस्त-कर्माणम्" इत्यादौ पठितो न्यासशब्दो यत्याश्रमविषयो "योगमातिष्ठ" इत्यादौ श्रुतो योगशब्दो गृहस्थाश्रमविषय इति कल्पयित्वा यतीनां सर्वकर्मत्यागेन ज्ञानमात्राधिकारित्वात् गृहिणां ज्ञानपरित्यागेन कर्म-मात्राधिकारित्वात् तयोरेकपुन्निष्ठत्वं न युज्यत इति भावेन योग-संन्यासयोर्मध्ये श्रेयः पृच्छति । उभयस्यापि कर्तव्यतया विहितत्वादेके-नैवानुष्ठातुमशक्यत्वात् अन्यतरपरित्यागेनान्यतरग्रहणे श्रेयस एव ग्राह्यत्वादिति भावः ॥ १ ॥

ननु योगसंन्यासयोर्मध्ये श्रेयोमात्र एवायं प्रश्नो, न तूक्तरीत्या विरोधाभिप्रायेण । तथात्वे परिहाराभावादित्यतः परिहारवाक्याभि-

---

श्रीरस्तु ॥ हरिः ॐ ॥ समुच्चित इति ॥ दलद्वययुक्तः कर्मयोगः तत्ते कर्म प्रवक्ष्यामीति प्रतिज्ञाय कर्मणो ह्यपीत्यादिना निरूपित इत्यर्थः ॥ योगेति ॥ भगवदर्पणबुद्ध्या कर्मानुष्ठानं योगः । कामवर्जनं संन्यासः ॥ इत्यादावुक्तमिति ॥ योगस्थः कुरु कर्माणि इत्यादिना द्वितीयोक्तस्य तृतीय-

---

1. A. मध्ये च ।

प्रायः । उभौ समुच्चितौ । "संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः" इति वक्ष्यमाणत्वात् ॥ २ ॥

द्वेषादिवर्जनमेव संन्यासशब्दार्थो[1] न यत्याश्रमोऽत्राभिप्रेत इत्याह—ज्ञेय इति । न च "काम्यानां कर्मणां न्यासं" इत्यनेन

प्रायमाह ॥ एकेति ॥ उभयोरेकपुंयोग्यत्वात् निःश्रेयसकरत्वाच्च अनुष्ठेयत्वादन्यतरस्य श्रेष्ठत्वे प्रश्नो व्यर्थ एव । अथ स्वरूपज्ञानमात्रार्थः प्रश्नश्चेद्योग एव विशिष्ट इति भावः । योगसंन्यासयोरेकपुंयोग्यत्वाभिधायकं पदमत्र न श्रूयत इत्यतस्तत्पठित्वा व्याचष्टे ॥ उभाविति ॥ द्वावपि प्रत्येकं श्रेयस्करावित्यर्थः किं न स्यादित्यत आह ॥ संन्यासस्त्विति ॥ योगरहितसंन्यासस्य अनर्थकरत्वोक्तेः संन्यासरहितयोगस्यैवासम्भवात् समुच्चितयोरेव निःश्रेयसकरत्वमुच्यते न प्रत्येकमिति भावः ॥ २ ॥

कथं योगसंन्यासयोः समुच्चयो युज्यते ? यतिगृहस्थयोरधिकारभेदादित्याशङ्कापरिहाराय श्लोकमवतारयति ॥ द्वेषादीति ॥ अत्र "संन्यस्तकर्माणम्" इत्यादौ । एवं "योगमातिष्ठ" इत्यादौ भगवदर्पणादियोग एवाभिप्रेतो न गृहस्थाश्रम इत्यपि द्रष्टव्यम् । ननु कथं द्वेषादिवर्जनस्य संन्यासत्वमत्रोच्यते ? "काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः" इति काम्यकर्मपरित्यागस्य संन्यासत्वाभिधायकवाक्यविरोधादित्यत आह ॥ न चेति ॥ भवेत्तद्विरोधो यद्यत्र द्वेषादिवर्जनमात्रं संन्यासत्वेन विवक्षितं स्यात् । नैतदस्ति । काम्यकर्मपरित्यागेनापि सहितस्य द्वेषादिवर्जनस्य संन्यासत्वेनाभिप्रेतत्वा-

---

चतुर्थयोः प्रपञ्चनादित्यादावुक्तमित्युक्तम् । पूर्वोत्तरगीतार्धयोरभिप्रायमाह ॥ उभयोरिति ॥ अथ स्वरूपेति । एतेन द्वयोर्निःश्रेयसकरत्वमुक्त्वाऽन्यतरवैशेष्योक्तिरयुक्तेति निरस्तम् ॥ असंभवादिति ॥ भगवदर्पणबुद्ध्याऽनुष्ठानस्य कामादिवर्जनाभावे अयोगादित्यर्थः । अत्रेत्यनुवादः संन्यस्तेत्यादि व्याख्या ॥

1. A. न्यासशब्दार्थो ।

विरोधः। तेनापि सहितस्य न्यासत्वात्। न च त्यागस्य पृथग्वचनाद्विरोधः। कुरुपाण्डववत्[1] न्यासावान्तरभेदत्वात्त्यागस्य ॥ ३ ॥

बालास्तु न्यासशब्देन यत्याश्रममेव स्वीकृत्य तत्स्थानामेव साङ्ख्यशब्दोदितज्ञानाधिकारः; गृहस्थानामेव योगशब्दोदितकर्माधिकार इति मन्यन्ते। तन्न पण्डिता मन्यन्ते। कुतः? यस्माज्ज्ञानमार्गं

दित्यर्थः। कथमत्र काङ्क्षादिवर्जनस्य संन्यासत्वमुच्यते? "सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः" इति तस्य त्यागत्वेनोक्तत्वात्। न च संन्यासत्यागयोरैक्यादविरोधः। "काम्यानां" इति श्लोके न्यासात्त्यागस्य पृथक्त्वेनोक्तेस्तद्विरोधादित्यत आह ॥ न चेति ॥ भवत्येवाकाङ्क्षादिवर्जनं न्यासः। न च तस्य त्यागत्वोक्तिविरोधः। न्यासत्यागयोरैक्यात्। न च पृथक्त्वोक्तिविरोधः। यथा खलु पाण्डवानां कुरुत्वेऽपि "सन्तानबीजं कुरुपाण्डवानाम्" इति पृथगुक्तिर्युज्यते, पाण्डवानां कुर्ववान्तरभेदत्वेन कुरुपाण्डवानां साक्षादैक्याभावात्, एवं त्यागस्य न्यासत्वेऽपि न्यासावान्तरभेदत्वेन त्यागन्यासयोः साक्षादैक्याभावात् पृथग् वचनोपपत्तेरिति भावः। न्यासादिशब्दस्य यत्याद्याश्रमार्थत्वं गृहीत्वा तयोरधिकारभेदात् समावेशायोगो यश्चोदितोऽसौ न्यासादिशब्दस्य तदर्थत्वानङ्गीकारेण परिहृतः ॥ ३ ॥

अथासावधिकारभेदोऽपि न युज्यत इत्युच्यते "साङ्ख्य" इति। दुर्गमार्थत्वात् श्लोकं व्याचष्टे ॥ बाला इति ॥ ज्ञानमार्गं सम्यगास्थित एव ज्ञानफलं प्राप्नोति। कर्ममार्गं च सम्यगास्थित एव कर्मफलं प्राप्नोतीत्यर्थः।

ज्ञानैकगम्ययतिप्राप्यस्थानप्राप्तिसद्भावाद्ध गृहिणां ज्ञानाधिकारोऽस्तीत्युक्त्वा उपसंह्रियते "यत्" इति। तत्र "एकं साङ्ख्यं" इत्युप-

---

त्यागस्य पृथक्त्वेनोक्तेरिति ॥ सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणा इत्यष्टादशोक्तेरित्यर्थः ॥ पृथगुक्तिरिति दशमस्कन्धे। अधिकारपदप्रयोगतात्पर्य-

---

1. A. कुरुषु पाण्डववत्।

कर्ममार्गं वा सम्यगास्थित उभयोरपि फलं प्राप्नोति । तस्माज्ज्ञानिनां कर्माण्यनुष्ठेयम् । कर्मिणामपि गृहस्थानां ज्ञातव्यो भगवान् । न हि ज्ञानं विना कर्मणः सम्यगनुष्ठानं भवति ।

" निष्कामं ज्ञानपूर्वं च निवृत्तमिह चोच्यते ।
निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनम् ॥
बुद्ध्याऽविहिंसन् पुष्पैर्वा प्रणवेन समर्चयेत् ।
वासुदेवात्मकं ब्रह्म मूलमन्त्रेण वा यतिः ॥
मुक्तिरस्तीति नियमो ब्रह्मदृग् यस्य विद्यते ।
तस्याप्यानन्दवृद्धिः स्याद्वैष्णवं कर्म कुर्वतः ॥
कर्म ब्रह्मदृशा हीनं न मुख्यमिति कीर्तितम् ।
तस्मात् कर्मेति तत्प्राहुर्यत्कृतं ब्रह्मदर्शिना ॥
एतस्मान्न्यासिनां लोकं संयान्ति गृहिणोऽपि हि ।
ज्ञानमार्गः कर्ममार्ग इति भेदस्ततो न हि ॥

संहारवाक्ये ज्ञानकर्मणोरैक्यं किमर्थमुच्यत इत्यतो यथावद्व्याचष्टे ॥ तस्मादिति ॥ ज्ञानिनां यतीनामिति शेषः । सम्यक्कर्मानुष्ठानेनैव कर्मी कर्मफलं प्राप्नोति चेत्तथापि कुतस्तस्य ज्ञानमित्यत आह ॥ न हीति ॥ एवं सम्यग्ज्ञानमार्गानुष्ठानेनैव ज्ञानफलं प्राप्नोति चेत्तथापि कुतो ज्ञानिनः कर्मेति शङ्कायां न हि कर्म विना ज्ञानमार्गस्य सम्यगनुष्ठानं भवति । संपूर्णफलसाधनत्वाभावादिति परिहारो द्रष्टव्यः । अत्र स्मृतिसम्मतिं चाह ॥ निष्काममिति ॥ अनेन कर्मिणां ज्ञानमुच्यते । "बुद्ध्या" इति ज्ञानिनां कर्म । "मुक्तिः" इत्युभयम् ।

कर्मिणां ज्ञानसद्भावे हेत्वन्तरमाह ॥ एतस्मादिति ॥ गृहिणामपि ज्ञानसद्भावादेवेत्यर्थः । अनेन "यत्सांख्यैः" इति व्याख्यातं भवति ।

माह ॥ ज्ञानमार्गमित्यादिना ॥ अत्र स्मृतीति ॥ ज्ञानं विना न कर्मणः सम्यगनुष्ठानं कर्मणा विना ज्ञानस्य संपूर्णफलसाधनत्वाभाव इत्यत्रेत्यर्थः ।

तस्मादाश्रमभेदोऽयं कर्मसङ्कोचसम्भवः ॥"

इति व्याससमृतेः ॥ ४ ॥ ५ ॥

"मोक्षोपायो योग इति तद्रूपो न्यास एव तु ।
विष्णवर्पिततया भद्रो नान्यो न्यासः कथञ्चन ॥"

इत्याग्नेये । विष्णवर्पितत्वादियोगरूपत्वं विना केवलकर्मत्यागो नरकफल एव । "यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।" इति

उभयोरपि ज्ञानकर्मसद्भावे कथमाश्रमभेद इत्यत आह ॥ तस्मादिति ॥ उभयोरप्युभयसद्भावस्य युक्त्यादिसिद्धत्वादिति भावः । सङ्कोचविकास सम्भवः ॥ ४ ॥ ५ ॥

समुच्चितयोरेव योगसंन्यासयोर्निःश्रेयसकरत्वमुक्तम् । असमुच्चये बाधकमुच्यते "संन्यासस्तु" इति । तत्स्मृत्यैव व्याचष्टे ॥ मोक्षेति ॥ योग इति ॥ उच्यत इति शेषः । विष्णवर्पिततया तद्रूप इति सम्बन्धः । पादत्रयम् उत्तरार्धव्याख्यानम् । "नान्यः" इति पूर्वार्धस्य । तद्विवृणोति ॥ विष्ण्वति ॥ आदिपदेन स्वोचितकर्मणां विष्णवर्पणादिकं न कार्यमिति बुद्ध्या कृतो नरकफल इति ज्ञातव्यम् । "अयोगतः" इति योगरूपत्वं विनेति किमर्थमुच्यते । योगं विनेत्येव किं न स्यादित्यत आह ॥ यमिति ॥ "यं संन्यासम्" इति योगसंन्यासयोरैक्यस्य वक्ष्यमाणत्वात् संन्यासस्य योगरूपत्वमेव वाच्यमित्यर्थः । योग-

---

यद्वा ज्ञानकर्मणोरन्योन्यसाहित्येनैव सम्यक्त्वमित्यस्मिन्नर्थ इत्यर्थः ॥ युक्त्यादीति ॥ उभाभ्यां संपाद्यज्ञानकर्मणोः सम्यक्त्वान्यथानुपपत्तिरूपयुक्तिस्मृतिसिद्धत्वादित्यर्थः ॥ उत्तरार्धव्याख्यानमिति ॥ मोक्षेति प्रथमपादेन योगपदार्थस्य योगयुक्तो मुनिरित्यस्य पादद्वयेन ब्रह्मेत्यादेर्व्याख्यानं भद्र इत्यनेन कृतमित्यर्थः ॥ पूर्वार्धस्येति । अन्यो न्यासः भद्रो नेत्युक्त्या तद्व्याख्यानं स्पष्टमेव ॥ तदिति ॥ पूर्वार्धव्याख्यानमित्यर्थः ॥ न कार्यमिति ॥ बुद्ध्या कृतो योग इत्यर्थः ॥ वक्ष्यमाणत्वादिति ॥ उत्तराध्याय इति योज्यम् ॥

वक्ष्यमाणत्वात् । योगविशेषत्वान्न्यासस्य पृथगुक्तिः ॥ ६ ॥

सर्वभूतात्मभूतात्मेति मुख्यो योगः ।

"आदानात्सर्वभूतानां विष्णुरात्मा प्रकीर्तितः ।
सर्वभूतात्मभूतात्मा तत्र भूतमनाः पुमान् ॥"

इति च ॥ ७ ॥

यथा न्यासस्य योगरूपत्वं तथाऽऽह—नैव किञ्चिदित्यादिना ।

"विष्णुनाऽर्थेष्वीरितानि मन आदीनि सर्वशः ।
वर्तन्तेऽन्यो न स्वतन्त्र[1] इति जानन् हि तत्त्ववित् ॥"

इति च[2] ॥ ८ ॥ ९ ॥

संन्यासयोरैक्ये "संन्यासः कर्मयोगश्च" इति पृथगुक्तिः कथमित्यत आह ॥ योगेति ॥ योगो न्यासश्चेत्येक एवार्थः । अपि तु न्यासो योगावान्तरभेदः । अतः कुरुपाण्डववत् पृथगुक्तिरुपपन्नेत्यर्थः ॥ ६ ॥

योगरूपतां विना न्यासस्यानर्थसाधनत्वमुक्त्वा "योगयुक्तः" इत्यनेन योगरूपसंन्यासस्योक्तं मोक्षसाधनत्वं प्रपञ्चयते ॥ योगयुक्त इति ॥ तत्र योगसंन्यासयोरेव वक्तव्यत्वात् तयोश्च योगयुक्तादिपदैरुक्तत्वात् "सर्वभूतात्मभूतात्मा" इति किमुच्यत इत्यत आह ॥ सर्वेति ॥ अनेनापि योग एवोच्यत इति नासङ्गतिः । नापि योगयुक्तपदेन योगस्योक्तत्वाद्वैय्यर्थ्यम् । योगयुक्तपदेन कर्मयोगस्योक्तत्वात्, अनेन ध्यानयोगस्योक्तत्वादिति भावः ।

अत्राधिकारिणः सर्वभूतैक्यमुच्यते । अतः कथमियं ध्यानयोगोक्तिरित्युच्यत इत्यतः स्मृत्यैव व्याचष्टे ॥ आदानादिति ॥ भूतमनाः स्थितमनाः ॥ ७ ॥

योगरूपसंन्यासस्य मोक्षहेतुत्वमुक्तम् । तत्र संन्यासस्य योगरूपत्वं केन प्रकारेणेत्यतस्तत्परिहारत्वेन श्लोकद्वयमवतारयति ॥ यथेति ॥ तत्रेन्द्रियाणामेव स्वातन्त्र्येण कर्तृत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ विष्णुनेति ॥ ८ ॥ ९ ॥

---

1. A. अन्ये न स्वतन्त्राः । 2. A. "इति च" इति नास्ति ।

तत्पूजात्मकानि तत्कृतानि मम शुभार्थमिति ब्रह्मण्याधानम् । स्वातन्त्र्याभावापेक्षयैव जीवस्याकर्तृत्वम् ।

"स्ववन्दनं यथा पित्रा कारितं शिशुकर्तृकम् ।
एवं पूजा विष्णवधीना भवेज्जीवकृतेत्यपि[1] ॥"

॥ १०-१२ ॥

अतो मनसैव कर्मन्यासोऽस्वातन्त्र्यापेक्षया ॥ १३ ॥

योगरूपसंन्यासवतो मुक्तिर्भवतीति नोपचारमात्रमिति भावेन पुनः फलमुच्यते "ब्रह्मणि" इति। तत्र कर्मणां ब्रह्मण्याधानं नामाकरणमेवेत्यन्यथाप्रतीतिनिरासायाह ॥ तत्पूजेति ॥ आधानं कर्मणामिति शेषः । अन्यथा करोतीत्यस्य व्याघातादिति भावः । भवत्पक्षेऽपि यदि कर्माणि भगवत्कृतानि तर्हि जीवस्याकर्तृत्वं स्यात् । तथाच करोतीति व्याहतं स्यात् । मम शुभार्थमिति चासम्भवीत्यत आह ॥ स्वातन्त्र्येति ॥ कर्मणां भगवत्कृतत्वे जीवस्याकर्तृत्वं स्यादिति सत्यमेव । न च तावता जीवस्य कर्तृत्वफलसम्बन्धानुपपत्तिः । स्वातन्त्र्याभावविवक्षयैव अकर्तृत्वस्याभ्युपगतत्वेन भगवदधीनतया कर्तृत्वोपपत्तेरिति भावः । अस्वतन्त्रत्वे च जीवस्य भगवत्पूजाकर्तृत्वं शुभयोगश्च न युज्यते । अस्वतन्त्रे कर्तृशब्दप्रयोगस्य फलसम्बन्धस्य चादर्शनादित्याशङ्कां स्मृत्यैव परिहरति ॥ स्ववन्दनमिति ॥ कारितं शिशुनेति शेषः । शिशुकर्तृकं भवेदिति सम्बन्धः ॥ १०-१२ ॥

इतश्च कर्मणां ब्रह्मण्याधानं नाम तत्र स्वस्य स्वातन्त्र्याभिमानत्याग एव । न तु स्वरूपपरित्याग इत्याह ॥ अत इति ॥ "ब्रह्मण्याधाय कर्माणि" इति संन्यासो ह्युच्यते । तल्लक्षणं च "सर्वकर्माणि" इत्यनेन प्रपञ्चयते । तत्र कर्मणां स्वरूपपरित्यागाभावादेव हि मनसैव त्यागोऽभिहितः । अतश्च नात्रापि कर्मणां स्वरूपत्यागोऽर्थ इति भावः । मनसैव

अन्यथेति ॥ आधानपदस्याकरणार्थत्वाङ्गीकार इत्यर्थः ॥ सर्वकर्माणीत्यने

---

1. A. "इति प्रवृत्ते" इत्यधिकः पाठः ।

यथा पितृदत्तं[1] पालकत्वं राजपुत्राणामेवं परमात्मदत्तं क्रियास्वातन्त्र्यलक्षणं कर्तृत्वं क्रियानिष्पन्नधर्मादिरूपकर्मणि स्वातन्त्र्यं च जीवानामप्यस्तीत्याशङ्कां परिहरति—न कर्तृत्वमित्यादिना। क्रियायामदृष्टोत्पादने फले च स्वातन्त्र्यं लोकस्य न सृजतीश्वर इत्यर्थः। अन्यथा लोकस्येति विशेषणं व्यर्थम्। जनपदे निवसतां तद्वित्त-

त्यागाभिधाने कथं स्वरूपत्यागाभाव इत्यत आह॥ अस्वातन्त्र्येति॥ मनसैव कर्मन्यासो नाम स्वातन्त्र्याभिमानपरित्याग एव। न तु स्वरूपत्यागः। तथात्वे मनसेति विशेषणवैयर्थ्यादिति भावः॥ १०-१३॥

यदुक्तं जीवानां स्वातन्त्र्याभावापेक्षयैवाकर्तृत्वं, परतन्त्रकर्तृत्वं त्वस्त्येवेति न तद्युक्तम्। "न कर्तृत्वं" इत्युत्तरवाक्यविरोधादित्यत आह॥ यथेति॥ स्वतो जीवानां स्वतन्त्रकर्तृत्वाद्यभावेऽपि परमात्मदत्तं तदस्ति। अतः कथं ब्रह्मण्याधानमुच्यत इत्याशङ्कामेवात्र परिहरति। न तु जीवानां सर्वात्मना कर्तृत्वाभावं वक्तीति भावः। कर्मफलसंयोगे च स्वातन्त्र्यमित्यपि संयोज्यम्। अनेन "न कर्तृत्वं न कर्माणि" इति पौनरुक्त्यं च परिहृतम्। नन्वत्र कर्तृत्वाद्यभाव एवोच्यते, न तु तत्रास्वातन्त्र्यम्। अतः कथमनेनैषा शङ्का परिह्रियत इत्यत आह॥ क्रियायामिति॥ कर्तृत्वादिकं न सृजतीत्यस्य तत्र स्वातन्त्र्यं न सृजतीत्येवार्थः। अतो भवत्येतदाशङ्कापरिहार इत्यर्थः। नन्वत्रेश्वरस्यैव कर्तृत्वाद्यभाव उच्यत इति किं न स्यादित्यत आह॥ अन्यथेति॥ यद्यत्रेश्वरस्यैव कर्तृत्वाद्यभाव उच्यते तदा लोकस्य कर्तृत्वादिकं न सृजतीति व्यर्थं स्यादित्यर्थः।

यदुक्तं जीवस्य पारतन्त्र्येण कर्तृत्वाद्यस्तीति न तद्युक्तम्। कर्तृत्वादि ईश्वरो लोकस्य न सृजतीत्युक्तत्वात्। न च तत्र तस्य स्वातन्त्र्यं न सृजतीत्यर्थः। कर्तृत्वादिसद्भावेऽपि स्वातन्त्र्याप्रदानाभिप्रायेण कर्तृत्वादिकं न सृजतीत्येवंजातीयप्रयोगादर्शनादित्यत आह॥ जनपद इति॥

नेति॥ उपरितनतृतीयश्लोकेनेत्यर्थः॥ अनेनेति॥ क्रियायामदृष्टे चेति

1. A. पित्रा दत्तम्।

भोजिनाम[1]प्याधिपत्यादानान्न दत्ता जनपदा राज्ञा स्वपुत्राणामितिवत् कर्मफलादिसंयोगिनामपि तत्स्वातन्त्र्यादानान्न सृजतीति युज्यते। स्वयमेव भवति भावयति चेति स्वभावो भगवान्[2]। स्वभावत्वात् स्वयमेव कर्तृत्वादिषु प्रवर्तते।

"स्वातन्त्र्याद् भगवान् विष्णुः स्वभाव इति कीर्तितः।
तत्स्वातन्त्र्यं कदाप्येष नान्यस्य सृजति क्वचित्॥
स्वातन्त्र्यादेव पापादिसम्बन्धः कुर्वतोऽपि न।
अज्ञानावृतबुद्धित्वादीदृशं तं न जानते॥"

यद्यत्र जीवानां सर्वात्मनेश्वरस्य च कर्तृत्वं न निषिध्यते तर्हि "स्वभावस्तु प्रवर्तते" इति स्वभावादेव प्रवृत्तिकथनं न युज्यत इत्यत आह॥ स्वयमेवेति॥ नात्र स्वभावपदेन प्रसिद्धस्वभावोऽभिधीयते। येनोक्तविरोधः। किन्तु स्वस्थितावन्यकरणे च परनिरपेक्षत्वाद्भगवानेवेत्यर्थः। प्रसिद्धपदपरित्यागेनाप्रसिद्धपदप्रयोगः किमर्थमित्यतो हेतुसूचनार्थमिति भावेन वाक्यार्थमाह॥ स्वभावत्वादिति॥

ननु किमर्थमेवमर्थान्तरं कल्पनीयम्? जीवस्येवेश्वरस्य च कर्तृत्वादिकं नास्त्येव। विश्वप्रवृत्तिस्तु स्वभावादेवेत्यर्थः किं न स्यात्? लोकस्येत्यस्य लोकविषय इत्यर्थोपपत्तेरित्यतः स्वोक्तार्थे स्मृतिसम्मतिमाह॥ स्वातन्त्र्यादिति॥ नान्यस्य सृजति। अपि तु स्वयमेव प्रवर्तत इति शेषः। ईश्वरस्यैव कर्तृत्वे कर्मलेपः स्यादित्यत आह॥ स्वातन्त्र्यादेवेति॥ अनेन "नादत्ते" इत्यस्यार्थोऽप्युक्तो भवति। एवं सर्वेषु स्थित्वा स्वातन्त्र्येण कर्ता ईश्वरोऽस्ति चेत् कथं न दृश्यत इत्यत आह॥ अज्ञानेति॥ एतेनाज्ञानेति व्याख्यातं भवति।

कर्तृत्वकर्मशब्दयोरर्थभेदकथनेनेत्यर्थः। सर्वात्मनेत्यस्य पूर्वत्रोत्तरत्र चान्वयः॥ स्वभावत्वादितीति॥ स्वस्थितावन्यकरणे च परानपेक्षत्वादित्यर्थः। शेषमाह॥

---

1. A. तद्वित्तभोजिनामिति नास्ति। 2. A. भगवानिति नास्ति।

इति महावाराहे ॥ "अहं सर्वस्य प्रभवः", "तपाम्यहमहं वर्षम्", पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च", "न ऋते त्वत्क्रियते किञ्चनारे", "देवस्यैष स्वभावोऽयम्", "लोकवत्तु लीलाकैवल्यम्" इत्यादेर्नास्यास्वाभाविकं कर्तृत्वमकर्तृत्वं वा। विपरीतप्रमाणाभावाच्च। अनिर्वाच्यनिरासादेव च निरस्तोऽयं पक्षः। न च सर्वविशेषराहित्यवादिनां शून्यवादात्कश्चिद्विशेषः। न हि सर्व-

---

यदुक्तमीश्वरः स्वयमेव भावयतीति न तद्युक्तम्। तस्य कर्तृत्वाभावात्। तस्य कर्तृत्वसद्भावेऽपि तस्यास्वाभाविकत्वादित्यत आह ॥ अहमिति ॥ अहं सर्वस्येति वचनद्वयं कर्तृत्वसद्भावे मानम्। परास्येत्यादिकं कर्तृत्वस्य स्वाभाविकत्वे। त्वदृते दूरे समीपे वा किञ्चन केनापि न क्रियत इत्यर्थः। अत्र भगवदितरस्य कर्तृत्वाभावोक्त्या ईश्वरकर्तृत्वस्यापराधीनत्वसम्भवेन स्वाभाविकत्वमेवोच्यते। लोकवदित्यत्रापि फलाद्यपेक्षाऽभावेन कर्तृत्वोक्त्या तस्य स्वाभाविकत्वमेवोच्यते। इतश्च नेश्वरस्य अकर्तृत्वमस्वाभाविकं कर्तृत्वं चेत्याह ॥ विपरीतेति। नन्वस्माभिरीश्वरस्य कर्तृत्वमस्वाभाविकपदेनानिर्वाच्यमभिप्रेयते। न तु फलापेक्षं पराधीनं वा। अतो नोदाहृतवचनविरोध इत्यत आह ॥ अनिर्वाच्येति ॥ ईश्वरस्य कर्तृत्वमनिर्वचनीयमिति पक्षो द्वितीयाध्यायेऽनिर्वाच्यवस्तुनो निरस्तत्वादेव निरस्तः। अतो न पुनरत्र निरसनीय इति भावः।

ननु ब्रह्मणः सर्वविशेषरहितत्वात् कथं परमार्थतः कर्तृत्वं स्यादित्यत आह ॥ न चेति ॥ भवेद्ब्रह्मणः कर्तृत्वस्यापारमार्थिकत्वं, यदि तस्य सर्वविशेषराहित्यं स्यात्। न च तद्युक्तम्। तथात्वे ब्रह्मणः शून्यत्वापत्त्या तदभ्युपगन्तॄणां शून्यवादित्वापातादिति भावः। सर्वविशेषरहितत्वेऽपि न ब्रह्मणः शून्यत्वापत्तिः, अस्तित्वादित्यत आह ॥ न हीति ॥ न भवेद्ब्रह्मणः शून्यत्वापत्तिः, यदि तस्यास्तित्वं

भवेद् ब्रह्मण इति ॥ उपनिषदामिति ॥ सत्यं ज्ञानमनन्तमित्येवमादी-

विशेषरहितमित्युक्ते तदस्तीति सिद्ध्यति । वाच्यत्वलक्ष्यत्वास्तित्वादीनामपि त[1]द्विशेषत्वात् । अन्यथा 'अस्ति ब्रह्म' इत्यादीनां शब्दानामपि पर्यायत्वादयो दोषाः । व्यावर्त्यविशेषश्च व्यावृत्तविशेषनिबन्धन एव । अन्यथा वैय्यर्थ्यमेव स्यात् । न च सर्वशब्दावाच्यस्य लक्ष्यत्वम् ।

सिध्येत् । न च तत्सिद्धिः । सर्वविशेषरहितमित्यङ्गीकारादिति भावः । सर्वविशेषरहितत्वेऽपि कुतोऽस्तित्वं न सिद्ध्यतीत्यत आह ॥ वाच्यत्वेति ॥ अस्तित्वे ब्रह्मणः अस्तित्वमस्तिशब्दवाच्यत्वं वा स्यात् । तस्य च विशेषत्वात् न तत्सर्वविशेषरहितस्य युज्यत इति भावः ।

भवेन्निर्विशेषत्वेऽस्तित्वासिद्धिः, यद्यस्तित्वं ब्रह्मणो विशेषतया अङ्गीक्रियते । नैतदस्ति । तस्य ब्रह्मस्वरूपमात्रत्वादित्यत आह ॥ अन्यथेति ॥ यद्यस्तित्वादिकं ब्रह्मणः स्वरूपमात्रं न तद्विशेषस्तर्हि ब्रह्म ब्रह्मेतिवदस्ति ब्रह्मेत्यादिशब्दानां पर्यायत्वं स्यात् । ततश्च "अस्ति ब्रह्मेति चेद्वेद" इत्यादिसहप्रयोगानुपपत्तिः स्यात् । तथा चोपनिषदां पुनरुक्तिदोषेण उन्मत्तवाक्यवदनादरणीयत्वं स्यादिति भावः । ब्रह्मण्यस्तित्वादिविशेषाभावेऽपि आरोपितासत्त्वादिविशेषव्यावृत्तिकथनद्वारा अस्त्यादिपदानि तल्लक्षयन्ति । अतो न शब्दानां पर्यायत्वादीत्यत आह ॥ व्यावर्त्येति ॥ भवेदस्त्यादिपदानामपर्यायत्वं, यद्यस्त्यादिपदानि ब्रह्मणोऽसत्त्वादि व्यावर्तयन्ति । न च तद्युक्तम् । व्यावर्त्यासत्त्वादिविशेषव्यावृत्तेः व्यावृत्ततयाऽङ्गीकृतब्रह्मगतास्तित्वादिविशेषनिबन्धनत्वात् । तेषां चानङ्गीकारात् । ब्रह्मण्यस्तित्वादिविशेषाभावेऽपि असत्त्वादिव्यावृत्तावसतोऽपि तद्व्यावृत्तिप्रसङ्गात् । गङ्गापदलक्ष्येऽपि तीरे गङ्गात्वाभावेऽपि अगङ्गात्वव्यावृत्तिप्रसङ्गादिति भावः ।

इतोऽप्यस्त्यादिपदानि अस्तित्वादिविशेषबोधकानि नेति न युक्तमित्याह ॥ अन्यथेति ॥ यद्यस्त्यादिपदामि न अस्तित्वादिब्रह्मविशेष-

---

नामित्यर्थः ॥ व्यावृत्तेरित्यस्य निबन्धनत्वपदेनान्वयः ॥ तद्व्यावृत्तिप्रसङ्गा-

1. A. तदिति नास्ति ।

न च सर्वप्रमाणागोचरमस्तीत्यत्र किञ्चिन्मानम्[1] । नास्तित्वं तु सप्तमरसादिवददर्शनात्सिद्ध्यति[2] । स्वप्रकाशत्वं च नामानं सिद्ध्यति ।

बोधकानि तर्हि तेषां वैयर्थ्यमेव स्यात् । ब्रह्मजिज्ञासुं प्रति ब्रह्मकथनस्यैव सार्थक्यात् । ब्रह्मणश्च ब्रह्मपदादेवावगतत्वात् । न चासत्त्वादिव्यावृत्तिः प्रयोजनम् । तदसम्भवस्योक्तत्वात् । ब्रह्म कुतो व्यावृत्तमित्यजिज्ञासितत्वाच्च । अजिज्ञासितत्वेऽपि ब्रह्मण्यसत्त्वादिभ्रान्तिः निवार्येत इति चेन्न । विकल्पासहत्वात् । भ्रान्तिः किं प्रतीतेऽप्रतीते वा ब्रह्मणि भवेत् ? नाद्यः । ब्रह्मप्रतीतौ तन्मात्रस्य सत्त्वादेरपि प्रतीतत्वेन भ्रान्त्यनवकाशात् । ब्रह्मप्रतीतावपि सत्त्वाद्यप्रतीतौ तन्मात्रत्वानुपपत्तेः । न द्वितीयः । अदृष्टकल्पनाप्रसङ्गादिति भावः ।

इतश्च न अस्त्यादिपदैरसत्त्वादिव्यावृत्तिद्वारा ब्रह्म लक्ष्यम् । तस्य सर्वशब्दावाच्यत्वाङ्गीकारात् । शब्दवाच्यस्यैव लक्ष्यत्वदर्शनादित्याह ॥ न चेति । अस्तित्वाङ्गीकारे ब्रह्मणः सविशेषत्वप्रसङ्गात् न तत्सिद्ध्यतीत्युक्तम् । इतोऽपि न ब्रह्मणोऽस्तित्वं सिद्ध्यतीत्याह ॥ न चेति ॥ न च तत्पक्षे ब्रह्मणोऽस्तित्वं सिद्ध्यति । तत्प्रमाणाभावात् । प्रमाणं विनाऽर्थसिद्धेः काप्यदर्शनात् । प्रमाणकथने च सर्वप्रमाणागोचरत्वाङ्गीकारभङ्ग इति भावः । यद्यस्तित्वे प्रमाणाभावात् न तत्सिद्ध्यतीत्युच्यते तर्हि ब्रह्मणो नास्तित्वमपि न सिद्ध्यति । तत्र प्रमाणाभावात् । तथाच न शून्यवादाविशेषापादनं ब्रह्मवादस्य युज्यत इत्यत आह ॥ नास्तित्वमिति ॥ ब्रह्मणो न नास्तित्वेऽस्माभिः पृथक् प्रमाणं वक्तव्यम् । तस्यास्तित्वप्रमाणाभावेनैव सिद्धेः । यथा खलु सप्तमरसाद्यस्तित्वे प्रमाणाभावात् नास्तित्वं सिद्ध्यति तथैवेत्यर्थः । अनेनानुपलब्धिलिङ्गकमनुमानं सूचितं भवति ।

दिति ॥ असद्व्यावृत्तिप्रसङ्गादित्यर्थः ॥ असंभवस्योक्तत्वादिति ॥ व्यावर्त्यविशेषश्चेत्येतद्व्याख्यावसर इति भावः ॥ अनेनेति ॥ नास्तित्वं त्वित्यादि-

1. A. किञ्चिदिति नास्ति । 2. A. इदं वाक्यं न दृश्यते ।

स्वयंप्रकाशत्वं च ततोऽतिरिक्तं चेद् विशेषाङ्गीकारः। न चेत्तदेव प्रमाणगोचरम्। तत्प्रमाणाभावे परप्रकाशत्वमात्रनिरासे स्वप्रकाशत्वे प्रमाणा[1]भावादप्रकाशत्वमेव स्यात्। अर्थतः सिद्धि[2]रित्यर्थापत्तितः

ननु प्रमाणावेद्यत्वेऽपि ब्रह्मणो न नास्तित्वं वाच्यम्। स्वप्रकाशतयैव तत्सिद्धेरिति चेन्न, विकल्पानुपपत्तेः। तथाहि—स्वप्रकाशत्वे ब्रह्मणः प्रमाणमस्ति न वा? न तावद्द्वितीयः। प्रमाणाभावे तदसिद्धेरित्याह॥ स्वप्रकाशत्वं चेति॥ आद्ये स्वप्रकाशत्वं ब्रह्मातिरिक्तं तत्स्वरूपमेव वा? प्रथमं दूषयति॥ स्वयंप्रकाशत्वमिति॥ यदि ब्रह्मणः स्वातिरिक्तं स्वयंप्रकाशत्वं प्रामाणिकं स्यात्तदा तस्य सविशेषत्वं प्रसज्यत इत्यर्थः। द्वितीयं दूषयति॥ न चेदिति॥ यदि स्वयंप्रकाशत्वं न ब्रह्मातिरिक्तं, किन्तु तत्स्वरूपमेव तर्हि स्वयंप्रकाशत्वे प्रमाणसद्भावाङ्गीकारे ब्रह्मैव प्रमाणगम्यमङ्गीकृतं स्यात्। तथाचाप्रमेयत्वभङ्ग इत्यर्थः।

न स्वप्रकाशपदेन स्वविषयप्रकाशत्वमुच्यते। येन तस्य ब्रह्मातिरिक्तत्वे ब्रह्मणः सविशेषत्वं स्यात्। किन्तु परप्रकाशत्वाभाव एवेत्यत आह॥ परेति॥ यदि स्वप्रकाशपदेन परप्रकाशनिरासमात्रमभिप्रेयते तर्हि ब्रह्मणः प्रकाशराहित्यमेव स्यात्। परप्रकाशस्यानभिमतत्वात्। स्वविषयप्रकाशत्वाख्यस्य स्वप्रकाशत्वस्योक्तरीत्या प्रमाणाभावेन, भावे च सविशेषत्वप्रमेयत्वप्राप्त्या निरस्तत्वादिति भावः।

तथापि न नास्तित्वं ब्रह्मणो वक्तुं शक्यते। "अस्ति ब्रह्म" इत्यादिश्रुत्या असत्त्वादिव्यावृत्तिद्वारा ब्रह्मणि लक्षितेऽर्थतस्तस्यास्तित्वसिद्धेरिति चेन्न। दूषितत्वात्। अभ्युपगम्याप्याह॥ अर्थत इति॥

भाष्येणेत्यर्थः। ब्रह्म नास्तित्ववत् केनापि प्रमाणेनास्तित्वानुपलंभान्नरशृंगवदिति सूचितमित्यर्थः॥ दूषितत्वादिति॥ सत्त्वादिधर्मबोधनं विना तद्विरोधीतरव्यावृत्तेरसंभवेन ब्रह्मणोऽवाच्यस्य लक्ष्यत्वायोगेन च दूषितत्वा-

1. अ. प्रमाभावात्। 2. अ. सिद्धिरपि।

सिद्धिस्तत्प्रमाणतः सिद्धिर्वा । उभयथाऽपि प्रमेयत्वमेव स्यात् । स्वप्रकाशशब्देन[1] स्वमितत्वानङ्गीकारात् परमितत्वानङ्गीकाराच्चासिद्धिरेव । प्रकाश इत्युक्तेऽपि स्वमन्यं वा किञ्चित्प्रकाश्यं[2] विना न दृष्ट एव भोजनादिवत् । कर्तृकर्मविरोधश्चानुभवविरुद्धः । ज्ञानं च ज्ञेयं ज्ञातारं च विना न दृष्टम् । अतः शून्यवादान्न कश्चिद्विशेषः । अतोऽनन्तदोषत्वादुपरम्यते ।

तत्प्रमाणत इति ॥ अस्ति ब्रह्मेति श्रुतिप्रमाणत इत्यर्थः । यदुक्तं स्वप्रकाशत्वेन ब्रह्म सिद्ध्यतीति तद्व्याहतं चेत्याह ॥ स्वप्रकाशेति ॥ न स्वप्रकाशपदेन स्वविषयप्रकाशत्वमङ्गीक्रियते । किन्तु परप्रकाशत्वानङ्गीकारमात्रमेव । अतः स्वपरप्रकाशशून्यतया स्वप्रकाशत्वेन ब्रह्मणोऽसिद्धिरेव स्यान्न तु तेन तत्सिद्धिरित्यर्थः ।

किञ्च भवेद् ब्रह्मणः स्वप्रकाशता यदि प्रकाशत्वमेव सम्भवेत् । न च तत्सम्भवति । ब्रह्माख्यप्रकाशस्य प्रकाश्यरहितत्वात् । न तावत् स्वयं प्रकाश्यम् । अनङ्गीकारात् । नाप्यन्यत् । तदभावात् । न च प्रकाश्यरहितप्रकाशरूपं ब्रह्मेति वाच्यम् । स्वमन्यं वा प्रकाश्यं विना प्रकाशस्यादृष्टत्वात् । यथा भोज्यरहितं भोजनं न दृष्टं तथैवेत्याह ॥ प्रकाश इति ॥ नन्वेकस्यां क्रियायामेकस्यैव कर्तृत्वं कर्मत्वं च विरुद्धम् । अतः कथं प्रकाश्यं विना प्रकाशो न दृष्ट इत्युच्यते । स्वस्यैव प्रकाश्यत्वे स्वयमेव प्रकाशयति प्रकाशते चेत्येकस्यैव कर्तृत्वकर्मत्वापत्तेरित्यत आह ॥ कर्तृकर्मेति ॥ मामहं जानामीत्येकस्यैवैकस्यां क्रियायां कर्तृत्वकर्मत्वानुभवात् नैकस्यां क्रियायां कर्तृकर्मणोरैक्यं विरुद्धमिति भावः ।

ननु प्रकाशो नाम द्रव्यम् । अतः कथं तस्य भोजनादिवत् कर्मापेक्षेत्याशङ्कां परिहरन् अधिकं च दोषमाह ॥ ज्ञानं चेति ॥ ब्रह्मणः प्रकाशत्वं नाम ज्ञानत्वमभ्युपगतम् । न च ज्ञानत्वं ब्रह्मणो युक्तम् ।

---

1. अ. च इत्यधिकः । 2. अ. प्राकाश्यं ।

"हरिः स्वभावतः कर्ता सर्वमन्यत्तदीरितम् ।
अतः सा कर्तृता तस्य न कदाचिद्विनश्यति ॥"

इति पैङ्गिश्रुतिः ॥ १४-१७ ॥

"विषमेष्वपि जीवेषु समो विष्णुः सदैव तु ।
यत्तृणादिगतस्यापि गुणाः पूर्णा हरेः सदा ॥"

इति च ॥ १८-२० ॥

इदानीमपि परमात्मनि स्मृतमात्रे सुखं विन्दतीति यत्तदा स एव सम्यग्युक्तः किमु ? ॥ २१-२३ ॥

ज्ञातृज्ञेयरहितत्वात् । तद्रहितज्ञानस्यादृष्टत्वादित्यर्थः । उपसंहरति ॥ अत इति ॥ यतः सर्वविशेषरहितत्वेनाप्रमेयत्वेन च ब्रह्मणो न अस्तित्वं सिद्ध्यत्यत इत्यर्थः । भगवतः कर्तृत्वाभावादिनिराकरणमुपसंहरति ॥ अत इति ॥ दुष्टत्वात् ॥ कर्तृत्वं नास्ति, सद्भावे वाऽस्वाभाविकमिति मतस्य । पुनरीश्वरस्य स्वभावतः कर्तृत्वे श्रुतिं चाह ॥ हरिरिति ॥ १४ ॥

"ज्ञानेन" इति प्रकृतज्ञानस्य साधनान्तरमुच्यते "विद्या" इति । तत्र न ब्राह्मणादिविषये समबुद्धित्वं विवक्षितम् । किन्तु तद्गतपरब्रह्मविषय एव । ब्राह्मणादीनां विषमत्वात् तद्गतब्रह्मण एव समत्वात् विपरीतज्ञानस्य च ज्ञानासाधनत्वादिति भावेन जीवानां वैषम्ये ब्रह्मणः साम्ये च प्रमाणमाह ॥ विषमेष्विति ॥ अनेन "निर्दोषं हि समं ब्रह्म" इत्येतदपि व्याख्यातं भवति ॥ १८-२० ॥

यदुक्तं योगरूपसंन्यासस्य निःश्रेयसकरत्वं तदुपपाद्यते "बाह्य" इति । तद्दुर्गमार्थत्वाद्व्याचष्टे ॥ इदानीमिति ॥ संसारेऽपि परमात्मस्मरणा-

---

दित्यर्थः । तदेव वाक्यं पुनः प्रकारांतरेणावतारयति ॥ भगवतः कर्तृत्वाभावादीति ॥ दुष्टत्वादित्यस्य इति मतस्येत्यनेनान्वयः ॥ विपरीतज्ञानस्येति ॥

*

ब्रह्मणि भूतः। अन्यथा पुनर्ब्रह्म गच्छतीति विरोधाच्च। अन्तः सुखादिकं च ब्रह्मदर्शनात् ॥ २४-२७ ॥

"अमुक्तो मुक्तसादृश्यान्मुक्त एव हि तत्त्वदृक्।
किमु मुक्तिगतस्तस्माज्ज्ञानमेवाधिकं नरे ॥

इति नारदीये ॥ २८ ॥ २९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये पञ्चमोऽध्यायः ॥ ५ ॥

घल्पयोगयुक्तः संन्यासी सुखं विन्दति यदा तदा ध्यानादिमहायोगयुक्तो मोक्षादिनिःश्रेयसं विन्दतीति किमु वाच्यमित्यर्थः ॥ २१-२३ ॥

ज्ञानिलक्षणमुच्यते "योऽन्तःसुखः" इति। तत्र ब्रह्मभूतपदं ब्रह्मणैकीभूत इत्यन्यथाप्रतीतिनिरासाय व्याचष्टे॥ ब्रह्मणीति ॥ मनसेति शेषः। प्रतीत एवार्थः किं न स्यादिति चेन्न। ज्ञानिनोऽपि ब्रह्मभेदस्य साधितत्वात्। दोषान्तरं चाह ॥ अन्यथेति ॥ यद्यत्र ज्ञानिनो ब्रह्मभावोऽभिधीयते तर्हि ब्रह्माधिगच्छतीति विरुद्धं स्यात्। न हि कश्चित् स्वयं स्वात्मानं गच्छतीत्यर्थः। नन्वत्र अन्तःसुखत्वादिकं भवतु ज्ञानिलक्षणम्। अन्तर्ज्योतिष्ट्वं कथं ब्रह्मदर्शिनो लक्षणं स्यात्। यावता ब्रह्मदर्शित्वमेव तदित्यत आह ॥ अन्तःसुखत्वादिकमिति ॥ नात्रान्तर्ज्योतिष्ट्वं ज्ञानिलक्षणमुच्यते। किन्तु अन्तःसुखत्वाद्येव। तत्र कारणत्वेनान्तर्ज्योतिष्ट्वमुच्यत इति भावः ॥ २४-२७ ॥

ब्रह्मयोगादिपदेन प्राकृतध्यानप्रकार उच्यते "स्पर्शान्" इति। तत्र ध्यानिनोऽमुक्तस्य कथं "मुक्त एव सः" इति मुक्तत्वमुच्यत इत्याशङ्कां स्मृत्यैव परिहरति॥ अमुक्त इति ॥ मुक्तसादृश्यमभिमानादि-

---

विषमेषु ब्राह्मणादिषु समत्वज्ञानस्येत्यर्थः ॥ साधितत्वादिति ॥ द्वितीयेऽध्याय इति योज्यम् ॥ ब्रह्मयोगादीति ॥ स ब्रह्मयोगयुक्तात्मेत्यत्रत्यब्रह्मयोगपदेनेत्यर्थः। आदिपदेन ब्रह्मणि स्थितो ब्रह्मभूत इत्यादेर्ग्रहः। मुक्त एवेत्य-

परित्यागः। मुक्त एवोच्यत इति शेषः। यस्मात् ज्ञानसामर्थ्येन एवं फलं भवति तस्मात् ॥ २८-२९ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायां पञ्चमोऽध्यायः ॥ ५ ॥

नूद्योच्यत इति शेषमाह ॥ इति शेष इति ॥ यद्वा मुक्तिगत इत्यनन्तरं मुक्त एवोच्यत इति शेषोक्तिः। दुर्गमत्वात्तच्छब्दार्थं व्यनक्ति ॥ यस्मादिति ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते पञ्चमोऽध्यायः ॥ ५ ॥

॥ अथ षष्ठोऽध्यायः ॥

हरिः ॐ ॥ ध्यानमत्रोच्यते । "स ब्रह्मनिष्ठस्तु यतिर्महात्मा शारीरमग्निं च मुखे जुहोति" इत्यादेर्न यतेरप्यनग्नित्वम् । आत्मसमारोपणाच्च ॥ १ ॥

योगविशेष एव संन्यास इत्यर्थः ॥ २ ॥

हरिः ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ ध्यानमिति ॥ "योगे त्विमां शृणु" इति प्रतिज्ञातम् । योगश्च कर्मयोगो ध्यानयोगश्चेति द्वेधा भवति । तत्र सङ्क्षेपविस्तराभ्यां कर्मयोगो निरूपितः । ध्यानयोगप्रकारश्च सङ्क्षेपेण पञ्चमान्ते निरूपितो विस्तरेणास्मिन्नध्याये उच्यत इति भावः ।

प्रकृतं ध्यानमग्न्यादिपरित्यागेन निस्सङ्गतया वर्तमानस्य भवतीत्याशङ्का निरस्यते "अनाश्रित" इति । तत्र निरग्नेः संन्यासित्वं योगित्वं च नास्तीत्युक्तं नोपपद्यते । तथासति यत्याश्रमस्याननुष्ठेयत्वप्रसङ्गात् । यतेर्निरग्नित्वेन योगसंन्यासाभावप्राप्तेः । तयोरेव श्रेयःसाधनत्वादित्यत आह ॥ स इति ॥ भवेदनेन यत्याश्रमस्याननुष्ठेयत्वप्रसङ्गो यदि यतेर्निरग्नित्वं स्यात् । न च तदस्ति । स ब्रह्मनिष्ठ इति तस्याप्यग्निश्रवणादिति भावः । इतश्च न यतेरग्नित्वमित्याह ॥ आत्मेति ॥ यत्याश्रमस्वीकारकाले पूर्वाश्रमस्वीकृताग्नेरात्मनि समारोपणाच्च न यतेरनग्नित्वमित्यर्थः । अनेन न केवलं निरग्निरक्रियो यतिरेव संन्यासी योगी च । किन्त्वनाश्रितः कर्मफलं कार्यं कर्म करोति यः सोऽपीत्यपव्याख्यानं च निराकृतं भवति ॥ १ ॥

संन्यासी योगी चेत्युक्त्या प्राप्ता संन्यासयोगयोः पृथक्त्वाशङ्का निवार्यते "संन्यासम्" इति । तत्र संन्यासयोगयोरैक्ये कथं पृथगुक्तिरित्यत आह ॥ योगेति ॥ २ ॥

हरिः ॐ ॥ प्रतिज्ञातमिति ॥ द्वितीये योगवचनं प्रतिज्ञातमित्यर्थः ॥ कर्मयोगः ॥ कर्मरूपज्ञानोपाय इत्यर्थः ॥ संक्षेपेति ॥ त्रैगुण्यविषया इत्यादिना द्वितीये संक्षेपेण तृतीयादौ विस्तरेण निरूपित इत्यर्थः ॥ पञ्चमांत इति ॥

सम्पूर्णोपायो योगारूढः ।
"नानाजनस्य शुश्रूषा कर्माख्या[1] करवन्मितेः ।
योगार्थिना तु सा कार्या योगस्थेन हरौ स्थितिः ॥
तेनापि स्वोत्तमानां तु कार्याऽन्यैरखिलेष्वपि ।
शक्तितः करणीयेति विशेषोऽसिद्धसिद्धयोः ॥
प्राप्तोपायस्तु सिद्धः स्यात् प्रेप्सुः साधक उच्यते ।
तस्य प्राण्युपकारेण सन्तुष्टो भवतीश्वरः ॥
सिद्धोपायेन विष्णोस्तु ध्यानव्याख्यार्चनादिकम् ।
कार्यं नान्यत्तस्य तेन तुष्टो भवति केशवः ॥"

इति प्रवृत्तवचनान्न विरोधः ।

कर्मयोगमध्ये कीदृशो योगो ज्ञानार्थिनोऽवश्यापेक्षित इत्यत उच्यते "आरुरुक्षोः" इति । तत्र योगारूढपदस्य दुर्गमार्थत्वादर्थमाह ॥ सम्पूर्णेति ॥ अत्र ज्ञानार्थिनः कर्म अपेक्षितमित्युक्त्वा ज्ञानिनः कर्मोपशमोऽपेक्षित इत्युच्यते । तथाच न निरग्निर्न चाक्रिय इत्यादिविरोध इत्यत आह ॥ नानेति ॥ नानाजनस्य उत्तमाधममध्यमस्य ॥ करवन्मितेरिति ॥ राजादिकरवदावश्यकतया प्रमितत्वादित्यर्थः । योगस्थेनापि शुश्रूषायाः कार्यत्वे को विशेषो योगार्थियोगस्थयोरित्यत आह ॥ तेनापीति ॥ अन्यैर्योगार्थिभिः । योगार्थियोगस्थयोर्विशेषे वक्तव्ये असिद्धसिद्धयोर्विशेषः किमर्थमुच्यत इत्यत आह ॥ प्राप्तेति ॥ नानाजनस्य शुश्रूषा कथं ज्ञानस्य साधनमित्यतो भगवत्प्रसादद्वारेत्याह ॥ तस्येति ॥ नन्वज्ञानामपि हरौ स्थितत्वाद्योगस्थेन हरौ स्थितिः कार्येति किमुच्यत

स्पर्शान् कृत्वा इत्यादिनेति योज्यम् ॥ कर्मयोगमध्य इति ॥ कर्मरूपोपायमध्य इत्यर्थः ॥ इत्युक्त्वेति ॥ पूर्वार्धेनेति योज्यम् ॥ कर्मोपशमः ॥ कर्मत्यागः । योगस्थेनापि सा कार्येत्युपेत्य शंकते ॥ योगस्थेनापीति ॥ भगवद्भया-

1. अ. कर्मेति ।

"शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रहः ॥"

इति भागवते ॥ ३ ॥

कथं नानुषज्जते । सर्वसङ्कल्पसंन्यासी । "मयि सर्वाणि कर्माणि" इत्युक्तत्वात् ।

"मदधीनमिदं ज्ञात्वा मत्संन्यासीति चोच्यते ।"

इति च ॥ ४ ॥

इत्यत उक्तं विवृणोति ॥ सिद्धेति ॥ अन्यत् नानाजनशुश्रूषादि । ज्ञानिनो मोक्षनियमात् किं ध्यानादिनेत्यत आह ॥ तस्येति ॥ ततश्च मुक्तावानन्दपूर्तिरिति भावः । अत्र कर्मपदेन नानाजनशुश्रूषैवोच्यते न तु सन्ध्यावन्दनादि । शमपदेन च नानाजनशुश्रूषोपशम एवोच्यते । भगवद्ध्यानादिकं च । न सन्ध्यावन्दनादिकर्मोपशमः । नानाजनस्येति स्मृतिसमाख्यानात् । अतो नास्य पूर्वोक्तविरोध इति भावः । शमपदस्य विष्णुध्यानादिवाच्यित्वे स्पष्टार्थां स्मृतिं चाह ॥ शम इति ॥ ३ ॥

योगारूढलक्षणमुच्यते "यदा हि" इति । तत्र न कर्मस्वनुषज्यत इति ज्ञानिनः कर्माभावकथनान्न चाक्रिय इत्यादिविरोध इत्यत आह ॥ कथमिति ॥ नात्र ज्ञानिनः स्वरूपतः कर्मानुषङ्गोऽभिधीयते । किन्तु सर्वकर्मसु सङ्कल्पन्यासेनैव । तथा स्वयमेव व्याख्यातत्वादिति भावः । यदि सर्वकर्मसु सङ्कल्पन्यासस्तर्हि कर्मस्वरूपन्यास एव प्राप्नोति । स्वरूपात्यागे सङ्कल्पत्यागायोगादित्यत आह ॥ मयीति । भवेत्कर्मस्वरूपत्यागप्राप्तिर्यदि सङ्कल्पस्वरूपत्यागोऽभिप्रेतः स्यात् । न चासावस्ति । सङ्कल्पसंन्यासपदेन सङ्कल्पादेर्भगवदधीनताज्ञानस्यैवाभिप्रेतत्वात् । मयि सर्वाणि कर्माणि संन्यस्येत्यत्र संन्यासपदस्य भगवद्-

---

नादिकं चेति ॥ शमपदेनोच्यत इत्यनुषंगः ॥ पूर्वोक्तेति ॥ न निरग्निक इत्याद्युक्तेत्यर्थः ॥ संन्यस्येत्यत्रेति ॥ तृतीय इति योज्यम् ॥ योगारोहस्येति ॥

"उद्धरेतैव संसारात् जीवात्मानं परात्मना ।
विष्णुर्बन्धुः सतां नित्यं परात्मा ह्यसतामरिः ॥
तत्प्रसादजया भक्त्या जितो यस्य वशे त्विव ।
वर्तते तस्य मित्रं स तदन्यस्य च शत्रुवत् ॥" इति च ।

परमात्मा समाहित इति वाक्यशेषात्[1] ॥ ५ ॥ ६ ॥

"सर्वत्र विष्णोरुत्कर्षज्ञानं ज्ञानमितीर्यते ।
तद्विशेषपरिज्ञानं विज्ञानमिति गीयते ॥" इति च ॥७-८॥

"यस्य यत्र यथा वृत्तिर्विहिता वर्तनं तथा ।
ज्ञानं वाऽपि समत्वं तद्विषमत्वमतोऽन्यथा ॥"

इति महाविष्णुपुराणे ।

धीनताज्ञानार्थतायाः समर्थितत्वादिति भावः । प्रमाणान्तरं चाह ॥ मदधीनमिति ॥ ४ ॥

योगारोहस्य भगवत्प्रसादो मुख्यसाधनमित्युच्यते "उद्धरेत्" इति । तत्राऽऽत्मपदं जीवादिमात्रविषयं न परमात्मविषयमित्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ उद्धरेतेति ॥ कुतः परमात्मना स्वात्मानमुद्धरेदित्यत आह ॥ विष्णुरिति ॥ कीदृशाः सन्तः कीदृशा असन्त इत्यत उक्तं विवृणोति ॥ तदिति ॥ तदन्यस्य भक्त्याऽवशीकृतपरमात्मनः पुरुषस्य । इतोऽप्यत्र आत्मपदेन परमात्मग्रहणं युक्तमित्याह ॥ परमात्मेति ॥ येन आत्मा वशीकृतस्तस्यासौ बन्धुतया किं करोतीत्यपेक्षायां वाक्यशेषे वशीकृतोऽसौ परमात्मा तस्य हृदि सम्यगाहितो भवतीत्युक्तत्वात् पूर्वमप्यात्मपदेन परमात्मैवोच्यत इति ज्ञायत इति भावः ॥ ५ ॥ ६ ॥

योगारूढलक्षणं प्रपञ्चयते "शीतोष्ण" इति । तत्र ज्ञानविज्ञान-

उपायसंपूर्तेरित्यर्थः । यदा हि नेन्द्रियार्थेष्वित्यत्र लक्षणस्योक्तत्वादाह ॥

1. अ. वाक्यशेषाच्च ।

अनिमित्तस्नेहवांस्तु सुहृज्ज्ञात्वोपकारकृत् ।
मित्रं वधादिकृदरिर्द्वेष्यस्त्वप्रियमात्रकृत् ॥
उदासीनः स्नेहवतोऽप्यस्नेही तत्कृतानुकृत् ।
मध्यस्थ इति विज्ञेयः सुहृदेषु विशिष्यते ॥

इति नारदीये ॥ ९-१९ ॥

आत्मानं विष्णुम् । आत्मना[1] तत्प्रसादेन[2] ॥ २०-२६ ॥

ब्रह्मणि भूतम् ॥ २७-२८ ॥

सर्वभूतेषु स्थितं परमात्मानम् ॥ २९-३० ॥

शब्दयोरर्थभेदं स्मृत्यैवाह ॥ सर्वत्रेति ॥ सर्वत्र वेदादौ ॥ ७ ॥ ८ ॥

ननु सुहृदादीनां विषमत्वात् कथं तेषु ज्ञानिनः समबुद्धित्वमुच्यत इत्याशङ्कां स्मृत्यैव परिहरति ॥ यस्येति ॥ सुहृन्मित्रपदयोः अरिद्वेष्यपदयोः उदासीनमध्यस्थपदयोश्च एकार्थत्वप्रतीतिनिरासाय स्मृत्यैव तदर्थमाह ॥ अनिमित्तेति ॥ ज्ञात्वोपकारकृदिति ॥ स्वयमेव तस्य क्लेशस्थानं निरूप्योपकारकर्तेत्यर्थः ॥ ९-१९ ॥

योगसम्पूर्तिस्वरूपमुच्यते "यदा" इत्यादिना । तत्र आत्मनाऽऽत्मानमित्यात्मशब्दयोर्जीवादिविषयत्वप्रतीतिनिरासायाह ॥ आत्मानमिति ॥ अन्यथा तोषायोगादिति भावः ॥ २०-२६ ॥

योगफलमुच्यते "प्रशान्त" इति । तत्र ब्रह्मभूतपदस्य अन्यार्थप्रतीतिनिरासायार्थमाह ॥ ब्रह्मणीति ॥ अन्यथा बहुप्रमाणविरोधादिति भावः ॥ अनेन पूर्वोक्तं मत्संस्थापदमपि व्याख्यातं भवति ॥ २७-२८ ॥

ध्येयमुच्यते "सर्वभूतस्थम्" इति । तत्रात्मपदेन जीव उच्यत

प्रपञ्चयत इति ॥ यदेत्यादिनेति । अनेकश्लोकग्रहणायादिपदम् ॥ अन्यथेति ॥ आत्मपदस्य जीवादिविषयत्व इत्यर्थः ॥ अन्यार्थप्रतीतीति ॥ ऐक्यार्थ-

---

1. अ. 'आत्मना' इति नास्ति । 2. अ. तत्प्रसादादेव ।

सर्वत्र विष्णुरेक इति स्थितः ॥ ३१ ॥

अतो विष्ण्वनुवर्तिषु स्ववत् स्नेहः कर्तव्यः ॥ ३२-३६ ॥

अयतिरप्रयत्नः । प्रयत्नाद्यतमानस्त्विति वाक्यशेषात् । योगशब्दस्योपायार्थत्वेऽप्यत्रोपायविशेष एव ध्यानयोगादिर्विवक्षित इति न विरोधः ॥ ३७-४३ ॥

इत्यन्यथाप्रतीतिनिरासायाह ॥ सर्वेति ॥ भोक्तारमिति सङ्क्षेपोक्तौ परमात्मन एव ध्येयत्वोक्तेः, यो मामित्यनुवादाच्चेति भावः ॥ २९-३० ॥

परमात्मध्यानफलमुच्यते "सर्व" इति । तत्र "एकत्वमास्थितः" इत्येतदन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ सर्वत्रेति ॥ अन्यथा सर्वभूतस्थितमिति स्ववचनविरोधादिति भावः ॥ ३१ ॥

योगिन एव इत्थम्भावान्तरमुच्यते "आत्मा" इति । तत्सर्वप्राणिविषयमित्यन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ अत इति ॥ अत्र भगवदीयेष्वेव स्वस्मिन्निव स्नेहो विधीयते, न त्ववैष्णवेषु । बन्धुरात्मेति वैष्णवानामेव भगवत्प्रियत्वस्योक्तत्वात्, अनात्मन इत्यवैष्णवानां भगवदप्रियत्वस्योक्तत्वादिति भावः ॥ ३२-३६ ॥

अयतिरित्यर्जुनप्रश्नवाक्यगतायतिपदस्य गृहस्थादिरित्यन्यथाप्रतीतिनिरासायार्थमाह ॥ अयतिरिति ॥ गृहस्थादिरेवार्थः किं न स्यादित्यत आह ॥ प्रयत्नादिति ॥ अयतेस्तत्र श्रद्धावतः का गतिरिति प्रश्ने जन्मान्तरे प्रयत्नवान् भवतीति परिहारस्योक्तत्वादप्रयत्न एवायतिरवगम्यते। अन्यथा जन्मान्तरे श्रद्धावशात् चतुर्थाश्रमी भवतीति परिहारप्रसङ्गादिति भावः । ननु योगशब्दस्य ज्ञानोपायार्थत्वात् श्रद्धावान् लभते ज्ञानमित्यादेः श्रद्धाया अपि ज्ञानोपायत्वात् श्रद्धयोपेतो योगाच्चलितमानस इति परस्परविरोध इत्यत आह ॥ योगेति । भवेदयं विरोधो यदि योगशब्देनात्र सामान्यतो ज्ञानोपायोऽभिधीयते । न च

प्रतीतीत्यर्थः । आत्मशब्दः परमात्मार्थ इत्यत्र ज्ञापकमाह ॥ भोक्तारमितीति ॥

"मोक्षोपायस्य जिज्ञासुरपि केवलपाठकात् ।
विशिष्टः किमु तद्विद्वान् किं पुनर्यस्तदास्थितः ॥"

इति परमयोगे ॥ ४४-४५ ॥

"तपसश्चैव यज्ञादेर्ध्यानमेव विशिष्यते ।
अज्ञानिध्यानतो ज्ञानं ध्यानं सज्ञानमप्यतः ॥
तत्रापि मय्यभक्तस्य नान्यध्यानं प्रयोजकम् ।
अन्यसामान्यविद् यो मे यश्चान्यं नेति पश्यति ॥
अवरत्ववदुदासीनो विद्वेषी चेत्यभक्तयः ।
मद्भक्तोऽपि हि कार्यार्थं यो ध्यायेदन्यदेवताम्[1] ॥

तदस्ति । ध्यानस्यैव विवक्षितत्वात् । न च योगशब्दस्य ज्ञानोपायवाचित्वविरोधः । ध्यानस्यापि ज्ञानोपायविशेषत्वादिति भावः ।

योगाच्चलितमानसस्य "प्राप्य पुण्यकृतान् लोकान्" इत्यादिफलमुपपाद्यते "जिज्ञासुः" इति । तत्र योगजिज्ञासोः विधिनिषेधाभावप्रतीतिनिरासाय तत्स्मृत्यैव व्याचष्टे ॥ मोक्षेति ॥ तदास्थित इति ॥ तत्राल्पप्रवृत्तिमानित्यर्थः ॥ ४४-४५ ॥

योगः स्तूयते "तपस्विभ्य" इति । तत्र योगस्य ज्ञानार्थत्वात् कथं ज्ञानादुत्तमत्वमुक्तमित्यतः तत्स्मृत्यैव व्याचष्टे ॥ तपस इति ॥ अज्ञानिध्यानत इति ॥ सम्यग् ध्यानप्रकाराज्ञस्य ध्यानतो ध्यानप्रकारज्ञानमेवोत्तमम् । ध्यानप्रकारज्ञानसहितं ध्यानं ध्यानप्रकारज्ञानमात्रतोऽधिकमित्यर्थः । ध्यानिष्वपि तारतम्यमाह ॥ तत्रापीति ॥ कीदृशोऽभक्त इत्यत आह ॥ अन्येति ॥ न भक्तिर्येषु तेऽभक्तयः । अन्यान् मदधीनान् जानन्नित्यनेन परिवारतया अन्योपासनमुच्यते । मदुपासकेष्वपि

पञ्चमांते संक्षेपेण ध्येयत्वोक्तावित्यर्थः ॥ उपपाद्यत इति ॥ कैमुत्यन्यायेनेति भावः ॥ अभक्तय इत्यस्य पुरुषपरत्वलाभायाह ॥ न भक्तिर्येष्विति ॥

---

1. अ. देवताः ।

परिवारतामृते तस्मात्केवलं मदुपासकः ।
वरोऽन्यान् मदधीनांश्च सर्वान् जानन् विशुद्धधीः[1] ॥"

इति[2] दत्तात्रेयवचनम् ॥ ४६ ॥ ४७ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये षष्ठोऽध्यायः ॥ ६ ॥

विशुद्धधीः निष्कामो वर इत्यर्थः । अनेन योगिनामिति श्लोको व्याख्यातो भवति । तथाहि—सर्वेषां योगिनां मध्ये यः श्रद्धाशब्दोदितमद्भक्तिमान् स एव युक्तो मतः । तत्रापि यो मां भजते स एव युक्ततरो मतः । तत्रापि फलकामनां विना यो मां भजते स युक्ततमो मत इति ॥ ४६ ॥ ४७ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां षष्ठोऽध्यायः ॥ ६ ॥

तत्रापीति ॥ भक्तेष्वपीत्यर्थः ॥ भजते सेवते ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
षष्ठोऽध्यायः ॥ ६ ॥

---

1. अ. सुशुद्धधीः । 2. अ. इति च ।

॥ अथ सप्तमोऽध्यायः ॥

हरिः ॐ ॥ भगवन्महिमा विशेषत उच्यते ॥ १-२ ॥

"अनन्तानां तु जीवानां यतन्ते केचिदेव तु ।
मुक्त्यै तेषु च मुच्यन्ते केचिन्मुक्तेषु च स्फुटम् ॥
केचनैव हरिं सम्यग् ब्रह्मरुद्रादयो विदुः ।
अन्येषां यावता मुक्तिस्तावज्ज्ञानं हरौ परम् ॥"

इति पाद्मे ।

"मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामते ॥"

इति भागवते ।

हरिः ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ भगवदिति ॥ यत्पूर्वोक्तं ध्यानं तद्भक्तिपूर्वकमेव ज्ञानसाधनं, नान्यथा । अतो भक्त्यर्थं भगवन्महिमाऽस्मिन्नध्यायेऽभिधीयत इत्यर्थः । न त्वेवाहमित्यादिना प्रागपि भगवन्महिम्नो वर्णितत्वात् किमनेनेत्यत उक्तम् ॥ विशेषत इति ॥ प्राक् सङ्क्षेपेणोक्तोऽत्र विस्तरेणोच्यत इत्यर्थः । उपरितनाध्याया-नामपि भगवन्महिमाभिधायकत्वादत्रेत्यादि नोक्तम ।

प्रतिज्ञाते ज्ञाने लिप्सामुत्पादयितुं दौर्लभ्यं तस्योच्यते "मनुष्या-णाम्" इति ॥ तत्स्मृतिभिर्व्याचष्टे ॥ अनन्तानामिति ॥ केचनैव चेत् सम्यग्विदुस्तर्हि कथमितरेषां मोक्ष इत्यत आह ॥ अन्येषामिति ॥ अनेन यततामपि केचित् सिद्धा भवन्तीति व्याख्यातं भवति । जीवन्मुक्तानां

हरिः ॐ ॥ पूर्वोक्तमिति ॥ पूर्वाध्यायादावुक्तमित्यर्थः ॥ भक्त्यर्थ-मिति ॥ माहात्म्यज्ञानपूर्वकस्नेहरूपत्वाद्भक्तेरिति भावः ॥ नोक्तमिति विभागः । अत्राध्याय इति अत्र सप्तमे इति वा नोक्तमित्यर्थः ॥ लिप्सेति ॥ लाभेच्छा । आदरजननायेति यावत् ॥ इति व्याख्यातमिति ॥ शेषोक्त्येति भावः ॥ इति

"सर्वे मुक्ता हरौ भक्तास्तेषु ब्रह्मैव मुख्यतः ।
विष्णोः परमभक्तस्तु तस्माज्जीवघनो मतः ॥"

इति सत्तत्त्वे ॥ ३ ॥

"अचेतना चेतनेति द्विविधा प्रकृतिर्मता ।
त्रिगुणाऽचेतना तत्र चेतना श्रीर्हरिप्रिया ॥
ते उभे विष्णुवशगे जगतः कारणे मते ।
पिता विष्णुः स जगतो माता श्रीर्या त्वचेतना ॥
उपादानं तु जगतः सैव विष्णुबलेरिता ॥"

इति च ॥ ४-६ ॥

मत्तोऽन्यत् परतरं नास्ति परतरस्त्वहमेवेत्यर्थः । अन्यथा अन्यदिति व्यर्थम् ।

सर्वेषामपि सिद्धिपदोदिता मुक्तिर्भवति । सिद्धिं गताः सर्वेपि नारायणायनाः, तज्ज्ञानादिमत्त्वात् । नारायणपरायणस्तु सुदुर्लभ इत्यर्थः । जीवघनो जीवसारः । अनेन न केवलं महाज्ञानिनो दौर्लभ्यमपि तु महाभक्त्यादिमानपि दुर्लभ इत्युक्तं भवति ॥ ३ ॥

प्रतिज्ञातं ज्ञानमुच्यते "भूमिः" इत्यादिना । तत्स्मृत्यैव व्याचष्टे ॥ अचेतनेति ॥ चेतना श्रीरित्यनेन जीवभूतामिति व्याख्यातं भवति । ते उभे इत्यनेन मे प्रकृतिरित्यस्यार्थ उक्तो भवति । एतद्योनीनीत्यस्यार्थो जगत इति । विष्णोरेव जगत्कारणत्वात् कथमेतदित्यत आह ॥ पितेति ॥ पितृत्वेनैव विष्णुः कारणमित्यर्थः । अनेनाहं कृत्स्नस्येति व्याख्यातं भवति । तर्हि प्रकृत्योः कीदृशं कारणत्वमित्यत्र आह ॥ मातेति ॥ अचेतनप्रकृतेरुपादानत्वशक्तिरपि भगवदधीनेत्युच्यते ॥ विष्णुबलेरितेति ॥ ४-६ ॥

त्वद्भक्तसर्वोत्तमान्तरस्यपि पितृत्वाद्युपपत्तेः कथं कृत्स्नस्येत्याद्युक्तमित्यत उच्यते "मत्त" इति । तत्र स्वव्यतिरिक्तमात्रं निषिध्यत इत्यन्यथाप्रतीतिनिरासायाऽह ॥ मत्त इति ॥ नात्र स्वव्यतिरिक्तनिषेधः,

"अवरा दुःखसम्बन्धाज्जीवा एव प्रकीर्तिताः ।
नित्यनिर्दुःखरूपत्वात् परा श्रीरेकलैव तु ॥
दुःखासम्पीडितत्वात्तु मध्यमो वायुरुच्यते ।
अनन्याधीनरूपत्वात् असमाधिकसौख्यतः ॥
तत्तन्त्रत्वाच्च सर्वस्य विष्णुः परतरो[1] मतः ।
अभावादन्तराऽन्यस्य त्विहैकार्थौ तरप्तमौ ॥
यस्याः सम्बन्धयोग्यत्वाज्जीवा अप्यवरा मताः ।
तस्या जडायाः प्रकृतेरवरत्वे क्व संशयः ॥

किन्तु मत्तोऽन्यद्वस्तु परतरं न भवति । किन्त्वहमेव परतरः । अतः "अहं कृत्स्नस्य" इत्यादि युक्तमेवोच्यत इति भावः । स्वातिरिक्तनिषेधोऽयं किं न स्यादित्यत आह ॥ अन्यथेति ॥ यद्यत्र स्वातिरिक्तनिषेधस्तर्हि परतरपदेनैव स्वातिरिक्तस्योक्तत्वादन्यदिति व्यर्थं स्यात् । अन्यदिति पदस्य स्वातिरिक्तार्थताभ्युपगमे च परतरमिति व्यर्थं स्यादित्यर्थः । यदि विष्णुरेव परतरस्तर्हि परावरादिना भाव्यम् । तत्किमित्यत उक्तार्थे स्मृतिमाह ॥ अवरा इति ॥ दुःखसम्बन्धित्वान्न परो, दुःखेन सम्यगपीडितत्वाच्च नावरः । अतो मध्यम इत्यर्थः । विष्णुः परतरश्चेत् कः परतम इत्यत आह ॥ अभावादिति ॥ अत्र परतरपरतमपदाभ्यां विष्णुरेक एवोच्यते । न त्वसौ परतम एव । परभूतश्रीतत्त्वस्य परतमभूतविष्णोश्च मध्ये परतरस्यान्यस्याभावात् । नापि विष्णुः परतर एव । परतमस्यान्यस्याभावादिति भावः । ननु जडप्रकृतेरपि नित्यनिर्दुःखत्वात् कथं श्रीरेकैव परेत्यत आह ॥ यस्या इति ॥ निर्दुःखत्वेऽपि दुःखकारणत्वेन जडप्रकृतेरसन्दिग्धमवरत्वमेवेत्यर्थः ।

प्रत्येकमन्वयः ॥ परावरादिनेति ॥ परेणावरेणावरतरेण परतरेण च भाव्यमित्यर्थः । अभावादन्तरान्यस्येत्येतद् द्वेधा योजयति ॥ न त्वसावित्यादिना ॥

---

1. अ. परतमो ।

अथावरतरा ये तु विमुखाश्चेतना हरेः ।
नित्यदुःखैकयोग्यत्वान्न ह्येतत्स्यादचेतने ॥
अतः परतरं[1] विष्णुं यो वेत्ति स विमुच्यते ।
मुक्तस्तु स्यात्पराभासः सुनित्यसुखभोजनात् ॥
तत्रापि तारतम्यं स्यात्तेषु ब्रह्माऽधिको मतः ।
विष्णोराधिक्यसंवित्तिः सर्वस्माज्ज्ञानमुच्यते ॥
एवं विविच्य तज्ज्ञानं विज्ञानमिति कीर्तितम् ॥
एतच्च तारतम्येन वर्तते केशवादिषु ।
मुख्यविज्ञान्यतो विष्णुः किञ्चिद्विज्ञानिनो परे" ॥ ७ ॥

यदुक्तं जीवा अवरा इति तस्यापवादमाह ॥ अथेति ॥ अत्रापि तरतमपावेकार्थौ । नन्वचेतनादपि चेतनस्योत्तमत्वात् ईश्वरविमुखानामवरतरत्वे कथं प्रकृतेरवरत्वमित्यत आह ॥ न हीति ॥ जीवानां दुःखसम्बन्ध उक्तस्तर्हि मोक्षः कथं स्यादित्यत आह ॥ अत इति ॥ उक्तप्रकारेणेत्यर्थः । ननु भगवज्ज्ञानेन दुःखमोक्षो भवति चेत् मुक्तस्य परत्वं स्यात् । तथा च श्रीरेकैव परेत्ययुक्तमित्यत आह ॥ मुक्त इति ॥ सुनित्यसुखभोजनादवरत्वाभावेऽपि प्राक् दुःखसम्बन्धात् पराभास एव न तु पर एवेत्यर्थः । सर्वमुक्तानां दुःखाभावसाम्येऽपि न सुखादावपि साम्यमित्याह ॥ तत्रापीति ॥ ननु श्रुत्यादौ ज्ञानविज्ञानाभ्यां मोक्षोक्तेः कथं विष्णोः परतरत्वज्ञानेन मोक्षोऽभिहित इत्यत आह ॥ विष्णोरिति ॥ उच्यते श्रुत्यादाविति शेषः । एवं श्र्यादीनां परत्वादिज्ञानेन । अनेन "ज्ञानं तेऽहं सविज्ञानम्" इत्यस्याप्यर्थ उक्तो भवति ।

व्याख्यातमिति ॥ चेतनरूपामिति व्याख्यातमित्यर्थः । इत्यस्येत्यस्य एवमित्यनुवादः ॥ श्र्यादीनां परत्वादिज्ञानेनेति व्याख्या ॥ लिप्सेति ॥ आदरेत्यर्थः ॥ तारतम्ये वेति ॥ तत्रापि तारतम्यं स्यादिति प्रागुक्ततारतम्ये

1. अ. परतमं ।

"सोऽप्सु स्थित्वा रसयति रसनामा ततः स्मृतः ।
सूर्यचन्द्रादिषु स्थित्वा प्रभानामा प्रभासनात् ॥
वेदस्थः प्रणवाख्योऽसावात्मानं यत्प्रणौत्यतः ।
खे स्थितः शब्दनामाऽसौ यच्छब्दयति केशवः ॥ ८ ॥

पुण्यापुण्यं गन्धयति स्वयं पुण्यो धरास्थितः ।
तेजयत्यग्निसंस्थः सन्[1] भूतस्थो जीवनप्रदः ।
[2]तपस्विस्थस्तपयति ॥ ९ ॥

व्यञ्जनाद्बीजसंज्ञितः ।

ज्ञानविज्ञानयोर्दौर्लभ्यं लिप्सोत्पादनायाऽह ॥ एतच्चेति ॥ मुक्तानां तारतम्ये वाऽनेन हेतुरुच्यते । अनेन मनुष्याणामित्येतदपि व्याख्यातं भवति ॥ ७ ॥

विष्णुतन्त्रत्वात् सर्वस्यासौ परतर इति विविच्य परतरत्वज्ञानं विज्ञानमित्युक्तम् । तद्विज्ञानमेव सर्वस्य तदधीनत्वप्रदर्शनेनाह ॥ स इति ॥ अनेन विज्ञानप्रदर्शकं रसोऽहमित्यादि व्याख्यातं भवति । रसयति रसमादत्ते रसं प्रेरयति । प्रभासनात् स्वयं प्रभासमानत्वात्, प्रभाप्रेरणाच्च । प्रणौति स्तौति स्तावकत्वं प्रेरयति च । शब्दयति वक्ति शब्दं प्रेरयति च ॥ ८ ॥

सुरभ्यसुरभितया गन्धं प्रेरयति, स्वयं सुरभिश्चेति पुण्यगन्धः । स्वयं पुण्यगन्धप्रदत्वाच्च । तेजयति तेजस्वी वर्तते, तेजः प्रेरयति चेति तेजः । जीवनप्रदः तस्माज्जीवनम् । तपयति तपः कुरुते प्रेरयति चेति तपः ॥ ९ ॥

चेत्यर्थः । भाष्योक्तदिशाऽऽह ॥ विज्ञानप्रदर्शकमिति ॥ गन्धयतीत्यस्यार्थांतरमाह ॥ पुण्यगन्धप्रदत्वाच्चेति ॥ प्रेरकत्वात् ॥ बीजप्रेरकत्वादित्यर्थः ॥

---

1. अ. स। 2. अ. तपस्विसंस्थस्तपति।

बोधनाद्बुद्धिनामाऽसौ बुद्धिमत्सु व्यवस्थितः ॥ १० ॥
नित्यपूर्णबलत्वात्तु [1]बलं कामविवर्जितम् ॥
अराजसबलश्चैव स्थानेभ्योऽन्येष्वयोजनात् ।
एतादृशबलात्माऽसौ बलिनां बलदः स्वयम् ॥
वेति पूर्णत्ववाची स्यात्तद्रतेर्बलमुच्यते ।
प्रायो हि कामिता अर्था धर्मं हन्युर्हरिः पुनः ॥
न धर्महानिकृत् किन्तु कामितो धर्मवृद्धिकृत् ।
धर्माविरुद्धकामोऽतो विष्णुर्भूतेषु संस्थितः ॥

व्यञ्जनाद् व्यञ्जकत्वात् प्रेरकत्वाच्च । बोधनात् बोद्धृत्वाद् बुद्धिप्रेरकत्वाच्च ॥ १० ॥

विषयभोगनिरपेक्षतया नित्यपूर्णबलत्वात् कामवर्जितं बलम् । अस्थानेऽप्रयुज्यमानत्वाद् रागविवर्जितं बलम् । रागिणो ह्यस्थानेऽपि बलं प्रयुञ्जते । कामरागविवर्जितबलदश्चेति वा । अर्थान्तरमुच्यते ॥ एतादृशेति ॥ एतादृशबलात्मेत्यनुवादः । अर्थान्तरं चोच्यते ॥ वेति ॥ तद्रतेः पूर्णरतित्वात् । अत्रापि कामरागराहित्यं पूर्ववत् । धर्माविरुद्धेच्छाप्रेरकत्वाच्चेति ज्ञातव्यम् । अप्सु रस इत्यादिव्यवस्थयाऽबादिसर्वेषां रसादिसर्वदोऽतो रसादिनामेत्यर्थः । रसाद्यभेदात्तन्नामा किं न स्यादित्यत आह ॥ सर्वत इति ॥ तत्र स्वातन्त्र्यं हेतुः । रसादेरस्वातन्त्र्यं प्रसिद्धमिति भावः ॥ ११ ॥

अर्थांतरमिति ॥ बलपदस्येति योज्यम् ॥ अनुवाद इति ॥ तथाच न पुनरुक्तिरिति भावः ॥ अत्रापीति ॥ पूर्णरतित्वरूपबलपदार्थेऽपीत्यर्थः ॥ पूर्ववदिति ॥ रसयतीत्यादौ तत्प्रेरकत्वं यथोक्तं तथा हरिः पुनर्न धर्महानिकृदित्यादि कामपदार्थे धर्माविरुद्धेच्छाप्रेरकत्वाच्च धर्माविरुद्धकाम इति योजनेति भावः । अप्सु स्थित्वा रसयतीत्यादेः फलितार्थपरस्मृतिशेषार्थमाह ॥

1. अ, बलकामविवर्जितः ।

एवं स सर्वतश्चान्यः स्वतन्त्रश्चैव सर्वगः ।
व्यवस्थयैव सर्वेषां सर्वदा सर्वदः प्रभुः ॥ ११ ॥
ये चैव सात्त्विका भावा राजसास्तामसाश्च ये ।
तत एव न चान्यस्मात्तदायत्तमिदं न सः ॥
अन्यायत्तो ॥ १२ ॥
—ऽचेतनया तन्मेयत्वात्तु मायया ।
लक्ष्म्या वशगया लोको विष्णुनैव विमोहितः ।
ये तु विष्णुं प्रपद्यन्ते ते मायां [1]तां तरन्ति हि ॥

न केवलं रसादिधर्मप्रेरकः, किंनामाऽबादिप्रेरकश्चेत्याह ॥ ये चेति ॥ यथा भगवदधीनमिदमेवं भगवानेतदधीनोऽस्तु, भूभूधरादिवदित्यत आह ॥ तदायत्तमिति ॥ इदमेव तदायत्तं न त्वसावेतदायत्त इति भावः । अनेन "न त्वहं तेषु ते मयि" इत्यस्य वैलोम्येनार्थ उक्तो भवति ॥ १२ ॥

एवं सर्वप्रेरकः परमात्मा कुतो लोकेन न ज्ञायत इत्यत आह ॥ अचेतनयेति ॥ प्रकृत्येति शेषः ॥ तन्मेयत्वादिति ॥ विष्णुनैव सम्यक् ज्ञातत्वात् । लक्ष्म्या चेत्यर्थः । अनेन त्रिभिरित्यादेरर्थ उक्तो भवति। ममेत्यस्यार्थो वशगयेति। विष्णुनैवेत्यनेनाचेतनप्रकृत्याद्याहितं स्वविषयमोहं भगवान् कुतो न वारयतीत्याशङ्कानिवारकस्य नाहं

अप्सु रस इत्यादिव्यवस्थयेति ॥ अपां रसः पृथिव्या गन्धः शशिसूर्ययोः प्रभेत्येवं व्यवस्थयेत्यर्थः । गीतामवतारयति ॥ न केवलमिति ॥ भूभूधरवदिति ॥ भूमेः पर्वतानां चान्योन्याश्रयभावस्तथेत्यर्थः ॥ वैलोम्येनेति ॥ पूर्वापरभावेनेत्यर्थः । लक्ष्म्यां मायाशब्दनिर्वचनपरं तन्मेयत्वादिति पदम् । तदर्थमाह ॥ विष्णुनैवेति ॥ माङ् मान इत्यतः कर्मणि यप्रत्यये स्त्रीत्वात् टाप्प्रत्यय इति भावः । लक्ष्म्या चेति ॥ जडप्रकृत्या समुच्चयाय चशब्दोऽध्या-

---

1. अ. तु

लक्ष्मीः सा जडमाया या देवता ते उभे अपि ।
विष्णोर्वशे ततोऽनन्यभक्त्या तं शरणं व्रजेत् ॥
यादृशी तत्र भक्तिः स्यात्तादृश्यन्यत्र नैव चेत् ।
अनन्यभक्तिः सा ज्ञेया विष्णावेव तु सा भवेत् ॥
अन्येषु वैष्णवत्वेन लक्ष्मीब्रह्महरादिषु ।
कुर्याद्भक्तिं नान्यथा तु तद्वशा एव ते यतः ॥

प्रकाश इत्यस्यार्थ उक्तो भवति। यदि साक्षाद्भगवत्या लोको मोहितस्तर्हि न कस्यापि ज्ञानमित्यत आह ॥ ये त्विति ॥ अनेन मामेवेत्येतद्व्याख्यातं भवति। भगवत्प्रपत्त्या कथं मायातरणमित्यत आह ॥ लक्ष्मीरिति ॥ ननु पूर्वं लक्ष्म्या एव भगवद्वशत्वस्योक्तत्वात् कथं ते उभे अपि विष्णोर्वशे उच्येते इत्यत उक्तम् ॥ लक्ष्मीः सा जडमाया या देवतेति ॥ लक्ष्म्या भगवद्वशत्वे उभयोरपि भगवद्वशत्वं भवति। अचेतनप्रकृतेर्लक्ष्मीवशत्वात्। अतो मोहकप्रकृत्योर्भगवद्वशत्वात् तत्प्रपत्त्या मायातरणं युक्तमेवातस्तं प्रपद्येतेत्यर्थः। अनेन गुणमयीत्येतद् व्याख्यातं भवति। ततोऽनन्यभक्त्येत्यनेनैकभक्तिरित्यादेः तात्पर्यमुक्तं भवति। अनन्यभक्तिर्नाम कीदृशीत्यत आह ॥ यादृशीति ॥ तत्र भक्तिविषये। अनेनैकस्मिन् भक्तिर्यस्येति विग्रहः सूचितः। तेन सामानाधिकरण्याङ्गीकारे भक्तिशब्दस्य प्रियादित्वेन पुंवद्भावाप्राप्तिश्च परिहृता।

हृतः ॥ अनेनेति ॥ अचेतनयेत्यादिग्रन्थेनेत्यर्थः। उपादानोपादेययोरभेदाद्वा प्रकृत्येत्युक्त्या तन्मयोपलक्षणाद्वा त्रिभिरित्यादेरर्थ उक्तो भवतीत्युक्तम् ॥ इति शंकानिवारकस्येति ॥ प्रकृतिद्वयं निमित्तीकृत्य हरिरेव मोहक इत्युक्त्या तन्निवारणमिति भावः ॥ सामानाधिकरण्येति ॥ एका भक्तिर्यस्येति विग्रहांगीकारे स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे, स्त्रियामपूरणीप्रियादिष्विति सूत्रे प्रियादिषु परतो न पुंवद्भाव इति निषेधाद्भक्तिपदस्य च प्रियादिषु पाठात् पुंवद्भावाप्राप्तावेका भक्तिरित्येव समासेऽपि प्राप्नोतीत्यर्थः ॥ इत्या-

एवं जानंस्तमाप्नोति नान्यथा तु कथञ्चन ।
पूर्णं वस्तु यतो ह्येको वासुदेवो न चापरः ॥
एवंविद् दुर्लभो लोके यत्सर्वे मिश्रयाजिनः ।
विष्णुं तत्परमज्ञात्वा रमाब्रह्महरादिकान् ॥
यजन्नपि तमो घोरं नित्यदुःखं प्रयाति हि ।
अज्ञानां तु कुले जातो यावद्विष्णोः समर्चनम् ।
विष्णुतत्त्वं च जानीयात्तावत्सेवा पृथक् कृता ॥

विष्णोः सर्वोत्तमत्वमन्येषां तद्वशत्वं च ज्ञात्वा भक्तिं कुर्वतां किं फलमित्यत आह ॥ एवमिति ॥ एवं जानन्निति ॥ ज्ञात्वा भजन्नित्यर्थः । अनेन "ज्ञानी त्वात्मैव मे मतम्" इत्याद्युक्तार्थं भवति । अवधारणार्थतुशब्दस्यार्थो नान्यथेति । भगवज्ज्ञानिनामेव मोक्षो नान्येषामिति कुत इत्यत आह ॥ पूर्णमिति ॥ भगवत एव पूर्णत्वेन मोक्षदानशक्तिर्नान्येषामित्यर्थः । अनेन वासुदेव इत्यस्यार्थ उक्तो भवति । यदि भगवज्ज्ञानेन मोक्षस्तर्हि सर्वेषां स्यादित्यत आह ॥ एवंविदिति ॥ वासुदेवज्ञानेन मोक्षसद्भावेऽपि तज्ज्ञानिनो न सर्वे इति न सर्वेषां मोक्ष इत्यर्थः । एतेन स इति व्याकृतं भवति । लोके भगवज्ज्ञानिनां बहूनां दृश्यमानत्वात् कथं दौर्लभ्यमित्यत आह ॥ यदिति ॥ मिश्रयाजिन इति ॥ वैपरीत्येन यजन्त इत्यर्थः । एतेन कामैरित्यादेस्तात्पर्यमुक्तं भवति । किं तेषां फलमित्यत आह ॥ विष्णुमिति ॥ तत्परं रमादिभ्यः परम् । अज्ञात्वा विपरीतं ज्ञात्वा च । कारणविशेषाज्ज्ञानरहितस्य विपरीतज्ञानाभावेनान्यदेवताराधनेन किं स्यादित्यत आह ॥ अज्ञाना-

---

द्युक्तार्थमिति ॥ आप्नोतीत्यात्मेति व्युत्पत्त्या मे आत्मा मम प्राप्तिमानित्युक्तार्थमित्यर्थः ॥ तुशब्दस्येति ॥ ज्ञानी त्विति तुशब्दस्येत्यर्थः । मिश्रयाजिनां त्रिदिवभूगोचरत्वेन वक्ष्यमाणतमःप्राप्तेरयोगादाह ॥ वैपरीत्येनेति ॥ विधिवैपरीत्येनेत्यर्थः । अज्ञानमात्रेण तमःप्राप्तेरयोगादाह ॥ विपरीतं ज्ञात्वा चेति ॥

विद्याद्यैहिकभोगाय यदि बुद्ध्वा पुनर्न तु ।
परिवारतामृते कुर्यादन्यदेवार्चनं क्वचित् ॥
अजानता कृतं त्यक्तं न दोषाय भविष्यति ।
जन्मादिप्रदमेव स्यादत्यागे पुनरेव तु ॥
क्षिप्रं च ज्ञापयत्येव भगवान् स्वयमेव तु ।
यदि जन्मान्तरे स्वीयो निमित्तीकृत्य कश्चन ॥"

इत्यादि च ।

मत्त एवेति, तान् विद्धीत्युपसंहाराच्च तत्तत्कारणत्वात् तत्तन्ना-

---

मिति ॥ उपलक्षणं चैतत् । निर्णेत्रभावादिकारणान्तरं च द्रष्टव्यम् । समर्चनं कर्तव्यमितीति शेषः । पृथक् सेवा परिवारतां विनैव अन्यदेवतायजनं विद्यादि तद्विषयज्ञानं स्तवनादि चेत्यर्थः । एतच्च फलं नाज्ञानिमात्रस्य, अपि तु ज्ञानानन्तरं यः पूर्वमार्गं त्यक्त्वा भगवद्भजनमेव कुर्यात्तस्यैव । केषाञ्चित्तमोयोग्यानामपि कदाचिज्ज्ञत्वसम्भवादिति भावेनाह ॥ यदीति ॥ इदं च तमोयोग्यव्यावृत्तिमात्रम् । नित्यत्रैविद्यानामपि फलसद्भावात् । प्राचीनापराधसद्भावात् कथमुत्तरापेक्षया फलमित्यत आह ॥ अजानतेति ॥ स्वतो भागवत एव यदि विष्णुतत्त्वं ज्ञात्वाऽपि कारणविशेषात् पूर्वमार्गं न जहाति तस्य किं

कारणांतरं चेति ॥ अज्ञकुले जातत्वापेक्षया कारणांतरं च भगवद्ज्ञानराहित्यमिति योज्यम् ॥ इति शेष इति ॥ तस्य जानीयादित्यन्वयः । तेन विष्णुतत्वं चेति चशब्दोपपत्तिरिति भावः ॥ तद्विषयज्ञानेति ॥ अन्यदेवताविषयकज्ञानस्तवननमनादीत्यर्थः । तस्यैवेति कुत इत्यत आह ॥ केषांचिदिति ॥ इदं चेति ॥ विष्णुतत्वज्ञानानंतरमन्यदेवतार्चनमित्यर्थः ॥ नित्यत्रैविद्यानामिति ॥ विष्णुं ज्ञात्वाप्यन्यदेवतार्चनात्यागिनां जन्मादिफलसत्वादित्यर्थः । शंकते ॥ प्राचीनेति ॥ उत्तरेति ॥ विष्णुतत्वज्ञानोत्तरकालीनान्यदेवतार्चनापेक्षयेत्यर्थः । शंकते ॥ स्वत इति ॥ कारणविशेषेति ॥ क्षुद्रफला-

मेत्यवसीयते । "मयि सर्वमिदं प्रोतम्" इति भेदेनैवोपक्रमाच्च । आप्नोति विष्णुमित्येवाऽत्मशब्दो ज्ञानिनि । "यच्चाप्नोति यदादत्ते" इत्यादेः । "आस्थितः स हि", "मां प्रपद्यते" इत्यादिवाक्यशेषाच्च । बहूनां जन्मनामन्ते ज्ञानवान् भवति । ततो मां प्रपद्यते । वासुदेवः सर्वमिति पूर्णमिति जानन् । "प्रपद्यन्तेऽन्यदेवताः" इति वाक्यशेषे भेददर्शनाच्च । "देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि ।" इति च ॥ २१-२२ ॥

स्यादित्यत आह ॥ अत्याग इति ॥ ज्ञापयति त्यक्तुमिति शेषः । जन्मान्तर इत्युपलक्षणम् । यदि स्वीय इति सम्बन्धः । केचन गुर्वादिकं निमित्तीकृत्य, न तु साक्षात् । अनेन लभते चेत्यादेर्विषय उक्तो भवति । एवं रसादिकारणत्वाद्रसादिनामकत्वं विष्णोर्नाभेदेनेति प्रमाणवचनेनोक्तम् । उपक्रमोपसंहारयोः सर्वस्य भगवदधीनत्वोक्तेश्च तज्ज्ञायत इत्याह ॥ मत्त एवेति ॥ ज्ञानी त्वात्मैव मे मतम्" इत्येतत् "एवं जानंस्तमाप्नोति" इति प्रमाणवचनेन व्याख्यातम् । युक्त्या च तदुक्तार्थमेव न त्वभेदार्थमिति साधयितुमाह ॥ आप्नोतीति ॥ आत्मशब्दस्याप्तिवाचित्वं कुत इत्यत आह ॥ यच्चेति ॥ "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य सन्ततो भावस्तस्मादात्मेति भण्यते ॥" इति भारतवाक्यम् । कुतोऽयमात्मशब्द आप्त्यर्थः, स्वरूपार्थः किं न स्यादित्यत आह ॥ आस्थित इति ॥ एतदर्थविवरणात्मके वाक्यशेषे परमां गतिमुद्दिश्य भगवन्तमुपासीनस्य ज्ञानिनस्तत्प्राप्तेरुक्तत्वात् अत्रापि प्राप्त्यर्थ एवाऽत्म शब्दो न स्वरूपार्थ इत्यर्थः । ननु ज्ञानानन्तरं मोक्षस्य कर्मक्षयमात्रा-

---

कांक्षादिरूपेत्यर्थः ॥ इत्युपलक्षणमिति ॥ तस्मिन्नपि जन्मनीत्यस्येति योज्यम् ॥ अनेनेति ॥ अत्यागे चेत्यादि ग्रन्थेन स्वतः शुद्धभागवतरूपो विषय उक्त इत्यर्थः ॥ उक्तार्थमेवेति ॥ आत्मपदं प्राप्त्यर्थकमेवेत्यर्थः ॥ उद्दिश्येति ॥ एतेन गतिमित्युद्देश्य द्वितीयेत्युक्तं भवति । उक्तात्मेत्यस्यार्थो

"ज्ञात्वा परत्वं विष्णोस्तु पृथग् देवान् यजन्नरः ।
याति देवांस्तदज्ञात्वा तम एव प्रपद्यते ॥
तथापि यावदन्यैस्तु साम्यं हीनत्वमेकताम् ।
न निश्चिन्वन्ति जायन्ते संसारे ते पुनः पुनः ॥"

इति च ॥ २३ ॥

वधित्वाद् "बहूनां जन्मनाम्" इति बहुजन्मनियतिः कथमुच्यत इत्यत आह ॥ बहूनामिति ॥ वासुदेव इत्येतत् पूर्णं वस्त्विति प्रमाणवचनेन व्याख्यातम् । युक्त्या चैतमर्थं साधयितुमाह ॥ वासुदेव इति ॥ अत्र वासुदेवस्य पूर्णत्वमेवोच्यते, न तु सर्वामेव इत्यर्थः । प्रमाणवचनेन भगवज्ज्ञानिनामेवानुत्तमगतिर्भवतीत्यत्र हेत्वभिधायकतयैव एतद्योजितम् । अथ बहूनां जन्मनामन्ते वासुदेवः सर्वमिति ज्ञानवान् भवतीत्यपि योजनां सूचयति ॥ जानन्निति ॥ अभेदार्थमेवेदं वाक्यं किं न स्यादित्यत आह ॥ प्रपद्यन्त इति ॥ "देवान् देवयजो यान्ति" इत्येतद् "विष्णुं तत्परमज्ञात्वा" इत्यादिना विवृतम् । ॥ २१-२२ ॥

वाक्यान्तरेणापि विवृणोति ॥ ज्ञात्वेति ॥ किमज्ञानमात्रेण तम इति, नेत्याह ॥ तथापीति ॥ यद्यप्येवमुच्यते तथापीत्यर्थः । तावदिति संयोज्यम् । केचन भागवताः पुरुषाः । केचन त्रैविद्याः सन्ति । तेषां च मोक्षादिकं फलमित्युक्तम् ॥ २३ ॥

भगवंतमुपासीनस्येति । मामास्थित इत्यस्यार्थः ॥ तत्प्राप्तेरिति ॥ एतद्योजितमिति ॥ वासुदेवस्सर्वमिति वाक्यं पूर्णं वस्तु यत इत्यादिप्रमाणेन योजितमित्यर्थः । तदर्थं फलं च स्मृत्यैवाहेत्यन्वयः । फलोक्तौ हेतुः पूर्वत्रदेवेत्यादि । पूर्वेषां भागवतानां त्रैविद्यानां च देवान्देवयजो यांति मद्भक्ता यांति मामपीति भगवत्प्राप्तितदन्यप्राप्तिरूपं फलं यथोक्तं तथा तेषां द्वेषिणां फलस्यानुक्तत्वादित्यर्थः ॥ एतदुच्यत इति ॥ यथावद्भगवत्स्वरूपाज्ञानित्वं तेषामुच्यत

"अव्यक्तः परमात्माऽसौ व्यक्तो जीव उदाहृतः ।
मन्यते यस्तयोरैक्यं स तु यात्यधरं तमः ॥"

इति च ॥ २४-२५ ॥

"यथाऽऽत्मानं हरिर्वेत्ति तथाऽन्ये नैव तं विदुः ।
जानन्ति किञ्चित् क्रमशो रमाद्यास्तत्प्रसादतः ॥"

इति च ॥ २६ ॥

द्वन्द्वमोहो मिथ्याज्ञानम् ।
"तमस्तु शार्वरं विद्यान्मोहश्चैव विपर्ययः ।"

इति च[1] भारते ।

अथ केचन द्वेषिणोऽपि सन्तीत्युच्यते 'अव्यक्तम्' इति । तदर्थे पूर्ववदेषां फलस्यानुक्तत्वात् फलं च स्मृत्यैवाह ॥ अव्यक्त इति ॥ एवं सर्वप्रेरकत्वादिमहिमवांश्चेद्भगवान् तत्कथं भगवतः केचिज्जीवाभेदं मन्यन्त इत्यतो वैतदुच्यते । सर्वात्मना ज्ञेयत्वाज्ञेयत्वाभ्यां जीवेश्वरयोर्व्यक्ताव्यक्तत्वम् ॥ २४-२५ ॥

यदि मायावशादज्ञानं लोकस्य भगवद्विषयं तर्हि भवतोऽपि लोकविषयं तदस्ति किं, कुड्योभयभागावस्थितयोरन्योन्यादर्शनवदित्यत उच्यते ॥ वेदाहमिति ॥ तत्र कस्यापि भगवज्ज्ञानाभावे वेदादिवैयर्थ्यापत्तेः कथं "मां तु वेद न कश्चन" इत्युच्यत इत्यतस्तत्स्मृत्यैव व्याचष्टे ॥ यथेति ॥ २६ ॥

यत्केषाञ्चिदद्वैतज्ञानं तदपि मदिच्छयेत्युक्तं नाहं प्रकाश इति । तदयुक्तम् । "ऐकात्म्यं नाम यदिदं केचिद् ब्रूयुरनैपुणाः । कामक्रोधाभिभूतत्वादहंकारवशं गताः ॥" इत्यादाविच्छाद्वेषादेरेवाद्वैतज्ञान-

---

इत्यर्थः । केन हेतुना जीवेश्वरौ व्यक्ताव्यक्तशब्दवाच्यावित्यत आह ॥ सर्वात्मनेति ॥ उक्तशंकेति ॥ इच्छेति श्लोकावतारिकायामुक्तशंकेत्यर्थः ।

---

1. अ. 'च' इति नास्ति ।

जीवेश्वरादिकं द्वन्द्वम् । तद्विषयो मोहो द्वन्द्वमोहः ।
संमोहस्तदाग्रहः ।

"तदाग्रहो महामोहस्तामिस्रः क्रोध उच्यते ।"

इत्युक्तत्वात् । सर्गे सर्गकाल एव ।

"जीवधर्मानीश्वरे तु यो जीवेष्वैश्वरानपि ।
विद्याज्जीवैश्वरैक्यं वा द्वन्द्वमोही स उच्यते ॥"

इत्याग्नेये ॥ २७-२९ ॥

हेतुत्वोक्तेरित्यत उच्यते ॥ इच्छेति ॥ तत्र मोहसंमोहशब्दयोरर्थभेद-प्रदर्शनाय द्वन्द्वमोहपदमनूद्य मोहशब्दार्थमाह ॥ द्वन्द्वेति ॥ मोहशब्दस्य मिथ्याज्ञानवाचित्वं कुत इत्यत आह ॥ तम इति ॥ शर्वरीसंबन्धि-तमोवदावरकमज्ञानमित्यर्थः । अस्तु मोहो मिथ्याज्ञानं, द्वन्द्वमोहो नाम क इत्यत आह ॥ जीवेति ॥ आदिपदेन सर्वज्ञत्वाल्पज्ञत्वादितद्धर्मग्रहणम् । मोहशब्दागतार्थतया संमोहशब्दं व्याचष्टे ॥ संमोह इति ॥ तदाग्रहो मिथ्याज्ञानदार्ढ्यमित्यर्थः । कुतोऽयं संमोहशब्दार्थ इत्यत आह ॥ तदाग्रह इति ॥ "मोहश्चैव विपर्ययः" इति प्रकृतविपर्ययः तदिति परामृश्यते । क्रोधो यथार्थज्ञानिषु । उक्तशङ्कापरिहारायोक्तं सर्गपदं तदाशङ्कापरिहारकं यथा स्यात्तथा व्याचष्टे ॥ सर्गे इति ॥ सत्यमिच्छा-द्वेषादिना मिथ्याज्ञानं भवतीति । तथापि तदवान्तरकारणमेव । सर्गकालमारभ्यैव तस्य कारणत्वात् । शरीरानुत्पत्ताविच्छाद्यभावात् । विष्णोस्तु सर्वदा कारणत्वादुक्तं युक्तमिति भावः । नन्वत्र जीवेश्वरादि-

---

शंकानिरासप्रकारं स्वयं व्यनक्ति ॥ सत्यमित्यादिना ॥ अवांतरकारणत्वं व्यनक्ति ॥ सर्गकालमिति ॥ इत्यत उच्यत इति ॥ फलमुच्यत इत्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
सप्तमोऽध्यायः ॥ ७ ॥

तद्ब्रह्मेत्युक्तेऽन्यत्वशङ्कां निवारयति ॥ साधिभूताधिदैवमिति ॥ ३० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये सप्तमोऽध्यायः ॥ ७ ॥

विषयद्वन्द्वमोहस्येच्छाद्यवान्तरकारणत्वमुच्यते । न तु जीवेश्वराभेदज्ञानस्य । न हि विशेष्यैक्यज्ञानमेव द्वन्द्वमोह इति नियामकमस्तीत्यत आह ॥ जीवेति ॥ २७ ॥

भगवज्ज्ञानेन किं भवतीत्यत उच्यते—जरेति । तत्र भगवता तद्ब्रह्मेत्युक्तेऽपि न ब्रह्मणो भगवतः सकाशादन्यत्वं शङ्कनीयम् । तदाशङ्कापरिहारार्थैव साधिभूताधिदैवं ब्रह्मेति वक्तव्ये मामित्युक्तत्वादिति भावेनाह ॥ तदिति ॥ इत्युक्ते जातामिति शेषः ॥ ३० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां सप्तमोऽध्यायः ॥ ७ ॥

॥ अथ अष्टमोऽध्यायः ॥

हरिः ॐ ॥ उक्तव्याख्यानपूर्वकं ब्रह्मप्राप्तिरुच्यते । तदिति विशेषणाद्ब्रह्मेत्युक्तमन्यदेव प्रकृत्यादीनां मध्ये [1]यत्किञ्चित्, उपरि

पूर्वाध्यायसङ्गतत्वेनैतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ उक्तेति ॥ यदुक्तं "ते ब्रह्म तद्विदुः" इत्यादि तद्व्याख्यानमत्रादौ क्रियते । "प्रयाण-कालेऽपि च माम्" इत्युक्तव्याख्यानप्रसङ्गेन अन्तकालस्मरणफलं, तदुपायप्रकारो, ब्रह्मप्राप्तिमार्गश्चेत्येतदुच्यत इत्यर्थः । अन्तकालस्मरणा-दीनां ब्रह्म प्राप्यते एभिरिति ब्रह्मप्राप्तिशब्दाभिधेयत्वं ज्ञातव्यम् ।

नन्वर्जुनस्य ज्ञानित्वाज्ज्ञानात्येवासौ भगवानेव ब्रह्मेति । अतः "किं तद्ब्रह्म" इति प्रश्नः कथं युज्यते, कारणाभावादित्यत आह ॥ तदिति ॥ अर्जुनस्य ज्ञानित्वेऽपि युक्तोऽयं प्रश्नः । तद्ब्रह्मेत्यत्र ब्रह्मणो भगवता तदिति पारोक्ष्येणोक्तत्वाद् भगवतोऽन्यदेवताऽऽत्रोक्तं ब्रह्मेति प्रतीयते । वासुदेवात्मकं ब्रह्मेत्यादेर्भगवान् ब्रह्मेति प्रतीयते । एव-मुभयथाप्रतीतिजनितसंशयस्य प्रश्नकारणस्य सद्भावादिति भावः । ननु ब्रह्मशब्दस्य भगवन्मात्रवृत्तित्वात् कथं तदिति विशेषितत्वेऽप्यन्यत्व-प्रतीतिरित्यत उक्तम् ॥ प्रकृतीति ॥ ब्रह्मशब्दस्य भगवति मुख्यत्वेऽपि प्रकृतिवेदादेरप्यमुख्यतया तदर्थत्वात्तदिति विशेषितत्वेन मुख्यार्था-सम्भवेऽप्यमुख्यार्थः प्रकृत्यादीनां मध्ये यत्किञ्चिदत्र स्यादिति प्रतीति-

---

हरिः ॐ ॥ इत्युक्तव्याख्यानप्रसङ्गेनेति ॥ एतेनोक्तव्याख्यान-मेवाध्यायस्यार्थः । अन्यत्तु प्रासङ्गिकमिति अनेकार्थकत्वकृताध्यायभेदशंका न कार्येति सूचितम् ॥ तदुपायेति ॥ स्मरणोपायेत्यर्थः । एतावानर्थः प्रातिपदेन कथं लभ्यत इत्यत आह ॥ अंतकालेत्यादि(ना) ॥ इत्यादेरिति ॥ स्मृतेरिति शेषः । ब्रह्मेति परमात्मेति भगवानिति शब्द्यते इत्यादिरादिपदार्थः ॥

---

1. अ. यदिति नास्ति ।

"साधियज्ञं च" इति चशब्दादधिभूतादिसहितत्वेन विष्णुज्ञानमन्यदेवेति संशयः किं तद्ब्रह्मेति प्रश्नकारणाम् । परमाक्षरो विष्णुरेव मुख्यत इति प्रसिद्धत्वात्तथैव परिहरति[1] । अज्ञानां तदपि ज्ञापयितुं तथैव परिहारः । पुनरहमिति नोक्तमित्याशङ्का "अव्यक्तं व्यक्ति-

युंक्तेति भावः । ननु तदिति विशेषणेन प्राप्ता ब्रह्मणो भगवदन्यत्वशङ्का "साधिभूताधिदैवं माम्" इत्युपरितनवाक्ये भगवतैव परिहृता । ब्रह्मेति वक्तव्ये मामित्युक्तत्वात् । अतः कथं ब्रह्मणो भगवदन्यत्वप्रतीतिरित्यत उक्तम् ॥ उपरीति ॥ यद्यप्येषा प्रतीतिरुपरितनवाक्ये परिहृता, तथापि पुनर्भवत्येव । तत्र "साधियज्ञं च" इति चशब्दस्य साधिभूताधियज्ञं मां चेति संयोजनेनाधिभूतादिसहितत्वेन ब्रह्मज्ञानादन्यदेव विष्णुज्ञानमुच्यत इति तदिति विशेषणादेव प्रतीतिसम्भवादिति भावः । यत्किञ्चिदित्यत्र अन्यदेवेत्यत्र च इति प्रतीत्या जात इति शेषः ।

ननु "साधिभूताधिदैवं माम्" इति भगवत एव ब्रह्मत्वोक्तेः किं तद्ब्रह्मेति प्रश्नेऽहं ब्रह्मेति परिहारो वक्तव्यः । "अक्षरं ब्रह्म परमम्" इति कथमुच्यत इत्यत आह ॥ परमेति ॥ तथैव परमाक्षरं ब्रह्मेत्येव । भवतु परमाक्षरं ब्रह्मेत्युक्तिफलं, परमाक्षरशब्दस्य विष्णौ प्रसिद्धत्वात् । तथाप्यहमिति साक्षादनुक्त्वा एवं कथने को हेतुरित्यत आह ॥ अज्ञानामिति ॥ तदपि स्वस्य परमाक्षरत्वमपि । ननु ये परमाक्षरं विष्णुरिति न जानन्ति तेषामहं ब्रह्मेति नोक्तम् । अक्षरं ब्रह्मेत्येवोक्तम् । अतो ब्रह्म अक्षरं च भगवतोऽन्यदेवेत्याशङ्कैव स्यान्न तु परमाक्षरं ब्रह्म च भगवानिति ज्ञानमित्यत आह ॥ पुनरिति ॥ सत्यमेव शङ्का भवतीति । सा च "अव्यक्तोऽक्षर इत्युक्तः" इत्युपर्यक्षरस्याव्यक्तत्वोक्त्या परि-

भगवन्मात्रवृत्तित्वादिति ॥ तदेव ब्रह्म परममित्यादिश्रुतिरिति भावः ॥ प्रकृतीत्यादि ॥ मम योनिर्महद्ब्रह्म, तेन ब्रह्महृदा, ब्रह्माणि जीवाः सर्वेऽपि इत्यादेरिति भावः ॥ इत्युपरीति ॥ अस्मिन्नेवाध्याये । संशयपदात्पूर्वं स्थलद्वये शेषमाह ॥

1. अ. परिहार इति ।

मापन्नम्" इति विष्णावेव प्रयुक्तेनाव्यक्तशब्देनाव्यक्तोऽक्षर इत्युक्त इति परिह्रियते। "ये चाप्यक्षरमव्यक्तम्" इत्यत्र तु पृथक् प्रश्नादुपासकयोः फलतारतम्यकथनात् "कूटस्थोक्षर उच्यते" इत्युक्त्वा[1] '[2]अहमक्षरादपि चोत्तमः' इति विष्णोः उत्तमत्वकथनाच्च अन्यदेवेत्यवसीयते।

अधियज्ञोऽहमेवेति साधियज्ञमित्युक्त्या प्राप्तभेदनिवृत्त्यर्थम्।

ह्रियते। "अव्यक्तं व्यक्तिमापन्नं मन्यन्ते माम्" इत्यव्यक्तशब्दस्य भगवति प्रयुक्तत्वात्। अतः "अक्षरं ब्रह्म परमम्" इति परिहारे अहमित्युक्तादपि लाभसम्भवात् तथा परिहारो युक्त इति भावः।

यद्यक्षरशब्दो विष्णावेव मुख्यस्तर्हि "ये चाप्यक्षरमव्यक्तम्" इत्यत्र, "कूटस्थोऽक्षर उच्यते" इत्यत्र च अक्षरशब्दवाच्यो विष्णुः स्यादित्यत आह॥ ये चेति॥ अक्षरशब्दस्य विष्णौ मुख्यत्वेऽपि "ये चाप्यक्षरमव्यक्तम्" इत्यत्र तावद्विष्णोरन्यदेव अक्षरशब्दवाच्यमित्येवावसीयते। "ये भक्तास्त्वां पर्युपासते", "ये चाप्यक्षरम्" इति भगवदक्षरयोः पृथक्त्वेन तदुपासकयोस्तारतम्यस्य पृष्टत्वात्। ये त्वक्षरमनिर्देश्यम्", "ये तु सर्वाणि कर्माणि" इत्यादिनाऽक्षरोपासकानां भगवदुपासकानां च फलतारतम्यस्य कथनाच्च। तथा "कूटस्थोऽक्षर उच्यते" इत्यत्रापि विष्णोरितरदेवाक्षरमित्यवसीयते। "अहमक्षरादपि चोत्तमः" इति विष्णोरक्षरादुत्तमत्वकथनात् मुख्यार्थासम्भवे गौणाङ्गीकारस्य न्याय्यत्वात्। प्रकृते तु बाधकाभावाद्विष्णुविषयत्वमेवेति भावः।

नन्वधियज्ञब्रह्मणोऽपि विष्णुत्वे तत्र ब्रह्माहमेवेत्यनुक्त्वा अधि-

---

इत्यत्र च इति प्रतीत्या जात इति शेष इति॥ तारतम्यस्येति॥ के वा युक्ततमा मता इत्यनेनेति भावः॥ प्रकृते त्विति॥ अक्षरं ब्रह्म परममित्यत्रेत्यर्थः॥

---

1. अ. इत्युक्तात्।
2. अ. अहमिति नास्ति।

तस्यैव सर्वप्राणिदेहस्थितरूपान्तरापेक्षया सहितत्वं युज्यते ।

"प्राणिनां देहगो विष्णुरधियज्ञ इतीरितः ।
स एव व्याप्तरूपेण ब्रह्मेति परिकीर्त्यते ॥
तैस्तैरधिकयाज्यत्वात् बृंहितत्वाच्च हेतुतः ।
अध्यात्मं तत्स्वभावो यदधिकः परमात्मगः ॥
पुंसां स जडभावानां सर्गः कर्म हरेः स्मृतम् ।
भूताधिकत्वतो जीवा अधिभूतमितीरिताः ।
अधिको दैवतं विष्णुरेव यस्यास्तु सा रमा ॥
पुरुप्राणाऽधिदैवाख्या त्विति ज्ञेयमिदं नरैः ।"

यज्ञोऽहमेवेति किमर्थमुच्यते । कारणविशेषमन्तरेणोक्तिमेदासंभवात् । अतोऽधियज्ञ एव विष्णुर्न ब्रह्मेत्यत आह ॥ अधियज्ञ इति ॥ ब्रह्माधियज्ञयोरुभयोर्विष्णुत्वेऽपि ब्रह्माहमेवेत्यनुक्त्वाऽधियज्ञोऽहमेवेति कथनं युज्यते । "साधियज्ञं माम्" इति भगवता स्वस्याधियज्ञसाहित्ये-नोक्तत्वात् अधियज्ञो भगवतो भिन्न एवेत्याशङ्का प्राप्ता । तन्निवृत्त्यर्थ-त्वादहमेवेत्युक्तेः । तदित्युक्त्या ब्रह्मणो भगवदन्यत्वशङ्काप्राप्तावपि मामित्यनेन तस्याः प्राज्ञबुद्धिमपेक्ष्य निरस्तत्वेन तत्राहमेवेत्युक्त्य-भावादिति भावः । एतेन "एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे" इत्युक्तत्वादधियज्ञप्रश्नपरिहारौ प्राप्तिशून्याविति च निरस्तं भवति । भगवानेवाधियज्ञश्चेत् कथं तत्साहित्यं प्रागुक्तमित्यत आह ॥ तस्यैवेति ॥ भगवत एवाधियज्ञत्वेऽपि तत्साहित्यं युज्यते । अधियज्ञस्य सर्वप्राणि-देहगतरूपान्तरत्वादिति भावः । अनेन देह इत्यस्याभिप्रायो वर्णितो भवति ।

मामित्यनेनेति ॥ साधिभूताधिदैवं मामित्यनेनेत्यर्थः ॥ एतेनेति ॥ साहि-त्योक्त्या प्राप्तेरुक्तत्वेनेत्यर्थः ॥ अनेनेति ॥ साहित्यनिर्वाहायाधियज्ञाख्य-रूपस्य सर्वप्राणिदेहगतरूपांतरत्वकथनेनेत्यर्थः । देहे इत्युक्त्यैव तल्लाभादिति भावः ॥ कथं तदुक्तिरिति ॥ अक्षरं ब्रह्मेत्युक्तिः किं ब्रह्मे(त्युक्त)ति प्रश्नस्य

इति तत्त्वविवेके। कथंरूपोऽधियज्ञ इति प्रश्नस्त्वहमेवेत्युक्तत्वात् लक्षणोक्त्यैव[1] परिहृतः ॥ ४ ॥

मद्भावं मयि भावम्। सदा तद्भावभाविताानामेव स्मरन्

अत्र प्रमाणं दर्शयन् भगवत एव ब्रह्मत्वे कथं तदित्युक्तिरित्याशङ्कां च परिहरन् श्लोकद्वयं स्मृत्यैव व्याचष्टे ॥ प्राणिनामिति ॥ ब्रह्मणः सर्वगतरूपान्तरत्वात् तदित्युक्तिर्युक्तेति भावः। तैस्तैः सर्वप्राणिभिरधिकयाज्यत्वादधियज्ञो, बृंहितत्वात् ब्रह्मेत्यर्थः। भूताधिकत्वत इत्यत्र भूतपदेन पृथिव्यादीनि। पुरुप्राणाऽतः पुरुषाख्येति शेषः। "षकारः प्राण आत्मा" इति श्रुतेः। ननु "अधियज्ञः कथं कोऽत्र" इत्यत्र कुतोऽधियज्ञः कथंरूप इति प्रश्नः कस्मान्न परिहृत इत्यत आह ॥ कथंरूप इति ॥ तल्लक्षणोक्त्येति ॥ "कविं पुराणम्" इति भगवल्लक्षणोक्त्येत्यर्थः। भगवल्लक्षणोक्त्या कथमधियज्ञस्वरूपप्रश्नः परिहृत इत्यत उक्तम् ॥ अहमेवेति ॥ "अधियज्ञोऽहमेव" इत्यधियज्ञस्य भगवदभिन्नत्वेनोक्तत्वादित्यर्थः ॥ ४ ॥

प्रयाणकाले च कथं ज्ञेयोऽसीत्यस्य किमर्थं कथम्भूतः केन प्रकारेण स्मर्तव्योऽसीत्यर्थः। तत्र किमर्थं स्मर्तव्योऽसीत्यस्य परिहार उच्यते "अन्तेति"। तत्र मद्भावपदस्य अन्यथाप्रतीतिनिरासायार्थमाह ॥ मद्भावमिति ॥ अन्यथा तं तमेवैतीति वाक्यशेषविरोध इति भावः। नन्वन्तकाले स्मरणादेव तत्प्राप्तेः सदा तद्भावभावितत्वं किमर्थमुच्यत इत्यत आह ॥ सदेति ॥ न तत्प्राप्त्यर्थं सदा तद्भावभावितत्वमुच्यते। किन्तु स्मरन् त्यजतीत्युक्तं साक्षादन्तकालस्मरणं सदा तद्भावभाविता-

---

कथमुत्तरमित्यर्थः। पुरुप्राणा विश्वचेष्टा भवतीति विश्वप्रेरिकेति यावत् ॥ इति भगवल्लक्षणोक्त्येति ॥ अत्रैवोपरीति ज्ञेयम् ॥ भगवदभिन्नत्वेनोक्तत्वादिति ॥ तथा चाधियज्ञाभिन्नस्य भगवतः कवित्वादिप्रकारोक्त्या तदभिन्नोऽधियज्ञोऽपि

1. अ. तल्लक्षणोक्त्यैव।

त्यजतीति केवलं तत्कालस्मरणं भवति। न चेत् स्मरतोऽपि समाधिस्थस्खलनवत् पूर्वकर्मानुसारिस्मृत्या तत्प्राप्तिरेव भवति। अपरोक्षज्ञानिनां प्रारब्धकर्मावसाने स्मरंस्त्यजतीति भवत्येव। "प्रयाण-

---

नामेव भवतीति साक्षादन्तकालस्मरणोपाय एवोच्यत इति भावः। ननु अन्तकाल एव महता प्रयत्नेन भगवत्स्मरणस्य कर्तुं शक्यत्वात् किं सदा तद्भावभावितत्वेनेत्यत आह॥ न चेदिति॥ सदा तद्भावभावितत्वाभावे महता प्रयत्नेन स्मरतोऽप्यन्यविषय एव प्रारब्धकर्मवशात् स्मृतिर्भवति। ततश्च तत्प्राप्तिरेव भवति। यथा खलु महता प्रयत्नेन समाधिं कुर्वतोऽपि प्रारब्धकर्मवशात् ततः स्खलनं भवति। अतः सदा तद्भावभावितत्वेन भाव्यमिति भावः। यदि प्रारब्धकर्मवशादन्तकाले ब्रह्मस्मृतिर्न भवेत् तर्हि ज्ञानिनामपि प्रारब्धकर्मभावादन्तकाले ब्रह्मस्मृत्यभावेन मोक्षाभावः प्रसज्यत इत्यत आह॥ अपरोक्षेति॥ अपरोक्षज्ञानिनां स्मरन् त्यजतीत्युक्तं साक्षादन्तकालस्मरणं भवत्येवातो नामोक्षः। तस्याप्रारब्धपूर्वोत्तरकर्मनाशाश्लेषसद्भावात् प्रारब्धकर्मणां परिमितत्वेन भोगेनावसानसम्भवादिति भावः।

एवं व्याख्याने भगवद्वाक्यसम्मतिमाह॥ प्रयाणेति॥ नन्वेवं सति अन्तकालस्मरणस्य प्रारब्धकर्मावसानमेव कारणं, तत्कारणतयाऽपरोक्षज्ञानं चेति प्राप्तम्। तथाच किं सदा तद्भावभावितत्वेनेत्यत आह॥ युक्तेति॥ सत्यं साक्षादन्तकालस्मरणस्य प्रारब्धकर्मावसानमेव

कत्रित्वादिप्रकारोपेत इति लाभादिति भावः॥ तत्प्राप्तिरेव भवतीति॥ अन्यवस्तुप्राप्तिरेव भवतीत्यर्थः॥ अप्रारब्धेति॥ प्रारब्धेतरसंचितागामिकर्मणां यथाक्रमं नाशाश्लेषेत्यर्थः। तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशाविति सूत्रादिति भावः॥ भोगेनेति॥ भोगेन त्वितरे क्षपयित्वाऽथ संपत्स्यत इति सूत्रादिति

कालेऽपि च मां ते विदुः" इत्युक्तत्वात् । युक्तचेतस इति विशेषणात् नित्यं स्मरतामेवापरोक्षज्ञानं जायते ।

"भक्त्या ज्ञानाभिषिद्धानां त्यागान्नित्यं [1]हरिस्मृतेः ।
अरागाद्विहितात्यागादित्येतैरेव संयुतैः ॥
अपरोक्षदर्शनं विष्णोर्जायते नान्यथा क्वचित् ॥"

इति सत्तत्त्वे ॥ ५-८ ॥

तमसः परस्तादप्राकृतदेहः[2] ॥ ९-१० ॥

कारणम् । तत्कारणत्वादपरोक्षज्ञानं चेति । तथापि सदा तद्भावभावितत्वं च अन्तकालस्मरणकारणं भवत्येव । अपरोक्षज्ञानसाधनत्वात् । सदा तद्भावभावितत्वस्यापरोक्षज्ञानसाधनत्वेन युक्तचेतस इत्युक्तत्वादिति भावः । अनेन युक्तचेतसो मामाश्रित्य यतन्ति ये ते तद्ब्रह्म विदुरिति योजना सूच्यते । यन्नित्यस्मरणं भगवदपरोक्षज्ञानसाधनमुक्तं तद्भक्त्यादियुक्तमेव तथा । न स्वयमेवेति स्मृत्याऽऽह ॥ भक्त्येति ॥ ५ ॥

कथम्भूतः स्मर्तव्योऽसीत्यस्य परिहार उच्यते "कविम्" इति । तत्राऽऽदित्यवर्णश्चेच्छरीरित्वेन जन्मादिप्रसङ्ग इत्यत उक्तं "तमसः परस्तात्" इति । तदनूद्य व्याचष्टे ॥ तमस इति ॥ "अव्यक्तं वै तमः" इति हि श्रुतिः ॥ ९ ॥

केन प्रकारेण स्मर्तव्योऽसीत्यस्य परिहार उच्यते "यदक्षरम्" इति । तत्र पूर्वमन्तकालस्मरणस्य सदा तद्भावभावितत्वं साधनमुक्त्वा ब्रह्मचर्यं तथा कथमुच्यत इत्यतो ब्रह्मचर्यपदं तत्परतया व्याचष्टे ॥

भावः ॥ अनेनेति ॥ इत्युक्तत्वादिति मूलवाक्येन । युक्तचेतसोऽपरोक्षज्ञानिनः । तद्ब्रह्म विदुर्व्याप्तं तद्रूपं पश्यन्तीत्यर्थ इति भावः ॥ तथा कथ-

---

1. अ. नित्यहरिस्मृतेः ।
2. अ. अप्राकृतदेहम् ।

मनआदीनां ब्रह्मणि चरणं ब्रह्मचर्यम् ॥ ११-१२ ॥

एकाक्षरवाच्यत्वादेकाक्षरं परं ब्रह्म ॥ १३-१५ ॥

"नियमाज्जन्मनो भावो मुक्तस्यैव तथापि तु ।
महर्लोकमतीतानां न जन्मांशलयौ विना ॥
तत्राप्यवश्यं तत्स्थानं तैः क्षिप्रं पुनराप्यते ॥"

इति पाद्मे ॥ १६ ॥

मन आदीनामिति ॥ "तत्ते पदं सङ्ग्रहेण प्रवक्ष्ये" इत्यत्र तत्स्मरणप्रकारं प्रवक्ष्य इत्यर्थः ॥ ११ ॥

"एकाक्षरं ब्रह्म" इत्येतदेकमक्षरं शब्दब्रह्मेति प्रतीतिनिरासाय व्याचष्टे ॥ एकेति ॥ ओमित्येकमक्षरं वाचकं यस्य तदेकाक्षरमित्यर्थः । ब्रह्मशब्दस्य परब्रह्मण्येव मुख्यत्वात् न प्रतीत एवार्थः ॥ १३ ॥

ब्रह्मादीन् प्राप्तानामपि पुनर्जन्माभावात् किं विशिष्याभिधीयते मामुपेत्य पुनर्जन्म नाप्नुवन्तीति । अत उच्यते "आब्रह्मेति" । तत्राऽजनाज्जनिर्भुवीति वचनात् जनलोकादिस्थितानामपि जन्माद्यभावात् कथं ब्रह्मभवनमारभ्य पुनरावृत्तिरुच्यत इत्याशङ्कां स्मृत्यैव परिहरति ॥ नियमादिति ॥ अत्र जन्मपदं मरणस्याप्युपलक्षकम् ॥ अंशलयाविति ॥ अंशेन भूमौ जननं, लयान्ते च जननं, तदादौ मरणं चेत्यर्थः । अंशस्य मरणं चास्तीत्याह ॥ तत्रापीति ॥ अंशतोऽवतीर्णत्वेऽपि तैरंशैरंशिस्थानमाप्यत इत्यर्थः । अनेन जनादौ जननाद्यभावेऽपि नैतदयुक्तम् । मुक्तस्यैव मुख्यतया जननाद्यभावात् जनादावल्पजननादिभावादेतद्वाक्यस्य च तदर्थत्वादित्युक्तं भवति ॥ १६ ॥

मुच्यत इति ॥ अंतकालस्मरणसाधनतया कथमुच्यत इत्यर्थः । आब्रह्मभवनादित्यस्यार्थानुवादो ब्रह्मभवनमारभ्येति । सत्यलोकगतब्रह्मभवनस्य जनलोकादुपरितनत्वादिति भावः ॥ अनेनेति ॥ स्मृतिवचनेनेत्यर्थः ॥ नैतदयुक्तमिति ॥ आब्रह्मभवनात्पुनरावर्ति न इत्येतदयुक्तं नेत्यर्थः ॥ अल्पजनना-

सहस्रमिति बह्वेव । ब्रह्मणः परब्रह्मणः ।

"अव्यक्ताद्व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।

रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञकः ॥"

इति वाक्यशेषात् । न हि विरिञ्चाहन्येव सर्वव्यक्तिलयः ।

"नित्यस्यापि हरेः कालो द्विपरार्धात्मकस्त्वयम् ।

अहश्चासौ निमेषश्चेत्यप्रवृत्त्योपचर्यते ॥"

इति च ॥ १७-२२ ॥

मत्प्राप्तावेवापुनरावृत्तिरित्युक्तस्थापनाय अशेषसृष्टिप्रलयादिकर्तृत्वमात्मन उच्यते "सहस्र" इति । तत्र सहस्रपदं दशशतवाचीत्यन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ सहस्रमिति ॥ बह्वेव प्रसिद्धसहस्रादिति शेषः । ननु "चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते" इत्यादौ युगसहस्रमात्रस्य विरिञ्चदिनादित्वेनोक्तत्वात् कथं सहस्रपदं ततोऽपि बह्वर्थमित्यत आह ॥ ब्रह्मण इति ॥ नात्र चतुर्मुखस्याहोरात्रमुच्यते, येन सहस्रपदं ततोऽपि बह्वर्थं न स्यात् । किन्तु परब्रह्मणो द्विपरार्धात्मकमहोरात्रमिति भावः । कुतो ब्रह्मपदेन परब्रह्मेत्यङ्गीकृत्य तदहोरात्रपरत्वमुच्यते, विरिञ्चाहोरात्रपरत्वं किं न स्यादित्यत आह ॥ अव्यक्तादिति ॥ एवं वाक्यशेषसद्भावेऽपि कुतो नास्य विरिञ्चाहोरात्रपरत्वमित्यत आह ॥ न हीति ॥ अहनीति ॥ तदवसान इत्यर्थः । एवं न अहरागमे सर्वव्यक्तिप्रभव इत्यपि द्रष्टव्यम् । ननु कथं भगवतोऽहोरात्रसद्भावः । कालकृतविकाराभावात् । "परनामनिमेषकान्ते" इत्यादौ द्विपरार्धकालस्य निमेषत्वेनोक्तत्वाच्चेत्याशङ्कां स्मृत्यैव परिहरति ॥ नित्यस्येति ॥ निर्विकारस्येत्यर्थः । उपचारे बीजमप्रवृत्त्येति ।

दीति ॥ कार्त्स्न्येन जननमृत्योरभावेऽप्यंशेन तयोर्भावादित्यर्थः ॥ एतद्वाक्यस्य चेति ॥ आब्रह्मभवनादिति वाक्यस्य च तदर्थत्वादंशेन पुनरावर्ति न इत्यर्थकत्वात् । यद्वा आजनान्नजनिर्भुत्रीत्येतद्वाक्यस्य च कार्त्स्न्येन जनिरूपमुख्यजनिर्नास्तीत्यर्थः ॥ द्विपरार्धात्मकेति ॥ ब्रह्मण आयुःशतं परसंज्ञकं तस्यार्ध-

यत्र कालाभिमानिदेवतासु मृत्यनन्तरं प्रयाताः। अग्निज्योतिर्धूमानामकालाभिमानित्वेऽपि कालप्राचुर्यात् काल इत्युच्यते।

"अग्निर्ज्योतिरिति द्वेधा वह्नेः पुत्रो व्यवस्थितः।
तं प्राप्य याति ब्रह्मिष्ठो दिवसाद्यभिमानिनः॥"

इति सत्तत्त्वे। तत्कालमरणविवक्षायामग्निज्योतिर्धूमानामयोगः।

रात्राविव प्रलयकाले प्रवृत्त्यभावादन्हीवान्यदा प्रवृत्तिसद्भावात् प्रलयादिकालो रात्र्यादित्वेनोपचर्यत इत्यर्थः॥ १७-२२॥

भगवन्तं प्राप्तानामपुनरावृत्तिः, अन्येषां पुनरावृत्तिरित्युक्तम्। तत्र पुनरावृत्तिमतामन्येषां च केन पथाऽऽगमनमित्यत उच्यते "यत्र" इति। यत्र यस्मिन् काले मृता अनावृत्तिं गच्छन्ति, यस्मिंश्च पुनरावृत्तिं गच्छन्ति तं कालं वक्ष्यामीत्यन्यथाप्रतीतिनिरासाय व्याचष्टे॥ यत्रेति॥ नन्वग्निज्योतिर्धूमानाम् अकालाभिमानिनामपि मार्गे गम्यत्वेन वक्ष्यमाणत्वात् कथं प्रतिज्ञावाक्ये यत्र काले तं कालमित्युच्यत इत्यत आह॥ अग्नीति॥ अग्निज्योतिर्धूमानां गम्यतया वक्ष्यमाणानामिति शेषः। गम्यतया वक्ष्यमाणेषु कालाभिमानिनां बाहुल्यात् अल्पसलिलयुतपयसि पयःपदस्य सलिलोपलक्षकत्ववत् कालपदस्येतरोपलक्षकत्वादिति भावः।

ननु "तेऽर्चिषमभिसम्भवन्ति", "अर्चिरादिना तत्प्रथितेः" इत्यादौ ज्योतिषः प्रथमप्राप्यतयोक्तत्वात् कथमत्र ज्योतिषः प्रथममग्नेः प्राप्तिरुच्यते। कुतश्चाहरादिपदस्य देवताविषयत्वमित्याशङ्कां स्मृत्यैव परिहरति॥ अग्निरिति॥ एवं स्मृतिसमाख्यानादुक्त एवार्थो नाहरादिकाले मृतानामपुनरावृत्त्यादिरिति समर्थितम्। विपक्षे बाधकं चाह॥ तत्कालेति॥ यद्यत्राहरादिकालमरणे अपुनरावृत्त्यादि स्यादिति

द्वयात्मकेत्यर्थः॥ तेऽर्चिषमभिसंभवन्तीति श्रुतिः। अर्चिरादिनेति तु सूत्रम्। अर्चिर्ज्योतिःपदयोरेकार्थत्वात् ज्योतिषः प्रथमप्राप्यतयेत्युक्तम्।

"अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानं गत्वा चन्द्रमसः सायुज्यꣳसलोकतामाप्नोत्येतौ[1] वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्राह्मणो महिमानमाप्नोति" इति विदुषो दक्षिणायनमरणेऽप्यपुनरावृत्त्या ब्रह्मप्राप्तिश्रुतेः ।

"विद्वान् ब्रह्म समाप्नोति यत्र तत्र मृतोऽपि सन् ।"

इति पाद्मे ॥ २३-२६ ॥

विवक्षा भवेत्तर्हि अग्निर्ज्योतिर्धूमकथनस्यासङ्गतिः स्यात् । न ह्यहरादाविव अग्निर्ज्योतिर्धूमेषु मरणं नामास्तीति भावः । इतश्च न प्रतीतोऽर्थ इत्याह ॥ अथेति ॥ "य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते" इति श्रुतावुत्तरायणे मृतस्य ज्ञानिनोऽपुनरावृत्त्या ब्रह्मप्राप्तिं, दक्षिणायने मृतस्य कर्मिणः पुनरावृत्त्या चन्द्रप्राप्तिं चोक्त्वा पुनर्ज्ञानिन उत्तरायणे दक्षिणायने वा मृतस्यापुनरावृत्त्या ब्रह्मप्राप्तिरुच्यते । अत उत्तरायणे मृतानां पुनरावृत्तिर्दक्षिणायने मृतानां पुनरावृत्तिरिति नियमाभावान्नान्योऽर्थ इति भावः ।

महिमानं पूजाम् । मह पूजायामिति धातोः । "आदित्याच्चन्द्रमसम्" इति श्रुतेः ब्रह्ममार्गेऽपि सूर्याचन्द्रमसोः विद्यमानत्वात् सूर्याचन्द्रमसोः महिमानमाप्नोतीति युक्तम् । अत्र ज्ञानिन उत्तरायणे मृतस्य ब्रह्मप्राप्तिकथनं फलाधिक्याभिप्रायमिति ज्ञातव्यम् । अत्र स्मृति

मूलोक्तश्रुतेः पूर्वशेषमाह　य एवमित्यादिना ॥ अथेत्यादेरर्थो दक्षिणायन इत्यादि । अतो वा इत्यादेरर्थः पुनर्ज्ञानिन इत्यादि । सूर्यचन्द्रमसोरिति लेखकदोषमूलोऽयं पाठः । देवताद्वन्द्वे चेत्यानङि कृते सूर्याचन्द्रमसोरिति भाव्यत्वात् । नन्वेवं गीतायामग्निर्ज्योतिरित्यादिना ज्ञानिनो ब्रह्मप्राप्त्यर्थ-

1. अ. सायुज्यं गच्छत्येतौ ।

"मार्गौ ब्रह्म च यः पश्येत्साक्षादेवापरोक्षतः ।
सर्वपुण्यातिगोऽमुह्यन् यात्यसौ ब्रह्म तत्परम् ॥"

इति च ॥ २७-२८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये अष्टमोऽध्यायः ॥ ८ ॥

चाह ॥ विद्वानिति ॥ यत्र तत्रेत्यस्याहरादिषु वा रात्र्यादिषु वेत्यर्थः ॥ २३-२६ ॥

मार्गकथनस्य प्रयोजनमुच्यते "नैते" इति । तत्र परोक्षतः स्मृतिज्ञानमात्रेणेदं फलमित्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ मार्गाविति ॥ योगीत्यस्यार्थो ब्रह्म च पश्येदिति ।

वेदेष्वित्यस्यार्थः "सर्वपुण्यातिगो यात्यसौ ब्रह्म तत्परम्" इति ॥ २७-२८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां अष्टमोऽध्यायः ॥ ८ ॥

मुत्तरायणे मृत्युक्तिः किमर्थेत्यत आह ॥ अत्रेति ॥ गीतायामित्यर्थः ॥ अत्रेति ॥ ब्रह्मप्राप्तौ कालनियमो नेत्यत्रेत्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
अष्टमोऽध्यायः ॥ ८ ॥

॥ अथ नवमोऽध्यायः ॥

सप्तमोक्तं प्रपञ्चयति ॥ १-३ ॥

विष्णुगान्यप्यतत्स्थानि भूतान्येष ह्यसङ्गत इति च। ममात्मा मम देह एव। तदनन्यत्वात्। देहस्याचेतनत्वाशङ्कानिवृत्तये

एतदध्यायप्रतिपाद्यमर्थं दर्शयति॥ सप्तमेति॥ भगवन्महिमानमिति शेषः। न चैवमस्याष्टमत्वेन भवितव्यमिति वाच्यम्। अर्जुनप्रश्नपरिहारेणान्तरितत्वात्।

प्रतिज्ञातं ज्ञानमुच्यते "मया" इति। तत्र "मत्स्थानि सर्वभूतानि", "न च मत्स्थानि भूतानि" इति व्याहतमित्याशङ्कां स्मृत्यैव परिहरति॥ विष्णुगानीति॥ विष्णोः स्पर्शरहितत्वात् स्पृष्ट्वा तत्रस्थत्वाभावादविरोध इत्यर्थः। ननु "मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः" इत्युक्तत्वात् "भूतभृन्न च भूतस्थो ममात्मा" इति पुनरुक्तिरित्यत आह॥ ममेति॥ पूर्वं स्वस्य भूताधारत्वाद्युक्तम्। इदानीं स्वदेहस्येत्यपौनरुक्त्यमिति भावः। ननु भगवल्लक्षणं भूताधारत्वादिकं कथं तद्देहे सम्भवतीत्यत आह॥ तदिति॥ भगवदनन्यत्वाद्देहस्य तत्र भगवल्लक्षणं युक्तमित्यर्थः। नन्वेवं भगवतस्तद्देहस्य चाभेदे पुनः पुनरुक्तिरापन्नेत्यत आह॥ देहस्येति॥ भगवतस्तद्देहस्य च भेदमङ्गीकृत्य देहत्वेन या लोकस्य भगवद्देहेऽप्यचेतनत्वशङ्का जायते

हरिः ॐ॥ षट्कांतर्भावसिद्ध्यर्थमाह॥ इति शेष इति॥ सप्तमानंतर्यमस्य शंकते॥ न चैवमिति॥ अंतरितत्वादष्टमेन व्यवहितत्वादित्यर्थः॥ ज्ञानमिति॥ ज्ञातव्यं प्रमेयमुच्यत इत्यर्थः॥ स्पर्शरहितत्वादिति॥ स्पर्शस्य शक्त्यात्मकत्वेन रामकृष्णाद्यवतारेष्विवाभिव्यक्त्यभावादित्यर्थः॥ स्पृष्ट्वेति॥ भूतलादौ चैत्रादेरिव स्पर्शनेन्द्रियेण तं ज्ञात्वा शैत्यौष्ण्याद्यन्योन्यधर्मसंक्रान्तिमापाद्य....तिभावः॥ भूताधारत्वादीत्यादिपदेन भूतस्थत्वाभावग्रहः॥ देहत्वेनेति॥ हेतुनेति योज्यम्। भगवद्देहोऽचेतनो देहत्वाद्देवदत्तदेहवदित्यचेतनत्व-

'ममात्मा' इत्याह ॥ ४-९ ॥

"अध्यक्षोऽधिपतिः प्रोक्तो यदक्षाण्यस्य चोपरि" इति शब्द निर्णये ॥ १० ॥

मानुषीं मनुष्यसदृशीम्। "तन्वा विष्णुरनन्योऽपि स्वाधीनत्वात् तदाश्रितः" इति च।

तन्निवृत्तयेऽत्र भगवल्लक्षणयुक्ततया तदैक्येन चेतनत्वमुच्यते। अतो न पुनरुक्तिरिति भावः। यद्यत्र देहो विवक्षितस्तर्हि मम देह इति प्रसिद्धशब्दं विहायात्मशब्दप्रयोगे को हेतुरित्यतो वाऽह॥ देहस्येति॥ यद्यत्र मम देह इत्येवोच्येत तर्हि कथमचेतनस्य देहस्य भगवल्लक्षणं स्यादित्याशङ्का स्यात्। तत्परिहाराय तस्य चेतनत्वं च पृथग्वक्तव्यं स्यात्। आत्मशब्दप्रयोगे तूभयमुक्तं स्यात्। द्व्यर्थो ह्ययमात्मशब्दो देहार्थस्तस्य चेतनत्वार्थश्च। अतो ममात्मेत्युक्तमिति भावः॥ ४-९॥

जगत्प्रकृतिवशं त्वमुदासीनश्चेत् तर्हि प्रकृतेरेव स्वातन्त्र्यं प्राप्तमित्यत उच्यते "मया" इति। तत्राप्यध्यक्षपदेनौदासीन्यमेवोच्यत इत्यन्यथाप्रतीतिनिरासाय तत्स्मृत्यैव व्याचष्टे॥ अध्यक्ष इति॥ एतदधिकृत्याक्षाणि यस्यासावध्यक्ष इत्यर्थः॥ १०॥

यद्येवंविधो भवांस्तर्हि कथं केचित्त्वामवजानन्ति, का च तेषां गतिरित्यत उच्यते "अवजानन्ति" इति। तत्र भगवतो मानुषशरीरोक्तेः "भूतभृन्न च भूतस्थः" इत्युक्तिविरोध इत्यत आह॥ मानुषीमिति॥ नात्र भगवद्देहस्य मानुषत्वमुच्यते, येन विरोधः स्यात्। किन्तु मूढानामवज्ञानकारणतया मानुषसादृश्येन प्रतीय-

---

शंकेत्यर्थः॥ उभयमिति॥ देहत्वं भगवल्लक्षणघटकचेतनत्वं चेत्यर्थः। कथमित्यत आह॥ द्व्यर्थो हीति॥ अस्य चोपरीत्यनेन लब्धं विग्रहं दर्शयति॥ एतदधिकृत्येति॥ एतत् विश्वमित्यर्थः। यदक्षाणीत्यस्यार्थोऽक्षाणि यस्यासाविति॥ अक्षाणि चक्षूंषि॥ इत्युक्तिविरोध इति॥ तत्र देहस्य भगव-

"ब्रह्मरुद्ररमादीनां साम्यदृष्टिरनन्यता ।
प्रादुर्भावगतस्यापि दोषदृष्टिरपूर्णता ॥
धर्मदेहावतारादेर्भेददृष्टिश्च सङ्करः ।
अवतारेष्विति ज्ञेयमवज्ञानं जनार्दने ॥
सर्वं मोघं शुभं तस्य योऽवजानाति केशवम् ।
अवरं याति च तमः प्रादुर्भावगतोऽप्यतः ॥
ज्ञेयः केवलचिद्देहो विदोषः पूर्णसद्गुणः ॥"

इति च भविष्यत्पर्वणि ॥ ११-१४ ॥

मानत्वमेवेत्यर्थः । तथाप्यत्र "तनुमाश्रितम्" इति भगवतस्तद्देहस्य च भेदोक्तेः पूर्वोक्तविरोध इत्याशङ्कां स्मृत्यैव परिहरति ॥ तन्वेति ॥ यथा देवदत्तशरीरं तदधीनमेवं भगवद्देहस्यापि तदधीनत्वात् भगवतस्तदाश्रितत्वप्रयोगो गौण इत्यर्थः । अवज्ञानं च न केवलमवरतया ज्ञानं किन्त्वन्यदप्यस्तीति भावेन श्लोकं स्मृत्यैव व्याचष्टे ॥ ब्रह्मेति ॥ "अनन्यता", "अपूर्णता" इत्यत्र दृष्टिरिति संयोज्यम् । अवतारेषु सङ्करो नाम अनवताराणामवतारत्वेन, अवताराणामनवतारत्वेन ज्ञानम् । सर्वस्माद्भिन्नः सर्वोत्तमः स्वगतभेदविवर्जितो यथावदिति च ज्ञातव्यम् ॥ ११-१४ ॥

भगवतो दोषित्वादेवावजानन्तीति किं न स्यादित्यतः तथात्वे देवप्रकृतयोऽप्यवज्ञां कुर्युः, न च तदस्तीत्युच्यते "महात्मानः" इति । तत्रैकत्वेनेत्येतदन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ एकेति ॥

लक्षणोक्त्याऽप्राकृतत्वप्राप्तेरिति भावः ॥ पूर्वोक्तेति ॥ भूतभृदित्यादौ देहस्य तत्स्वरूपत्वोक्तिस्तद्विरोध इत्यर्थः । अनवताराणां पृथ्व्यादीनां अवताराणां वेदव्यासपरशुरामप्रभृतीनां अवमत्वादिना ज्ञानमवज्ञानमित्युक्तम् । महात्मानस्तु ज्ञात्वा भजन्तीत्यत्र तद्ज्ञानस्वरूपम(मा)त्रस्मृतौ तदप्यत्र ग्राह्यमिति स्वयमाह ॥ सर्वस्माद्भिन्न इत्यादिना ॥ यथावदित्यत्र ज्ञानमिति योज्यम् ॥

"एकमूर्तिश्चतुर्मूर्तिरथवा पञ्चमूर्तिकः ।
द्वादशादिप्रभेदो वा पूज्यते सज्जनैर्हरिः ॥"

इति च ॥ १५ ॥

"अर्च्यत्वादृक् समत्वाच्च निजरूपेषु साम सः ।
याज्यत्वात्स यजुर्यज्ञः सार्वज्ञात्पुरुषोत्तमः ॥
क्रतुः कृतिस्वरूपत्वात् स्वधाऽनन्यधृतो यतः ।
मानात् त्रातीति मन्त्रोऽयमुष्टानां निधिरौषधम् ॥
आ ज्यायस्वादाज्यनामा दर्भो दरधरो यतः ।
आहूतत्वाद्धुतं चायमग्निर्नेताऽगतेर्यतः ॥" इत्यादि च ।
तत्तत्पदार्थभिन्नोऽपि तत्तन्नामैवमच्युतः ।
स्वातन्त्र्यात् सर्वकर्तृत्वात् गुणानन्त्याच्च केवलम् ॥"

इति च ।

एकत्वेनेत्यादिपदचतुष्टयस्य एकमूर्तिरित्यादि यथाक्रमं व्याख्यानम् ॥ १५ ॥

प्रतिज्ञातं विज्ञानमुच्यते "अहं क्रतुः" इति । तत्र हरेः क्रत्वादिस्वरूपत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ अर्च्यत्वादिति ॥ ऋगञ्चन इति धातुः । "सर्वदा समः, तेन साम" इति हि श्रुतिः । यदस्ति तज्जानातीति यज्ञः । स्वात्मानं धत्त इति स्वधा । मानात् त्रातीति मन्त्रो, ज्ञातो रक्षतीत्यर्थः । उष प्लुष दाह इति धातोस्तापत्रयदग्धा उष्टाः । दर्भशब्दो दरं बिभर्तीत्यन्यत्रस्थो व्याक्रियते । आहूतत्वाद्यज्ञादाविति शेषः । अगतेः स्वशक्त्या गन्तुमशक्तस्य जगतः ।

क्रत्वादिभिन्नस्यैव हरेर्योगवृत्त्या तत्तन्नामकत्वमित्यत्र स्मृत्यन्तरं चाह ॥ तत्तदिति ॥ एतत्स्मृतावपि पूर्वमेवास्यार्थस्योक्तत्वं द्योतयत्येवं-

---

तदस्तीति ॥ यत्प्रामाणिकमित्यर्थः ॥ दरं बिभर्तीति ॥ शंखं बिभर्तीत्यर्थः ॥

"ओमित्याक्रियते यस्मादोङ्कारो भगवान् हरिः" इति च ।

"पातीति स पिता मानान्माता यत्स पितुर्महान् ।
पितामहो निधातृत्वान्निधानं भीतरक्षणात् ॥
शरणं व्यञ्जनाच्चैव बीजमित्युच्यते प्रभुः ॥" इति च ।

प्रलयकाले संहर्तृत्वात् प्रलयः । अन्यदाऽपीति मृत्युः ।

"प्राणगः प्राणधर्ता यदमृतं प्रविलापयन् ।
विश्वं प्रलय इत्युक्तो मृत्युरन्यत्र मारणात् ॥" इति च ।

शब्दः । तत्तत्पदार्थभिन्नत्वे हेतुः स्वातन्त्र्यं सर्वकर्तृत्वं च । भिन्नत्वे कथं तत्तन्नामवाच्यत्वम् ? केवलं तत्तच्छब्दप्रवृत्तिनिमित्तानन्तगुणत्वादेवेत्यर्थः । तदधीनत्वादर्थवदिति न्यायेन स्वातन्त्र्यादिकं च तत्तच्छब्दवाच्यत्वे कारणम् । ओंकार इत्यादेरर्थं स्मृत्यन्तरेणाह ॥ ओमिति ॥ आक्रियते आहूयते । पाति पालयति । मानात् ज्ञानात् ॥ पितुर्महानिति ॥ जगत्पितुः विरिञ्चादपि महानित्यर्थः । निधातृत्वात् धारकत्वात् । व्यञ्जनात् जगदभिव्यञ्जकत्वात् । प्रलयमृत्युशब्दयोरर्थभेदं सप्रमाणकमाह ॥ प्रलयेति ॥ प्रलयादन्यदाऽपि संहर्तृत्वादित्यर्थः । इन्द्रियेषु स्थित्वा तेषां देहधारणेन मृतिं परिहरति यस्मात्तस्मादमृत-

---

एतत्स्मृताविति ॥ तत्तत्पदार्थेति स्मृतौ ॥ पूर्वं पूर्वशेषे । एतस्यार्थस्यार्कादिनामार्थस्योक्तत्वं द्योतयतीत्यर्थः । अन्यथा परामर्शविषयाभावादेवंशब्दो न युक्तः स्यात् । मूलकृता पूर्वशेषानुक्तिस्तु पूर्वस्मृत्यैकार्थत्वादिति भावः । स्वातन्त्र्यसर्वकर्तृत्वे न केवलं भिन्नोपीत्यत्र हेतू । किन्तु तत्तन्नामैवमुच्यत इत्यत्रापि हेतू इत्याह ॥ तदधीनत्वादिति ॥ शब्दप्रवृत्तिनिमित्तानां तदधीनत्वादीशाधीनत्वात् शब्दजातमर्थवत् भगवद्रूपार्थवत् तद्वाचकमिति सूत्रोक्तन्यायेनेत्यर्थः ॥ कारणमिति ॥ भृत्यगतजयं प्रति राज्ञो जयिशब्दवाच्यत्व इवेति भावः । प्राणगः प्राणधर्तेत्यादेरर्थमाह ॥ इन्द्रियेषु स्थित्वेत्यादि ॥ कदा विश्वं

"सत् साधुगुणपूर्णत्वादस्मान्नान्यो गुणाधिकः ।
यतोऽतोऽसदिति प्रोक्तं विष्ण्वाख्यं परमं पदम् ॥"

इति शब्दनिर्णये ॥ १६-१९ ॥

"अनन्यदेवतायागाद् भक्त्युद्रेकादकामनात् ।
सदा योगाच्च वैशिष्ट्यं त्रैविद्याद्वैष्णवादपि ॥

मित्यर्थः । प्रविलापयन् प्रलय इति शेषः । अहं क्रतुरित्यादेरशेषक्रत्वादिभोक्तृत्वं चार्थः ॥ १६-१९ ॥

तत्र भगवतः सर्वयज्ञादिभोक्तृत्वे त्रैविद्यभागवतयोः फलभेदो न स्यादित्याशङ्क्य परिह्रियते "त्रैविद्याः" इति । तदेव प्रपञ्चयते "येऽपीति"। तत्र त्रैविद्यभागवतयोः भगवद्याजित्वसाम्येऽपि फलभेदः सहेतुकमुक्तः । तस्य स्फुटमप्रतीतेः स्मृत्यैव तद्याचष्टे ॥ अनन्येति ॥ अन्यदेवताभक्ता यजन्त इति त्रैविद्यानामन्यदेवतायाजित्वमुक्तम् । भागवतानां तत्प्रतियोगितयोक्तस्य "अनन्याः" इत्यस्यार्थः "अनन्यदेवतायागात्" इति । "न तु मामभिजानन्ति तत्त्वेन" इति त्रैविद्यस्यातिशयभक्तिज्ञानाभाव उक्तः । तत्त्वज्ञानाभावे भक्त्यभावात् । तत्प्रतियोगितयोक्तस्य "पर्युपासते" इत्यस्यार्थो "भक्त्युद्रेकात्" इति । भक्त्युद्रेकेणोपासनस्यैव पर्युपासनत्वात् । "स्वर्गतिं प्रार्थयन्ते कामकामाः" इति त्रैविद्यानां कामनमुक्तम् । तत्प्रतियोगितयोक्तस्य "चिन्तयन्तो माम्" इत्यस्यार्थः "अकामनात्" इति । मामेव चिन्त-

---

प्रविलापयन्नित्याकाङ्क्षायामाह ॥ प्रलय इति शेष इति ॥ उत्तरत्र शंकोत्थानाय भाष्योक्तार्थांतरमप्यत्र ग्राह्यमित्याह ॥ अहं क्रतुरिति ॥ सहेतुकमुक्त इति ॥ भगवद्भजनप्रकाररूपो यः फलोपायस्तद्भेदहेतुकः फलभेद उक्त इत्यर्थः । तमेव भजनप्रकाररूपोपायभेदं फलभेदहेतुं व्यनक्ति ॥ अन्यदेवतेत्यादिना ॥ उक्तमिति ॥ ययेति श्लोके उक्तमित्यर्थः ॥ तत्प्रतियोगितया तद्विरोधितयेत्यर्थः ॥ उक्तस्येति ॥ गीतायामुक्तस्येत्यर्थः ॥ उक्त इति ॥ अत्रैवोपरितनश्लोके उक्त

स्याद्धि भागवतस्यैव तेन ब्रह्मादयोऽखिलाः ।
अश्वमेधादिभिर्यज्ञैरपि केशवयाजिनः ॥
वैष्णवा इति बुद्ध्यैव मानयन्त्यन्यदेवताः ॥" इत्याग्नेये ।
"सम्यग् गुणगणज्ञानादुपासा पर्युपासना ।"
इति च ॥ २०-२३ ॥

मामिष्ट्वा प्रार्थयन्त इत्युक्तत्वात् जानन्तोऽपि नाभिजानन्ति तत्त्वेन ।

यन्तो न तु काममित्यर्थः । "मामिष्ट्वा मामैव यजन्ति" इति त्रैविद्यानामन्ते समर्पणमुक्तम् । तत्प्रतियोगितयोक्तस्य "नित्याभियुक्तानां" इत्यस्यार्थः "सदायोगात्" इति । सर्वदा स्मरणोद्देशादियोगादित्यर्थः । वैशिष्ट्यं फलेनाधिक्यम् । "योगक्षेमं वहामि" इत्यपुनरावृत्तिपुरुषार्थदानस्योक्तत्वात् । वैष्णवादपि भगवद्याजित्वेऽपीत्यर्थः । "पशून् देवताभ्यः प्रत्यौहत्" इत्यादौ ब्रह्मादीनामप्यन्यदेवतायाजित्वं श्रूयत इत्यत आह ॥ वैष्णवा इति ॥ न तु देवतात्वेनेत्यर्थः ।

ननु त्रैविद्यानामविधिपूर्वकत्वविवरणरूपेण "न तु ममाभिजानन्ति" इति पदेन तत्त्वज्ञानाभाव उक्तः । तत्प्रतियोगितया भागवतस्य तत्त्वज्ञानं किमिति नोक्तमित्यतः पर्युपासनपदेनैवोक्तमिति भावेन तत्स्मृत्यैव व्याचष्टे ॥ सम्यगिति ॥ २०-२३ ॥

"न तु मामभिजानन्ति तत्त्वेनातः च्यवन्ति ते" इत्यत्र भगवन्तमजानतां तत्त्वेनेति विशेषणात् विपरीतं जानतां वाऽत्रैविद्यानां स्वर्गभोगानन्तरं च्यवनमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ मामिष्ट्वेति ॥ न चात्र "न तु मामभिजानन्ति तत्त्वेन" इत्युक्तत्वात् भगवन्तमजानतां मिथ्याज्ञानिनां वा त्रैविद्यानां स्वर्गात् च्यवनमुच्यत इति कल्प्यम् । "न तु मामभिजानन्ति तत्त्वेन" इत्यस्य सर्वदेववरत्वेन जानन्तोऽपि ब्रह्मरुद्रादीनां तत्परिवारत्वादिकं सम्यङ्ग न जानन्तीत्यर्थोपपत्तेः ।

इत्यर्थः ॥ कामनमुक्तमिति ॥ पूर्वश्लोके ॥ वैष्णवादपीत्यनुमादः । भगवदि-

सर्वदेववरत्वेन यो न जानाति केशवम् ।
तस्य पुण्यानि मोघानि याति चान्धन्तमो ध्रुवम् ॥ इति च ।

मोघाशा मोघकर्माण इत्युक्तत्वाच्च न केवलाज्ञविषयं मिथ्याज्ञानिविषयं वा "च्यवन्ति ते" इत्यादि । अतः सर्वाधिक्यं विष्णोर्ज्ञात्वाऽपि ब्रह्मादीनां तत्परिवारत्वादिकमजानतामिदं फलम् ॥ २४-२८ ॥

"नास्य भक्तोऽपि यो द्वेष्यो न चाभक्तोऽपि यः प्रियः ।
किन्तु भक्त्यनुसारेण फलदोऽतः समो हरिः ॥"

इति पाद्मे । प्रीत्या मयि ते ॥ २९-३१ ॥

कुतोऽयमर्थः कल्प्यते ? "त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते" इति त्रैविद्यस्यान्ते सर्वसमर्पणेन भगवद्यजन-प्रार्थनयोरुक्तत्वात् सर्वदेववरत्वाज्ञाने तदसम्भवात् । अभिशब्द-बलाच्चेति भावः ।

इतश्च स्वर्गभोगानन्तरं च्यवनं नात्र केवलाज्ञानां मिथ्याज्ञानिनां चोच्यत इत्याह ॥ सर्वेति ॥ सर्वदेववरत्वेनेति केवलाज्ञानां यज्ञादि-कर्माणि मोघानि मिथ्याज्ञानिनां विपरीतफलानि भवन्तीत्युक्तत्वात् "मोघाशा" इति विपरीतज्ञानिकर्मणां मोघत्वस्योक्तत्वाच्च न स्वर्ग-भोगानन्तरं च्यवनमत्र केवलाज्ञस्य मिथ्याज्ञानिनो वोच्यत इत्यर्थः । मिथ्याज्ञानी चेद् याति चान्धन्तमो ध्रुवमिति । उक्तं विवृण्वन्नुप-संहरति ॥ २४-२८ ॥

भक्त्युपहृतमश्नामीति भक्तप्रियत्वमुक्तम् । तथासत्यभक्तेष्व-प्रीतिश्च स्यात् । ततश्च भगवतो वैषम्यमापन्नमित्यत उच्यते "समोऽहं" इति । तदस्फुटार्थत्वात् स्मृत्यैव व्याचष्टे ॥ नास्येति ॥ भक्तोऽपि यो द्वेष्योऽसौ नास्ति । अभक्तोऽपि यः प्रियोऽसौ नास्तीत्यर्थः । अनेन "न मे द्वेष्योऽस्ति न प्रियः" इत्यत्रापि भक्तो-भक्तश्चेति संयोज्यमित्युक्तं भवति । भक्त्यनुसारेण फलद इति

"पापादिकारिताश्चैव पुंसां स्वाभाविका अपि ।
विप्रत्वाद्यास्तत्र पुण्याः स्वाभाव्या एव मुक्तिगाः ॥
यान्ति स्त्रीत्वं पुमांसोऽपि पापतः कामतोऽपि वा ।
न स्त्रियो यान्ति पुंस्त्वं तु स्वभावादेव याः स्त्रियः ॥

भक्तेष्वेव प्रीतिं करोम्यभक्तेष्वेवाप्रीतिमित्यर्थः। यदि भक्तेषु द्वेषम् अभक्तेषु प्रीतिं कुर्यात्तर्ह्येव विषमः स्यात्। न चैवम्। अतः सम एवेति भावः । ये भजन्ति तु मां भक्त्या तेषु प्रीतिं करोमीति वक्तव्यम्। किमेतद्भक्तसाधारणं मयि त इत्याद्युच्यत इत्यत आह ॥ प्रीत्येति ॥ वर्तन्त इत्यादि शेषः। तदेवोच्यत इति भावः ॥ २९-३१ ॥

ननु भगवदाश्रिताः सर्वेऽपि पुण्या एव। 'सत्त्वाधिकः पुल्कसोऽपि यस्तु भागवतः सदा' इत्यादेः । अतः कथं "मां हि पार्थ" इति स्त्रीवैश्यशूद्राणां पापयोनय इति विशेषणं, ब्राह्मणराजर्षीणां पुण्या इति विशेषणमुच्यत इत्यत आह ॥ पापादीति ॥ स्वतो विप्राद्युत्तमवर्णानां क्षत्रियाद्यधमवर्णित्वं पापकारितम्। स्वतः शूद्राद्यधमवर्णानां वैश्याद्युत्तमवर्णित्वं पुण्यकारितमित्यर्थः। अत्रादिपदेन कामश्च भवति। स्वाभाविकविप्रत्वाद्याः पुण्या इत्युच्यन्त इत्यर्थः । तल्लक्षणमाह ॥ मुक्तिगा इति ॥ मुक्ताववशिष्यमाणविप्रत्वाद्याः स्वाभाविका इत्यर्थः।

यथा स्वतो विप्रादीनां क्षत्रियादित्वं स्वतः क्षत्रियादीनां विप्रादित्वं भवति तथा स्वाभाविकपुंसां स्त्रीत्वं, स्वाभाविकस्त्रीणां पुंस्त्वं स्यात्किमित्याशङ्कायामाह ॥ यान्तीति ॥ पापतो यथा सुद्युम्नस्य इलात्वं, कामतो यथाऽग्निपुत्राणामप्सरस्त्वम्। इलायाः सुद्युम्नत्व-

---

त्यादि व्याख्या ॥ इत्यादाविति ॥ वाजसनेयादौ ॥ अभिशब्दबलाच्चेति ॥ तस्य सम्यगर्थकत्वादिति भावः ॥ इत्यादि शेष इति ॥ तेष्वहं प्रीत्या वर्ते इत्यादिपदार्थः ॥ तदेवेति ॥ भक्तेष्वेव प्रीतिं करोमीत्येतदेवेत्यर्थः ॥ यस्तु भागवतस्सदेत्यादेरिति ॥ अष्टादशे वक्ष्यमाणस्मृतेरित्यर्थः ॥ आदिपदेनेति ॥ पापादीत्यादिपदेनेत्यर्थः ॥ सुद्युम्नस्य इलात्वमिति ॥ व्यक्तमेतन्नवमस्कन्धे

15

पुंसा सहैव पुंदेहे स्थितिः स्याद्वरदानतः ।
तज्जन्मनि वराः पापजाताभ्यो निजसत्स्त्रियः ।
सर्वेषामपि जीवानामन्त्यदेहो यथा निजः ॥
मुक्तौ तु निजभावः स्यात्कर्मभोगान्ततोऽपि च ।"

दर्शनात् कथं "न स्त्रियो यान्ति पुंस्त्वं" इत्युच्यत इत्यत आह ॥ स्वभावादिति ॥ स्वभावादेव स्त्रिया अम्बायाः शिखण्डित्वं स्थूणाकर्णवरेण दृष्टमित्यत आह ॥ पुंसेति ॥ अम्बायाः स्थूणाकर्णवरेण तद्देहे तेन सह तस्मिन् जन्मनि स्थितिरेवासीन्न तु स्वातन्त्र्येण पुरुषदेहः । तावन्मात्रं त्वङ्गीक्रियत इति भावः । स्वभावात् पुंसां पापतः स्त्रीत्वे तासां स्वभावतः स्त्रीणां च मध्ये कासां श्रेष्ठत्वमित्यपेक्षायामाह ॥ वरा इति ॥ पापजाताभ्य इत्यनेन कामतो जातानां वरत्वं सूचितम् । स्वभावतः स्त्रीणां पापजाताभ्यः श्रेष्ठतायाम् इलादिभ्य आसुरीणां श्रेष्ठत्वं प्रसज्यते । तन्निरासार्थमुक्तं—सत्स्त्रिय इति । अत्रावरत्वमौपाधिकमभिप्रेतम् । स्वाभाविकावशेषस्य कालान्तरं चाह ॥ सर्वेषामिति ॥ चरमदेहः स्वभावानुसारीत्यर्थः । पूर्वानुवादेन कालान्तरं चाह ॥ मुक्तौ त्विति ॥ इति वचनानुसारेण अविरुद्धतया व्याख्यातुं शक्यत्वा-

---

द्वितीये, होतुस्तद्व्यभिचारेण कन्येळा नाम साऽभवदित्यादिना ॥ अग्निपुत्राणामप्सरस्त्वमिति ॥ पुत्रा ह्यग्नेः पूर्वमासंश्च तेऽथ स्त्रीत्वप्राप्त्या इत्यादिना राजकुलेषु जाता इत्यन्तेन ग्रन्थेन व्यक्तमेतद्भारततात्पर्ये विंशेऽध्याये। अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमागताः । भर्तारं वा जगद्योनिं वासुदेवमजं विभुमिति महाकौर्मे इति प्रथमस्कन्धतात्पर्ये दशमेऽध्याये च व्यक्तम् ॥ अंबाया इति ॥ भविष्यति पुमान् इति, साऽम्बा ततोऽजनि । नाम्ना शिखण्डिनीत्यादिना स शिखण्डी नामतोऽभूदित्यन्तेन व्यक्तमेतद्भारततात्पर्ये (च) एकादशेऽध्याये ॥ तत्रेति ॥ इलादौ श्रेष्ठत्वमुत्तमकुलजत्वाद्युपाधिकृतमित्यर्थः ॥ कालान्तरं चेति ॥ न केवलं वरत्वमिति चार्थः । स्वाभाव्या एव मुक्तिगा इति प्रागुक्तत्वान्मुक्तौ चेति पुनरुक्तिरितिशंकाव्युदासायाह ॥ पूर्वानुवादेनेति ॥ अविरुद्धतयेति ॥

इति भविष्यत्पर्ववचनात् पापयोनयः पुण्या इति विशेषणम् ॥३२-३३॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये नवमोऽध्यायः ॥ ९ ॥

वेतद्विशेषणं युक्तमित्यर्थः। अनेन एतदेवं व्याख्यातं भवति। ये पापादियोनयोऽस्वाभाविकाः स्त्रियो वैश्यास्तथा शूद्रा ब्राह्मणा राजर्षयश्च तेऽपि यान्ति परां गतिम्। किं पुनः पुण्याः स्वाभाविका एते स्त्रीवैश्यादयः। अत्र पापयोनयः स्त्रिय इतिवत् पुमांस इत्यनुक्तिः पापादिकारितपुंसामभावादिति ॥ ३२-३३ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां नवमोऽध्यायः ॥ ९ ॥

सत्त्वाधिक इति प्रागुक्तवचनाविरुद्धतयेत्यर्थः। दुर्गमत्वादर्थं व्यनक्ति ॥ अनेनेति ॥ पापादिकारिण इति वचनेनेत्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
नवमोऽध्यायः ॥ ९ ॥

॥ अथ दशमोऽध्यायः ॥

हरिः ॐ ॥ उपलक्षणार्थं सुरगणा इत्यादि ॥ १-२ ॥

अनस्याप्यादिरनादिः ॥ ३ ॥

"बुद्धिर्बोधनिधित्वात्तदन्तःकरणमुच्यते" इति शब्दनिर्णये ॥ ४ ॥

हरिः ॐ ॥ षष्ठे ध्यानमुक्तम् ॥ तत्र ध्येयतया भगवद्विभूतिरूपाण्यत्रोच्यन्त इत्यध्यायार्थस्यातिरोहितत्वादनुक्तिः ।

भूयो महिमानं शृण्विति प्रतिज्ञातमुच्यते "न मे विदुः" इति । तत्र मे महिमानं सुरगणाः महर्षयश्च न विदुरित्येवोक्तत्वाद् गन्धर्वादयो विदुरित्यन्यथाप्रतीतिनिरासायाह ॥ उपलक्षणार्थमिति ॥ सुरगणा महर्षय इति पदद्वयं सर्वोपलक्षकम् । सुरगणादीनामज्ञानेऽन्येषां सुतरां तद्भावादिति भावः ॥ १-२ ॥

स्वज्ञानान्मोक्षाख्यमहिमाऽत्रोच्यते "यो माम्" इति । तत्र अजमित्युक्तत्वादनादिमिति पुनरुक्तिरित्यत आह ॥ अनस्येति ॥ अनो मुख्यप्राणः ॥ ३ ॥

बुद्ध्यादिप्रदत्वमहिमा चोच्यते "बुद्धिः" इति । तत्र बुद्धिज्ञानशब्दयोरेकार्थत्वमित्यतो बुद्धिशब्दस्यार्थान्तरत्वे स्मृतिमाह ॥ बुद्धिरिति ॥ भुत् बोधः । तदाश्रयत्वात् जलधिरितिवत् तज्ज्ञानाश्रयोऽन्तःकरणं बुद्धिरित्युच्यत इत्यर्थः ॥ ४ ॥

हरिः ॐ ॥ भाष्योक्तमध्यायार्थमाह ॥ षष्ठ इति ॥ मन्मना भवेति नवमान्ते स्मारितं चेत्यपि ग्राह्यम् । तेन षष्ठानन्तर्यशंकानवकाशः । भोक्तारं यज्ञतपसामिति पञ्चमान्तादौ तत्र तत्र ध्येयमुक्तम् । तथापि विशिष्टाधिकारिणां भगवद्विभूतय उपास्या इति भावेनोक्तम् ॥ भगवदित्यादि ॥ विभूतिशब्दार्थोऽग्रे व्यक्तः ॥ तद्भावादिति ॥ अज्ञानभावादित्यर्थः ॥ भुत् बोध इति ॥ बुध अवबोधन इत्यतो भावे क्विप् । तदुपपदे दधातेर्घोः किरिति किरिति

"मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः ।
वसिष्ठश्च महातेजाः पूर्वे सप्तर्षयः स्मृताः ॥" इति ब्राह्मे ।

"मनवो बोधवैशेष्याद् देवा ब्रह्मादयः स्मृताः ।
विप्रादिवर्णभेदेन चत्वारो बहवोऽपि ते ॥
दीनत्वाद्देवनामानस्त्वन्ये ब्रह्मादिनामकाः ।
अवैष्णवकृतो यज्ञो दीनैर्देवैस्तु भुज्यते ॥

न केवलं भूतानां बुद्ध्यादिकं मत्तो भवत्यपि तु सर्वभूतानि चेत्युच्यते "महर्षयः" इति । तत्र प्रतिमन्वन्तरं सप्तर्षिभेदोक्तेरत्र के विवक्षिता इति चेत्पूर्वमन्वन्तरस्था एव । पूर्वे इति विशेषणात् । के पूर्वमन्वन्तरस्था इत्यतस्तान् स्मृत्यैव दर्शयति ॥ मरीचिरिति ॥ चतुर्दशमनुषु चत्वारोऽत्र के विवक्षिता इत्यतो न केवलमत्र मनुपदेन प्रसिद्धमनवोऽपि तु सर्वदेवाः । तेषां चतुष्ट्वं विप्रादिवर्णविवक्षयेत्यत्र स्मृतिमाह ॥ मनव इति ॥ मनु अवबोधन इति धातोः बोधवत्त्वान्मनव इत्युक्ते बोधस्य सर्वप्राणिसाधारणत्वात् को विशेषो देवादीनामित्यतो बोधवैशेष्यादित्युक्तम् । ननु देवा इति वा ब्रह्माद्या इति वा प्रसिद्ध-प्रयोगं विहाय किमप्रसिद्धप्रयोगेणेत्यत आह ॥ दीनत्वादिति ॥ देवादि-शब्दानामसुरसाधारणत्वात् मनुशब्दस्यैव देवेष्वसाधारणत्वात् तस्यैव प्रयोग इति भावः । द्विविधदेवानां कुत्र विनियोग इत्यत आह ॥ अवैष्णवेति ॥ एतेनैव "एषां लोक इमाः प्रजाः" इत्यस्याप्यभिप्रायो वर्णितो भवति ॥ ६ ॥

भाव: ॥ प्रसिद्धमनव इति ॥ स्वायंभुवस्वारोचिषरैवतोत्तमाख्याः प्रसिद्धमनव इत्यर्थः ॥ विप्रादिवर्णविवक्षयेति ॥ देवेषु केचित् ब्राह्मणाः केचन क्षत्रियाः केचन वैश्याः केचन शूद्रास्संतीति तद्विवक्षया चतुष्ट्वमित्यर्थः । व्यक्तमेत-च्चातुर्विध्यं वाजसनेयभाष्ये प्रथमेऽध्याये विष्णोर्ब्राह्मणजातिस्सन् जज्ञे ब्रह्मा चतुर्मुख इत्यादिनेति ज्ञेयम् ॥ एतेनैवेति ॥ मरीच्याद्यास्त्वित्यादिस्मृति-

वैष्णवैस्तु कृतो यज्ञो देवैर्हि मनुनामकैः ।
मरीच्याद्यास्तु तत्पुत्रा मानवा नामतः स्मृताः ॥
तत्पुत्रपौत्रा मुनयस्तथा मानवमानवाः ।
तेभ्यो मनुष्या इत्येषा सृष्टिर्विष्णोः समुत्थिता ॥

इति महाविष्णुपुराणे ॥ ६ ॥

"युज्यते येन योगोऽसावुपायः शक्तिरेव च ।" इति च । विशिष्टभवनं विभूतिः । महत्त्वम्, विविधभवनं वा । योगः सामर्थ्यम् ॥ ७ ॥

उक्तमाहात्म्यज्ञाने फलमुच्यते "एतां" इति । तत्र कर्मसमाधियोगयोरत्रानुक्तेः कथमेतं योगमित्युच्यत इत्यतो नात्र कर्मयोगादिर्विवक्षित इति भावेन योगशब्दस्यार्थान्तरं स्मृत्या दर्शयति ॥ युज्यत इति ॥ युज्यते उपेयं सम्भवतीत्यर्थः । शक्तिश्च, युज्यते शक्यमनयेति योग इत्यर्थः । नन्वत्राणिमाद्यैश्वर्यस्यानुक्तत्वात् कथमेतां विभूतिमित्युच्यत इत्यत आह ॥ विशिष्टेति ॥ अभिप्रायमाह ॥ महत्त्वमिति ॥ महत्त्वं च सुरगणाद्यविज्ञेयतयोक्तमिति भावः । "वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः" इति पृष्टे महत्त्वस्यानुक्तत्वात् कथं विभूतिशब्दो महत्त्वार्थ इत्यत आह ॥ विविधेति ॥ तत्र विविधभवनं विभूतिशब्देनाभिप्रेतमिति भावः । अस्तु योगशब्दस्योपायादिवाचित्वं तथाप्यत्र कोप्युपायो नोक्त इत्यतोऽत्र शक्तिरेवार्थः । सा चोक्तेति भावेनाह ॥ योग इति ॥ ७ ॥

शेषोदाहरणेनेत्यर्थः ॥ उपेयमिति ॥ प्राप्यमित्यर्थः । अन्यव्यावृत्तिभ्रांतिनिरासायैवकारत्यागेनान्वयपूर्वमुपादत्ते ॥ शक्तिश्चेति ॥ योग इत्यन्वयः ॥ शक्यमिति ॥ शक्तिविषयतायोग्यमित्यर्थः ॥ सा चोक्तेति ॥ भूतानां बुद्ध्यादिभूतधर्माणां च स्रष्ट्त्वोक्त्या प्रभवमित्यस्य प्रभावमिति व्याख्यानाद्वा शक्तिरुक्तैवेत्यर्थः ॥ तथा भजन्त इति ॥ सर्वकारणत्वादिज्ञाने विश्वासेनेति

"भजन्ते माम्" इत्यनेन जीवेश्वरैक्यशङ्कां निवर्तयति ॥ ८ ॥

मद्गतप्राणाः मद्विषयचेष्टाः ॥ ९-२० ॥

"येषां विष्णुस्वरूपाणां सन्निधेरन्यवस्तुषु ।
विशिष्टत्वं स्वजातेः स्याद्विभूत्याख्यानि तानि तु ॥
ब्रह्मनामा ब्रह्मगतः सर्वदैवतसञ्चयात् ।
आधिक्यहेतुर्भगवान् सामस्थः सामनामकः ॥
आधिक्यहेतुर्वेदेभ्यस्तथाऽश्वत्थस्थितो हरिः ।
उत्कर्षहेतुर्वृक्षेभ्यो य एवाश्वत्थनामकः ॥"

इत्यादि विभूतितत्त्वे ।

उक्तार्थे विश्वासोत्पादनार्थं सन्ति च तथा भजन्त इत्युच्यते "अहम्" इति । तत्र "अहं सर्वस्य प्रभवः" इत्यादिनैव मामित्यस्य सिद्धत्वात् किं पुनः "भजन्ते माम्" इत्युच्यत इत्यत आह ॥ भजन्ते मामिति ॥ मामित्यनुक्ते जीवैश्वरैक्याभिप्रायेण स्वात्मानमुद्दिश्याहमेव सर्वस्य प्रभव इत्यादि मत्वा भजन्त इति प्रतीतिः स्यात् । तन्निवृत्त्यर्थं मामित्युक्तमित्यर्थः ॥ ८ ॥

प्राणानां भगवद्गतत्वं कथमित्यत आह ॥ मद्गतेति ॥ ९-२० ॥

अत्र विभूतिरूपप्रश्ने "अहं ज्योतिषां रविः" इत्याद्युच्यते । तत्र स्वजात्यादिविशिष्टवस्तून्येव भगवतो विभूतिरूपाणीत्यन्यथाप्रतीतिं स्मृत्यैव निवारयति ॥ येषामिति ॥ स्वजातेरिति स्वजात्येकदेशाद्युपलक्षणम् । तदेव प्रपञ्चयति ॥ ब्रह्मेति ॥ आधिक्यहेतुरित्यादौ ब्रह्मण इत्यादि शेषः । इतश्च न रथ्यादिकमेव भगवतो विभूतिरूपं किन्तु

वार्थः ॥ स्वजात्यादीति ॥ स्वजात्यादिभ्यो विशिष्टवस्तुनि श्रेष्ठवस्तुनीत्यर्थः । वासवादेः स्वजातिसर्वदेवेभ्यः श्रैष्ठ्याभावात् क्वचिद्विजातितोऽपि श्रैष्ठ्यस्य गीतायामुक्तेराह ॥ स्वजात्येकदेशाद्युपलक्षणमिति ॥ इत्यादि शेष इति ॥

"केषु केषु च भावेषु" इत्युक्तत्वाच्च ब्रह्मादिजीवेभ्योऽन्यदेव विभूतिरूपम् ।

"द्विविधं वैभवं रूपं प्रत्यक्षं च तिरोहितम् ।
कपिलव्यासकृष्णाद्यं प्रत्यक्षं वैभवं स्मृतम् ॥
भिन्नं ब्रह्मादिजीवेभ्यो जडेभ्यश्चापि तद्गतम् ।
स्वजात्याधिक्यदं तेषां तत्तिरोहितवैभवम् ॥" इत्यादि च ।

"आत्माऽऽततगुणत्वेन रवज्ञेयो यतो रविः ।
उदवन्मेघचलनान्मरीचिः साम साम्यतः ॥

तत्रस्थमेवेत्याह ॥ केष्विति ॥ यद्यत्र रव्यादिकमेव विभूतिरूपं न तु तदन्तर्गतमिति स्यात् तदा "केषु केषु च भावेषु चिन्त्योऽसि" इति प्रश्नाननुगुणत्वं परिहारस्य स्यादिति भावः । जीवपदं जडस्याप्युपलक्षणम् । यदि तत्तत्पदार्थगतमेव विभूतिरूपं तर्हि "सिद्धानां कपिलो मुनिः", "मुनीनामप्यहं व्यासः", "वृष्णीनां वासुदेवोऽस्मि", "रामः शस्त्रभृतामहम्", "आदित्यानामहं विष्णुः" इत्युक्तानां कपिलादीनामपि भगवद्रूपत्वाभावः स्यादित्याशङ्कां स्मृत्यैव परिहरति ॥ द्विविधमिति ॥ वैभवं रूपं विभूतिरूपम् । अत्रापि स्वजातिपदमन्योपलक्षकम् । केषु केष्विति प्रश्नस्तिरोहितरूपविषय इति भावः ।

तत्तन्नामकं तत्तद्वस्तुगतं विभूतिरूपमित्युक्तम् । तत्र तत्तत्पदार्थैक्याभावे कथं तत्तन्नामकत्वमित्यतो योगवृत्त्या विभूतिरूपाणां तत्तन्नामकत्वं स्मृत्यैव दर्शयति ॥ आत्मेति ॥ रवेण वेदशब्देन ईयते ज्ञायत इति रविः । इण् गताविति धातुः । मरशब्दोदितोदकवान् मेघो मरी । तं चालयतीति मरीचिः । सुखात्सुखमतिसुखं शशम् । तद्वान् शशी । साम साम्यतः, वेदो वेदनतः इत्यनेन सामवेदोऽस्मीत्येतद्

वेदेभ्य आधिक्यहेतुरित्यत्र साम्न इति उत्कर्षहेतुरित्यत्राश्वत्थस्येत्येवं रूपेणेति भावः ॥ इण् गताविति धातुरिति ॥ रवशब्दोपपदादिणः क्विपि उपपदान्त-

सुखात् सुखत्वात्तु शशी वेदो वेदनतो हरिः ।
वासवर्ती वासवोऽसौ चेतोनेता तु चेतना ॥
पालकैर्वननीयत्वात् पवनो बोधनान्मनः ।
पावकः शोधनान्मेरुरीरो यन्माऽस्य सागरः ॥
सारस्य गरणात् स्कन्दो जगतः स्कन्दनाद् भृगुः ।
भर्जनाज्जपयज्ञश्च जातपो याज्य एव च ।
अश्वाकारस्थितोऽश्वत्थ ऐरं[1] श्रीश्च तदाश्रयः ॥
ऐरावतो नराणां यद् दद्यात्सर्वं स नारदः ।
ह्रीश्रीसमाश्रयत्वाच्च हिमालय इतीरितः ॥

व्याख्यातम् । वासः सर्वदेशः । तत्र वर्तत इति वासवः । पाः पालकाः, तैर्वननीयत्वाद् भजनीयत्वात् पवनः । वन षण सम्भक्ताविति धातुः । पव शुद्धाविति धातोः शोधनात्पावकः । मा नास्ति ईरः प्रेरको यस्येति मेरः । तच्छीलत्वान्मेरुः । ताच्छील्यार्थादुनस्तथेत्युक्तेः । सारस्य सारविषयस्य गरणाद् भोक्तृत्वादित्यर्थः । स्कन्दनं स्वतो निष्कासनमिति यावत् । भर्जनाद्विरोधिनामिति शेषः । जाः जाताः । तान् पातीति जपः, याज्यत्वाद् यज्ञ इति जपयज्ञः । अश्ववत् स्थित इत्यश्वत्थः । "तदैरं मदीयं सरः" इत्यादेः ऐरं श्रीः । ताम् अवतीत्यैरावतः । नराणामपेक्षितं नारं, तद्ददातीति नारदः । ह्रीमाऽऽलय एव हिमालयः । विशेषेण नता विनताः । तदास्पदतया

लोपे रविरिति रूपमिति भावः ॥ वासः सर्वदेश इति ॥ वसतेरधिकरणे घञिति भावः ॥ वर्तत इति ॥ वृतेर्ड इति भावः ॥ पाः पालका इति ॥ पा रक्षण इत्यतो विच्प्रत्ययः ॥ मा इत्यनुवादः नास्तीति व्याख्या ॥ स्वत इति ॥ स्वस्मादित्यर्थः ॥ इत्यादेरिति ॥ अष्टमाध्यायछन्दोगश्रुतेरित्यर्थः ॥

---

1. अ. ऐरा।

वर्ज्यत्वादरिभिर्वज्रो वैनतेयो नतास्पदः ।
वासुकिर्वासुसुखदः कन्दर्पः सुखभेदपः ॥
अर्यमा ज्ञेयमातृत्वात् काल आकलनादपि ।
वरुणो वरणाद् द्वन्द्वो द्विरूपोऽन्तर्बहिर्यतः ॥
मकरो मानकर्तृत्वाद् यमः संयमनाद्विभुः ।
प्रह्लादः स महानन्दो मृगेन्द्रो मृगयत्पतिः ॥
जाह्नवी जहतां स्थानमध्यात्मं चाऽऽत्मनां पतिः ।
विद्या ज्ञप्तिस्वरूपत्वाद् वादो वाच्यत्वतो हरिः ॥
कीर्त्यो वक्ताऽऽश्रयः कीर्तिर्वाक् श्रीरिति च नामकः ।

तत्सम्बन्धी वैनतेयः । वासस्य कं सुखं वासकम् । तदेवाधिक्येऽधिकमित्यतो वासुकम् । दातृत्वेन तद्वान् वासुकिः । कस्य सुखस्य दराः प्रभेदाः कन्दराः । तान् पिबति अनुभवतीति कन्दर्पः । पा पान इति धातुः । ऋगताविति धातोरर्यं ज्ञेयम् । तन्माति जानातीत्यर्यमा । कल ज्ञान इति धातोराकलनं ज्ञानम् । वरं णं सुखं यस्यासौ वरुणः । "णो हि निर्वृतिवाचकः" इत्युक्तेः । वृणोतीति वरुण इति वा । माङ् मान इति धातोर्मा ज्ञानम् । ऊनार्थे चोनमिष्यत इत्यतो लोकस्याल्पं मां करोतीति मकरः । स्वात्मानं मृगयन्तो भक्ता मृगाः । तदधिपतित्वात् मृगेन्द्रः । असारतया संसारं जहतो वृणोतीति जाह्नवी । स्थानमाश्रयः । आत्मनोऽधिकृत्य पतित्वेन वर्तत इत्यध्यात्मम् । कीर्त्यत्वात् कीर्तिः । वक्तृत्वाद् वाक् । श्रयत इति श्रीः । तथेर्यत्ते मेधा क्षमेतीर्यते । दिवु क्रीडेत्यादिधातोः क्रीडापरत्वाद् द्यूतम् । गायकान्,

---

तत्संबन्धी वैनतेय इति ॥ संबन्धार्थे उक्प्रत्यय इति भावः । मत्वर्थे इकारप्रत्यय इत्युपेत्याह ॥ तद्वान् वासुकिरिति ॥ माकर इत्यनुक्त्वा मकर इत्युक्तिकृत्यमाह ॥ ऊनार्थ इति ॥ ओहाक् त्याग इति धातुपाठादाह ॥ जहत इति ॥ त्यजत इत्यर्थः ॥ श्रयत इति ॥ श्रिञ् सेवायां, सेवत इत्यर्थः ॥

स्मरणीयः स्मृतिर्मेधाक्षमारूपस्तथेर्यते ॥
द्यूतं क्रीडापरत्वाच्च गायत्री त्राति गायकान् ।
सत्त्वं साधुगुणत्वाच्च दण्डनाद्दण्ड उच्यते ॥
बृहत्सारोऽप्यमेयश्च बृहत्सामोशनोशतेः ।
शुभाशुभज्ञानकरः कुसुमाकर ईरितः ॥
ज्ञानं ज्ञानात्मतो मौनं मुनीड्यो नीतिरानयन् ।
मार्गाणामन्तगत्वात्तु मार्गशीर्षः प्रकीर्तितः ॥
सुखं पिबल्लीलयैव कपिलो व्यास एव च ।
विशिष्टत्वाद्विष्णुनामा विशिष्टप्राणसौख्यतः ॥

स्वस्येति शेषः । बृहत्सारो बृहत्सः । अमेयत्वादम इति बृहत्साम । उशतेः स्वर्गादीच्छावत्त्वात् । उश इच्छायामिति धातोः । कुत्सितां सुष्ठुभूतां च मां ज्ञानं लोकस्य करोतीति कुसुमाकरः । ईड्यत्वेन मुनिसम्बन्धित्वात् मौनम् । "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति श्रुतेः । मार्गाणां शीर्षस्थानत्वान्मार्गः । कं सुखं पिबत्यनुभवति लीलयेति कपिलः । विशिष्टा आसा स्थितिर्यस्यासौ व्यासः । "वकारः प्राणः" इति श्रुतेः, ण शब्दस्य निर्वृतिवाचकत्वाद् विशिष्टसुखचेष्टाशीलत्वाद् विष्णुः । शय्यादिषु विजातीयस्वाम्यदो नक्षत्रा-

---

बृहत्स इति ॥ सारशब्दस्य सादेश इति भावः ॥ इति धातोरिति ॥ तस्मादसुन्प्रत्यये उशना इति रूपमिति भावः ॥ मुनिसंबन्धीति ॥ मुनिशब्दात् संबन्धार्थेऽण् प्रत्ययः । संबन्धः(श्च)स्तुत्यस्तोतृरूप इति भावः ॥ शीर्षस्थानत्वादिति ॥ चरमप्राप्यत्वादित्यर्थः । आस उपवेशन इति धातो रूपमुपेत्याह ॥ आसा स्थितिरिति ॥ उ(न्प्र)प्रत्ययार्थमाह ॥ शीलत्वादिति ॥ शय्यादिषु विजातीयस्वाम्यद इत्यादेरर्थमाह ॥ शय्यादिष्विति ॥ ज्योतिषां रविरंशुमान् । स्थावराणां हिमालय इत्यादिरादिपदार्थः । विभूतिरूपत्वोपपादनायोक्तम् ॥

एवं नानागुणैर्विष्णुर्नानानामभिरीरितः ।
नानाप्राण्यादिसंस्थश्च विभूतिरिति शब्दितः ॥
शश्यादिषु विजातीयस्वाम्यदः सारदः क्वचित् ।
शर्वादिषु सजातीयश्रैष्ठ्यदत्वेन संस्थितः ॥
शक्रोशनार्जुनाद्येषु सजातीयैकदेशतः ।
देवेष्वप्यधिको ब्रह्मा यतो विष्णोरनन्तरः ॥
कवित्वादिगुणेष्वेव[1] यत्समो नास्ति कश्चन ।
तथा भीमश्च पार्थेषु ज्ञानं यज्ञेषु चोत्तमम् ॥
सुदर्शनं[2] चाऽयुधेषु वेदेष्वृग्वेद उच्यते ।"

इत्यादि विभूतितत्त्वे ।

दीनां विजातीयत्वात् । सत्त्वं सत्त्ववतामहमित्यादौ धर्मिषु सत्त्वादिसारदत्वेनोक्तः । रुद्राणां शङ्कर इत्यादौ शङ्करादीनां सजातीयश्रैष्ठ्यदत्वेनोक्तः । देवानामस्मि वासवः, कवीनामुशना कविः, पाण्डवानां धनञ्जयः, यज्ञानां जपयज्ञोऽस्मि, आयुधानामहं वज्रं, वेदानां सामवेदोऽस्मीत्यादौ सजातीयैकदेशतः श्रैष्ठ्यदो वासवादीनामुक्तः । वासवादीनां सजातीयैकदेशतः एव श्रैष्ठ्यं कुत इत्यत आह ॥ देवेष्विति ॥ देवादिषु ब्रह्मादीनामेव श्रेष्ठत्वाद् वासवादीनां सजातीयैकदेशत एव श्रैष्ठ्यमित्यर्थः ।

यदुक्तं वेदेषु ऋग्वेदस्याधिक्यात्साम्नः सजातीयैकदेशत एव श्रेष्ठत्वमिति तदयुक्तम् । क्वचित्सामवेदस्य ऋग्वेदादप्याधिक्यस्योक्तत्वादित्यत आह ॥ क्वचिदिति ॥ यत्र सामवेदस्य ऋग्वेदादाधिक्यमुच्यते

सत्त्वादिसारदत्वेनेति ॥ आदिपदेन भूतानां चेतना यमस्संयमताम् । वादः प्रवदतां उद्धवश्च भविष्यतामित्यादेर्ग्रहः ॥ उक्त इति ॥ भगवानिति योज्यम् ॥ यत्र सामवेदस्येति ॥ छांदोग्ये वाच ऋग्रसः ऋचः साम रस इत्यादिनोच्यत

1. अ. गुणेष्वेवं 2. अ. सुदर्शनः

क्वचित्साम्न आधिक्यमभिमान्यपेक्षया — "ऋचः श्रीर्गीरुमाद्याश्च साम्नः प्राणशिवादयः" इत्याद्यभिमानिभेदात् । तत्रापि यथायोग्यम् ॥ २१-४० ॥

मम तेजोंऽशेन संयुक्तं भवति ॥ ४१ ॥

तत्र सामवेदाभिमानिदेवताया एव ऋग्वेदाभिमानिदेवताधिक्यविवक्षयैवोच्यते, न तु वेदस्वरूपविवक्षया। अतो न विरोध इति भावः। भवेदेतद्यदि सामवेदाभिमानिदेवताऽन्यो ऋग्वेदाभिमानिदेवता अन्या भवेत्तदेव कुत इत्यत आह ॥ ऋच इति ॥ ननु सामवेदाभिमानिनां प्राणशिवादीनां ऋग्वेदाभिमानिलक्ष्म्यादिभ्यः श्रैष्ठ्याभावात् कथं सामवेदस्य ऋग्वेदादाधिक्योक्तिरभिमानिदेवतापेक्षयाऽप्युपपद्यत इत्यत आह ॥ तत्रापीति ॥ अभिमानिष्वपि यथासम्भवमाधिक्यं ग्राह्यमित्यर्थः। यदा सामवेदस्य ऋग्वेदाधिक्यमुच्यते तदा सामवेदाभिमानिनः प्राणस्य विवक्षायाम् ऋग्वेदाभिमानिसरस्वत्याद्याधिक्यं ग्राह्यम् । यदा शिवस्य विवक्षा तदोमाद्याधिक्यं ग्राह्यमित्याद्युक्तं भवति ॥ २०-४० ॥

विभूतीनां सङ्क्षेपमुक्त्वा विस्तर उच्यते ॥ यद्यदिति ॥ तत्र यद्यद्विभूत्यादिमत्तत्तन्मयाऽधिष्ठितमित्यनुक्त्वा मम तेजोंऽशसम्भवमिति स्वांशजातत्वं तस्य किमर्थमुच्यत इत्यत आह ॥ ममेति ॥ प्रकाशरूपांशेन संयुक्तं भवतीति तेजोंऽशसंभवं न तु तेजोंऽशात् संभवो यस्येति। येनासङ्गतिरिति भावः ॥ ४१ ॥

ततोऽपि विभूतिविस्तर उच्यते "अथवा" इति । तत्रोक्तेन

इत्यर्थः ॥ इत्याद्युक्तं भवतीति ॥ यदा तु ऋच श्रीर्देवता तस्य सर्ववेदाधिक्यमित्यादि चादिपदार्थः ॥ इत्यनुक्त्वेति ॥ प्रकरणबलेनाधिष्ठितत्वस्यैव वक्तव्यत्वादेव मुक्तिरसंगतेति भावः ॥ ततोऽपीति ॥ लक्षणमुखेनोक्तादप्येकांशेन

"किं ज्ञातेन" इति वक्ष्यमाणस्याधिकफलत्वज्ञापकमेव। अन्यथोक्तेरेव वैय्यर्थ्यात्।

"अन्याधिक्यज्ञापनार्थं शुभं चाक्षिप्यते क्वचित्।
न तावताऽस्य निन्द्यत्वं ज्ञेयैवान्यवरिष्ठता।
उभयं मिलितं चैव ततोऽप्यधिकशोभनम्।" इति च ॥४२॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये दशमोऽध्यायः ॥ १० ॥

बहुना ज्ञातेन किमपि फलं नास्तीत्यन्यथाप्रतीतिनिरासायाह ॥ किमिति ॥ किं ज्ञातेनेति वचनमुक्तज्ञानादपि वक्ष्यमाणज्ञानस्याधिकफलत्वज्ञापनार्थमेव न तूक्तज्ञानस्य निष्फलत्वज्ञापकमित्यर्थः। उक्तज्ञानस्य निष्फलत्वज्ञापकमेव किं न स्यादित्यत आह॥ अन्यथेति॥ ननु पूर्वोक्तविज्ञानस्यापि साफल्ये ततोऽपि वक्ष्यमाणज्ञानमधिकफलमित्येव वक्तव्यम्। किं ज्ञानेनेत्युक्ताक्षेपो न युक्त इत्यतो वक्ष्यमाणस्याधिक्यज्ञापनेऽप्युक्तशुभाक्षेपसम्भवनियामिकां स्मृतिमाह ॥ अन्येति ॥ निन्द्यत्वं हेयत्वं ज्ञेयमिति शेषः। किं तत्रस्मादन्यस्य वरिष्ठतैव ज्ञेयेत्यर्थः। यद्यन्यद्वरिष्ठं तर्ह्याक्षिप्तं हेयमेव। वरिष्ठलामेऽल्पस्याप्रयोजकत्वादित्यत आह॥ उभयमिति॥ न वरिष्ठलामेऽल्पस्य हेयत्वम्। उभयलामे अधिकशोभनप्राप्तेरित्यर्थः॥ ४२॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां दशमोऽध्यायः ॥ १० ॥

जगद्व्यापित्वोक्त्या अधिकविस्तरमाहेत्यर्थः ॥ उभयलाभ इति ॥ प्रागुक्तरविप्रभृतिस्थपरिच्छिन्नविभूतिरूपज्ञानजगद्व्यापिरूपज्ञानरूपोभयलामेऽधिक - शोभनप्राप्तेरित्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
दशमोऽध्यायः ॥ १० ॥

॥ अथ एकादशोध्यायः ॥

हरिः ॐ ॥ आत्मानमव्ययम्, परमं रूपमैश्वरम्, "सर्वाश्चर्यमयं देवमनन्तं विश्वतो मुखम्" इत्यादिरूपविशेषणाच्च रूपस्येश्वरसाक्षात्स्वरूपत्वं, नित्यत्वं तत एव चिदानन्दाद्यात्मकत्वं च

अत्र ध्यानार्थं विश्वरूपस्थितिरुच्यत इत्यध्यायप्रतिपाद्यस्य स्फुटं प्रतीयमानत्वादनुक्तिः। तत्र विश्वरूपस्य प्रागुत्तरं चादृष्टत्वात् तदानीमेव किञ्चित्प्रधानादिकं उपादानीकृत्य भगवता निर्मायार्जुनाय प्रदर्श्य विश्वरूपं नाशितमिति शङ्कां निवारयति ॥ आत्मानमिति ॥ दर्शयात्मानमव्ययमित्यात्मप्रदर्शनप्रार्थनानन्तरं दर्शयामास पार्थाय परमं रूपमैश्वरमिति विश्वरूपप्रदर्शनस्योक्तत्वात् विश्वरूपस्य साक्षादीश्वरस्वरूपत्वं सिद्धम्। अन्यथा प्रदर्शनस्य प्रार्थनाननुगुणत्वप्रसङ्गात्। देवमित्युक्त्या साक्षादपि तत्सिद्धम्। अव्ययं परमं सर्वाश्चर्यमयम् अनन्तं विश्वतोमुखम् इत्यादीश्वरविशेषणयुक्ततया विश्वरूपस्योक्तत्वाच्च तस्य साक्षादीश्वरस्वरूपत्वं सिद्धम्। साक्षादीश्वरस्वरूपत्वे च तस्य नित्यत्वं चिदानन्दाद्यात्मकत्वं च सिद्धम्। भगवतो नित्यत्वाच्चिदानन्दाद्यात्मकत्वात्। अतो विश्वरूपमचेतनोपादानकं निर्मायेत्युक्तमयुक्तमिति भावः।

ननु विश्वमेव रूपं विश्वरूपम्। शशिसूर्यनेत्रमित्यादेः। अतः कथं साक्षाद्भगवत्स्वरूपं स्यादित्यत आह ॥ ममेति ॥ "पश्यादित्यान्

हरिः ॐ ॥ ध्यानार्थमिति ॥ विष्टभ्याहमिति पूर्वत्र संक्षेपेणोक्तस्य व्याप्तरूपोपासनस्य बुद्धावनारोहेणाशक्यतया विस्तरेण श्रुते सत्येव ध्यानं सुशकमिति ध्यानार्थं प्रागुक्तव्याप्तरूपस्थितिर्विस्तरेणात्रोच्यत इत्यर्थः। अनेन पूर्वानन्तरता च सिद्धेति भावः। प्रागुत्तरत्र चेति। पूर्वोत्तरकाल(संबन्ध)मित्यर्थः। अग्रे साध्यत्रयोक्तेः केन किं सिद्धमित्यत आह ॥ दर्शयेत्यादिना ॥ देवमित्युक्त्येति ॥ क्रीडादिगुण(क)स्वरूपभगवल्लक्षणोक्त्येत्यर्थः। मम देह इत्यस्य

सिद्धम्। "मम देह" इत्युक्तत्वाच्चादित्यादीनां भेदः सिद्धः। "मे रूपाणि", "सर्वतोऽनन्तरूपम्", "द्रष्टुमिच्छामि ते रूपम्" इत्यादेश्चैकस्यैवाभिन्नानन्तरूपत्वं च।

"एकं रूपं हरेर्नित्यमचिन्त्यैश्वर्ययोगतः।
बहुसङ्ख्यागोचरं च विशेषादेव केवलम्॥
अभावो यत्र भेदस्य प्रमाणावसितो भवेत्।
विशेषो नाम तत्रैव विशेषव्यवहारवान्॥

वसून् रुद्रानश्विनौ मरुतस्तथा। मम देहे गुडाकेश" इत्यादिना विश्वस्य विश्वरूपाश्रितत्वेनोक्तत्वात् ततस्तस्य भेदसिद्धेर्युक्तं विश्वरूपस्य साक्षाद्भगवत्स्वरूपत्वमिति भावः। शशिसूर्यनेत्रमित्यस्य शशिसूर्याश्रयनेत्रत्वमर्थः। ननु विश्वरूपस्यानन्तरूपसमुदायत्वात् न भगवत्स्वरूपत्वं युक्तम्। एकेनानेकभेदस्य विरुद्धत्वादित्यत आह॥ मे रूपाणीति॥ न विश्वरूपस्यानन्तरूपसमुदायत्वात् ईश्वररूपत्वायोगः। "पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः।" "पश्यामि त्वां सर्वतोऽनन्तरूपम्" इत्यादेरनन्तरूपाणां प्रदर्शितत्वावगमाद् "द्रष्टुमिच्छामि ते रूपम्" इत्यादेरेकरूपप्रदर्शनस्यैव प्रार्थितत्वावगमाच्चैकस्यैवानन्तरूपत्वसिद्धेः। न चैतद्विरुद्धम्। तेषामनन्तरूपाणामपि परस्परमभिन्नत्वादिति भावः।

अनन्तरूपाण्यभिन्नानीत्ययुक्तम्। रूपाणामैक्येऽनन्तत्वायोगादित्याशङ्कां ब्रह्मतर्कवाक्येन परिहरति॥ एकमिति॥ "विशेषादेव केवलम्" इत्युपपादकान्तरम्। भेदाभावे कथं विशेषमात्रेण व्यवहारविशेष इत्यत आह॥ अभाव इति॥ यत्र वस्तुनि भेदाभावः प्रमाणावसितो भवेत्तत्र व्यवहारविशेषनिर्वाहक एव हि विशेषो नामतः। अतो विशेषादेव प्रमाणावसितभेदाभावेषु भगवद्रूपेषु व्यवहारविशेषो युक्त

पूर्वेणाप्यन्वयमुपेत्याह॥ मरुतस्तथा। मम देह इति॥ उपपादकान्तरमिति॥

विशेषोऽपि स्वरूपं स स्वनिर्वाहक एव च।
द्रव्यात्मना स नित्योऽपि विशेषात्मैव जायते ॥
[1]नित्या एव विशेषाश्च केचिदेवं द्विधैव सः।

इति भावः। भेदाभावेऽपि विशेषादेव भगवद्रूपेषु व्यवहारविशेषो भवति चेत् गवाश्वादावपि विशेषादेव व्यवहारविशेषः स्यादित्यतो वाऽऽह ॥ अभाव इति ॥ यत्र भेदाभावः प्रमाणावसितो भवेत्तत्रैव विशेषो व्यवहारविशेषनिर्वाहकोऽङ्गीक्रियते। गवाश्वादौ तु भेदस्यैव प्रमाणावसितत्वात् न व्यवहारविशेषनिबन्धन इति भावः।

नन्वयं विशेषो विशेषिणो भिन्नोऽभिन्नो वा? आद्ये भेदानवस्था। द्वितीये विशेषविशेषिव्यवहारो न स्यात्। न च तत्र विशेषादेव व्यवहारविशेषनिर्वाहः। विशेषानवस्थाप्रसङ्गादित्यत आह ॥ विशेषोऽपीति॥ विशेषोऽपि विशेषिस्वरूपमतो न भेदानवस्था। भेदाभावेऽपि विशेषादेव विशेषव्यवहारसिद्धिः। विशेषस्य स्वस्यैव स्वस्मिन् व्यवहारविशेषनिर्वाहकत्वेन विशेषान्तरानङ्गीकाराच्च विशेषानवस्थाऽपीति भावः।

तमेव विशेषं विभज्य निरूपयति॥ द्रव्येति॥ एतच्च चेतनाचेतनसाधारणं वाक्यं यथाक्रमं योजनीयम्। चेतने कश्चिद्विशेषो जायते, कश्चिन्नित्य इत्येवं विशेषो द्विविधो भवति। न च वाच्यं द्रव्यात्मकत्वेन विशेषस्य नित्यत्वाच्च जननमिति। चेतनद्रव्यात्मकत्वेन नित्यस्यापि व्यक्तिविशेषविवक्षया जननोक्तिसम्भवात्। अचेतने च विशेषिद्रव्यस्यैव विशेषोपादानत्वाद् उपादानविशेषिद्रव्यात्मनाऽयावद्

अचिंत्यैश्वर्ययोगत्वापेक्षयेत्यर्थः। विशेषित इति। विशेषवत इत्यर्थः ॥ न च तत्रेति ॥ विशेषविशेषिणोर्भेदाभावेऽप्ययं विशेषी विशेषोऽयमिति व्यवहारो विशेषान्तरादित्यर्थः ॥ विशेषव्यवहारेति ॥ अयं विशेषोऽयं विशेषीति व्यवहारेत्यर्थः। तामेव योजनामाह ॥ चेतन इति ॥ विशेषोपादानत्वादिति ॥

---

1. अ. नित्य एव विशेषश्च कश्चिदेवम्।

वस्तुस्वरूपमस्त्येवमादिष्वभेदिनः ॥
विशेषोऽनुभवादेव ज्ञायते सर्ववस्तुषु ।
न चाविशेषितं किञ्चिद्वाच्यं लक्ष्यं तथा मितम् ॥
विशिष्टस्य स्वतोऽन्यत्वे स्वस्यामेयत्वहेतुतः ।
नैव ज्ञेयं विशिष्टं च मानाभावाच्च नो भवेत् ॥

द्रव्यभाव्यपि कार्यरूपेण कश्चिद्विशेषो जायते । कश्चिद् यावद्द्रव्यभावीति द्विविधो विशेष इति भावः । चेतनाचेतनयोः प्रत्येकं द्विविधविशेषान् तत्तत्स्थलेषूदाहरति ॥ वस्त्विति ॥ चेतनवस्तुस्वरूपमस्तीत्यत्र चेतनत्ववस्तुत्वस्वरूपत्वास्तित्वविशेषा नित्याभिव्यक्ताः । चेतनः करोति भुङ्क्ते गच्छतीत्यत्र करणगमनभोजनविशेषा व्यक्त्यव्यक्तियुताः । ते द्विविधा अपि विशेषिणाऽत्यन्ताभेदिनः । तथा चूतफलस्वरूपमस्तीत्यत्र चूतत्वफलत्वादिविशेषा यावद्द्रव्यभाविनो विशेषिणाऽत्यन्ताभिन्नाः । पीतं चूतफलमित्यत्र पीतत्वादिविशेषाः कादाचित्का विशेषिणा भिन्नाभिन्ना इति भावः ।

एवंविधविशेषसद्भावे किं मानमित्यत आह ॥ विशेष इति ॥ तदेव स्फुटीकरोति ॥ न चेति ॥ ननु वस्तुनि यावान् विशिष्टाकारस्तस्य विशेष्यस्वरूपादन्यत्वेन विशेष्यस्वरूपस्य निर्विशेषत्वात् कथं विशेषः सर्ववस्तुषु ज्ञायत इत्युक्तमित्यत आह ॥ विशिष्टस्येति ॥ भवेदेतद्यदि विशिष्टं विशेष्यस्वरूपादन्यद् भवेत् । न चैतदस्ति । विशिष्टस्य विशेष्यस्वरूपादन्यत्वे विशेष्यस्वरूपस्यामेयत्वप्रसङ्गात् । विशेषवत्येव प्रमाणप्रवृत्तेरुक्तत्वात् । विशेष्याज्ञाने च विशिष्टाज्ञानं च प्रसज्यते । व्यावर्तकाज्ञाने व्यावर्त्यस्य सम्यग् ज्ञातुमशक्यत्वात् । विशेष्यस्य

विशेषं प्रत्युपादानकारणत्वादित्यर्थः ॥ अयावद्द्रव्यभाव्यपि इति विभागः ॥ कार्येति ॥ विशेषकार्यरूपेणेत्यर्थः ॥ उक्तत्वादिति ॥ न चाविशेषितं किञ्चिन्मि(न्म)तमिति पूर्ववाक्येऽर्थादुक्तत्वादित्यर्थः । यद्वा स्वरूपस्य च

स्वयमित्यपि हि स्वत्वविशेषेण विवर्जितम् ।
न ज्ञेयं तद्विशेष्यं च तथैवेत्यनवस्थितिः ॥
अभेदे न विरोधोऽस्ति ज्ञाताज्ञातं यतोऽखिलम् ।
तदेव ज्ञातरूपेण ज्ञातमज्ञातमन्यथा ॥

विशिष्टव्यावर्तकत्वादिति भावः । विशेष्यस्वरूपस्यामेयत्वे बाधकान्तरं चाह ॥ मानेति ॥ वस्तुसिद्धेर्मानाधीनत्वाद् विशेष्यस्वरूपस्यामेयत्वे तदभावश्च स्यादिति भावः । इतोऽपि न विशेष्यस्वरूपं निर्विशेषमित्याह ॥ स्वयमिति ॥ यद्विशेष्यस्वरूपं तस्य तावद्विशेष्यस्वरूपत्वं विशेषोऽङ्गीकार्य एव । विशेष्यस्वरूपत्वविशेषवर्जितस्य विशेष्यस्वरूपमिति ज्ञातुं व्यवहर्तुं वाऽशक्यत्वात् । अतो विशेष्यस्वरूपमपि न निर्विशेषमिति भावः । ननु यद्विशेष्यस्वरूपत्वविशेषविशिष्टं तस्मिन् विशिष्टे यद्विशेष्यस्वरूपं तद्विशिष्टादन्यदेव । अतो निर्विशेषमेवेत्यत आह ॥ तदिति ॥ यत्तस्मिन् विशिष्टे विशेष्यस्वरूपं तद्विशिष्टादन्यदपि विशेष्यस्वरूपत्वविशेषसहितमेव । अतो न निर्विशेषमिति भावः । तस्मिन्नपि विशिष्टे यद्विशेष्यस्वरूपं तद्विशिष्टान्यदेव । अतो निर्विशेषमित्यङ्गीकारेऽनवस्थामाह ॥ इतीति ॥ यथा विशिष्टविशेष्यस्वरूपयोर्भेदाभ्युपगमेऽनवस्थोच्यते तथा तयोरभेदाङ्गीकारेऽपि तत्प्राप्तौ सोऽपि पक्षस्त्याज्य एव स्यात् । विशिष्टविशेष्यस्वरूपयोरभेदे च विशेष्यस्वरूपज्ञाने विशिष्टाकारस्यापि ज्ञातत्वप्रसङ्गेन विशेष्यस्वरूपानुवादेन विशिष्टाकारप्रश्नानुपपत्तिः स्यादित्यत आह ॥ अभेद इति ॥ एकमेव वस्तु

सिद्धत्वाद् व्यर्थैव श्रुतिरित्यादिना द्वितीये उक्तत्वादित्यर्थः ॥ विशेष्यस्य विशिष्टव्यावर्तकत्वादिति ॥ ज्ञायमानोऽयं नीलः पीतो दण्डीत्यादिविशिष्टाकारः कस्येत्युक्ते चैत्रस्येत्याद्युक्तेरिति भावः ॥ तस्मिन्विशिष्ट इति ॥ विशेष्यस्वरूपत्वविशिष्टे इत्यर्थः ॥ तत्प्राप्ताविति ॥ अनवस्थादिदोषप्राप्तावित्यर्थः ॥

*

अभिन्नस्य विशिष्टत्वान्न दोषद्वयमप्युत ।
एकत्वानुभवाच्चैव विशेषानुभवादपि ॥
तज्ज्ञानानुभवाच्चैव न दोषद्वयसम्भवः ।
भेदाभेदौ च तौ नैव कर्तृभोक्तृविशेषणे ॥

अनूद्याकारेण ज्ञातं पृच्छ्यमानाकारेणाज्ञातमिति प्रत्येकमखिलवस्तूनां ज्ञातत्वाज्ञातत्वात् न प्रश्नानुपपत्तिः । विशिष्टाकारस्य विशेष्यस्वरूपाभिन्नत्वेन न भेदसापेक्षानवस्थाऽपीति भावः ॥ अभिन्नस्य विशिष्टत्वादिति ॥ यद्विशेष्येणाभिन्नं तत्स्वरूपं तस्यैव विशिष्टत्वादित्यर्थः । विशिष्टविशेष्ययोरत्यन्ताभेदे कथमाकारभेदेनापि ज्ञातत्वाज्ञातत्वमित्याशङ्कां परिहरन्नुक्तं विवृणोति ॥ एकत्वेति ॥ विशिष्टविशेष्ययोरेकत्वानुभवात् नानवस्थादोषः । अभेदेऽपि विशेषानुभवात् तद्बलेनैकस्यैव ज्ञातत्वाज्ञातत्वानुभवात् न प्रश्नासम्भवदोषोऽपीत्यर्थः ।

ननु विशिष्टविशेष्ययोः भेदाभेदौ किं न स्याताम् । तथात्वे भेदेन प्रश्नासम्भवस्य परिहर्तुं शक्यत्वादभेदेनानवस्थादेश्च परिहर्तुं शक्यत्वादिति चेत् । किं विशिष्टविशेष्ययोः क्वचिद्भेदाभेदावङ्गीक्रियेते उत सर्वत्रापि ? आद्ये सम्प्रतिपत्तिः । अयावद्द्रव्यभाविविशेषणविशिष्टस्य विशेष्येण भेदाभेदाङ्गीकारात् । द्वितीयं दूषयति ॥ भेदाभेदाविति ॥ तौ परेणाङ्गीकृतौ । सर्वत्र विशिष्टविशेष्ययोरिति शेषः ॥ कर्तृभोक्तृविशेषण इति ॥ कर्तृत्वभोक्तृत्वे विशेषणे यस्य विशिष्टस्य तस्मिन्नित्यर्थः । कर्तृत्वभोक्तृत्वादियावद्द्रव्यभाविविशेषणविशिष्टविषये कर्ता भोक्ता मदन्योऽहं चेति विशेषेण भेदाभेदानुभवाभावादिति भावः । एतेन कर्तृभोक्त्रादिविशिष्टविशेष्ययोरभेदप्रतिपादनेनैव यदुक्तं चेतन-

---

प्रश्नानुपपत्तिरिति ॥ चैत्रः किंविशिष्ट इति प्रश्नायोग इत्यर्थः । अभिन्नमित्यस्यार्थस्तत्स्वरूपमिति । अनवस्थादेश्चेत्यत्रादिपदेन विशेष्यस्य निर्विशेषत्वमज्ञातत्वमत एव तदसत्त्वमिति दोषत्रयस्य ग्रहः ॥ अहं चेति ॥ अन्य इति

मदन्य इत्यनुभवो यतो नैवास्ति कस्यचित् ।
भेदो विशेषणस्यापि नान्तरस्य क्वचिद्भवेत् ॥
शुद्धस्वरूप इत्यादावभेदस्यैव दर्शनात् ।
अपृथग्दृष्टिनियमाद् बलज्ञानादिकस्य च ॥
ऐक्यं बाह्यविशेषाणां पृथग् दृष्टयैव तन्न तु ॥

विशेषाणामाविर्भावतिरोभाववतां कर्तृत्वादीनां विशेषिणाऽभिन्नत्वं तदपि समर्थितं भवति ।

अथ नित्याभिव्यक्तानां स्वरूपत्वादीनां चाभेदं साधयति ॥ भेद इति ॥ नित्याभिव्यक्तस्येति शेषः ॥ आन्तरस्येति ॥ देहोपाधित्वं विना चेतनगतस्येत्यर्थः । शुद्धस्वरूप इत्यादौ शुद्धस्वरूपत्ववस्तुत्वादीनां नित्याभिव्यक्तविशेषाणां शुद्धस्वरूपो मुक्त इति सामानाधिकरण्येनाभेदस्यैव दर्शनाद्विशिष्टविशेष्ययोरभेदे विशेषणाभेदस्य नियतत्वादिति भावः । आविर्भावतिरोभाववतां कर्तृत्वादिविशेषाणां विशेषिचैतन्यैक्यमर्थतः पूर्वं सिद्धम् । अथ गुणत्वेन पराभ्युपगतानां तादृशानामेव ज्ञानादिविशेषाणामपि विशेष्यैक्यं साधयति ॥ अपृथगिति ॥ पृथक्त्वेन दर्शनाभावनियमादित्यर्थः ।

ननु यथोच्यते शुद्धस्वरूप इत्यादि यथा च कर्ता भोक्ता बलवान् विद्वानिति तथा कृष्णः स्थूल इत्यादि चोच्यते । अतो देहनिमित्तानां कार्ष्ण्यादिविशेषाणामपि चैतन्यैक्यं स्यादित्यत आह ॥ बाह्येति ॥

योज्यम् ॥ यदुक्तमिति ॥ द्रव्यात्मना स नित्योऽपीत्यत्रेति योज्यम् ॥ समर्थितमिति ॥ मदन्य इत्यनुभवाभावस्योक्तत्वादिति भावः ॥ नित्याभिव्यक्तानाम् ॥ धर्मिणा सहैव ज्ञातानामित्यर्थः ॥ आविर्भावतिरोभावेति ॥ कादाचित्कप्रतीतिकानामित्यर्थः ॥ पूर्वमिति ॥ भेदाभेदौ च तौ नैव कर्तृभोक्तृविशेषणे । मदन्य इत्यनुभवो यतो नैवेत्युक्तेरर्थादैक्यं सिद्धमित्यर्थः । तादृशानां आविर्भावतिरोभाववतामित्यर्थः ॥ उभयविधविशेषेति ॥ स्वाभाविका-

विशेषहेत्वभावेऽपि द्वैविध्यं कल्प्यते यदि ।
कल्पनागौरवाद्यास्तु दोषास्तत्रातिसङ्कताः ॥
नैकत्वं नापि नानात्वं नियमादस्त्यचेतने ।
भेदाभेदावनुभवादतस्तत्रान्यथागतेः ॥

नास्माभिरुभयविधविशेषविशिष्टविशेष्ययोः सामानाधिकरण्यमात्राद्विशेषाणां चैतन्यैक्यमुच्यते । किन्तु भेदादर्शने सति सामानाधिकरण्येन । न चात्र कृष्णदेवदत्तयोः भेदादर्शनं, येन च कार्ष्ण्यं देवदत्तस्वरूपं स्यात् । भेदस्यैव दृष्टत्वादिति भावः ।

एके तु शुद्धस्वरूपत्वादीनां नित्याभिव्यक्तानामेव विशेषाणां चैतन्यैक्यं, न तु कर्तृत्वादीनामिति मन्यन्ते । तान् निराकरोति ॥ विशेषेति ॥ शुद्धस्वरूपत्वादीनामेव चैतन्यैक्यं न तु कर्तृत्वादीनामिति द्वैविध्यं किं यत्किञ्चिद्धेतुबलेन कल्प्यते तद्विना वा ? नाद्यः । तददर्शनात् । न द्वितीयः । कर्तृत्वादीनामप्यैक्योपपत्तौ वृथा द्वैविध्यकल्पने कल्पनागौरवप्रसङ्गात् । अप्रामाणिकप्रमाणविरुद्धकल्पनप्रसक्तेश्च । यदि कल्पनागौरवादिदोषानङ्गीकृत्यापि कर्तृत्वादीनां भिन्नत्वमुच्यते तर्हि शुद्धस्वरूपत्वादयोऽपि विशेषा भिन्ना एवेत्यतिप्रसङ्गः स्यात् । परस्य दोषभयाभावादिति भावः । एवं चेतने विशेषादेरत्यन्ताभेदः समर्थितः । तन्न्यायेनाचेतनेऽपि यावद्द्रव्यभाविनो विशेषादेर्विशेषिणाऽत्यन्ताभेदो द्रष्टव्यः ।

अयावद्द्रव्यभाविविशेषस्य यौ भेदाभेदावुक्तौ तौ समर्थयति ॥ नैकत्वमिति ॥ एकत्वं नानात्वं च नास्तीत्युक्तेऽनिर्वचनीयत्वशङ्का

न्योपाधिकरूपोभयविधविशेषेत्यर्थः । विशेषादेरित्यादिपदेन विशिष्टाकारग्रहः । भेदाभेदावुक्ताविति ॥ भेदाभेदौ च तौ नैव कर्तृभोक्तृविशेषण इत्युक्त्या कर्तृत्वादिविशेषणेतरविशेषणेऽर्थाद्भेदाभेदौ प्राप्तावित्युक्तावित्युक्तं, उक्तप्रायावित्यर्थः ॥ समर्थयतीति ॥ अनुदात्तेत्त्वनिबन्धनमात्मनेपदमनित्यमिति

एकोऽहमन्यतोऽन्यश्चेत्येवमेव व्यवस्थितौ ।
भेदाभेदौ चेतनेषु तस्मान्नैकप्रकारता ॥
एकमित्येव यज्ज्ञातं बहुत्वेनैव तत्पुनः ।
पटाद्यं ज्ञायते यस्माद्भेदाभेदौ कुतो न तत् ॥
तन्तुभ्योऽन्यः पटः साक्षात् कस्य दृष्टिपथं गतः ।
अनन्यश्चेत्तन्तुभावे पटाभावः कुतो भवेत् ॥

स्यात् । तन्निरासाय नियमादित्युक्तम् । अत एकैकस्याभावादिति भावः । अनुभवादन्यथा गत्यभावाच्च नैकत्वम्, नापि नानात्वमिति सम्बन्धः । ननु चेतनेऽपि भेदाभेदसद्भावेन चेतनाचेतनयोरेकप्रकारत्वात् अचेतन इति किं विशिष्याभिधीयत इत्यत आह ॥ एक इति ॥ अहं मदभिन्नो घटादेर्भिन्न इति चेतने भिन्नप्रतियोगिकावेव भेदाभेदावनुभूयेते । अचेतने त्वेकप्रतियोगिकावेव । अतो न चेतनाचेतनयोरेकप्रकारतेत्यर्थः । कथमचेतने भेदाभेदावनुभवसिद्धावित्यतः तन्त्वाद्यवयवेभ्यः पटाद्यवयविनो भेदाभेदसद्भावेऽनुभवकथनेन तन्त्वादीनां पटत्वादिविशेषैर्भेदाभेदसद्भावेऽनुभवः प्रदर्शित एव भवतीति मन्वान आह ॥ एकमिति ॥ तन्तूनां पटरूपेणैकत्वस्य परस्परं भेदस्य चानुभवादेकैकतन्तोः पटेन भेदाभेदावनुभूयेते । एकैकतन्तोः पटेनात्यन्ताभेदेऽन्योन्यभेदानुभवायोगादिति भावः । गत्यन्तराभावं चाह ॥ तन्तुभ्य इति ॥ यद्येकैकतन्तोः पटोऽत्यन्तभिन्नस्तर्ह्येकैकतन्तुभ्यः पटः पृथग् दृश्येत । न चैतदस्ति । नाप्येकैकतन्तुना पटोऽत्यन्ताभिन्नः । यथास्वसंस्थानविशेषेणावस्थितैकैकतन्तुभावे पटाभावानुपपत्तेरिति भावः ।

चक्षिङो ङित्करणेन ज्ञापनात्समर्थयतीति साधु । अत एव 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इति रघुवंशे प्रयोगः । अत इत्यस्य व्याख्या एकैकस्येति । भेदमात्रस्याभेदमात्रस्य वेत्यर्थः । नन्वचेतने विशेषविशेषिणोर्भेदाभेदादावनुभवे पृष्टे तन्तुपटयोस्तदनुभवोक्तिरसङ्गतेत्यतस्तां संगमयति ॥ तन्त्वाद्यवयवेभ्य इत्यादिना ॥ एकैकतन्तोरिति पञ्चमी । मूलानुक्तं स्वयमाह ॥

न चाऽत्मनि विशेषोऽत्र दृष्टान्तत्वं गमिष्यति ।
शुद्धोऽहंप्रत्ययो यस्मात् तत्राभेदप्रदर्शकः ॥
अत्रावयवभेदेन स्यादेव ह्यनवस्थितिः ।
न चानवयवं वस्तु क्वचित् स्यान्मानगोचरम् ॥

सर्वावयवसमुदायस्य स्वयमबहुत्वात् तद्भावेऽवयव्यभावाभावात् संस्थानविशेषेणावस्थितानामेवावयवत्वात् अवयविनाऽत्यन्ताभेदो द्रष्टव्यः । यथाऽऽत्मगतानां कर्तृत्वादिविशेषाणां बहुत्वेऽप्येकेनाऽत्मनाऽत्यन्ताभेदः तथा बहुत्वेपि तन्तूनां एकेन पटेनात्यन्ताभेदः किं न स्यादित्यत आह ॥ न चेति ॥ किमनेनोक्तस्य व्यभिचारश्चोद्यते उतात्मगतविशेषदृष्टान्तेन जडेऽप्यत्यन्ताभेदसाधनमात्रम् ? नाद्यः । अत्र कर्तृत्वादीनां बहुत्वाभावात् । व्यवहारविशेषस्य स्वनिर्वाहकविशेषेणैवोपपत्तेरुक्तत्वात् । नापि द्वितीयः । कर्ताऽहं भोक्ताऽहमित्येकैकविशेषविशिष्टस्यात्मनो भेदानुभवेनैकैकविशेषस्यापि केवलाभेदानुभवात् । एकैकस्मिंश्च तन्तौ पटप्रत्ययाभावादिति भावः । किमचेतने पटादावन्त्यावयविन्येव अवयवावयविनोर्भेदाभेदाविति ? नेत्याह ॥

सर्वावयवसमुदायस्येति ॥ यद्वा तन्तुभ्योऽन्य इत्यर्थस्यैव संस्थानविशेषापन्नेभ्य इत्यर्थमुपेत्येयमुक्तिः ॥ अबहुत्वादिति ॥ बहुत्वे हि एकत्वबुद्धिविषयपटेनाभेदो न युक्तः स्यादिति भावः । तद्भावे समुदायभावे ॥ अवयविनेति ॥ संस्थानविशेषापन्नतन्तूनामवयवत्वेन व्यवहारभाजामेवावयवित्वादिति भावः । एकैकतन्तुनापि पटस्याभेद एव किं न स्यात्किं भेदाभ्युपगमेन । न च तेषां बहुत्वादेकेन पटेनाभेदायोगः । दृष्टान्तबलेन स्यादिति शंकते ॥ यथाऽऽत्मगतानामिति ॥ उक्तस्येति ॥ अबहुत्वादेकेन पटेनात्यन्ताभेद इत्युक्तस्येत्यर्थः ॥ उक्तत्वादिति ॥ द्रव्यात्मना स नित्योऽपीत्यादिव्याख्यावसर इति भावः ॥ अंत्यावयविन्येवेति ॥ द्रव्यान्तरानारंभके वस्तुनीत्यर्थः ॥ भेदाभेदाविति ॥

पूर्वापरादिभेदेन यतोंऽशोऽस्यावगम्यते ।
उपाधिरप्येकदेशसम्बद्धः सन्तमेव हि ॥
ज्ञापयेद्भेदमखिलं ग्रसन् स विभजेत् कथम् ।
तस्माद् गुणादिकमपि नास्त्यनंशतया क्वचित् ॥
भावाभावव्यवहृतेर्विद्यमानेऽपि वस्तुनि ।
भेदाभेदौ गुणादेश्च जडे वस्तुनि संस्थितौ ॥

अत्रेति ॥ अचेतने पटादौ स्वावयवैर्भेदाभेदौ तदवयवस्यापि स्वावयवैर्भेदाभेदावित्येवम् अपर्यवसानमेव भवेदित्यर्थः । परमाणोर्नित्यत्वेन तत्र पर्यवसानसम्भवात् कथमनवस्थितिरित्यत आह ॥ न चेति ॥ न केवलं निरवयवत्वे प्रमाणाभावात् परमाणोः सावयवत्वम् । अपि तु पूर्वापरादिभागभेदेन सावयवत्वावगमाच्चेत्याह ॥ पूर्वेति ॥ स्वतः परमाणोरवयवाभावेऽपि पूर्वादिदिगुपाधिकृतावयवसद्भावात तद्विषयोऽसावगम इति चेत् किमुपाधिः परमाणोरेकदेशसम्बद्धो भवेत् तर्ह्येकदेशस्य प्रागेव सत्त्वात् प्रागेव सन्तमवयवभेदं ज्ञापयेदित्येव प्राप्तमित्यर्थः । द्वितीयं दूषयति ॥ अखिलमिति ॥ ननु गुणादीनां निरवयवत्वात् कथं "न चानवयवं वस्तु क्वचित् स्यात्" इत्युच्यत इत्यत आह ॥ तस्मादिति ॥ पूर्वापरादिभागभेदेन अंशावगमादौपाधिकांशस्य निरस्तत्वादित्यर्थः ।

एवमवयवावयविनोर्भेदाभेदसमर्थनेन पटत्वादीनामयावद्द्रव्यभाविनां विशेषाणां तन्त्वादिविशेषिणा भेदाभेदौ समर्थितौ । अथ गुणादित्वेन पराभ्युपगतानाम् अयावद्द्रव्यभाविनां रूपादिविशेषाणां तन्त्वादिविशेषिणा भेदाभेदौ साधयति ॥ भावेति ॥ जडे वस्तुनि गुणक्रियादीनामयावद्द्रव्यभाविविशेषाणां स्वसद्भावदशायां भेदाभेदावेव युक्तौ । नीलं फलमिति तेषां सामानाधिकरण्येन भावव्यव-

---

एकैकावयवेनेति भावः ॥ भावव्यवहृतेरिति ॥ नीलरूपस्य सत्त्वव्यवहारा-

चेतने शक्तिरूपेण गुणादेर्भाव इष्यते ।
सुप्तोऽयं बलवान् विद्वानित्यादिव्यवहारतः ॥
न चैवं शक्तिरूपेण जडे व्यवहृतिः क्वचित् ।
एकमेवाद्वितीयं तन्नेह नानास्ति किञ्चन ॥

द्वारभेदस्याङ्गीकार्यत्वात् । वस्तुनि विद्यमानेऽपि कदाचिन्न नीलं फलमित्यभावव्यवहृतेर्भेदस्याप्यङ्गीकार्यत्वात् । अत्यन्ताभेदे वस्तुनि सति तद्विनाशासम्भवादिति भावः । विनाशानन्तरं तु भेद एवेति ज्ञातव्यं, स्वयमसतोऽभेदायोगात् । ननु यथा चेतने सुप्त्यादावविद्यमानानामपि बलज्ञानादीनामत्यन्ताभेदस्तथा अत्राप्यत्यन्ताभेद एव किं न स्यादित्यत आह ॥ चेतन इति ॥ सुप्तोऽयं बलवानित्यादिव्यवहारबलेन सुप्त्यादावपि बलादीनां शक्तिरूपेणावस्थानसिद्धेः युक्तोऽत्यन्ताभेदो, न तु श्यामतादीनाम् । तेषामत्यन्तोच्छेदादित्यर्थः । श्यामतादीनामपि शक्तिरूपेणावस्थानं किं न स्यादित्यत आह ॥ न चेति ॥ मन्यामहे नीलत्वादीनां शक्तिरूपेणावस्थानं यदि बलादीनामिव शक्तिरूपाभिप्रायेण तेषां व्यवहारो भवेत् । न हि पीते चूतफले नीलमिति व्यवहारोऽस्तीति भावः ।

यदुक्तं विशेषबलादेकं रूपं हरेर्बहुव्यवहारविषयतां यातीति तद्भवेद्यदि रूपाभेदः प्रमाणावसितो भवेत् । "अभावो यत्र" इत्युक्तत्वात् । न च तत्प्रमाणमुपलभ्यत इत्यत आह ॥ एकमेवेति ॥ यदुक्तमचिन्त्यैश्वर्ययोगतो दुर्घटमप्येतद् घटत इति तदयुक्तम् । तथासति परमैश्वर्यबलेन जीवाभेदादेरपि घटनापातादित्यत आह ॥ परमेति ॥

दित्यर्थः ॥ विनाशानन्तरमिति ॥ नीलरूपादिनाशात्पूर्वं रूपिणा भेदाभेदौ रूपनाशानन्तरं विशेषात्यन्तभेद एवेत्यर्थः ॥ हरेर्बहुव्यवहारविषयतामिति ॥ शतशस्सहस्रश इत्यादि बहुसंख्यागोचरत्वरूपव्यवहारविशेषविषयतामित्यर्थः ॥ इत्युक्तत्वादिति ॥ 'अभावो यत्र भेदस्य प्रमाणावसितो भवेत् । विशेषो नाम

मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।
यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ॥
एवं धर्मान् पृथक् पश्यन् तानेवानुविधावति ।
इत्यादिश्रुतिमानाच्च परमैश्वर्यतस्तथा ।
सर्वं तु घटते विष्णौ यत्कल्याणगुणात्मकम् ॥"

इत्यादि ब्रह्मतर्के ॥ १-१४ ॥

कमलासने ब्रह्मणि स्थितं रुद्रम् ।
"विष्णुं समाश्रितो ब्रह्मा ब्रह्मणोऽङ्कगतो हरः ।
हरस्याङ्कविशेषेषु देवाः सर्वेऽपि संस्थिताः ॥"

इति पाद्मे ॥ १५-१८ ॥

द्यावापृथिव्योरन्तरमेकेनैव रूपेण व्याप्तम् । "नान्तं न मध्यम्" इत्युक्तत्वात् पुनः "अनादिमध्यान्तम्" इति गुणा-

---

यत्कल्याणगुणात्मकं तत्सर्वं प्रतीत्या दुर्घटमपि हरौ परमैश्वर्ययोगतो घटत इत्येवाङ्गीक्रियते न तु जीवैक्यादिकमपीति । तथा सति परमैश्वर्यस्यैवानुपपत्तेरिति भावः ॥ १-१४ ॥

दृष्टविश्वरूपो दृष्टानुवादव्याजेन स्तौति "पश्यामि" इति । तत्र कमलरूपासने स्थितं ब्रह्माणमित्यल्पार्थत्वप्रतीतिनिरासाय कमलासनस्थपदं व्याचष्टे ॥ कमलेति ॥ कथं ब्रह्मणो ब्रह्मणि स्थितत्वमित्यतो रुद्रस्येशपदोदितस्येदं विशेषणमिति भावेनाह ॥ रुद्रमिति ॥ भवेदिदं व्याख्यानं यदि रुद्रस्य ब्रह्मणि स्थितत्वं भवेत्, तदेव कुत इत्यत आह ॥ विष्णुमिति ॥ १५-१८ ॥

"द्यावापृथिव्योः" इत्यत्र त्वयेत्युक्त्यैवेकेनेति सिद्धत्वात् किमर्थं पुनरेकेनेत्युच्यत इत्यतस्तस्य सार्थक्यमाह ॥ द्यावापृथिव्योरिति ॥ "अनादिमध्यान्तम्" इति परिमाणानन्त्यमुच्यत इत्यन्यथाप्रतीति-

---

तत्रैव' इत्युक्तत्वादित्यर्थः ॥ तथा सतीति ॥ जीवेनैक्ये सति प्रत्यक्षादि-

नन्त्यापेक्षया । "त्वया ततं विश्वमनन्तरूप" इति कालापेक्षया । स्वयमन्तं विद्यमानमपि न पश्यतीत्याशङ्क्य "त्वया ततं विश्वमनन्तम्" इत्याह । अन्यत् तात्पर्यज्ञापनायाभ्यासरूपम् । "सर्वं

निरासायाह ॥ नान्तमिति ॥ अनादिमध्यान्तमित्यत्र परिमाणेतरगुणानन्त्यमेवोच्यते, न तु परिमाणानन्त्यम् । तस्य "नान्तं न मध्यं" इत्यनेनोक्तत्वादित्यर्थः । "त्वया ततं विश्वमनन्तरूप" इत्यत्रानन्तरूपेति पुनरुक्तिरित्यत आह ॥ त्वयेति ॥ तर्हि "नान्तं न मध्यं न पुनस्तवादिं पश्यामि" इति परिमाणानन्त्यस्योक्तत्वात् "त्वया ततं विश्वम्" इति पुनरुक्तिरित्यत आह ॥ स्वयमिति ॥ नान्तं पश्यामीत्युक्ते नेश्वरस्य परिमाणानन्त्यं सिध्यति । विद्यमानमन्तं स्वयं न पश्यतीत्यपि प्रतीतेः । तन्निवृत्त्यर्थं न केवलमहं पश्यामि, किन्तु त्वया ततं विश्वमित्युक्तत्वेन सप्रयोजनत्वान्न पुनरुक्तिरिति भावः । तथापि "पश्यामि त्वां सर्वतोऽनन्तरूपं", 'द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः" इत्यादिपुनरुक्तिरित्यत आह ॥ अन्यदिति ॥ एतद्वाक्यजातस्य विष्णोर्देशतः कालतो गुणतश्चानन्त्ये स्वस्य महातात्पर्यज्ञापनायाभ्यासरूपत्वान्न पुनरुक्तिदोष इति भावः । 'अनन्तवीर्यामितविक्रमस्त्वं', 'सर्वं समाप्नोषि' इति पुनरुक्तिशङ्का पूर्वोक्त्यैव गर्भस्रावेण गता । तथापि तस्य प्रयोजनान्तरमाह ॥ सर्वमिति ॥ 'सर्वं खल्विदं ब्रह्म' इत्यादेः सर्वस्य जगतो ब्रह्मात्मकत्वात् 'त्वमस्य विश्वस्य परं निधानम्' इत्याद्ययुक्तमित्याशङ्क्य तच्छ्रुतिगतसर्वशब्दस्य ब्रह्मैवार्थः, सर्वव्याप्तत्वादित्यत्रोच्यते । अतो न पौनरुक्त्यमिति भावः । ननु स्वयमेव

विरोधपरिहारायोभयगतधर्मत्यागेन निर्विशेषचितोरेवैकीभावस्य वाच्यत्वेन परमैश्वर्यायोगादिति भावः । परिमाणतो परिच्छिन्नरूपेति मत्वाऽऽह ॥ अनन्तरूपेति ॥ पुनरुक्तिरिति ॥ पूर्वोक्त्यैवेति ॥ अभ्यासरूपमित्युक्त्यैवेत्यर्थः ॥ परं निधानम् ॥ उत्तमाश्रय इत्यर्थः । मयेदं व्याप्तमित्यादिरादि-

समाप्नोषि ततोऽसि सर्वः" इति सर्वं खल्विदं ब्रह्म इत्यादिषु सर्व-शब्दव्याख्यानरूपम् ॥ १९ ॥

"त्रिलोकेषु स्थितैर्भक्तैरर्जुनाय प्रदर्शितम् ।
दृष्टं विष्णोर्विश्वरूपं स्वयोग्यत्वानुरूपतः ॥
प्रायः सहैव पार्थेन प्रायो भीताश्च तेऽखिलाः ।
दर्शनाभ्यासतो दृष्टिरानन्दोद्रेकदा भवेत् ।
तस्मिन् काले तु भूमेश्च भारहारार्थमुद्यमात् ॥
उग्रत्वमिव सर्वत्र न भीतिर्ब्रह्मदर्शिनाम् ।
अर्जुनादधिका ये तु तेषां भीतिर्न चाभवत् ॥

'नमोऽस्तु ते सर्वत एव सर्व' इति सर्वशब्देन सम्बोध्य 'सर्वं समाप्नोषि' इति किमर्थमसौ व्याख्यायत इत्यतो वाऽऽह ॥ सर्वमिति ॥ नात्र स्ववचनं व्याक्रियते, येन वैयर्थ्यं स्यात् । किन्तु 'सर्वं खल्विदं ब्रह्म', 'सर्वं ह्येतद् ब्रह्म' इत्यादिवाक्येषु श्रुतसर्वशब्दमनूद्य तद्व्याख्यान-मिदं स्वोक्तस्थापनार्थमिति भावः ॥ १९ ॥

ननु 'मन्यसे यदि तच्छक्यं मया द्रष्टुं' इति स्वस्यापि यद्दर्शनम-सुलभमुक्तं तादृशरूपदर्शनं कथं लोकत्रयस्य 'दृष्ट्वाऽद्भुतं रूपं' इत्यादि-नाऽर्जुनेनोच्यते । 'सुखमात्यन्तिकं' इत्यादौ भगवद्दर्शनस्य परमानन्द-हेतुत्वेनोक्तत्वात् कथं विश्वरूपदर्शनस्य व्यथाहेतुत्वमुच्यत इत्यत आह ॥ त्रिलोकेष्विति ॥ किं विश्वरूपदर्शनं सदा भयङ्करमित्यत आह ॥ दर्शनेति ॥ किमेवं सर्वरूपेष्वपि प्रथमतो भीतिर्भवतीत्यत आह ॥ तस्मिन्निति ॥ उग्रत्वमिवातो भीतिरिति शेषः । तर्हि सर्वेषामपि भय-

---

पदार्थः ॥ अत्रोच्यते ॥ गीतायामुच्यत इत्यर्थः ॥ असाविति ॥ सर्वशब्द इत्यर्थः । स्वोक्तस्थापनायेति ॥ परं निधानमित्याद्युक्तस्थापनायेत्यर्थः ॥ लोक-त्रयस्येति ॥ अर्जुनेनोच्यत इत्यन्वयः । केनोच्यत इत्यत उक्तम् ॥ दृष्ट्वेति ॥ सुखमात्यन्तिकमित्यादाविति ॥ षष्ठे सुखमात्यन्तिकं यत्तदित्यादावित्यर्थः ।

श्रीब्रह्मरुद्रपूर्वाणां कृष्णाया भीमरामयोः ।"
इत्याग्नेयवचनाद् "दृष्ट्वाऽद्भुतं रूपम्" इत्यादि युज्यते ॥ १९-२० ॥

मुक्ताः सुरसङ्घाः विशन्ति । "प्रवेशो निर्गमश्चैव मुक्तानां स्वेच्छया भवेत् ।" इति ब्रह्माण्डे ॥ २१-२५ ॥

अन्यचेष्टां कुर्वतामपि भगवच्चेष्टयैव प्रलयोदके प्रजानां प्रवेशवत् प्रवेशो युज्यते । सेनामध्यतो भगवन्मुखानामुभयाभिमुख-

---

सम्भवात् किमर्थमुच्यते प्रायो भीता इत्यत आह ॥ अर्जुनादिति ॥ एतद्वचनबलेन लोकत्रयशब्दस्य तत्र स्थितविश्वरूपदर्शनयोग्यप्रतिबन्धकहीनभक्तविषयत्वात् भगवतः किञ्चिदुग्रत्वात्तद्दर्शिनां भयस्यापि सम्भवात् 'दृष्ट्वाऽद्भुतं' इत्यादिवाक्यमुपपन्नमिति भावः । "पश्यामि देवांस्तव देहे" इत्युक्तत्वात् "अमी हि त्वा सुरसङ्घा विशन्ति" इति पुनरुक्तिरित्यत आह ॥ मुक्ता इति ॥ अत्र "अमी सुरसङ्घाः" इति पारोक्ष्येण निर्दिष्टा मुक्ताः । तत्रामुक्ता इत्यपौनुरुक्त्यमिति भावः । भवेदपुनरुक्तिर्यद्येतत् मुक्तविषयं स्यात् । तदेव कुतः ? परोक्षनिर्देशस्यामुक्तेष्वपि सम्भवादिति चेन्न । "त्वां विशन्ति" इति स्वेच्छयैव भगवत्प्रवेशोक्तेरिति भावेनाह ॥ विशंतीति ॥ तथापि कुतो मुक्तविषयत्वमस्येत्यत आह ॥ प्रवेश इति ॥ २१-२५ ॥

ननु धृतराष्ट्रपुत्रादीनां भगवन्मुखप्रवेशोन्मुखचेष्टाऽभावात् कथं "अमी च त्वा धृतराष्ट्रस्य पुत्राः" इत्याद्युच्यत इत्यत आह ॥ अन्येति ॥ भगवन्मुखप्रवेशानुन्मुखचेष्टानामपि भगवन्मुखचेष्टयैव तत्र प्रवेशादुपचारेण विशन्तीति प्रयोगो युज्यते । प्रलयोदकप्रवेशानुन्मुखचेष्टानां प्रजानां तच्चेष्टयैव तत्र प्रवेशे "प्रविष्टा उदकं प्रजाः" इति प्रयोगवदित्यर्थः । भगवन्मुखचेष्टयैव तत्र प्रवेशश्चेत् धार्तराष्ट्रसेनाया एव भवेत् । भगवन्मुखानां तदभिमुखत्वात् । अतः "सहास्मदीयैः"

योग्यत्वेऽपि सति प्रतिबन्धके तद्दर्शनाभावादाह ॥ प्रतिबन्धकहीनेति ॥

त्वाच्चोभे सेने तत्र प्रविशतः । ये तु तस्मिन् मुहूर्ते मरिष्यन्ति तेषां दशनान्तरे चूर्णितमपि शिरः सूक्ष्मदृष्टिगोचरत्वात् मानुषदृष्ट्या तथा न दृश्यते । यथा भिन्नमपि घटादिकं यावत् पृथङ् न पतति तावन्मन्ददृष्टीनां न ज्ञायते । यथा पुरूरवसो जराऽश्विभ्यामेव दृष्टा ॥ २६-३० ॥

इत्ययुक्तं स्यादित्यत आह ॥ सेनेति ॥ ननु युद्धोपक्रम एव चूर्णितोत्तमाङ्गतयाऽन्यैरदृष्टाः कथमर्जुनेन मया तथा सन्दृश्यन्त इत्युच्यते "केचिद्विलग्नाः" इत्यादिनेत्यत आह ॥ ये त्विति ॥ तस्मिन्नेव मुहूर्ते मरिष्यमाणानामेवात्र ग्रहणाद् युद्धोपक्रम एवैवमुक्तिर्युक्ता । विशीर्णत्वेनापतितस्य सूक्ष्मदृष्टिगोचरत्वादन्येषां तथा दर्शनं च युक्तम् । "दिव्यं ददामि ते चक्षुः" इत्यादेरर्जुनस्य दिव्यदृष्टित्वादन्यादृष्टदर्शनं च युक्तमिति भावः । अन्येषां तददर्शने दृष्टान्तमाह ॥ यथेति ॥ दिव्यदृष्टित्वादर्जुनस्यान्यादृष्टदर्शने दृष्टान्तमाह ॥ यथेति ॥ एतच्च विष्णुधर्मे विस्तरेणोक्तम् ॥ २६-३० ॥

विष्णुधर्मे विस्तरेणोक्तमिति ॥ एकोनत्रिंशाध्याये । पुरूरवसो रूप दृष्टुमागतावश्विनौ प्रति पुरूरवो राजा तैलाभ्यक्तोऽस्मि, स्नात्वा भूषणभूषित आगमिष्यामि, तदा मद्रूपं द्रष्टव्यमित्युक्ते 'अप्रसाधितमेवाशु भवन्तं वसुधाधिपम् । पश्यावो भूषितं त्वां वै पश्चात्संक्रन्दनान्वितम्' इत्यश्विभ्यामुक्ते तूर्णं बहिर्निर्गतं राजानं "अंगोपांगादिकं सर्वं नृपतेस्तदपश्यताम् । शिरोललाटबाह्वास्यनयनादिविलोकनम् । कृत्वा चिरं महीपालमूचतुस्तावरिंदमौ । प्रविश्य स्नात्वा भूपाल यथार्हैश्च विभूषणैः । विभूषिततनुं भूयः त्वां द्रक्ष्यावो नरेश्वर" । इत्यश्विभ्यामुक्तो राजा गृहं प्रविश्य स्नातोऽनुलिप्तः वस्त्रालंकारभूषणभूषितोऽश्विनोः समीपमागतः । तदा तौ तद्रूपं दृष्ट्वा हासं चक्रतुः । राज्ञा हासकारणे पृष्टे "शृणु भूपाल सकलमावयोर्हासकारणम् । युष्मदर्शनसंभूतं क्षणापचयहेतुकम् । अस्नातस्याभवत्पूर्वं यादृशी ते सरूपता ।

विशेषगुणकर्मविषय एव प्रश्नः । विष्णविति सम्बोधनात् ॥३१॥

"कालः कलितसम्पूर्णसद्गुणत्वाज्जनार्दनः ।
संहारात् सर्ववित्त्वाद्वा सर्वविद्रावणेन वा ॥"

इति महावाराहे । अपिशब्देन भ्रात्रादीनप्यृते ॥ ३२-३३ ॥

जयद्रथस्य पितुर्वरादेव विशेषः । निहता निहतप्रायाः ।

"आख्याहि मे को भवान्" इत्यत्र को देवो भवानिति पृच्छतीत्यन्यथाप्रतीतिनिरासायाऽह ॥ विशेषेति ॥ गुणादेः स्वयमेवोक्तत्वात् किं पुनः प्रश्नेनेत्यतो विशेषेत्युक्तम् । स्वाज्ञातविषय इत्यर्थः । स्वरूपविषय एव किं न स्यादित्यत आह ॥ विष्णवितीति ॥ "भासस्तवोग्राः प्रतपन्ति विष्णो' इत्यर्जुनेन भगवतः सम्बोधितत्वेन विष्णुरिति पूर्वमेव ज्ञातत्वात् विशेषगुणकर्मादिविषय एवायं प्रश्नो न स्वरूपमात्रविषय इत्यर्थः ॥ ३१ ॥

परिहारे गुणादेरनुक्तत्वात् नायं तद्विषय इत्यतः कालशब्द एव गुणादिवाचीति भावेन स्मृत्यैव तं व्याचष्टे ॥ काल इति ॥ कलिताः स्वसम्बद्धाः । कल बन्धने, कल संहरणे, कल ज्ञाने, कल विद्रावण इति पठन्ति । उग्ररूपः किमर्थमिति प्रश्नपरिहारायोक्तं "लोकक्षयकृत्" इत्यादि । तदुपपाद्यते "ऋतेऽपि" इति । तत्र युधिष्ठिरादीनामप्युर्वरितत्वात् कथं त्वामृते सर्वे मरिष्यन्तीत्युच्यत इत्यत आह ॥ अपीति ॥ नात्रार्जुनमेकमृते सर्वे मरिष्यन्तीत्युच्यते । किन्तु अर्जुनभ्रातॄनश्वत्थामादींश्च विना । अपिशब्देन तेषां समुच्चितत्वादिति भावः ॥ ३२-३३ ॥

यतोऽहमेव लोकान् समाहर्तुमिह प्रवृत्तोऽतो वैरिजये सन्देहायोगाद् युध्यस्वेत्युच्यते "तस्मात्" इति । तत्र द्रोणं च भीष्मं चेति जयद्रथस्य द्रोणादिवद्विशिष्योक्तिः कथम् ? तावत्सामर्थ्याभावादित्यत

साम्प्रत तादृशी नेयं भूषितस्यापि भूषणैः । दिव्येन चक्षुषा भूप कालस्यास्य च तस्य च । वपुःपरिणतिं स्वस्मात् पश्यातोऽपचयप्रदाम्" इत्यादिनेति भावः ॥ युधिष्ठिरादीनामिति ॥ पञ्चानां पाण्डवानां अश्वत्थामकृतवर्मकृपाणां चेत्यर्थः ॥

पश्चादर्जुनेऽपि स्थित्वा स एव हनिष्यति ॥ ३४-३८ ॥

"वायुर्बलज्ञानयोगात् शशाङ्कोऽतिसुखाङ्कितः ।
इन्द्रः स परमैश्वर्यादिति नानाभिधो हरिः ॥"

इति च ॥ ३९-४१ ॥

एकः सर्वोत्तमोऽप्यसत्कृतः ।

आह ॥ जयद्रथस्येति ॥ योऽस्य शिरः छिन्नं भूमौ पातयेत्तच्छिरो भिद्यतामिति पितृदत्तातिबलिष्ठवरादेवास्य विशेषोक्तिर्न तु द्रोणादिवत् सामर्थ्यविशेषादित्यर्थः । ननु जीवन्त एव कथं "मयैवेते निहताः" इत्युच्यते । तथात्वे च कथं "जेताऽसि" इत्युच्यत इत्यत आह ॥ निहता इति ॥ निहतप्रायत्वं नामापहृतायुष्ट्वेन सन्निकृष्टमरणत्वम् । यदि साक्षान्न निहतास्तर्हि हन्ता भवेति वक्तव्यम् । निमित्तमात्रं भवेति कथमुच्यत इत्यत आह ॥ पश्चादिति ॥ तस्य स्वातन्त्र्येण हन्तृत्वाभावात् निमित्तमात्रमित्युक्तमिति भावः । मृतमारणायोगात् "मया हतांस्त्वं जहि" इति कथमुच्यत इत्यतो वाऽऽह ॥ पश्चादिति ॥ अर्जुने स्थित्वा तस्यैव हन्तृत्वात् मया हतेषु त्वमपि हन्तेति व्यवहारविषयो भवेत्येव भगवतोच्यत इति भावः ॥ ३४-३८ ॥

वायुर्यमोऽग्निरित्याद्यर्जुनस्तुतिवाक्ये वाय्वादीनां भगवदभेद उच्यत इत्यन्यथाप्रतीतिनिरासाय वाय्वादिशब्दानां भगवति योगवृत्तिं स्मृत्यैव दर्शयति ॥ वायुरिति ॥ वबयोरभेदाद् वकारो बलवाची । अयपय गताविति धातोः आयुशब्दो ज्ञानवाची । इदि परमैश्वर्ये इति धातुः ॥ ३९-४१ ॥

"असत्कृतोऽसि विहारशय्यासनभोजनेषु । एकोऽथवाऽपि" इत्यत्र यद्यप्यहं त्वमेक एव । तथापि लोकव्यवहारानुसारेण क्षामय

साक्षान्न निहता इति ॥ भगवतेति योज्यम् ॥ इति धातोरिति ॥ उण् प्रत्यये आयुरिति रूपमिति भावः ॥ इति धातुरिति ॥ तस्मादप्रत्यये इदित्वा-

"एकः सर्वाधिको ज्ञेय एक एव करोति यत् ।"

इति च ॥ ४२-४५ ॥

तेनैव रूपेण भवेत्यनन्तरूपगोपनेन तदेव प्रकाशयेत्यर्थः ।

"पञ्चाननं चिन्त्यमचिन्त्यरूपं पद्मासनं गोपितविश्वरूपम् ।"

इति वैहायससंहितायाम् ॥ ४६ ॥

"विश्वनामा स भगवान् यतः पूर्णगुणः प्रभुः ।"

इति पाद्मे । त्वदन्येन न दृष्टपूर्वमित्यनेन तेनैवेन्द्रशरीरेण दृष्टमिति ज्ञायते । त्वदन्येनेति त्वदवरापेक्षया । तैरपि तद्वन्न दृष्टमित्येव ।

इत्यन्यथाप्रतीतिनिरासायाह ॥ एक इति ॥ तर्ह्यन्वयो नोपपद्यत इत्यतस्तं दर्शयति ॥ अपीति ॥ सर्वोत्तमत्वेनासत्काराऽयोग्योऽप्यसत्कृतोऽसीत्येवोच्यते । नान्यत् । अर्जुनस्य भगवदैक्ये मानाभावादिति भावः । एकशब्दः कथं सर्वोत्तमवाचीत्यत आह ॥ एक इति ॥ एकत्वाद् यः, करोतीति क इत्यर्थः । अन्यनिरपेक्षतया हि कर्ता सर्वोत्तमः ॥ ४२-४५ ॥

"तेनैव रूपेण भव" इत्यर्जुनप्रार्थनावाक्ये विश्वरूपं विहाय पूर्वतनं गृहाणेत्युच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ तेनैवेति ॥ यदा रूपान्तरं प्रतीयते तदा विश्वरूपत्याग एव किं न स्यात्, किं तद्गोपनेनेत्यत आह ॥ पञ्चाननमिति ॥ नरसिंहरूपेऽपि गोपितविश्वरूपत्वोक्तेर्न रूपान्तरप्रतीतौ विश्वरूपत्याग इति भावः ॥ ४६ ॥

भक्त्यतिशयोत्पादनाय विश्वरूपदर्शनस्य दौर्लभ्यमुच्यते "मया" इति । तत्र "तेजोमयं विश्वं" इति विश्वात्मकत्वं भगवद्रूपस्योच्यत इत्यन्यथाप्रतीतिनिरासाय विश्वशब्दं स्मृत्यैव व्याचष्टे ॥ विश्वेति ॥ "यन्मे त्वदन्येन न दृष्टपूर्वं" इत्यर्जुनेतरैर्विश्वरूपस्यादृष्टत्वमुच्यते इत्यन्यथाप्रतीतिनिरासायाह ॥ त्वदिति ॥ नात्र विश्वरूपस्यार्जुनेतरैरदृष्टत्वमुच्यते । प्रत्युतेतः पूर्वं केनापि न दृष्टमित्यनुक्त्वा त्वदन्येनेत्युक्-

---

न्नुमागमे इन्द्रेति रूपमिति भावः ॥ करोतीति क इति ॥ कृञो डप्रत्ययः ।

"विश्वरूपं प्रथमतो ब्रह्माऽपश्यच्चतुर्मुखः ।
तच्छतांशेन रुद्रस्तु तच्छतांशेन वासवः ॥
यथेन्द्रेण पुरा दृष्टमपश्यत् सोऽर्जुनोऽपि सन् ।
तदन्ये क्रमयोगेन तच्छतांशादिदर्शिनः ॥"

इति ब्रह्माण्डे ॥ ४७ ॥

वेदादिभिरपि त्वदवरेर्णैवं द्रष्टुमशक्यम् । अन्यथा "दृष्ट्वाऽद्भुतं रूपम्" इत्यादिविरोधः ॥ ४८-४९ ॥

त्वात् तेनैवेतः पूर्वम् इन्द्रशरीरेण दृष्टमित्येवोच्यत इत्यर्थः । तर्हि ब्रह्मादिभिरपि न दृष्टमित्यपि नाशङ्कनीयम् । त्वदन्येनेत्यर्जुनादधमविवक्षयोक्तत्वादित्याह ॥ त्वदिति ॥ नैतावताऽर्जुनाधमैर्न दृष्टमिति कल्पनीयम् । अधमैरप्यर्जुनवन्न दृष्टमित्यभिप्रायेणैवादृष्टत्वस्योक्तत्वादित्याह ॥ तैरिति ॥ भवेदेवैतद् व्याख्यानं यदि विश्वरूपं ब्रह्मादिभिरिन्द्रेणार्जुनादधमैश्च दृष्टं, इन्द्रेण चार्जुनवदेव दृष्टं, अर्जुनादधमैस्तद्वन्न दृष्टमित्येतत्सिध्येत्, तदेव कुत इत्यत आह ॥ विश्वरूपमिति ॥ इन्द्रस्याधिकदर्शित्वेऽल्पदर्शित्वे वा विशिष्य त्वयेन्द्रशरीरेण दृष्टमित्युक्तिर्न सम्भवति । आधिक्येऽनुक्तेराधम्ये निषेधस्य चादर्शनात् ॥ ४७ ॥

यद्यन्येषामपि विश्वरूपदर्शनमत्राभिप्रेतं स्यात्तर्हि "न वेदयज्ञाध्ययनैर्न दानैः" इत्युत्तरवाक्यविरोध इत्यत आह ॥ वेदेति ॥ नोत्तरवाक्येऽर्जुनादन्येषां विश्वरूपदर्शनाभाव उच्यते । किन्तु त्वदवरैस्त्वद्वन्न दृष्टमित्युक्तेः स्वतस्तथा दर्शनाभावेऽपि वेदादिसाधनैस्तथा तैर्दृश्यतामित्याशङ्क्य त्वदवरैर्वेदादिसाधनैरपि त्वद्वन्न द्रष्टुं शक्यत इत्येवोच्यत इति भावः । विश्वरूपस्यार्जुनादन्येनादृष्टत्वमेवार्थः किं न स्यादिति चेन्न ।

प्रत्युतेत्यस्यैतेनैवोच्यत इत्यनेनान्वयः । त्वयेन्द्रशरीरेण दृष्टमिति विशिष्य कस्मान्नोच्यते किं त्वदन्येत्यादिवक्रोक्त्येत्यत आह ॥ इन्द्रस्येत्यादि ॥ उदाहृत-

*

स्ववत् क्रियत इति स्वकं रूपम् । विश्वरूपमज्ञानां स्वरूपवन्न दर्शयति । एतदज्ञानामपि तथैव दर्शयतीति विशेषः । अन्यथा "द्रष्टुमिच्छामि ते रूपम्" इति विरुद्धं स्यात् ।

"परावरविभेदस्तु मुग्धदृष्टिमपेक्ष्य तु ।
प्रादुर्भावस्वरूपाणां विश्वरूपस्य च प्रभोः ॥
अन्यथा न विशेषोऽस्ति व्यक्तिर्ह्यज्ञव्यपेक्षया ।"

इति च ॥ ५० ॥

उदाहृतस्मृतिविरोधात् । अत्रापि "दृष्ट्वाऽद्भुतं रूपं", "दृष्ट्वा लोकाः" इत्यादिपूर्ववाक्यविरोधः स्यादित्यत आह ॥ अन्यथेति ॥ ४८-४९ ॥

"स्वकं रूपं दर्शयामास" इति कृष्णरूपस्य विशिष्य स्वीयत्वोक्तेः यदुक्तं विश्वरूपस्य साक्षादीश्वरस्वरूपत्वं तदयुक्तमित्यत आह ॥ स्ववदिति ॥ नात्र स्वकशब्देन कृष्णरूपस्य स्वकीयत्वमुच्यते, येन विश्वरूपस्य स्वकीयत्वं न स्यात् । किन्तु स्ववत् स्वकीयवत् क्रियते प्रदर्श्यत इति व्युत्पत्त्या स्वकीयतया प्रदर्शनीयत्वमेवेत्यर्थः । ननूभयोरपि भगवदीयतया प्रदर्श्यमानत्वात् कृष्णरूपस्यैव कुतो विशेषोक्तिरित्यत आह ॥ विश्वरूपमिति ॥ सत्यमुभयं रूपं भगवदीयतया प्रदर्श्यत इति, किन्तु ज्ञानिनामेव । अज्ञानिनां तु कृष्णरूपमेव भगवद्दीयतया प्रदर्श्यते । न तु विश्वरूपमतोऽज्ञविवक्षया विशेषोक्तिर्युक्तेति भावः । अत एवाल्पज्ञानिविवक्षया स्ववदित्युक्तम् । किमर्थमेवं व्याख्येयम् ? विश्वरूपं भगवदीयमेव किं न स्यादित्यत आह ॥ अन्यथेति ॥

कृष्णरूपविश्वरूपयोः स्वकीयत्वास्वकीयत्वप्रतीतिनिराकरणप्रसङ्गेन परमं रूपं दर्शयामासेति विश्वरूपस्य परत्वोक्त्या कृष्णरूपस्यापरत्वं स्मृत्यैव निराकरोति ॥ परेति ॥ अन्यथा स्वभावतः । तर्हि विश्वरूप

स्मृतीति ॥ विश्वरूपं प्रथमत इत्यादिस्मृतीत्यर्थः ॥ यदुक्तमिति ॥ एतदध्यायादाविति योऽयम् ॥ अन्यथेत्यनुवादः स्वभावत इति व्याख्या ॥ परत्वमिति ॥

किञ्चिन्मनुष्यवद् दृश्यमानत्वान्मानुषम् ॥ ५१ ॥
ये दर्शनकाङ्क्षिणस्तैरपीदानीं [1]दृष्टप्रायः ॥ ५२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये एकादशोऽध्यायः ॥ ११ ॥

एव परत्वं विदुषामपि कथं दृश्यत इत्यत आह ॥ व्यक्तिरिति ॥ विश्वरूपे परत्वव्यक्तिर्नावताररूपेषु ॥ अतस्तथा दृष्टिर्युक्तेति भावः । इयं च व्यक्तिरल्पज्ञानिविवक्षयोच्यते । न तु ब्रह्मादिमहाज्ञानिविवक्षया । तेषां कृष्णादावपि परत्वस्य प्रतीतेरित्याह ॥ अज्ञेति ॥ ५० ॥

ननु "दृष्ट्वेदं मानुषं रूपं" इति कृष्णरूपस्य मानुषत्वोक्तेः कथं नावरत्वमित्यत आह ॥ किञ्चिदिति ॥ अन्यथोदाहृतवाक्यविरोधः स्यादित्यर्थः ॥ ५१ ॥

ननु "सुदुर्दर्शमिदं रूपं" इत्यत्र देवा अप्यस्य रूपस्य नित्यं दर्शनकाङ्क्षिण एव वर्तन्ते, न तु पश्यन्तीत्युक्तत्वात् कथमर्जुनादुत्तमैर-धमैश्च विश्वरूपस्य दृष्टत्वमुच्यत इत्यतस्तद्वाक्यं यथावद्योजयति ॥ य इति ॥ अनेन यन्मम रूपं दृष्टवानसि, अस्य रूपस्य नित्यं दर्शन-काङ्क्षिणो ये देवास्तेऽपि यद्दृष्टवन्तस्तदिदं सुदुर्दर्शमिति योजना सूचिता भवति । अन्यथोक्तविरोध इति भावः ॥ ५२ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां एकादशोऽध्यायः ॥ ११ ॥

उत्तमत्वमित्यर्थः ॥ उदाहृतवाक्येति ॥ परापरविभेदस्त्वित्यादिवाक्येत्यर्थः ॥ अन्यथोक्तेति ॥ दृष्ट्वाऽद्भुतं रूपं, विश्वरूपं प्रथमतो ब्रह्मापश्यदित्याद्युक्तविरोध इत्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
एकादशोऽध्यायः ॥ ११ ॥

---

1. अ. दृष्टं प्रायः ।

॥ अथ द्वादशोऽध्यायः ॥

हरिः ॐ ॥ साधननिर्णयोऽत्र । "श्रिये जातः श्रिय आ निरियाय श्रियं वयो जरितृभ्यो दधाति । श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ ।"

"उपासिता मुक्तिदा सद्य एव
ह्यस्येशाना जगतो विष्णुपत्नी ।
या श्रीर्लक्ष्मीरौपला चाम्बिकेति
ह्रीश्चेत्युक्ता संविदग्र्या सुविद्या ॥"

इत्यादिश्रुतिभ्यः,

ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ साधनेति ॥ मोक्षसाधनयोरव्यक्तभगवदुपासनयोर्मध्ये प्रागुक्तभगवदुपासनस्याधिक्यनिर्णयोऽस्मिन् अध्याये क्रियत इत्यर्थः । ननु भगदुपासनस्येवाव्यक्तोपासनस्यापि यदि मोक्षसाधनत्वं क्वचिदुक्तं स्यात्तदा "एवं सततयुक्ताः" इति सन्दिह्य प्रश्नो युज्यते । न च तदस्तीत्यतः कथं प्रश्न इत्यत आह ॥ श्रिय इति ॥ यः पुरुषः श्रीसमाराधनार्थं जातोऽसौ तदर्थमेव गृहान्निर्गतो भवति स श्रियं उपदेष्टृभ्यो गुरुभ्य एव स्वस्य वयो धत्ते । एवं श्रियमुपासीनाः पुरुषा अमृतत्वं यान्ति । तस्मिन्

हरिः ॐ ॥ प्रागुक्तेति ॥ मत्कर्मकृदित्यादिनोक्तेत्यर्थः । अनेन पूर्वानन्तर्यमप्यस्याध्यायस्य सूचितं भवति ॥ संदिह्येत्यनन्तरं कृत इति योज्यम् । तेन ल्यबन्तोपपत्तिः । द्वितीयश्रिये इत्यस्यार्थः ॥ तदर्थमेवेति ॥ श्रीदेवीसमाराधनार्थमेवेत्यर्थः । श्रियं जरितृभ्य इत्यस्यार्थः ॥ श्रियं उपदेष्टृभ्य इति ॥ श्रियं प्रति वसानाः वसन्त इति वा तामाच्छाद्य स्थिता इति वाऽर्थ इत्युपेत्य फलितमाह ॥ उपासीना इति ॥ यान्तीति लकारव्यत्ययेनार्थोक्तिः । पद्मनाभतीर्थीये तु श्रियं संपदं वय आयुश्च जरितृभ्यः श्रीदेवी दधाति

"श्रीः सुतुष्टा हरेस्तोषं [1]जनयेत् क्षिप्रमेव तु ।
अतुष्टा तदतुष्टिं च तस्माद् ध्येयैव सा सदा ॥
अव्यक्तं प्रकृतिं प्राहुः कूटस्थं चाक्षरं च ताम् ।
प्रधानमिति च प्राहुर्महापुरुष इत्यपि ॥
तां ब्रह्म महदित्याहुः परं जीवं परां चितिम् ।
तस्यास्तु परमो विष्णुर्यो ब्रह्म परमं महत् ॥"

इति ब्रह्माण्डवचनाच्चाव्यक्तोपासनात् मोक्षाशङ्कया पृच्छति। 'कूटस्थोऽक्षर उच्यते' इत्युत्तरवचनात् 'कूटस्थमचलम्' इत्यत्राप्युक्तेरव्यक्त-

---

गुरुशिष्याख्ये मिथुने समीहितानि सत्यानि भवन्तीत्यर्थः । किं श्रिय उपासनं स्वातन्त्र्येणैव मोक्षसाधनमित्यतः श्रीप्रसादमुत्पाद्य ततो भगवत्प्रसादद्वारेणैवेति भावेन स्मृतिमाह ॥ श्रीरिति ॥ श्रीप्रसादस्य भगवत्प्रसादोत्पादकत्वं कुत इत्यतः श्रियोऽतिमहिमानमाह ॥ अव्यक्तमिति ॥ एवम्भूता चेत् श्रीस्तर्हि तत्प्रसादः स्वयमेव पुरुषार्थहेतुः किं न स्यात्? ईश्वरप्रसादसाधनत्वं तस्य किमर्थमुच्यत इत्यत आह ॥ तस्या इति ॥ श्रियोऽपि विष्णोः परमत्वान्न तत्प्रसादस्य स्वातन्त्र्येण पुरुषार्थसाधनत्वं, किन्तु विष्णुप्रसादद्वारेणैवेत्यर्थः । विष्णोः महद्ब्रह्मभूतश्रिय उत्तमत्वे हेतुमाह ॥ य इति ॥ एवं श्रुतिपुराणवाक्येभ्यो विष्णूपासनस्येवाऽव्यक्तोपासनस्यापि मोक्षसाधनत्वप्रतीतिजातया भगवदुपासनं वाऽव्यक्तोपासनं वा उत्तमं मोक्षसाधनमिति शङ्कयोत्तमसाधनं पृच्छतीत्यर्थः ।

यदि भगवदुपासनस्येव श्रिय उपासनस्यापि मोक्षसाधनत्वं प्रतीयेत तर्हि तद्विषय एव प्रश्नः कर्तव्यः । अव्यक्तोपासनविषये किमर्थं क्रियत इत्यत आह ॥ कूटस्थ इति ॥ "कूटस्थोऽक्षर उच्यते"

ददाति । मितद्रौ मिथुने दंपत्योः श्रियमुपासीनयोः समिधा समीहितानि सत्यानि भवन्तीत्यर्थ उक्तः । भाष्यटीकायां तु मितद्राविल्यस्य समुद्रे

---

1. अ. गमयेत् ।

शब्दः चित्प्रकृतिवाची । अन्यथा 'ये त्वां पर्युपासते', ये चाप्यक्षरं', 'तेषां के योगवित्तमाः' इति भेदेन प्रश्नानुपपत्तिः । 'परं ब्रह्म परं धाम पवित्रं परमं भवान्' इति तेनैवोक्तत्वात् । ये तु 'ते मे युक्ततमा मताः', 'मय्येव मन आधत्स्व' इत्यादौ भगवतोक्तेऽप्यव्यक्तोपासकानामाधिक्यं वदन्ति ते त्वपलापकत्वादतीव[1] साहसिका इति सुशोच्या एव ।

इत्युपरितनवाक्ये चित्प्रकृतावेव प्रयुक्तकूटस्थाक्षरशब्दयोरत्राप्यव्यक्ते प्रयुक्तत्वेनाऽव्यक्तं चित्प्रकृतिरेव । अतः चित्प्रकृत्युपासनस्य मोक्षसाधनत्वप्रतीत्याऽव्यक्तोपासनविषये प्रश्नो युक्त एवेति भावः । एतेन 'इत्यादिश्रुतिभ्यः', 'अव्यक्तोपासनात्' इत्यस्याप्यनवद्यत्वं सिध्यति । नन्वव्यक्तादिशब्दानां परब्रह्मणि मुख्यत्वादत्र तत्किं विवक्षितं न स्यादित्यत आह ॥ अन्यथेति ॥ यद्यत्राव्यक्तशब्देन परब्रह्मोच्येत तर्हि त्वदुपासकाव्यक्तोपासकानां मध्ये क उत्तम इति भगवतोऽव्यक्तस्य च भेदेनार्जुनप्रश्नोऽनुपपन्नः स्यादित्यर्थः । कुतोऽनुपपन्न इत्यतोऽर्जुनेनैव भगवतः परब्रह्मत्वस्योक्तत्वादित्याह ॥ परमिति ॥

अन्ये त्वत्राव्यक्तपदेन यत्किञ्चिच्छून्यापरनामकं निर्गुणं ब्रह्मोच्यत इति मन्वानाः तदुपासकेश्वरोपासकयोः कोऽधिक इति प्रश्नार्थं कल्पयित्वाऽव्यक्तोपासकानामेवाधिक्यं परिहारे कथ्यत इति वदन्ति । तान् प्रत्याह ॥ ये त्विति ॥ 'ते मे युक्ततमा मताः' इति भगवता स्वोपासकनामुत्तमत्वमुक्त्वा 'मय्येव' इति मदुपासकानामेवोत्तमत्वात् मदुपासक एव भवेति स्फुटमुक्तत्वादव्यक्तोपासकानामाधिक्यं वदता-

---

क्षीराब्धावित्युक्तम् ॥ किमर्थं क्रियत इति ॥ प्रश्न इत्यनुषङ्गः ॥ एतेनेति ॥ अव्यक्तस्य चित्प्रकृतित्वसमर्थनेनेत्यर्थः । अन्वयमुखेनानुवदति ॥ इत्यादि श्रुतिभ्योऽव्यक्तोपासनादिति ॥ ननु पूर्वोत्तरार्धयोः कृष्णोपासक(पर)ब्रह्मोपासकविषयतया भेदेनार्जुनप्रश्नोऽयुक्त इति भावेनाक्षिपति ॥ कुतोऽनुपपन्न

---

1. अ. अतिसाहसिकाः ।

'न चलेत् स्वात् पदाद्यस्मादचला श्रीस्ततो मता।'

इत्याग्नेये।

"सूक्ष्मत्वादप्रसिद्धत्वाद्गुणबाहुल्यतस्तथा।
अनिर्देश्यौ तथाऽव्यक्तावचिन्त्यौ श्रीश्च माधवः॥"

इति नारदीये॥

"अविष्णुज्ञैरतद्भक्तैस्तदुपासाविवर्जितैः।
शपेदुपासिताऽप्येषा श्रीस्तान् तद्धरितत्त्ववित्॥
तद्भक्तस्तमुपास्यैव श्रियं ध्यायीत नित्यदा।
तेन तुष्टा तु साऽच्छिद्रं दद्याद्विष्णोरुपासनम्॥

मपलापकत्वमेव। ततश्च साहसिकत्वात् 'अहो नष्टा एते' इति शोकविषयत्वमेव न तु परिहारं वक्तुं प्रतिवादित्वमित्यर्थः।

ननु चेष्टावत्याः श्रियोऽचलत्वम् 'अचलं ध्रुवम्' इति कथमुच्यत इत्यतः स्मृत्यैव तद्घटयति॥ नेति॥ 'अनिर्देश्यमव्यक्तमचिन्त्यं पर्युपासते' इति व्याहतम्। अनिर्देश्याव्यक्ताचिन्त्यस्योपासनायोगादित्यतः अनिर्देश्यत्वादिकमुपास्यत्वाविरोधेन स्मृत्यैव घटयति॥ सूक्ष्मत्वादिति॥

मदुपासका एवोत्तमा इत्युच्यते 'मयि' इति। त्वदुपासकानामिवाव्यक्तोपासकानामपि मोक्षसद्भावात् कथं तेषामुत्तमत्वमित्यतोऽव्यक्तोपासकानां मोक्षमङ्गीकृत्य सहेतुकं स्वोपासकानामुत्तमत्वमुच्यते "ये त्वक्षरम्' इति। तत्रोच्यमानभगवत्प्राप्तिः न केवलशाक्तेयानामिति भावेन मयीत्यादिकं श्रुत्यैव व्याचष्टे॥ अविष्णुज्ञैरिति॥ अत्र "ध्यायीत नित्यदा" इत्यन्तेन परीत्युपसर्गाभिप्राय उक्तो भवति। "तेन तुष्टा" इत्यनेन "ते प्राप्नुवन्ति मामेव" इत्यस्याभिप्राय उक्तो भवति।

इति॥ सहेतुकमिति॥ क्लेशाभावरूपहेतुसहितमित्यर्थः। व्यक्तमेतदग्रे सुष्ठ्वाचारादेरौन्येपीत्यादिना॥ केवलशाक्तेयानामितीति॥ भगवद्भक्त्यादि-

ततस्तद्दर्शनान्मुक्तिं यात्यसौ नात्र संशयः ।
तथापि सर्वपरमां सर्वदोषविवर्जिताम् ॥
ज्ञात्वा श्रियं तत्परमं तत्पतिं पुरुषोत्तमम् ।
विज्ञायोपासते नित्यं ते हि युक्ततमा मताः ॥
यतः क्लेशोऽधिकस्तेषां पृथक् श्रियमुपासताम् ।
विष्णुना सहिता ध्याता सा हि[1] तुष्टिं परां व्रजेत् ॥
अन्यथा तु पुनर्विष्णोः श्रीपतित्वेन चिन्तनम् ।
अच्छिद्रमेव कर्तव्यमिति मुक्तिश्चिराद्भवेत् ।
तस्मादक्लेशतो मुक्तिः क्षिप्रं विष्णुमुपासताम् ॥"

एवमव्यक्तोपासनस्य मोक्षसाधनत्वेऽपि न तदेवोत्तमं मन्तव्यमिति भावेनाह ॥ तथापीति ॥ उपासते श्रिया सहेति शेषः । अनेन 'मय्यावेश्य' इत्युक्तार्थं भवति । अव्यक्तोपासकानामपि मोक्षसद्भावे कथं भगवदुपासकानामुत्तमत्वमित्यत आह ॥ यत इति ॥ अनेन "क्लेशः" इति व्याख्यातं भवति । अनेन उक्तप्रकारेण पर्युपासनम् इन्द्रियग्रामातिनियमनं, सर्वत्र समबुद्धित्वं, सर्वभूतहितेरतत्वादिसुष्ठाचारमन्तरेण अव्यक्तप्रसादाभावात् परमश्रद्धामात्रयुक्तानां सुष्ठाचारादेरौन्येऽपि भगवत्प्रसादसम्भवात् क्लेशाधिक्यं ज्ञातव्यम् । इतश्च भगवदुपासनमेवोत्तममित्याह ॥ विष्णुनेति ॥ श्रिया सह भगवदुपासने द्वयोरपि परमप्रसादसम्भवेनाचिरात् मोक्षो भवति । पृथगव्यक्तोपासनपक्षे तु किञ्चिद्भगवदुपासनं कृत्वा बहुकालं पृथक् श्रियमुपास्य पुनः श्रिया सह निरन्तरं भगवदुपासनं कर्तव्यम् । ततो मुक्तिरिति चिरेणैव भवतीत्यतोऽपि भगवदुपासनमेवाधिकमिति भावः । अनेन

हीनश्रीदेवीमात्रोपासकानामित्यर्थः ॥ उक्तप्रकारेण पर्युपासनमिति ॥ हरितत्ववित् तद्भक्तस्तमुपास्यैव श्रियं ध्यायीतेत्युक्तप्रकारेणेत्यर्थः ॥ औन्येपीति ॥ ऊनत्वेऽपीत्यर्थः ॥ इतश्चेति ॥ भगवदुपास्तिरूपमुक्तिमार्गस्य मोक्षफलकत्वे

---

1. भ. साऽपि ।

इति परमश्रुतिः। युक्ततमाः साधकतमाः ॥ २ ॥ ३ ॥

विष्णोरन्यं[1] न स्मरेद्यो विना तत्परिवारताम्।
तदधीनतां वाऽनन्ययोगी स परिकीर्तितः॥

इति च।

'अन्तवत्तु फलं तेषाम्' इत्यादिनाऽन्यदेवतो[2]पासनायाः पूर्वं[3]

"ये तु सर्वाणि" इत्येतदुक्तार्थं भवति। हेतुद्वयेनोक्तं विष्णूपासनस्याधिक्यमुपसंहरति॥ तस्मादिति॥ तेषामाधिक्यं चेति शेषः॥

ये नित्ययुक्तास्ते युक्ततमा इत्यप्युक्तम्। एकार्थत्वादित्यत आह॥ युक्तेति॥ नित्ययुक्तपदं नित्योद्युक्तार्थमिति च द्रष्टव्यम्। ननु 'ये तु सर्वाणि' इत्यत्रानन्ययोगेन भगवदुपासनस्योत्तमत्वमुच्यते। अतः कथं श्रिया सहितभगवदुपासनस्य आधिक्यकथनपरतयैतद्व्याख्यायत इत्याशङ्क्यां प्रमाणवाक्येनैव परिहरति॥ विष्णोरिति॥ नात्रानन्ययोगपदेन अन्योपासनसम्बन्धो निषिद्ध्यते। किन्त्वन्यस्य भगवदधीनत्वं तत्परिवारत्वं विनोपासनम्। अतो युक्तं प्राचीनव्याख्यानमिति भावः। ननु यदि भगवदुपासकानामिवाव्यक्तोपासकानामपि मोक्षश्रवणात् तदुपासनविषये किमुत्तममिति प्रश्नः क्रियते तर्हि 'ज्ञात्वा शिवं शान्तिमत्यन्तमेति', 'हरिं हरं विरञ्चं च ज्ञात्वा मुच्येत संसृतेः' इत्यन्यदेवतोपासनस्यापि मोक्षहेतुत्वश्रवणात् तद्विषये किमिति प्रश्नो न क्रियत इत्याशङ्क्यां सिंहावलोकनन्यायेन परिहरति॥ अन्तवदिति॥ अन्यदेवतोपासनाया मोक्षसाधनत्वस्य पूर्वमेव निषिद्धत्वेन श्रुत्यादौ तदुक्तावपि तस्यान्यार्थत्वं कल्पयित्वाऽव्यक्तोपासनविषय एव प्रश्नः

श्रीदेव्युपास्तिमार्गस्यैव विलम्बाभावहेतुतश्चेत्यर्थः॥ हेतुद्वयेनेति॥ अक्लेशत्वाचिरत्वरूपहेतुद्वयेनेत्यर्थः। हेत्वर्थकेतिशब्दानन्तरं शेषमाह॥ तेषामित्यादि॥ न केवलमक्लेशादिकमिति चार्थः॥ पूर्वमेवेति॥ सप्तमे

---

1. अ. अन्यत्। 2. अ. देवोपासनायाः। 3. अ. पूर्वमेव।

निन्दितत्वात् लक्ष्म्यास्त्वतिसामीप्याद् विशेषमाशङ्क्य तदुपासनाविषय एव प्रश्नः कृतः ।

"वैष्णवान्येव कर्माणि यः करोति सदा नरः ।
जपार्चामार्जनादीनि स्वाश्रमोक्तानि यानि च ॥

कृतो नान्यदेवतोपासनविषय इति भावः । तर्हि सामान्यतो भगवदन्योपासनस्य मोक्षसाधनत्वस्य पूर्वमेव निषिद्धत्वेनाव्यक्तोपासनस्यापि तद्भावप्राप्तेस्तद्वचनानामप्यर्थान्तरम् अकल्पयित्वा किमिति तद्विषये प्रश्नः क्रियत इत्यत उक्तम् ॥ लक्ष्म्या इति ॥ सामान्यतो भगवदन्योपासनस्य मोक्षसाधनत्वनिषेधेऽपि लक्ष्म्याः भगवदतिप्रियत्वेनान्येभ्यो विशेषसद्भावात् तदुपासनस्य मोक्षसाधनत्वसम्भवेन निषेधस्य तद्व्यतिरिक्तोपासनविषयत्वं कल्पयित्वाऽर्जुनेनान्योपासनविषयप्रश्नमकृत्वाप्यव्यक्तोपासनविषय एव प्रश्नः कृत इति भावः ।

मदुपासनस्याधिकत्वात्तदेव कुरु । तदलाभे मां जानीहि । तदभावे चाभ्यासयोगेन मां जानीहि । तदभावे च मत्कर्मपरो भव । तदशक्तौ च मद्योगमाश्रितः कर्मफलत्यागं कुर्वित्युच्यते—'मयि' इति । तत्र मत्कर्मकृत्त्वमेव मद्योगः । अतः कथमेतदित्यतः स्मृत्यैव व्याचष्टे ॥ वैष्णवानीति ॥ सर्वकर्माणि वैष्णवानि करोतीति योजना । विष्णुविषयतया करोतीत्यर्थः । अर्चामार्जनं प्रतिमास्नापनम् । आदिपदेन ध्यानं च ग्राह्यम् । तद्योगमात्रवान् तत्कर्मत्वोपायमात्रवान् । अनेन मद्योगमिति मत्कर्मत्वयोगमिति व्याख्यातम् । यदि भगवत्कर्मत्वं कामयते तर्ह्येव तद्योगो भवति । न तु काम्येनान्योपासनादिनेत्यर्थः । अनेन

अंतवत्तु फलं तेषामित्यादिना निषिद्धत्वेनेत्यर्थः ॥ श्लोकचतुष्टयार्थं संग्रहेणानुवदति ॥ मदुपासनस्येत्यादिना ॥ श्लोकचतुष्टयस्य प्रतीकग्रहणम् ॥ मयीतीति ॥ तद्योगो भवतीति ॥ वैष्णवतया सर्वकर्मकरणयोग्यो

स तत्कर्मेति विज्ञेयो योऽन्यदेवादिपूजनम् ।
कृत्वा हरावर्पयति स तु तद्योगमात्रवान् ॥
तत्र पूर्वो विशिष्टः स्यादादिमध्यान्ततः स्मृतेः ।
अवान्तरे च नियमाद्विष्णोस्तद्दास्यताऽस्य यत् ॥
मनसा वर्ततेऽन्योपि यथाशक्ति हरिस्मृतेः ।
पूर्वोक्तयोग्यो भवति यदि नित्यं तदिच्छति ॥
असम्यग्ज्ञानिनो ध्यानाज्ज्ञानमेव विशिष्यते ।
ज्ञात्वा ध्यानं ततस्तस्मात्तत्फलेच्छाविवर्जितम् ॥
तस्माज्ज्ञानाद्भवेन्मुक्तिः त्यागाद्ध्यानयुतात्[1] स्फुटम् ॥"

इति च। शान्तिर्मुक्तिः ॥ ४-१५ ॥

'सर्वकर्म' इत्युक्तार्थं भवति । भगवदुपासनेऽपि तारतम्यमाह ॥ असम्यगिति ॥ ध्यानालाभे ज्ञानं, तदलाभेऽभ्यास इत्येतत्समर्थ्यते— 'श्रेयो हि' इति । तदनेन व्याख्यातं भवति । ज्ञानपूर्वध्यानेऽपि सकामान्निष्काममेवाधिकमित्याह ॥ तस्मात् ॥ इति । तत्र हेतुमाह ॥ तस्मादिति ॥ अनेन 'ध्यानात्' इत्येतद् व्याख्यातं भवति । नन्वत्र त्यागाच्छान्तिः फलमुच्यते । अतः कथमुच्यते तस्मान्मुक्तिरित्यत आह ॥ शान्तिरिति ॥ नन्वत्र कर्मफलत्यागमात्रस्यैव ध्यानाधिक्यमुच्यत इति किं नेष्यते ? ज्ञानपूर्वं ध्यानसाहित्यं किमुच्यते ? इत्यतो वाऽऽह ॥ शान्तिरिति ॥ अत्र त्यागस्य शान्तिपदोदितमुक्तिहेतुत्वमुच्यते । न च तत्केवलत्यागग्रहणे युक्तम् । 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' इत्युक्तत्वात् । ज्ञानपूर्वकध्यानसहितत्यागस्य

भवतीत्यर्थः ॥ तदनेनेति ॥ श्रेयो हीत्यादिकमसम्यगिति स्मृत्युदाहरणेन व्याख्यातमित्यर्थः ॥ सन्यासस्त्विति ॥ त्यागस्त्वित्यर्थः ॥ अयोगतः ॥ कर्मानुष्ठानहीनात् ॥ इत्युक्तत्वादिति ॥ पञ्चमेऽध्याये ॥ प्रपंच्यत इति ॥

1. अ, त्यागध्यानयुतात् ।

अवैष्णवसर्वारम्भपरित्यागी । सर्वारम्भाभिमानत्यागेन फलत्यागेन भगवत्समर्पणरूपेण च त्यागी ।

'सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ।'
'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।'

इत्यादेः ।

'भक्तिं ज्ञानं च वैराग्यमृते यो नेच्छति क्वचित् ।
शुभाशुभपरित्यागी विद्वद्भिः कीर्तितो हि सः ॥"

इति च ।

तत्सम्भवात् स एवात्र विवक्षित इति भावः ॥ ४-१५ ॥

'ये तु सर्वाणि कर्माणि इत्यादि प्रपञ्चयते —'अद्वेष्टा' इति । तत्र 'सर्वारम्भपरित्यागी' इत्येतदन्यथाप्रतीतिनिरासाय चतुर्धा व्याचष्टे ॥ अवैष्णवेति ॥ उक्तार्थानुपपादयति ॥ सर्वेति ॥ सर्वकर्मफलत्यागमित्यनेन सर्वारम्भफलपरित्यागेन सर्वारम्भपरित्यागीत्युक्तं सिद्धयति । मयीत्यनेन सर्वारम्भाभिमानत्यागेन सर्वारम्भाणां भगवति समर्पणेन च सर्वारम्भपरित्यागीत्युक्तं सिद्धयति । 'मयि' इति वाक्यस्य स्मृत्यैव तथा व्याख्यातत्वात् । आदिपदगृहीतेन 'सर्वधर्मान् परित्यज्य' इत्यादिनाऽवैष्णवारम्भपरित्यागेन सर्वारम्भपरित्यागीत्युक्तं सिद्धयति । तस्य तथा सयुक्तिकं व्याकरिष्यमाणत्वात् ।

ननु 'सर्वारम्भपरित्यागी' इत्यस्य 'शुभाशुभपरित्यागी' इति प्रपञ्चयमानत्वात् अवैष्णवारम्भपरित्यागीत्यादिकं किं विशिष्याभि-

---

तत्रोक्तधर्मेभ्यो धर्मान्तरकथनेनेति योज्यम् ॥ अन्यथाप्रतीतीति ॥ आरंभसामान्यनिषेधप्रतीतीत्यर्थः । स्मृत्यैव व्याख्यातत्वादिति । तृतीये नाहं कर्ता हरिः कर्ता तत्पूजा कर्म चाखिलमिति स्मृत्या नाहं कर्तेत्यभिमानत्यागः । हरिः कर्तेत्यादिना च भगवति समर्पणरूपः कर्मन्यास इति व्याख्यातत्वादिति भावः ॥ व्याकरिष्यमाणत्वादिति ॥ अष्टादशे (अन्य)

'प्रायः सुखादिषु समः प्रायो हर्षादिवर्जितः ।
तथोच्यते यथाऽल्पस्वो निःस्व इत्युच्यते जनैः'[1] ॥
न हि मुख्यतया साम्यं कस्यचित्सुखदुःखयोः ।
न च हर्षादिसन्त्यागो यावन्मुक्तिः कुतश्चन ॥

इति च ।

'हृतिर्मदादधर्माय हर्षो नाम प्रकीर्तितः ।'

इति शब्दनिर्णये ॥ १७ ॥ १९ ॥

व्यस्तेन प्रियाः समस्तेनातीव प्रियाः । भक्तिस्तु व्यस्तेऽ-

धीयत इत्यतस्तत्स्मृत्यैव उक्ताविरुद्धतया व्याचष्टे ॥ भक्तिमिति ॥ उपलक्षणं चैतत् । तत्साधनतया वैष्णवारम्भांश्चेति ज्ञातव्यम् । 'समदुःखसुखः', 'हर्षामर्षभयोद्वेगैर्मुक्तः' इत्येतन्नियमप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ॥ प्राय इति ॥ तथोच्यते सुखादिषु समो हर्षादिवर्जित उच्यते । एवं चेदल्पवैषम्यादेर्विद्यमानत्वात् कथं तदभावोक्तिरित्यत आह ॥ यथेति ॥ मुख्यार्थ एव किं न स्यादित्यत आह ॥ न हीति ॥ ननु हर्षस्य गुणत्वात् कथं तत्परित्यागोऽपेक्षिततयोच्यत इत्यतो हर्षशब्दस्य हेयार्थतां स्मृत्यैव दर्शयति ॥ हृतिरिति ॥ मनस इति शेषः । ननु 'अद्वेष्टा' इत्यादावद्वेषादिमतां प्रियत्वमात्रमुक्त्वा 'ये तु धर्म्यामृतम्' इत्यत्र श्रद्धादिमतामतिप्रियत्वं किं निमित्तमुच्यत इत्यत आह ॥ व्यस्तेनेति ॥ 'अद्वेष्टा' इत्यादौ यत् पृथक् पृथक् साधनमुक्तं तत्तन्मात्रेण प्रियत्वमुक्तम् । 'ये तु' इत्यत्राद्वेष्टेत्यादि-प्रागुक्तसमस्तसाधनेनातीवप्रियत्वम् । व्यस्तात् समस्तस्याधिक्यादिति

सर्वधर्मान् परित्यज्येत्युक्तशेषत्वेनेत्यादिनेत्यर्थः ॥ उक्ताविरुद्धतयेति ॥ अवैष्णवेत्याद्युक्ताविरुद्धतया शुभपदस्य ज्ञानभक्तिवैराग्यान्यशुभपरतया व्याचष्ट इत्यर्थः । एतेन वैष्णवेत्यस्य ज्ञानभक्तिवैराग्यान्यानीत्युक्तम् ॥ तत्साधन-

---

1. अ. बुधैः ।

प्युक्तैव । 'यस्मान्नोद्विजते' इत्यत्रापि स चेत्यनेन भक्तिरनुषज्यते[1]। धर्मसाधनं धर्म्यं, तदेवामृतसाधनममृतं धर्म्यामृतम् ॥ २० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-तात्पर्यनिर्णये द्वादशोऽध्यायः ॥ १२ ॥

भावः । ननु 'अद्वेष्टा' इत्यादावद्वेषादिसाधनेन प्रियत्वमुच्यते, 'ये तु' इति भक्त्याऽतीव प्रियत्वमुच्यत इति किं न स्यात्? भक्तेः सर्वसाधनोत्तमत्वादित्यत आह ॥ भक्तिरिति ॥ अद्वेषादिकथनेऽपि भक्तेरुक्तत्वात् नायं विभागो युक्त इति भावः । 'यस्मान्नोद्विजते लोकः' इति व्यस्तसाधनकथने भक्तेरनुक्तत्वात् कथं भक्तिस्तु व्यस्तेष्वप्युक्तैवेत्युच्यत इत्यत आह ॥ यस्मादिति ॥ १७-१९ ॥

धर्म्यामृतपदस्य दुर्गमार्थत्वादर्थमाह ॥ धर्मेति ॥ २० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायां द्वादशोऽध्यायः ॥ १२ ॥

तयेति ॥ ज्ञानभक्तिवैराग्यसाधनतया तुलस्याहरणभगवदाराधनतीर्थयात्राचारांश्च विनेत्यर्थः ॥ व्यस्तसाधनकथन इति ॥ असमस्तसाधनकथन इत्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते द्वादशोऽध्यायः ॥ १२ ॥

---

1. 'भक्तिस्तु' इत्यारभ्य 'अनुषज्यते' इत्यन्तं 'अ' पाठे न दृश्यते ।

॥ अथ त्रयोदशोऽध्यायः ॥

हरिः ॐ। सर्वार्थसङ्क्षेपोऽयम् ।

"हिंसाहेतुश्च जीवस्य परेण प्रेर्यते च यत् ।
अव्यक्तादिशरीरं तु तत्क्षेत्रं क्षीयतेऽत्र यत् ॥

एतदध्यायप्रतिपाद्यमर्थं दर्शयति॥ सर्वेति॥ यत् प्रथमषट्के प्राचुर्येण ज्ञानसाधनमुक्तं, यच्च द्वितीये भगवत्स्वरूपं निरूपितं, 'न त्वेवाहं' इत्यादौ यज्जीवस्वरूपं प्रदर्शितं, 'भूमिरापोऽनल' इत्यादौ यत् क्षेत्रमभिहितं तद्विप्रकीर्णतयोक्तं सर्वं बुद्ध्यारोहार्थं सङ्क्षिप्यास्मिन्नध्याये प्रदर्शयतीत्यर्थः। सर्वेषामध्यायानामर्थान् सङ्क्षिपति सङ्क्षिप्य दर्शयतीति सर्वार्थसङ्क्षेपः ।

तत्र 'तत् क्षेत्रं यच्च' इति प्रतिज्ञातम् । भगवज्ज्ञानस्यैव मोक्षहेतुत्वात् क्षेत्रं भगवत्स्वरूपं चोभयं किमर्थमुच्यत इत्याशङ्का तावत्परिह्रियते 'इदं' इति। तत्र 'सङ्घातश्चेतना' इति क्षेत्रविकारत्वेनोक्त-

---

हरिः ॐ ॥ पूर्वोक्तज्ञानज्ञेयक्षेत्रपुरुषानित्यादिभाष्योक्तदिशा तात्पर्यवाक्यं विवृणोति ॥ यत्प्रथमेत्यादिना ॥ बहूनि मे व्यतीतानि जन्मानीत्यादेरपि कथनादुक्तं प्राचुर्येणेति ॥ द्वितीय इति ॥ षट्क इत्यनुषज्यते ॥ न त्वेवाहमित्यादौ यज्जीवस्वरूपमिति ॥ द्वितीयाध्यायादाविति योज्यम् । तत्र जीवस्वरूपोक्तेरेव प्राधान्यं भगवत्स्वरूपं तु तादर्थ्येनेति भावः ॥ क्षेत्रमिति ॥ क्षीयते हरिरत्रेति भगवदावासस्थानमुक्तमित्यर्थः । संक्षेपशब्दस्य भावार्थत्वेऽध्याहृताध्यायपदेन सामानाधिकरण्यायोगात्कर्तरि निष्पन्नः सन् प्रदर्शनलक्षक इति भावेनाह ॥ संक्षिपति संक्षिप्य प्रदर्शयतीति सर्वार्थसंक्षेप इति ॥ संक्षिप्य प्रदर्शक इत्यर्थः । करणे कर्तृत्वोपचार इति भावः ॥ परिह्रियत इति ॥ क्षेत्रज्ञत्वप्रकारकभगवज्ज्ञानोपयोगित्वात् क्षेत्रत्वोक्तेरिति भावेनेति योज्यम् । संघातश्चेतनेतीत्यनन्तरं वक्ष्यमाणेति योज्यम् ॥ क्षेत्रविकारेषु एक-

इच्छा द्वेषः सुखं दुःखं देहो व्याप्तिश्च चेतसः ।
तद्विकारा इति ज्ञेयाश्चिद्रूपेच्छादिमिश्रिताः ॥
विकारेच्छादिनिर्मुक्तश्चिन्मात्रेच्छादिसंयुतः ।
मुक्त इत्युच्यते जीवो मुक्तिश्च द्विविधा मता ॥
चिन्मात्रद्वेषदुःखे च देहो मिथ्यादृगात्मकः ।
निषिद्धेच्छा यत्र स्युर्नित्या सा मुक्तिरासुरी ॥

शरीरस्य कथं समस्तक्षेत्रत्वमुच्यत इत्याशङ्कापरिहाराय श्रुत्यैतद्व्याचष्टे ॥ हिंसेति ॥ जीवस्य स्वतो नित्यत्वात् देहादितया परिणततदुपघातादेव जीवो हिंसित इत्युच्यते। अव्यक्तादिकं हिंसाहेतुर्जीवस्य भवति । शॄ हिंसायामिति धातोर्हिंसाहेतुत्वात् शः । परेणेर्यत्वादीरमिति शरीरमित्यर्थः। क्षीयतेऽत्रेत्यस्मिन् अव्यक्तादिशरीरे भगवता स्थीयत इत्यर्थः । क्षि निवासगत्योरिति धातोः । अव्यक्तादीत्यनेन महाभूतानीत्यस्यार्थ उक्तो भवति। तद्विकाराः क्षेत्रविकाराः। अनेन 'इच्छाद्वेष' इत्युक्तार्थं भवति । विकारित्वं च न चिद्रूपेच्छादीनामिति भावेनाह। चिद्रूपेति॥ अनेन स्वयमचिद्रूपा इति लभ्यते। वर्तन्त इति शेषः । किमेतेषां सदा मिश्रतयाऽवस्थानमित्यतः संसार एव न सर्वदेति भावेनाह ॥ विकारेति॥ मुक्तौ द्वेषदुःखाभावात् कथं चिन्मात्रेच्छादिसंयुतो मुक्तः स्यादित्यत आह ॥ मुक्तिश्चेति॥ आसुरी दैवी चेति शेषः। तर्हि दैवमुक्तौ द्वेषाद्ययोगादासुरमुक्तौ च सुखाद्ययोगादधिकं सङ्कटमेवेत्यतः प्रत्येकमिच्छाद्यशेषासम्भवेऽपि विभागेन तत्सम्भवाद्विरोध इति भावेनाऽऽह ॥ चिन्मात्रेति॥ यत्र स्युरित्युत्तरत्रापि सम्बद्ध्यते। इच्छादिष्वपठिताऽपि

देशत्वेन संघातपदेनोक्तेत्यर्थः ॥ इति धातोरिति ॥ विच्प्रत्यये सार्वधातुकेति गुणे च शरिति रूपमिति भावः ॥ ईर्यत्वादीरमिति ॥ ईर प्रेरण इति धातोः कर्मणि घञि ईरमिति रूपमिति भावः ॥ इति धातोरिति॥ अधिकरणे

चिन्मात्रा वैष्णवी भक्तिर्देहः सम्यग् दृगात्मकः ।
सुखमिच्छानुकूला च धृतिर्दैवीति सा मता ॥"

इति नारायणश्रुतिः ।

"क्षेत्रज्ञो भगवान् विष्णुर्न ह्यन्यः क्षेत्रमञ्जसा ।
वेत्त्यसौ भगवान् ज्ञेयो व्यक्ताव्यक्तविलक्षणः ॥
स तु जीवेषु सर्वेषु बहिश्चैव व्यवस्थितः ।
विलक्षणश्च जीवेभ्यः सर्वेभ्योऽपि सदैव च ॥
सर्वतः पाणिपादादिर्यतः पाण्यादिशक्तिमान् ।
केशादिष्वपि सर्वत्र कृष्णकेशो हि यादवः ॥
अणोरणुतरै रूपैः पाणिपादादिसंयुतैः ।
सर्वत्र संस्थितत्वाद्वा सर्वतः पाणिपादवान् ॥

विष्णुभक्तिर्द्वेषस्य पठितत्वेन तत्प्रतियोगितया गृह्यते ।

'एतद्यो वेत्ति' इत्येतज्जीवविषयतया प्रतीतिनिरासाय वचनान्तरेण व्याचष्टे ॥ क्षेत्रज्ञ इति ॥ यः क्षेत्रं जानाति स सर्वोऽपि क्षेत्रज्ञः, अतो विष्णुरिति किं विशिष्योच्यत इत्यत आह ॥ न हीति॥ किमयं स्वयं क्षेत्रान्तर्भूतः सन् तज्जानातीत्यपेक्षायामाह ॥ असाविति ॥ अनेन 'न सत्तत्' इति व्याख्यातं भवति। सर्वासन्निहितत्वात् कथं सर्वज्ञानं हरेरित्यत आह ॥ स इति ॥ एतेन 'बहिरन्तश्च' इति व्याख्यातं भवति। विष्णोः सर्वजीवाभिन्नत्वात् कथं तेषु स्थितिरित्यत आह ॥ विलक्षणश्चेति ॥ कथं वैलक्षण्यमित्यत आह ॥ सर्वत इति ॥ केशादिषु पाण्यादिशक्तिमत्त्वं युक्तिविरुद्धमित्यतः प्रतीतत्वान्न युक्तिविरुद्धमिति भावेनाह ॥ कृष्णेति ॥ अनेन 'सर्वतः' इत्युक्तार्थं भवति।

औणादिकत्रप्रत्यये गुणे च क्षेत्रमिति सिद्धमिति भावः ॥ उत्तरत्रापि संबद्ध्यत इति ॥ दैवी तु सा मतेत्यतः पूर्वमित्यर्थः ॥ तत्प्रतियोगितयेति ॥ तद्विरोधितयेत्यर्थः ॥ न सत्तदिति ॥ न सत्तन्नासदुच्यत इति गीतावाक्यं

*

सर्वेन्द्रियाणां विषयान् वेत्ति सोऽप्राकृतेन्द्रियः ।
यतोऽतोऽनिन्द्रियः प्रोक्तो यन्न भिन्नेन्द्रियोऽथवा ॥
गुणैः सत्त्वादिभिर्हीनः सर्वकल्याणमूर्तिमान् ।
अन्यथाभावराहित्यादचरश्चर एव च ॥
चरणात्सर्वदेशेषु व्याप्तोऽणुर्मध्यमस्तथा ।
सर्वगत्वात् समीपे च दूरे चैवान्तरे च सः ॥

का नाम भगवत्पाण्यादिशक्तिरित्यत आह ॥ सर्वेति ॥ वेत्तीत्येतत् कर्मणोऽप्युपलक्षकम् । अनेन 'सर्वेन्द्रियगुण' इति व्याख्यातं भवति । सर्वेन्द्रियगुणा आभास्यन्तेऽ गु यन्तेऽनेनेति । भगवतः पाण्यादिमत्त्वे श्रुत्यादावनिन्द्रियत्वोक्तिः कथमित्यत आह ॥ स इति ॥ अनेन 'सर्वेन्द्रियविवर्जितं' इत्युक्तार्थं भवति । ज्ञानादिगुणसद्भावे कथं तस्य निर्गुणत्वोक्तिरित्यत आह ॥ गुणैरिति ॥ कुत एवं निर्गुणत्वश्रुतेरर्थान्तरं कल्प्यते ? सर्वथा गुणराहित्यमेव किं न स्यादित्यतः तस्य सर्वकल्याणगुणमूर्तिमत्त्वेन प्रमाणसिद्धत्वादित्याह ॥ सर्वेति ॥ अनेन "निर्गुणं" इत्युक्तार्थं भवति । हरेः पाणिपादादिमत्त्वेऽचरत्वोक्तिः कथमित्यत आह ॥ अन्यथेति ॥ क्वचिच्चरत्वोक्तेः कथं विकारित्वाभाव इत्यत आह ॥ चर इति ॥ अनेन "अचरं चरमेव च" इति व्याख्यातं भवति । कथं सर्वगतस्य चरणमित्यतो न तस्य सर्वगतत्वमेव किन्त्वणुत्वं मध्यमत्वं चास्तीत्याह ॥ व्याप्त इति ॥ अनेन "सर्वमावृत्य तिष्ठति", 'हृदि सर्वस्य विष्ठितम्" इत्याद्युक्ततात्पर्यं भवति । तद्दूरे तदन्तिक इत्यादौ विरुद्धधर्मोक्त्येश्वरस्य निःस्वभावत्वोक्तेः कथमुक्तं युक्तं स्यादित्यतस्तद्धटयति ॥ सर्वगत्वादिति ॥ अनेन

व्याख्यातमित्यर्थः ॥ कर्मणोऽप्युपलक्षणमिति ॥ सर्वकर्मेन्द्रियकर्माणि करोति चेत्यपि ज्ञेयमित्यर्थः ॥ अनेनेतीति ॥ इति व्याख्यातमितीति पूर्वेणान्वयः ॥ इत्याद्युक्ततात्पर्यं भवतीति ॥ महत्त्वाणुत्वपरिमाणरूपेण हृदि विष्ठितमित्युक्तं

अनन्ताव्ययशक्तित्वात् तदन्यत्र विरोधिनः ।
सन्ति सर्वे गुणास्तत्र न च तत्र विरोधिनः ॥"

इति च ।

न च जीवस्य क्षेत्रज्ञनाम ।

"क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचिता अनित्याः ।
आविर्हिताश्चापि तिरोहिताश्च शुद्धो विचष्टे ह्यविशुद्धकर्तुः ॥"

इति भागवते ।

अत एतद्यो वेत्तीत्युक्ते जीवस्यापि किञ्चिज्ज्ञानात्तत्प्राप्तेस्तन्निरा-

---

"दूरस्थं" इति व्याख्यातं भवति । व्याप्तत्वाणुत्वादीनां वस्त्वन्तरे सहानवस्थानात् कथं हरौ सह स्थितिरित्यत आह ॥ अनन्तेति ॥ अनन्ताव्ययशक्तित्वेऽपि विरोधिनः कथं तेऽत्र सन्तीत्यत आह ॥ न चेति ॥ क्षेत्रज्ञनाम्नो जीवे प्रसिद्ध्यभावाच्च नात्रासावुच्यत इत्याह ॥ न चेति ॥ कचित् सद्भावेऽपि तदमुख्यमिति भावः । न च विष्णावपि क्षेत्रज्ञनाम्नो न प्रसिद्धिरिति वाच्यम् । उक्तवचन एव प्रसिद्धत्वात् । वचनान्तरेऽपि तत्प्रसिद्धिं दर्शयति ॥ क्षेत्रज्ञ इति ॥ मनसो विभूतीर्मनसो विकारान् । मायारचिताः निमित्तभूतस्वेच्छारचिताः ।

इतश्च "एतद्यो वेत्ति" इत्येतन्न जीवपरमित्याह ॥ अत इति ॥ यतोऽत्र न जीवो विवक्षितोऽत एव एतद्यो वेत्तीति भगवदभिप्रायेण । सामान्यतः क्षेत्रज्ञशब्दस्य व्युत्पादितत्वात् जीवस्यापि किञ्चित्क्षेत्रज्ञान-सद्भावात् तस्य क्षेत्रज्ञत्वप्राप्तेस्तन्निराकरणाय क्षेत्रज्ञं मामित्युक्त-मित्यर्थः । जीवस्य क्षेत्रज्ञत्वनिराकरणाय क्षेत्रज्ञं मामित्युक्तमिति कुत इति चेत् ? किम् 'एतद्यो वेत्ति' इत्यस्येश्वरपरत्वमभ्युपगम्येदमुच्यते

भवतीत्यर्थः ॥ उक्तवचन एवेति ॥ क्षेत्रज्ञो भगवान्विष्णुरिति प्रागुक्तवचन एव प्रसिद्धत्वादित्यर्थः । मनोविकारान् ज्ञानेच्छादीनित्यर्थः । व्यर्थपदस्यार्थ-

करणार्थं क्षेत्रज्ञं चापि मां विद्धीत्याह । अन्यथा एतद्यो वेत्तीत्युक्तेनैव सिद्धत्वात् क्षेत्रज्ञं चापीति व्यर्थम् । भेदपक्षे तु नामनिरुक्त्यर्थमेतद्यो वेत्तीति । सर्वाभेदमपि केचिद्वदन्तीति क्षेत्रं च ज्ञश्चेति

उत जीवविषयत्वम्? पक्षद्वयं दूषयति ॥ अन्यथेति ॥ 'एतद्यो वेत्ति' इत्यस्येश्वरपरत्वमङ्गीकृत्य 'क्षेत्रज्ञं मां' इत्यस्य जीवव्यावर्तकत्वानङ्गीकारे परमेश्वरस्य 'एतद्यो वेत्ति' इत्यनेनैव क्षेत्रज्ञत्वसिद्धेः क्षेत्रज्ञं मामिति पुनस्तद्वचनस्य वैयर्थ्यं स्यात्। एतद्यो वेत्तीत्यस्य जीवपरत्वमङ्गीकृत्य क्षेत्रज्ञं मामित्यस्य जीवव्यावर्तकत्वानङ्गीकारे वक्तव्यस्य जीवक्षेत्रज्ञत्वस्यैतद्यो वेत्तीत्युक्तेनैव पूर्णत्वात् क्षेत्रज्ञं मामिति निरर्थकं विरुद्धार्थं च स्यादिति भावः ।

एतद्यो वेत्तीत्यस्य जीवपरत्वेऽपि नोत्तरवाक्यवैयर्थ्यम् । जीवस्य क्षेत्रज्ञत्वमुक्त्वा ईश्वरस्याप्युच्यत इति क्षेत्रज्ञत्वेनोक्तजीवस्य क्षेत्रस्य चेश्वरैक्यमुच्यत इति सार्थक्योपपत्तेः । प्रत्युतैवमनभ्युपगम्येश्वरस्यैव क्षेत्रज्ञत्वाङ्गीकृतावेतद्यो वेत्तीति व्यर्थं स्यात्। क्षेत्रज्ञं चापीत्यनेनैवेश्वरस्य क्षेत्रज्ञत्वसिद्धेरित्यत आह ॥ भेदेति ॥ जीवस्य क्षेत्रज्ञत्वमुक्त्वा तस्येश्वराभेद उच्यत इत्यादियोजनामनङ्गीकृत्येश्वरस्य क्षेत्रज्ञत्वाङ्गीकारेऽप्येतद्यो वेत्तीति सार्थकमेव । क्षेत्रज्ञनामनिरुक्त्यर्थत्वादित्यर्थः । क्षेत्रं जानातीति क्षेत्रज्ञ इति क्षेत्रज्ञनामनिरुक्तेः

द्वयमाह ॥ निरर्थकं विरुद्धार्थं च स्यादिति ॥ जीवस्य क्षेत्रज्ञत्वपक्षे भगवतः क्षेत्रज्ञत्वोक्तेर्विरोधादिति भावः । शंकते ॥ एतदित्यादिना ॥ उच्यत इतीत्यनन्तरं वाशब्दो योज्यः । क्वचित्तथैव पाठः ॥ क्षेत्रज्ञं चापि मामित्यत्र क्षेत्रं चासौ तज्ज्ञश्चेति व्युत्पत्तिमुपेत्य ज्ञशब्दार्थोक्तिर्जीवस्य क्षेत्रज्ञस्येति । यद्वा क्षेत्रज्ञजीवं सर्वक्षेत्रं च मामिति सर्वक्षेत्रपदं द्वितीयांततया त्रिपरिणाम्यानुवदति ॥ क्षेत्रस्य चेति ॥ शङ्कामनुवदति ॥ जीवस्येत्यादिना ॥ इत्यादियोजनामिति ॥ प्रागुक्तव्युत्पत्त्या क्षेत्राभेदश्चोच्यत इति

व्युत्पत्तिं निधारयति । क्षेत्रज्ञं मां सर्वक्षेत्रेषु स्थितत्वेन विद्धीत्यर्थः । तत्पक्षे तु यो वेत्तीत्युक्त ईश्वरस्यापि क्षेत्रज्ञत्वं सिद्धमेव । सर्वाभेद-

---

प्रसिद्धत्वात् क्षेत्रज्ञं चापि मामित्येतावतैवालं किं निरुक्त्येत्यत आह ॥ सर्वेति ॥ 'क्षेत्रज्ञं चापि मां विद्धि' इत्येवोक्ते क्षेत्रं च ज्ञश्चेति क्षेत्रज्ञ इति व्युत्पत्त्या जडजीवात्मकत्वमीश्वरस्यैवोच्यत इति प्रतीतिः स्यात् । तन्निराकरणाय प्रसिद्धाऽपि व्युत्पत्तिरुच्यते । न च प्रसिद्ध-व्युत्पत्तिं परित्यज्यैवं व्युत्पत्त्या शङ्काप्राप्तिरेव नास्तीति वाच्यम् । जडजीवात्मकस्य सर्वस्यापीश्वरेणाभेदमङ्गीकुर्वतां तथा प्रतीतिसम्भवादिति भावः ।

ईश्वरस्य क्षेत्रज्ञनामनिरुक्तिः, जीवस्य तदभाव इत्येतत्सर्वस्य एतद्यो वेत्तीश्वरस्तं क्षेत्रज्ञं प्राहुरित्यादिवाक्य एव ईश्वरवाचिपद-प्रक्षेपेण वक्तुं शक्यत्वात् तदर्थं पृथग् वाक्यकल्पने गौरवमित्यत आह ॥ क्षेत्रज्ञमिति ॥ नोत्तरवाक्ये जीवव्यावृत्त्यर्थमेव स्वस्य क्षेत्रज्ञत्वमात्र-मुच्यते । येन गौरवं स्यात् । किन्तु जीवव्यावृत्त्यर्थमीश्वरस्यास्फुट-मुक्तं क्षेत्रज्ञत्वं स्फुटमनूद्याव्यक्तादिशरीरस्य कथं क्षेत्रशब्दवाच्यत्व-मित्यतः क्षीयतेऽत्र ईश्वरेणेति क्षेत्रमित्यर्थसूचनाय स्वस्य क्षेत्रे स्थिति-श्चोच्यत इति भावः ।

यदुक्तमेतद्यो वेत्तीति जीवस्य क्षेत्रज्ञत्वमुक्त्वा क्षेत्रज्ञं चापीति ईश्वरस्यापि तदुच्यतेऽतो न वैयर्थ्यमिति तन्निराचष्टे ॥ तत्पक्ष इति ॥ एतद्यो वेत्तीत्यस्य जीवविषयत्वपक्षे क्षेत्रं जानातीति क्षेत्रज्ञ इति

योजनामित्यादिपदार्थः । शङ्कते ॥ क्षेत्रं जानातीति ॥ इत्येतत्सर्वस्येति ॥ इत्यभिमतार्थस्य सर्वस्येत्यर्थः ॥ आदिवाक्य एव प्रश्नवाक्य एवेत्यर्थः ॥ इतीश्वरवाचिपदप्रक्षेपेणेत्यन्वयः ॥ पृथग्वाक्येति ॥ एतद्यो वेत्तीति क्षेत्रज्ञं चापि मामिति पृथग्वाक्येत्यर्थः ॥ अव्यक्तादिशरीरस्येति ॥ इदं शरीरं कौंतेयेत्यत्रोक्तस्याव्यक्तादिरूपशरीरस्येत्यर्थः । योगव्युत्पत्त्या शरीरशब्दनिर्दिष्टा-व्यक्तादेरिति यावत् ॥ क्षीयत इति ॥ स्थीयत इत्यर्थः । क्षि निवासगत्यो-

विवक्षायां च सर्वं क्षेत्रमिति वक्तव्यम्। क्षेत्रेष्विति व्यर्थम्। न च तत्पक्षे मामित्यस्य कश्चिद्विशेषः। किन्त्वेक एव क्षेत्र इति वक्तव्यम् ॥ ३ ॥

यतश्च यत्। यतः परमेश्वरानुमतेरिदं याति प्रवर्तते स चानुमन्ता यः। अनुसारिणी मतिरनुमतिः प्रेरणरूपा।

"प्रेरणाऽनुमतिः प्रोक्ता क्वचित्संवाद उच्यते।
प्रेरकत्वात्तु भगवाननुमन्ता प्रकीर्तितः ॥"

व्युत्पत्तेर्जीव इव ईश्वरेऽपि साम्येन एतद्यो वेत्तीत्युक्त्यैवेश्वरस्यापि क्षेत्रज्ञत्वं सिद्ध्यत्येव। अतः क्षेत्रज्ञं चापीति वाक्यं व्यर्थमेवेति भावः। क्षेत्रज्ञतयोक्तजीवस्य क्षेत्रस्य चेश्वराभेदकथनाय क्षेत्रज्ञं चापि मां विद्धीति सार्थकमित्युक्तं दूषयति ॥ सर्वेति ॥ यदि क्षेत्रज्ञं चापि मामित्यत्र क्षेत्रक्षेत्रज्ञरूपस्य सर्वस्याभेदो विवक्षितः स्यात्तर्हि सर्वक्षेत्रं क्षेत्रज्ञं चापि मां विद्धीति वक्तव्यम्। सर्वक्षेत्रेष्विति सप्तमीप्रयोगोऽनुपपन्नः स्यादिति भावः। तर्हि क्षेत्रज्ञस्यैवेश्वराभेदोऽत्रोच्यताम्। तथात्वे बाधकाभावादित्यत आह ॥ न चेति ॥ यदि क्षेत्रज्ञतयोक्तजीवस्येश्वरस्य चैक्यमत्र विवक्षितं स्यात्तर्हि क्षेत्रज्ञोऽहं चैक एवेति वक्तव्यम्। न तु क्षेत्रज्ञमनूद्येश्वरत्वविधानं युज्यते। जीवमनूद्य मां विद्धीति विधातुमस्येश्वरस्यापि जीववत् कल्पितत्वेन विशेषाभावादिति भावः ॥ ३ ॥

'तत्क्षेत्रं यत्' इत्युक्तत्वात् 'यतश्च यत्' इति पुनरुक्तिरित्यत आह ॥ यतश्चेति ॥ तर्हि 'सा च या' इति वक्तव्यमित्यतस्तत्प्रतिज्ञान्तरमिति भावेनाह ॥ स चेति ॥ केयमनुमतिरित्यत आह ॥ अनुसारिणीति ॥ कार्योत्पादस्येति शेषः। अनेनानुमन्तृशब्दार्थोऽप्युक्तो भवति। अत्र प्रमाणमाह ॥ प्रेरणेति ॥ 'यतश्च यत्', 'स च

रिति धातोः ॥ अनुपपन्नः स्यादिति ॥ विपरिणामस्त्वगतिकागतिरिति

इति च। उपद्रष्टाऽनुमन्ता चेत्यनेनैवानुमतिरनुमन्ता चोक्तः। ज्ञेयं यत्तदित्यादिना यत्प्रभाव इत्यपि ॥ ४ ॥

चेतना चित्तव्याप्तिः।

"सङ्घातो देह उद्दिष्टश्चित्तव्याप्तिस्तु चेतना।"

इति च ॥ ५–७ ॥

तत्त्वज्ञानविषयस्य विष्णोरपरोक्षदर्शनं तत्त्वज्ञानार्थदर्शनम्। ज्ञायतेऽनेनेति ज्ञानम्। ज्ञप्तिर्ज्ञानमिति व्युत्पत्त्या "एतज्ज्ञानमिति प्रोक्तं" इति ज्ञानसाधनं ज्ञानं चोक्तम् ॥ १२ ॥

यः' इति प्रतिज्ञाद्वयं चेत्तर्हि तदुभयमुत्तरत्रोच्यते। न चोभयोक्तिः श्रूयत इत्यत आह ॥ उपद्रष्टेति ॥ 'उपद्रष्टाऽनुमन्ता' इत्यादिनाऽनुमन्तुरुक्तत्वात् तद्धर्मतयाऽनुमतिरप्युक्तैवेति भावः। 'यत्प्रभावश्च' इति प्रतिज्ञातं कुत्रोच्यत इत्यत आह ॥ ज्ञेयमिति ॥ ननु चैतन्यस्याविकारित्वात् कथं विकारेषु चेतना पठ्यत इत्यत आह ॥ चेतनेति ॥ ननु महाभूतानीत्यादिनोक्तानां सङ्घातस्य क्षेत्रत्वात् कार्यत्वं कथमुच्यत इत्याशङ्कां परिहरन् उक्तार्थे प्रमाणमाह ॥ सङ्घात इति ॥ ७ ॥

ज्ञेयं वक्तुं ज्ञानमुच्यते 'अमानित्वं' इति। तत्र तत्त्वज्ञानार्थदर्शनपदस्यास्फुटार्थत्वात् तदर्थमाह ॥ तत्त्वेति ॥ नन्वमानित्वमित्यादिना ज्ञानसाधनं तत्त्वज्ञानार्थदर्शनमिति ज्ञानं चोक्त्वोपसंहारे कथम् 'एतज्ज्ञानमिति प्रोक्तं' इत्युच्यत इत्यत आह ॥ ज्ञायत इति ॥ प्रोक्तमित्यत्र ज्ञानशब्देनेति शेषः। उक्तमित्युच्यत इति वा ॥ १२ ॥

ननु 'अनादिमत्परं ब्रह्म' इत्यत्रानादीत्येतावता पूर्णत्वात् अनादिमदिति किमर्थमुच्यत इत्यत आह ॥ अनादीति ॥ न चात्र

भावः ॥ ज्ञानमुच्यत इति ॥ ज्ञानशब्दोऽत्र भावे करणे च व्युत्पन्नः सन् ज्ञप्तितत्साधनोभयपरः। केन साधनं केन ज्ञप्तिरुच्यत इत्यतस्तद्विवेचयन्नेव मूलमवतारयति ॥ नन्वित्यादिना ॥ न चात्रेति ॥ आदिमन्न भवतीत्यनादि-

अनादीत्युक्ते स्वयं कारणं न भवतीत्याशङ्का स्यादिति तन्निवृत्यर्थमनादिमदित्याह ।

"मुख्यतो गुणपूर्णत्वात्परंब्रह्म जनार्दनः ।
मूर्तामूर्तव्यतीतत्वान्न सन्नैवासदुच्यते ॥" इति च ।
"मूर्तं सदवगम्यत्वादज्ञेयत्वादसत्परम् ।
पुंसामर्थ्यादगम्यत्वात् सर्ववेदप्रसिद्धितः ।
विलक्षणः सदसतोर्भगवान् विष्णुरव्ययः ॥"

इति च ॥ १७ ॥

भाष्यविरोधः । तत्रोक्तस्य मतुपो मुख्यार्थस्यानङ्गीकारे भाष्ये दोषस्योक्तत्वात् । अत्र पुनस्तमङ्गीकृत्यैव [1]प्रयोजनान्तरं मतुपा चिनोतीति ।

मदित्यभिप्रेत्यानादीत्यादीना मूलोक्तार्थेऽन्यथानादीत्येव स्यादिति भाष्ये विरोध इत्यर्थः ॥ तत्रेति ॥ आदिमन्न भवतीत्यनादिमदिति विग्रहाङ्गीकारेण कारणोपेतं नेत्यर्थस्वीकारे न विद्यते आदिः कारणं यस्येति बहुव्रीह्याश्रयेणैवास्यार्थस्य सिद्धेर्मतुपो वैयर्थ्यं स्यादित्युक्तेस्तद्विरोध इत्यर्थः ॥ तत्रोक्तस्येति ॥ आदिरेषामस्तीत्यादिमन्ति देहेन्द्रियगुणकर्माणि । न विद्यन्ते आदिमन्ति यस्य तदनादिमदित्युक्तस्य मुख्यार्थत्वस्येत्यर्थः । दोषस्येति ॥ मतुपो वैयर्थ्यदोषस्येत्यर्थः ॥ तमङ्गीकृत्येति ॥ वैयर्थ्यदोषमङ्गीकृत्य आदिकारणं न भवतीत्यनादीति नञ्तत्पुरुषाश्रयेण स्वयं कारणं नेति चोद्यनिवृत्तिरूपं प्रयोजनमन्वाचिनोति । अनास्थयोपादत्ते इत्यर्थः । चार्थयोरन्वाचयसमुच्चययोरन्वाचयरूपार्थो न समुच्चयरूपः । अनादीत्युक्तावपि न विद्यते आदिकारणं यस्येति बहुव्रीहिणा स्वस्य कारणं नेत्यर्थो लभ्यते । नञ्तत्पुरुषपक्षे तु छान्दसलिङ्गव्यत्ययो वा विभक्तिलोपो वा आश्रयणीयः । अन्यथाऽऽदिशब्दस्य नित्यपुल्लिङ्गतयाऽनादिरिति स्यात् । अतोऽनास्थयोक्तशङ्कानिवृत्तिरूपं

1. प्रयोजनान्तरमन्वाचिनोति इति पाठान्तरम् ।

ज्ञानेन मुक्तौ प्राप्यत्वात् ज्ञानगम्यम् । स्वयमेवाऽऽत्मनाऽऽत्मानं वेत्थेति स्वज्ञेयत्वाज्ज्ञेयम् । अन्यज्ञेयत्वस्य "ज्ञेयं यत्तत्" इति पूर्वमेव सिद्धत्वात् । कर्तृकर्मविरोधवादिमतं निराकरोत्युत्तरज्ञेयशब्देन ।

"स्ववेत्ता वेदनं च स्वं स्वेन वेद्यश्च केशवः ।
परस्य वेत्ता वित्तिश्च वेद्यश्च स्यात्परैः क्वचित् ॥

परंब्रह्म न सत्तन्नासदुच्यत इत्येतत् प्रमाणवाक्येनैव व्याचष्टे ॥ मुच्यत इति ॥ कथं मूर्तामूर्तयोः सदसच्छब्दवाच्यत्वं, कथं च भगवतस्त-द्विलक्षणत्वमित्यत आह ॥ मूर्तमिति ॥ परं अमूर्तम् ॥ १७ ॥

ज्ञानगम्यमिति ज्ञानविषयत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ ज्ञानेनेति ॥ ज्ञेयपदेनान्यज्ञेयत्वमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ स्वयमेवेति ॥ अत्र स्वज्ञेयत्वमेवोच्यते, न तु परज्ञेयत्वम् । न च भगवतः स्वज्ञेयत्वाभावः । स्वयमिति तस्योक्तत्वादित्यर्थः । अन्य-ज्ञेयत्वमर्थः किं न स्यादिति आह ॥ अन्येति ॥ ज्ञानं ज्ञेयमिति ज्ञेयशब्दे-नैकस्यां क्रियायां कर्तृकर्मणोरैक्यविरोधान्नेश्वरस्य ज्ञेयत्वमुक्तमिति वदतां वादिनां मतनिरासाय स्वज्ञेयत्वमेवोच्यते । न त्वन्यज्ञेयत्वम् । तस्य 'ज्ञेयं यत्तत् प्रवक्ष्यामि' इत्युपक्रमवाक्य एवोक्तत्वेन पुनरुक्ति-प्रसङ्गादिति भावः । स्वज्ञेयार्थत्वे प्रभावोक्तिरियं कथमित्यत आह ॥ कर्तृकर्मेति ॥ अघटितमप्येकस्यां ज्ञानक्रियायां कर्तृकर्मभावमात्मनि ईश्वरो घटयतीत्येवमभिप्रायेणेदमुच्यते । अतो भवति प्रभावोक्तिरिय-मिति भावः ।

ईश्वरस्य ज्ञेयत्वे प्रमाणान्तरं चाह ॥ स्ववेत्तेति ॥ स्ववेत्ता स्वतन्त्रवेत्ता । तस्य वेदनं च स्वतन्त्रम् । कस्य वेत्तेत्यत आह ॥

प्रयोजनलाभमङ्गीकरोत्यादिमन्नेति विग्रहाश्रयणम् । वस्तुतस्तु भाष्योक्तार्थ एव तात्पर्यमिति भावः ॥ इत्येतदिति ॥ परब्रह्मादिशब्दजातमित्यर्थः ॥ उक्तत्वा-दिति ॥ दशमे ॥ स्वतन्त्रवेत्तेति ॥ आगमशासनमनित्यमितीडभावः । वेदि-

तत्प्रसादं विना कश्चिन्नैव वेत्तुं हि शक्नुयात् ।
स्ववेदनेऽन्यवित्तौ वा नासावन्यदपेक्षते ॥
स्वप्रकाश इति प्रोक्तस्तेनैकः पुरुषोत्तमः ।
जीवानां स्वप्रकाशत्वं तत्प्रसादात्स्ववेदनम् ॥"

इति च ॥ १८ ॥

मद्भावाय मयि भावाय ॥ १९ ॥

स्वेनेति ॥ यच्च तस्य वेदनं स्वतन्त्रमुक्तं तदपि न तस्माद्भिन्नमित्याह ॥ वित्तिश्चेति ॥ किं स्वेनैव वेद्य इत्यत आह ॥ वेद्यश्चेति ॥ कश्चिदिति किमर्थमुच्यते, सर्वथा परैर्वेद्यः किं न स्यादित्यत आह ॥ तदिति ॥ यथाऽन्येषां भगवज्ज्ञाने तत्प्रसादसापेक्षता तथा भगवतोऽपि स्ववेदनादौ परसापेक्षता नास्तीति स्वातन्त्र्यं विवृणोति ॥ स्वेति ॥ तेन स्ववेत्तृत्वादिना । तथाहि—स्वः स्वतन्त्रश्चासौ प्रकाशयति वेत्तीति प्रकाशश्चेति स्वप्रकाशः । स्वः स्वतन्त्रः प्रकाशो यस्यासौ स्वप्रकाशः । स्वः प्रकाशः प्रकाश्यो येनासौ स्वप्रकाशः । स्वश्चासौ प्रकाशश्चेति स्वप्रकाशः । परस्य वेत्ता वेद्यश्च स्यादिति न स्वप्रकाशशब्दार्थकथनम् । जीवानामपि स्वप्रकाशत्वात् कथमेक इत्युच्यत इत्यत आह ॥ जीवानामिति ॥ जीवानां स्वतन्त्रत्वेत्तृत्वाभावादेक इति युक्तमिति भावः ॥ १८ ॥

उक्तमुपसंहृत्य तज्ज्ञानं स्तूयते इतीति ॥ तत्र मद्भावपदमन्यथाप्रतीतिनिरासाय व्याचष्टे ॥ मद्भावायेति ॥ १९ ॥

तेत्यर्थः । स्ववेत्तेति प्रागुक्तार्थमाह स्वः स्वतन्त्र इत्यादिना । ज्ञानं च स्वमित्युक्तमाह ॥ स्वः स्वतन्त्रश्चेत्यादि ॥ स्वेन वेद्यश्चेत्युक्तार्थोक्तिः स्वः प्रकाश इत्यादि । स्वः स्वतन्त्र इत्यर्थः । स च स्वयमेवेति कर्मणि घञिति भावः । वित्तिश्चेत्युक्तार्थोक्तिः ॥ स्वश्चासावित्यादि ॥ परस्य वेत्ता वेद्यश्च परैरित्युक्तार्थोऽत्र कुतो नोच्यत इत्यत आह ॥ परस्य वेत्तेत्यादि ॥ किन्तु प्रागुक्त-

'प्रकृतिं पुरुषं च' इत्यत्र पुरुषशब्देन जीवपरयोः प्रकृतिशब्देन चेतनाचेतनप्रकृत्योः स्वीकाराय 'उभावपि' इति। विकाराणां सत्त्वादीनां चोपादानत्वविवक्षया प्रकृतिसम्भवत्वम्। स्वातन्त्र्यं तु परमेश्वरस्यैव। 'उपद्रष्टाऽनुमन्ता च' इत्यादिवक्ष्यमाणत्वात्। गुणानां च विकारत्वेऽप्यधिकविकारत्वविवक्षयाऽन्येषां विकारांश्च

यतश्च यत् स च य इति प्रतिज्ञातं वक्तुं प्रकृत्यादिस्वरूपमुच्यते 'प्रकृतिमिति'। तत्र प्रकृतिं पुरुषं चेत्युक्त्यैवोभाविति सिद्धेः किमुभावित्युक्तेनेत्यत आह ॥ प्रकृतिमिति ॥ इत्युक्तमिति शेषः। उभावित्युक्तस्य पुल्लिङ्गेनान्वयाय व्युत्क्रमः। अनेनोभावित्येतत् पृथग्वाक्यमित्युक्तं भवति। उभे अपीति सङ्ग्रहश्च। विकारांश्च गुणांश्चेत्यत्र विकारादीनां प्रकृतिः स्वतन्त्रं कारणमित्यन्यथाप्रतीतिम् इच्छादयो विकारा इत्युक्तत्वाद् गुणशब्दार्थमेव वदन् निराकरोति ॥ विकाराणामिति ॥ स्वातन्त्र्यमेव प्रकृतेः किं न स्यादित्यत आह ॥ स्वातन्त्र्यमिति ॥ उपद्रष्टाऽनुमन्ता चेतीश्वरस्यैव स्वातन्त्र्यस्य वक्ष्यमाणत्वात् न प्रकृतेः स्वातन्त्र्यं, किन्तूपादानत्वमेवेत्यर्थः। नन्विच्छादिवत् सत्त्वादिगुणानामपि विकारत्वाद् विकारांश्च गुणांश्चेति पृथगुक्तिः किंनिमित्तेत्यत आह ॥ गुणानां चेति ॥

दिशा शङ्कानिरासार्थं प्राप्तमिति शेषः ॥ अन्यथाप्रतीतीति ॥ मदात्मकत्वप्रतीतीत्यर्थः। भाष्योक्तसंगतिमाह ॥ यतश्चेत्यादि ॥ वक्तुमिति ॥ उपद्रष्टेत्यादिनेति योज्यम्। ततः प्रेरकाद्यत् प्रवर्तमानमस्ति प्रकृत्यादिक्षेत्रमित्यर्थः। स च प्रेरकश्च य इति प्रतिज्ञातमित्यर्थः ॥ पुल्लिङ्गेनान्वयायेति ॥ पुरुषपदेनान्वयाय पुरुषशब्दितौ उभावित्यन्वयाय पश्चादुक्तपुरुषशब्दार्थं प्रागुक्त्वा पश्चात्प्रकृतिशब्दार्थ उक्त इत्यर्थः। व्युत्क्रमव्याख्यानेन किं जातमित्यत आह ॥ अनेनेति ॥ पृथग्वाक्यमिति ॥ प्रकृतिं पुरुषं च विद्धि उभौ जीवपरौ उभे चेतनाचेतनप्रकृती चानादी विद्धीत्येवमित्यर्थः ॥ इति सङ्ग्रहश्चेति ॥ इत्यस्याप्यत्र(सं)ग्रहणमित्यर्थः ॥ प्रतीतिमिति निराकरोतीत्य-

गुणांश्चेति पृथगुक्तिः ।

"स्वदेहेन्द्रियहेतुत्वं यज्जीवस्य स्वकर्मभिः ।
आवृत्य विष्णुतत्त्वं तद्धेतुश्चित्प्रकृतिर्मता ॥
जीवस्य सुखदुःखानां भोगशक्तिप्रदः सदा ।
परमः पुरुषो विष्णुः सर्वकर्ताऽपि सन् सदा ॥
विशेषकर्ता केषाञ्चिदुक्तो यद्वद्विकुण्ठपः ।
उच्यते सर्वपालोऽपि विशेषेण स्वकर्मणा ॥" इति च ।

सत्त्वादिगुणानां विकारत्वेऽपि विकारांश्च गुणांश्चेति पृथगुक्तिः सत्त्वादीनामल्पविकारत्वादिच्छादीनां ततोऽधिकविकारत्वात्तद्विवक्षया युक्तेत्यर्थः ।

'कार्यकारणकर्तृत्वे' [1]इति श्लोकमचेतनप्रकृतिजीवविषयत्वप्रतीतिनिरासाय चेतनप्रकृतीश्वरविषयतया प्रमाणेनैव व्याचष्टे ॥ स्वदेहेति ॥ विष्णुतत्त्वमावृत्येति ॥ विष्णोर्यथास्थितिमज्ञापयित्वेत्यर्थः । विष्णुतत्त्वाज्ञस्यैव बन्धकर्मसम्भवेन देहेन्द्रियहेतुत्वादज्ञानहेतुचित्प्रकृतेर्जीवस्य शरीरेन्द्रियहेतुत्वम् । ईश्वरपरतयोत्तरार्धं व्याचष्टे ॥ जीवस्येति ॥ सर्वकर्तृत्वादीश्वरस्य भोगशक्तिकर्तृत्वं किं विशिष्योच्यत इत्यत आह ॥ सर्वेति ॥ यथा सर्वपालोऽपि विकुण्ठपो विशिष्योच्यते, स्थानान्तरस्येव विकुण्ठस्य पालकान्तररहितत्वात् तथा सर्वकर्ताऽपि हरिः केषाञ्चिद्भोक्तृत्वादीनां कर्ता विशिष्योच्यते । कार्यान्तर इव भोक्तृत्वादावन्येषां प्रवृत्त्यभावादित्यर्थः । विशेषेण स्वकर्मणा केवलेन स्वकर्मणा । एतेन भगवतः कार्यकारणकर्तृत्वहेतुत्वेऽपि चित्प्रकृते-

---

न्वयः । शङ्कते ॥ अज्ञानहेतुचित्प्रकृतेरित्यादि ॥ हेतुत्वं किं विशिष्योच्यत इत्यन्वयः । अस्योत्तरं एतेन भगवत इत्यादिनाग्रे व्यक्तम् ॥ स्वकर्मणेति ॥

---

1. इति श्लोकस्य न केवलमचेतनप्रकृतिजीवविषयत्वं, किन्तु चित्प्रकृतीश्वरविषयत्वमपीति पूर्वार्धं चेतनप्रकृतिविषयतया प्रमाणेनैव व्याचष्टे— इति मुद्रितपुस्तके पाठान्तरमपि दर्शितम् ।

परमेश्वरस्यैव सर्वकर्तृत्वेऽपि भोक्तृत्वदाने देव्या अल्पप्रवृत्तिरिति दर्शयितुमुच्यत इति स्थानद्वयेऽप्युक्तम् । कर्तृत्वेऽपि स एव मुख्यहेतुः । तथापि भोक्तृत्वापेक्षया तस्या अधिकप्रवृत्तिरिति कर्तृत्वे "हेतुः प्रकृतिरुच्यते" इति सर्वहेतुत्वेऽपि विष्णोः प्रकृतेर्जीवं प्रति भोक्तृत्वदानेऽल्पप्रवृत्तिरिति पुरुषो "भोक्तृत्वे हेतुरुच्यते" इति विशेषहेतोरेवमुच्यते । मुख्यतस्तु सर्वहेतुत्वं विष्णोरेवेति भावः । "पुरुषः प्रकृतिस्थः" इत्यत्र पुरुषशब्दो जीवे । उभयोरपि पुरुषशब्देन पूर्वं प्रस्तुतत्वात् । यथायोग्यमुपपत्तेः ॥ २१ ॥

भोक्तृत्वप्रदाने स्वप्रवृत्तिमपेक्ष्य कार्यकारणकर्तृत्वेऽधिकप्रवृत्तिरिति कार्यकारणकर्तृत्वे हेतुत्वोक्तिरिति सूचितं भवति ।

एतदुभयं गीतायामेव सूचितमित्याह ॥ परमेश्वरस्येति ॥ परमेश्वरस्यैव कार्यकारणकर्तृत्वे हेतुत्वेऽपि चित्प्रकृतेस्तदुक्तिर्युक्ता । भोक्तृत्वदाने तस्या अल्पप्रवृत्तित्वेन तदपेक्षया कर्तृत्वेऽधिकप्रवृत्तिमत्त्वात् । तथा परमेश्वरस्य सर्वकर्तृत्वेऽपि विशिष्य भोक्तृत्वदानोक्तिर्युक्ता । भोक्तृत्वदाने चित्प्रकृत्यादीनामन्यत्र प्रवृत्तिमपेक्ष्याल्पप्रवृत्तित्वेन भगवत एवाधिकप्रवृत्तित्वादित्येतत्सूचयितुमस्य श्लोकस्य पूर्वोत्तरार्धयोरुच्यत इत्युक्तमित्यर्थः । कथमनेनैतत्सूचितमित्यत आह ॥ कर्तृत्वेऽपीति ॥ भोक्तृत्वापेक्षयेति ॥ स्वस्या भोक्तृत्वदाने प्रवृत्त्यपेक्षयेत्यर्थः । अधिकप्रवृत्तिः कार्यकारणकर्तृत्व इति शेषः । भोक्तृत्वे हेतुरुच्यते । विशेषेणेति शेषः ।

'पुरुषः प्रकृतिस्थो हि' इत्यत्रेश्वर उच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ पुरुष इति ॥ ईश्वरस्य 'पुरुषः सुखदुःखानां' इति पुरुषशब्देन प्रकृतत्वात् कथमत्र जीवे पुरुषशब्द इत्यत आह ॥ उभयोरिति ॥ यद्यप्यत्र पुरुषशब्देनेश्वरः प्रकृतस्तथाप्यत्र पुरुषशब्दस्य जीवविषयत्वग्रहणं युक्तम् । 'प्रकृतिं पुरुषं चैव' इत्यत्र पुरुषशब्देनेश्वरवत् जीवस्यापि प्रकृतत्वात् । अन्यथा 'उभौ' इत्यस्य वैयर्थ्यादिति

कार्यकारणसम्बन्धं भोगं च मिथ्येति वदतां निराकरणायाह —"प्रकृतिः पुरुषस्थो हि" इति। हीत्यनुभवविरोधं दर्शयति तेषाम्। न हि ज्ञानाज्ञानसुखदुःखादिविषयस्यान्तरानुभवस्य भ्रान्तित्वं

भावः। अस्तु जीवः प्रकृतस्तथापि समीपप्रकृतं परित्यज्य दूरप्रकृतग्रहणं नोपपन्नमित्यत आह ॥ यथेति ॥ समीपप्रकृतत्वेऽपीश्वरस्य तत्परित्यागेन दूरप्रकृतजीवग्रहणमुपपद्यते। अस्य पुरुषस्य प्रकृतिजगुणभोक्तृत्वप्रतीतेः। ईश्वरस्य तदयोगात्, जीवस्य तद्योग्यत्वात्। यथायोग्यमेवार्थाश्रयणस्योपपन्नत्वादिति भावः। उभयोः प्रकृतत्वे जीवमात्रग्रहणं कथमित्यतो वाऽह ॥ यथेति ॥ २१ ॥

यद्यत्र पुरुषपदं जीवपरं तर्हि पुनरुक्तिः स्यात्। जीवस्य 'कार्यकारणकर्तृत्वे' इत्यनेनोक्तकार्यकारणसंबन्धस्यैव प्रकृतिस्थपदेनोक्तेः। सुखदुःखानां भोक्तृत्वे इत्यनेनोक्तसुखदुःखादिभोगस्यैव 'भुङ्क्ते प्रकृतिजान् गुणान्' इत्युक्तत्वादित्यत आह ॥ कार्येति ॥ कार्यकारणसंबन्धस्य सुखादिभोगस्य च प्रागुक्तत्वेऽपि तन्मिथ्यात्ववादिनां निरासाय 'पुरुषः प्रकृतिस्थो हि' इत्युक्तत्वान्न पुनरुक्तिदोष इति भावः। निराकरणस्य प्रमाणसापेक्षत्वात् तदनुक्तोक्ताभिधानमात्रेण कथं निराकरणमित्यत आह ॥ हीति ॥ अत्र कार्यकारणसम्बन्धस्य सुखादिभोगस्य च हिशब्देनानुभवप्रसिद्धिकथनेन तन्मिथ्यात्ववादिनामनुभवविरोधस्य दर्शितत्वात् नैतदुक्ताभिधानमात्रमिति भावः।

अहं सुखीदुःखीत्याद्यनुभवस्य भ्रान्तित्वसम्भवात् सुखादिभोगस्य मिथ्यात्वाङ्गीकारे कथं तद्विरोध इत्यत आह ॥ न हीति ॥ सुखादिविषयानुभवो न भ्रमः, आन्तरार्थानुभवत्वात्। आन्तरार्थानुभवस्य

खव्यापारेणेत्यर्थः ॥ इत्यतो वाह यथेतीति ॥ तदर्थः प्राग्वदेवेति भावः। शङ्कते ॥ यद्यत्र पुरुषपदमित्यादिना ॥ उक्ताभिधानमात्रेणेति ॥ प्रागुक्तस्य पुनः कथनमात्रेणेत्यर्थः। अनुकूलतर्कमाह ॥ आन्तरार्थानुभवस्येति ॥ बहि-

क्वचिद्दृष्टम् । न चास्य मिथ्यात्वे किञ्चिन्मानम् । शरीरमारभ्यैव ह्यपरोक्षभ्रमो दृष्टः । तत्रापि बलवत्प्रमाणविरोधादेव भ्रान्तित्वं कल्प्यम् । साक्षिसिद्धस्यापि भ्रान्तित्वाङ्गीकारे येन सर्वस्य भ्रान्तित्वमभ्रान्तित्वं चात्मनोऽवगतं तदपि प्रमाणमात्मैव । व्यवहारतोऽप्य-

---

भ्रमत्वादर्शनादिति भावः । बाधकाभावाच्च नायमनुभवो भ्रम इत्याह ॥ न चेति ॥ नन्वात्मादौ जैनादीनां मध्यमपरिमाणत्वादिज्ञानस्य भ्रमत्वदर्शनात् कथमान्तरार्थानुभवत्वादभ्रमत्वमुच्यत इत्याशङ्कां परिहरन् व्याप्तिमाह ॥ शरीरमिति ॥ नात्राऽन्तरानुभवत्वमेव हेतुः । येन व्यभिचारः स्यात् । अपि त्वपरोक्षत्वविशिष्टम् । अपरोक्षानुभवस्य च बहिरेव भ्रमत्वदर्शनादान्तरानुभवस्य तदभावः सिद्ध्यति ॥ जैनादीनां चानुमानादिनैव मध्यमपरिमाणत्वादिभ्रम इति भावः । बाधकाभावेऽपि सुखाद्यनुभवस्य भ्रमत्वं किं न स्यादित्यत आह ॥ तत्रापीति ॥ यत्र बहिरर्थानुभवस्य भ्रमत्वं तत्रापि बलवत्प्रमाणविरोधादेव तत् कल्प्यते । अतः सुखादिविषयानुभवस्य बाधकाभावेनाभ्रमत्वं युक्तमिति भावः ।

इतश्च न सुखादिविषयानुभवस्य भ्रमत्वेन सुखादेर्मिथ्यात्वं वाच्यमित्याह ॥ साक्षीति ॥ साक्ष्यनुभवसिद्धस्यापि सुखादेर्भ्रान्तिकल्पितत्वे सर्वं मिथ्या, आत्मा सत्य इति व्यवस्थाऽपि न सिद्ध्यति । एतद्व्यवस्थाया अपि साक्ष्यनुभवसिद्धत्वेन मिथ्यात्वापातादिति भावः ॥ भ्रान्तित्वमभ्रान्तित्वमिति ॥ भ्रान्तिकल्पितत्वमभ्रान्तिकल्पितत्वमित्यर्थः । सर्वं मिथ्या आत्मा सत्य इति व्यवहारत एवास्ति, न तु परमार्थतः । अतस्तदसिद्धिर्नानिष्टेत्यत आह ॥ व्यवहारत इति ॥ व्यवहारत एवेयं व्यवस्थाऽस्तीत्यपि न सिद्ध्यति । साक्षिणोऽप्रामाण्ये तत्र प्रमाणाभावादिति भावः । किञ्च साक्ष्यनुभवस्याप्रामाण्ये स्तम्भादौ

रेवेति ॥ शुक्तिरूप्यादिस्थल एवेत्यर्थः ॥ तत्रेति ॥ व्यवहारतो व्यवस्थाऽ-

स्तीत्यत्र प्रमाणाभावात् भ्रान्तिरभ्रान्तिर्वा न किञ्चित्सिद्ध्यति । अनुभवो भ्रान्त इत्युक्ते भ्रान्तत्वे प्रमाणं तत्प्रामाण्यं च कुतः सिद्ध्येत् । व्यवहारतः सर्वमङ्गीकुर्म इत्युक्ते व्यवहारो व्यवहर्ता च

स्थाण्वादिमनोवृत्तिर्भ्रान्तिः । स्तम्भादिमनोवृत्तिरभ्रान्तिरित्यपि न सिद्ध्यति । साक्षिण एव ज्ञानस्य भ्रान्तित्वाभ्रान्तित्वग्राहकत्वात् । तदसिद्धौ च व्यवहारमात्रं च न सिद्ध्यतीति भावेनाह ॥ भ्रान्तिरिति ॥ एतेन सर्वं मिथ्या आत्मा सत्य इति व्यवस्था व्यवहारतोऽस्तीत्येतदागमादिना सिद्ध्यतीत्येतदपि निरस्तम् । आगमादिप्रामाण्यस्यापि साक्षिग्राह्यत्वात् । 'साक्षिसिद्धस्य' इत्यादेरेकग्रन्थत्वे भ्रान्तिरित्यस्य साध्याभिधानपरतया तच्छेषत्वं ज्ञातव्यम् ।

यदुक्तं सुखादिविषयसाक्ष्यनुभवस्य न भ्रान्तित्वं, बाधकाभावादिति तदयुक्तम् । 'विमुक्तश्च विमुच्यते' इत्यादिप्रमाणसद्भावादित्यत आह ॥ अनुभव इति ॥ नानेन सुखादिविषयस्यानुभवस्य भ्रान्तित्वं सिद्ध्यति । तत्स्वरूपप्रामाण्ययोः सिद्ध्यभावात् । साक्ष्यनुभवस्यैव तत्साधकत्वात् । तस्य च भ्रान्तित्वाभिधानादिति भावः । न च सुखादिविषय एव साक्ष्यनुभवस्य भ्रमत्वं, प्रमाणस्वरूपादावभ्रमत्वमिति युक्तम् । विशेषप्रमाणाभावेनानाश्वासात् । साक्ष्यनुभवस्य भ्रमत्वेऽपि प्रमाणस्वरूपप्रामाण्ये लोकव्यवहारादेव सेत्स्यत इत्याशङ्क्याह ॥ व्यवहारत इति ॥ न लोकव्यवहारतः प्रमाणस्वरूपादिसिद्धिः । लोकस्य च तद्व्यवहारस्य चासिद्धेः । साक्षिण एव तद्ग्राहक-

---

स्तीत्यत्र प्रमाणाभावादित्यर्थः ॥ तदसिद्धाविति ॥ भ्रान्त्यभ्रान्तिव्यवस्थासिद्धावित्यर्थः ॥ आगमादिप्रामाण्यस्यापीति ॥ तज्जन्यज्ञानप्रामाण्यस्यापीत्यर्थः ॥ इत्यादेरिति ॥ न किञ्चित्सिद्ध्यतीत्यन्तस्येत्यर्थः ॥ साध्येति ॥ आपाद्याभिधानपरतयेत्यर्थः ॥ तत्स्वरूपप्रामाण्ययोरिति ॥ विमुक्तश्चेति

कुतः सिद्धः ? प्रतीतित इत्युक्ते सैव कुतः । स्वत इत्युक्ते स्वस्य भ्रान्तित्वे प्रतीतिं विनैव प्रतीतिरस्तीति भ्रान्तिः स्यात् । स्वाभावोऽपि स्यात् । स्वयमस्तीति च भ्रमः स्यात् । निरालम्बनो भ्रमो नोपपद्यत इत्यस्यापि भ्रमत्वोपपत्तेः । तत्प्रमाणमप्यप्रमाणमेव । प्रमाणत्वभ्रम इति न

त्वात् । तस्य च भ्रान्तित्वाङ्गीकारादिति भावः । साक्षिणो भ्रान्तित्वेऽपि व्यवहारव्यवहर्तृसिद्धिः प्रतीतित एव भविष्यतीत्याशङ्क्य परिहरति ॥ प्रतीतित इति ॥ भवेत् प्रतीत्यैव व्यवहारादिसिद्धिः यदि सैव सिद्ध्येत् । न च तत्साधकं वक्तुं शक्यत इति भावः । साक्षिण एव प्रतीतिसिद्धेः कथं तत्साधकाभाव इत्याशङ्क्य परिहरति ॥ स्वत इति ॥ न साक्षिणा प्रतीतिसिद्धिः । तस्य सुखादौ भ्रान्तित्वाङ्गीकारेण प्रतीत्यभावेऽपि प्रतीतिरस्तीति भ्रमोऽयमिति शङ्काकुण्ठितशक्तित्वादिति भावः ।

इतश्च न सुखादिविषयानुभवस्य भ्रमत्वमित्याह ॥ स्वेति ॥ सुखादिविषयानुभवस्य भ्रमत्वाङ्गीकृतावात्माभावोऽपि स्यात् । आत्मसाधकाभावादिति भावः । नन्वहमिति प्रत्यक्षत एवात्मोपलभ्यते । अतः कथं तत्साधकाभाव इत्यत आह ॥ स्वयमिति ॥ नाहमित्यनुभवेनात्मसिद्धिः, अनुभवस्य सुखादौ भ्रान्तित्वाभ्युपगमेनात्मन्यपि भ्रमत्वशङ्कावारकाभावादिति भावः । निरधिष्ठानभ्रमासम्भवात् सुखादिभ्रमान्यथानुपपत्याऽधिष्ठानभूतात्मसिद्धिरित्यत आह ॥ निरालम्बन इति ॥ नानेन तर्केणात्मसिद्धिः । एतत्तर्कानुभवस्यापि सुखानुभववत् भ्रमत्वशङ्कायाः प्रसङ्गादिति भावः । श्रुतिरात्मनि प्रमाणमित्यत आह ॥ तदिति ॥ यच्छ्रुतिः प्रमाणमात्मन्युच्यते तच्छ्रुतिप्रामाण्यसाधकाभावेनाप्रामाण्यस्यापि वक्तुं शक्यत्वात् न तेनात्मसिद्धिरिति भावः । श्रुतेः प्रामाण्यानुभवात् कथमप्रामाण्यमित्यत आह ॥ प्रमाण-

---

श्रुतिजन्यज्ञानस्वरूपतत्प्रामाण्ययोरित्यर्थः । इतिशब्दस्यार्थोक्तिरेवमुक्त-

*

किञ्चित् सिद्ध्यति । भ्रम इत्यस्यैव भ्रमत्वेऽन्यस्याभ्रमत्वमेव भवति । सुखदुःखादिविषयं ज्ञानमात्मस्वरूपमेवेति तस्य भ्रमत्वे छद्मना विनैव शून्यवादो भवति । न हि वृत्तिज्ञानविषयमज्ञानादिकं तेषामपि । भ्रमस्य चाविद्याकार्यत्वाङ्गीकारात् । आत्मस्वरूपस्याप्यविद्याकार्यत्वं

त्वेति ॥ नानुभवेन श्रुतेः प्रामाण्यसिद्धिः । सुखानुभववदस्याप्यप्रामाण्ये प्रमाणत्वभ्रमत्वसम्भवादिति भावः । साक्षिसिद्धस्येत्याद्युक्तमुपसंहरति ॥ इतीति ॥ एवमुक्तप्रकारेण साक्ष्यनुभवस्य भ्रमत्वे सर्वं मिथ्या आत्मा सत्य इति व्यवस्थादि किञ्चिदपि न सिद्ध्यतीत्यर्थः ।

सुखाद्यनुभवो भ्रम इत्यर्थसाधकश्रुतेः प्रामाण्यासिद्धेर्न तथा सुखाद्यनुभवस्य भ्रमत्वसिद्धिरित्युक्तम् । अथ तस्य श्रौतानुभवस्यापि भ्रमत्वोपपत्त्या सुखाद्यनुभवस्याभ्रमत्वमेव भवति । न तु तेन तस्य भ्रमत्वसिद्धिः । परस्परविरुद्धयोरन्यतरनिषेधस्येतरविधिनान्तरीयकत्वादिति भावेनाह ॥ भ्रम इति ॥ इतोऽपि न सुखाद्यनुभवस्य भ्रमत्वमित्याह ॥ सुखेति ॥ यदि सुखाद्यनुभवो भ्रमस्तर्हि यत् प्रच्छन्नं नैरात्म्यमतमङ्गीकृतं तत्प्रकटितं स्यात् । सुखादिविषयानुभवस्य आत्मस्वरूपत्वादित्यर्थः । सुखादिविषयानुभवस्यात्मरूपत्वं भवन्मत एव नास्मन्मते । किन्तु मनोवृत्तिरूपत्वमेवेत्यतोऽपसिद्धान्त इत्याह ॥ न हीति ॥ नन्वस्तु सुखाद्यनुभवस्य भ्रमत्वमात्मस्वरूपत्वं च । तथापि कथमात्माभावप्रसङ्ग इत्यत आह ॥ भ्रमस्येति ॥ सुखादिविषयानुभवस्य भ्रमत्वेऽविद्याकार्यत्वं स्यात् । भ्रमस्याविद्याकार्यत्वाङ्गीकारात् । तथा चात्मनोऽप्यविद्याकार्यत्वं स्यात् । सुखादिविषयानुभवस्यात्मस्वरूपत्वात् । अविद्याकार्यत्वे चात्मनो मिथ्यात्वं दुर्निवारमिति भावः ।

अस्त्वेवमात्मनो युक्त्या दुर्घटत्वम् । तथापि न तद्बाधकम् । आत्मनः प्रमाणसिद्धत्वात् । न हि प्रमाणसिद्धस्य युक्त्या दुर्घटत्व-

---

प्रकारेणेति ॥ इत्यर्थसाधकश्रुतेरिति ॥ विमुक्तश्चेत्यादिश्रुतेरित्यर्थः ॥

स्यात्। दुर्घटत्वं भूषणमित्युक्ते दुर्घटत्वं सुघटत्वं चोभयं भूषणमस्माक-मित्युत्तरम्। न हि प्रमाणसिद्धस्य दुर्घटत्वे सुघटत्वे वाऽपवादो दृष्टः। दुर्घटत्वं भूषणमिति वदद्भिरात्मनोऽप्यविद्यात्वमङ्गीकृत्य तदयुक्त-मित्युक्ते तत्रापि भूषणत्वं किमिति नाङ्गीक्रियते। अतिसुकरत्वात्।

मात्रेण बाधोऽस्तीत्याशङ्क्य परिहरति ॥ दुर्घटत्वमिति ॥ यद्यात्मनः प्रामाणिकत्वाद्युक्त्या दुर्घटत्वमपि न बाधकमित्युच्यते तर्हि सुखादीनामपि दुर्घटत्वं सुघटत्वं वाऽस्तु। न तद्बाधकं, प्रमाण-सिद्धत्वादिति वक्तव्यमित्यर्थः। युक्त्या दुर्घटत्वमस्तु। न तद्बाधक-मिति कथमित्यत आह ॥ न हीति ॥ अङ्गीकृत्य चेदमुक्तम्। युक्त्या दुर्घटत्वमपरिहृत्य तस्याबाधकत्वाभ्युपगमेऽतिप्रसङ्गः स्यादित्याह ॥ दुर्घटत्वमिति ॥ यदि युक्त्या दुर्घटत्वं न बाधकमित्यात्मास्तित्वं दुर्घटतयाऽङ्गीक्रियते तर्ह्यात्मनोऽविद्यात्वं दुर्घटमप्यङ्गीक्रियताम-विशेषादित्यर्थः। प्रामाणिकस्यैव युक्त्या दुर्घटत्वं न बाधकमित्युच्यते। न चात्मनोऽविद्यात्वं प्रामाणिकं, येन युक्त्या दुर्घटत्वमबाधकं स्यादित्यत आह ॥ अतीति ॥ नात्मनोऽविद्यात्वमप्रामाणिकम्। किञ्चि-च्चेतनं किञ्चिदचेतनमित्यङ्गीकारे गौरवप्राप्तेः। सर्वस्याचेतनत्वाङ्गी-कृतेरेव ज्यायस्त्वमिति युक्तिसिद्धत्वादिति भावः। न केवलं प्रामाणिके युक्त्या दुर्घटत्वमबाधकम्। किन्तु यदङ्गीकारे प्रमाणाविरोधस्तत्रैव। आत्मनोऽविद्यात्वं प्रमाणविरुद्धमतो युक्त्या विरुद्धत्वं तत्र बाधक-मेवेत्यत आह ॥ न चेति ॥ आत्मनोऽविद्यात्वं वदतां प्रतिपक्षिणा-मुक्तरीत्या न कोऽपि प्रमाणविरोधोऽस्तीति भावः। नन्वेवमनुभवबलेन कार्यकारणसम्बन्धस्य सुखदुःखादिभोगस्य च सत्यत्वं वदता भगवता-

---

अङ्गीकृत्य चेदमुक्तमिति ॥ प्रमाणसिद्धस्य युक्त्या दुर्घटत्वं न बाधक-मितीदं चाङ्गीकृत्योक्तमित्यर्थः ॥ तत्रैवेति ॥ दुर्घटत्वमबाधकमित्यनुषङ्गः ॥ उक्तरीत्येति ॥ किञ्चिच्चेतनमित्यादिनोक्तरीत्येत्यर्थः ॥ कार्यकारणसंबन्धस्येति ॥ कार्यकारणकर्तृत्वस्यैव पुरुषः प्रकृतिस्थो हीति पुनरुक्तसुखादिभोगस्य

न चात्मनोऽप्यविद्यात्वं वदतां तेषामुत्तरम् । अतोऽनन्तदोषदुष्टत्वात् हीति प्रसिद्ध्यैव भगवता निराकृताः ॥ २२ ॥

अस्य जीवस्य सदसद्योनिजन्मसु कारणं सत्त्वादिगुणसङ्गः ।
स्वतन्त्रकारणं तु परमेश्वर एवेत्याह—उपद्रष्टाऽनुमन्तेति ।

'सर्वेभ्य उपरि द्रष्टा यदुपद्रष्टृनामकः ।
स्वातन्त्र्यात् स्वानुकूल्येन मत्या प्रेरयति स्म यत् ॥

ऽनुभवस्य भ्रमत्वमभ्युपगच्छतां मतमेवं किमिति न निराकृतमित्याशङ्कां परिहरन्नुक्तमुपसंहरति ॥ अत इति ॥ अनुभवभ्रमत्वस्य स्फुटमुक्तरीत्या अनन्तदोषदुष्टत्वप्रतीतेर्न स्वयं भगवता तन्निराकृतिः कृतेति भावः ।

पुरुषः प्रकृतिस्थ इत्युक्तम् । तत्र स्वतः शुद्धस्य जीवस्य प्रकृतिस्थत्वे किं कारणमित्यत उच्यते "कारणम्" इति ॥ तत्र परमात्मनो जीवभावेन शरीरसम्बन्धाद्युक्तौ शुद्धस्य किं कारणं शरीरसम्बन्धादेरित्यतः सगुणत्वं तत्कारणमुच्यत इत्यन्यथाप्रतीतिनिरासायाऽह ॥ अस्येति ॥ ॥ २२ ॥

अत्र जीवस्य शरीरसम्बन्धे सत्त्वादिगुणसङ्गः कारणमुच्यते, न तु परमात्मनस्तत्र सगुणत्वम् । परमार्थतस्तदनुपपत्तेः । तन्मिथ्यात्वस्य दूषितत्वादिति भावः । किं जीवस्य सत्त्वादिगुणसङ्गः सदसद्योनिजन्मसु स्वतन्त्रकारणमुत निमित्तमात्रम् ? नाद्यः । जडत्वेन तदनुपपत्तेः । द्वितीये स्वतन्त्रकारणं वाच्यमिति शङ्कापरिहारत्वेन श्लोकमवतारयति ॥ स्वतन्त्रेति ॥ कथमनेन हरेः स्वतन्त्रकारणत्वमुच्यत इत्यतः प्रमाणवाक्येन श्लोकं व्याचष्टे ॥ सर्वेभ्य इति ॥ उपरि उपरि वर्तमानः,

---

चेत्यर्थः ॥ एवमिति ॥ तात्पर्यकृदुक्तरीत्येत्यर्थः ॥ उक्तरीत्येति ॥ न हि ज्ञानाज्ञानेत्यादिनोक्तरीत्येत्यर्थः ॥ प्रकृतिस्थत्व इति ॥ देहेन्द्रिययुक्तत्व इत्यर्थः ॥ तत्रेति ॥ जीवभावेन शरीरसम्बन्ध इत्यर्थः । सगुणत्वमित्यत्र तत्कारणमित्यनुषङ्गः ॥ तदनुपपत्तेरिति ॥ देहत्वसगुणत्वाद्यनुपपत्तेरित्यर्थः । मिथ्याभूतं तदस्तीत्यत्र आह ॥ तन्मिथ्यात्वस्येति ॥ देहसम्बधादिमिथ्यात्वस्येत्यर्थः ॥

अनुमन्तेति कथितः स्वयं प्रभुरजो हरिः ।
महाशक्तिर्यतो विष्णुर्महेश्वर इतीरितः ॥
परमत्वाच्च तस्यैव ह्यनुमन्तृत्वमुच्यते ।
स एव सर्वदेहेषु देहिनोऽन्यो व्यवस्थितः ॥' इति च ।

मां विद्धि सर्वक्षेत्रेष्विति देहेऽप्युक्तः । तेनाहमेव स इति दर्शयति ॥ २३ ॥

'द्विविधं पुरुषं चैव प्रकृतिं द्विविधामपि ।
सह तत्तद्गुणैः सम्यग्ज्ञात्वा पश्यति यः पुमान् ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २४ ॥

उत्तम इति यावत् । स्वानुकूल्येन स्वात्मनोऽविक्षेपकतया । मत्या बुद्धिपूर्वकम् । स्वातन्त्र्यं तत्र हेतुत्वेनैवोक्तम् । परमत्वादित्यनेन परमात्मेत्युक्तार्थं भवति । उपद्रष्टेत्यादौ सर्वत्रेतिशब्दान्वयेनानुमन्तृत्वे हेत्वभिधायकत्वं द्रष्टव्यम् । देहिनोन्य इत्यनेन परशब्दो व्याख्यातो भवति । नन्वनुमन्तुः प्राग्देहस्थितत्वेनानुक्तत्वादप्युक्तो देहेऽस्मिन्निति कथमुच्यत इत्यत आह ॥ मामिति ॥ 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' इति प्रागनुमन्तुर्देहगतत्वेनोक्तत्वादप्युक्तो देहेस्मिन्नित्युक्तिर्युक्तेति भावः । ननूपद्रष्टृत्वादिकमनुमन्तृत्वे हेतुत्वेनोच्यताम् । अनुमन्तुर्देहस्थतयोक्तत्वं किमर्थमुच्यत इत्यत आह ॥ तेनेति ॥ कोऽयमनुमन्तेत्यतो देहेऽप्युक्त इत्यनेनाहमेवानुमन्तेति दर्शयति ॥ देहस्थत्वेनात्मनः कथितत्वादिति भावः ॥ २३ ॥

'प्रकृतिं पुरुषं चैव' इत्याद्युक्तार्थे बुभुत्सातिशयोत्पादनाय तज्ज्ञानफलमुच्यते — 'य एवं' इति । तत्प्रमाणवचनेनैव व्याचष्टे ॥ द्विविधमिति ॥ ज्ञात्वा परोक्षतः । 'सर्वथा वर्तमानः' इत्यस्य प्रमादादन्यायेन वर्तमानोऽपि नियतमोक्ष इत्यर्थः । परमपुरुषादिदर्शने

हेतुत्वेनैवेति ॥ न तु शब्दार्थतयेत्यर्थः ॥ इतिशब्दान्वयेनेति ॥ हेत्वर्थ-

अनादियोग्यताभेदात् पुंसां दर्शनसाधनम् ॥
नानैव तत्र विष्णोस्तु प्रसादाद्वैष्णवं वपुः ।
स्वयं विज्ञायते किञ्चित् श्रूयते किञ्चिदन्यतः ॥
तथा ज्ञात्वा हरिं ध्यात्वा स्वान्तः पश्यन्ति केचन ।
ऋषयः केचिदपरो नारदाद्या बहिस्त्वपि ॥
देवा विष्णुप्रसादेन लब्धसत्प्रतिभाबलात् ।
सर्वं क्रमेण विज्ञाय प्रतिभास्पष्टताक्रमात् ॥
पश्यन्ति बहिरन्तश्च विष्णुं ध्यानमृतेऽपि तु ।
येषां ध्यानमृते दृष्टिस्तेषां ध्यानेऽपि दर्शनम् ।
स्यादेव साङ्ख्ययोगास्ते देवा ब्रह्माऽधिकोऽत्र च ॥

किं साधनमित्यत आह ॥ अनादीति ॥ कथं नानात्वमित्यत आह ॥ तत्रेति ॥ स्वयमिति ॥ स्वप्रतिभया ॥ तथेति ॥ उक्तप्रकारद्वयेन । अनेन 'ध्यानेन' इत्युक्तार्थं भवति । 'किञ्चित्' इत्युक्त्या तेषां ध्यानातिरिक्तसाधनसद्भावेऽपि तस्याल्पत्वादनुक्तिरित्युक्तं भवति । ऋषयोऽन्तःप्रकाशा इत्यादौ ऋषीणामन्तर्दर्शननियमोक्तेः केचनेत्युक्तिः किमर्थेत्यत आह ॥ केचिदिति ॥ ऋष्यन्तरविषया श्रुतिरिति भावः । 'देवाः' इत्यनेन 'अन्ये साङ्ख्येन' इत्युक्तार्थं भवति । क्रमेण काल-क्रमेण । देवानां ध्यानाभावे दर्शनं भवति चेत्तर्हि दर्शनविरोधिध्यानं किमर्थं ते कुर्वन्तीत्यत आह ॥ येषामिति ॥ साङ्ख्यं प्रतिभा योगो दर्शनोपायो येषां ते साङ्ख्ययोगाः । 'प्रतिभा स्पष्टताक्रमात्' इत्युक्तम् । तत्र सर्वोत्तमप्रतिभा देवेषु कस्य मुख्येत्यत आह ॥ ब्रह्मेति ॥

केति योज्यम् ॥ उक्तप्रकारद्वयेनेति ॥ स्वप्रतिभयाऽन्यतः श्रवणेन चेत्यर्थः ॥ तेषां ध्यानातिरिक्तसाधनेति ॥ स्वप्रतिभादिरूप इत्यर्थः ॥ अनुक्तिरिति ॥ ध्यानेनेति श्लोक इति योज्यम् ॥ इत्यादाविति ॥ देवा वाव सर्वप्रकाशा ऋषयोऽन्तःप्रकाशाः मनुष्या एव बहिःप्रकाशा इति चतुर्था-

केचित्तु क्षत्रियवरा अश्वमेधादिकर्मभिः ।
यजन्तो भक्तिमन्तश्च यज्ञभागार्थमागतम् ॥
श्रवणप्रतिभाभ्यां च स्मरन्तः पुरुषोत्तमम् ।
पश्यन्त्यन्ये तथान्येभ्यः सर्वं श्रुत्वाऽनुमत्य च ॥
उपास्यैव तु पश्यन्ति नान्यथा तु कथञ्चन ।
ऋषीन् राज्ञस्तथाऽऽरभ्य प्रतिभाऽभ्यधिका क्रमात् ॥
यावद्ब्रह्मा ब्रह्मणस्तु प्रायो नाप्रतिभासितम् ।
विष्णोः प्रीत्यर्थमेवास्य श्रोतव्यं प्रायशो हरेः ॥
अन्येषां श्रवणाज्ज्ञानं क्रमशो मानुषोत्तरम् ।
अत्यल्पप्रतिभानत्वात् मानुषाः श्रुतवेदिनः ॥
सर्वे ते दर्शनात्तस्मात् स्वयोग्यान्मुक्तिगामिनः ॥' इति च ।

केचिदित्यनेन 'कर्म' इति व्याख्यातं भवति । अत्रापि श्रवणप्रतिभयो-रल्पत्वं द्रष्टव्यम् । अन्य इत्यनेन 'अन्ये तु' इत्युक्तार्थं भवति ।

ऋषिदेवराज्ञां प्रतिभोक्ता । तत्र किमेतेषामेकविधैव प्रतिभाऽस्ति, अथ तारतम्येनेत्यपेक्षायामाह ॥ ऋषीनिति ॥ ब्रह्मणः प्रतिभाप्रमाण-माह ॥ ब्रह्मण इति ॥ तर्हि तस्य हरेः सकाशात् श्रवणं किमर्थमित्यत आह ॥ विष्णोरिति ॥ प्रीत्यर्थमेव, न तु ज्ञानार्थम् । केषां तर्हि ज्ञानार्थं श्रवणमित्यत आह ॥ अन्येषामिति ॥ मानुषोत्तरमिति ॥ मानुषाणां प्रायः श्रवणादेव ज्ञानमित्यर्थः । नन्वेवं ध्यानादियोगिनामपि श्रवणादिसद्भावे कथं मानुषाणां श्रुतवेदित्वं क्वचिदुच्यत इत्यत आह ॥ अत्यल्पेति ॥ एवं दर्शनसाधनं नानाविधमुक्त्वा प्रकृतमनुसन्धत्ते ॥ सर्व इति ॥

ध्यायतृतीयपादीयभाष्योक्तश्रुताविल्यर्थः । प्रतिभाप्रमाणमाहेत्यर्थः ॥ प्रकृत-मनुसंधत्त इति ॥ प्रकृतिं पुरुषं चैव विद्धि इत्युक्तार्थे बुभुत्सातिशयजननाय तज्ज्ञानफलवचनं य एनं वेत्तीत्यादिना प्रकृतं तद् बुद्धिस्थं करोतीत्यर्थः ॥ इति

अन्येषामपि किञ्चिच्छ्रवणे विद्यमानेऽपि मनुष्याणामत्यल्पप्रतिभानत्वात् 'श्रुत्वाऽन्येभ्यः' इति विशेषणम्। मनुष्याणां प्रतिभा मूलप्रमाणापेक्षा प्रायो न सम्यगुत्पद्यतेऽल्पा चेति 'श्रुतिपरायणाः' इति।

'अश्रुतप्रतिभा यस्य श्रुतिस्मृत्यविरोधिनी।
विश्रुता नृषु जातं च तं विद्याद्देवसत्तमम्॥
यश्च स्वमुखमानेन नवाधोदेहवान् पुमान्।
अष्टमानवती स्त्री च षण्णवत्यङ्गुलौ पुनः॥

यदुक्तं ध्यानादियोगिनामपि श्रवणाद्यस्तीति तदयुक्तम। तथा सति केषाञ्चित् 'श्रुत्वाऽन्येभ्यः' इति विशिष्योक्त्यसम्भवादित्यत आह॥ अन्येषामिति॥ ध्यानादियोगिनां श्रवणादिसद्भावेऽपि मनुष्याणां 'श्रुत्वाऽन्येभ्य उपासते' इति विशेषोक्तिर्युक्ता। तेषामत्यल्पप्रतिभानत्वेन श्रवणबाहुल्यसद्भावादिति भावः। अनेनात्यल्पप्रतिभानत्वादिति विवृतं भवति। कथं मनुष्याणामत्यल्पाऽपि प्रतिभा युज्यते। श्रुतिपरायणा इति श्रवणैकाश्रयत्वोक्तेरित्यत आह॥ मनुष्याणामिति॥ मनुष्याणामत्यल्पप्रतिभासद्भावेऽपि श्रुतिपरायणा इति विशेषणं युक्तम्। तत्प्रतिभाया मूलप्रमाणापेक्षत्वेन स्वातन्त्र्याभावात् प्रायेणासम्यक्त्वाच्च। अस्वतन्त्रेऽसाधुनि चासत्त्वोक्तिदर्शनादिति भावः।

यदुक्तं मनुष्याणां प्रतिभा मूलप्रमाणसापेक्षा प्रायो न सम्यगुत्पद्यते, अल्पा चेति तदयुक्तम्। पाण्डवादिमनुष्याणामश्रुतार्थेऽपि सम्यक् बहुप्रतिभादर्शनादित्याशङ्कां प्रमाणेनैव परिहरति॥ अश्रुतेति॥ विश्रुता ख्याता बहुलेत्यर्थः। तल्लक्षणान्तराणि चाह॥ यश्चेति॥ यः पुरुषः स्वमुखपरिमाणेननवपरिमाणाधोदेहवान्, या च स्त्री स्वमुखपरिमाणेनाष्टपरिमाणवती तौ पुनः स्वस्वाङ्गुलिपरिमाणेन षण्णवत्यङ्गुलौ,

---

विवृतमिति॥ इति स्मृत्युक्तं विवृतमित्यर्थः॥ तल्लक्षणान्तराणि चेति॥

दशतालौ सप्तपादौ विद्यात्तौ च सुरोत्तमौ ।
यावत्पञ्चाङ्गुलोनं तद्देवमानं क्रमात्परम् ॥
पादे त्वङ्गुलमात्रोनं तदूनं चतुरङ्गुलम् ।
यावद्देवोपदेवानां पादे चोनाङ्गुलं पुनः ।
तावन्मनुष्यमानं स्यात्ततोऽधस्त्वासुरं स्मृतम् ।
द्विचत्वार्यधिकं तस्मात् षण्णवत्यङ्गुलादधः ॥

स्वस्वतालपरिमाणेन दशतालौ, स्वस्वपादपरिमाणेन सप्तपादौ तौ च सुरोत्तमौ विद्यादित्यर्थः । अत्र तालो नाम मध्यमाङ्गुल्यग्रात् मणिबन्धपर्यन्तः कर उच्यते । देवोत्तमलक्षणमुक्त्वा देवमात्रलक्षणमाह ॥ यावदिति ॥ तत् षण्णवत्यङ्गुलं क्रमेण ह्रसदेकनवत्यङ्गुलपर्यन्तमुत्तमावरसुरावधिकदेवमानं भवति । अत्र सप्तपादपरिमाणं क्रमेण ह्रसदेकाङ्गुलोनमेव भवतीत्यर्थः । गन्धर्वादिलक्षणमाह ॥ तदूनमिति ॥ तदेकनवत्यङ्गुलं सप्ताशीत्यङ्गुलपर्यन्तं क्रमेण ह्रसद्गन्धर्वादिपरिमाणं भवति । अत्रापि सप्तपादपरिमाणं क्रमेण ह्रसत्पुनरेकाङ्गुलोनं भवतीत्यर्थः ॥ मनुष्यलक्षणमाह ॥ तावदिति ॥ सप्ताशीत्यङ्गुलं मनुष्यपरिमाणमित्यर्थः । असुरलक्षणमाह ॥ तत इति ॥ सप्ताशीतेरधस्तात् असुरपरिमाणमित्यर्थः । देवोपदेवानां मानस्य सम्भूय कियतीष्वङ्गुलिषु परिसमाप्तिरित्यत आह ॥ द्विचत्वारीति ॥ तस्मात् सप्ताशीत्यङ्गुलादुपरि देवोत्तमपरिमाणात् । षण्णवत्यङ्गुलादधो यदष्टाङ्गुलं तद्देवोपदेव-

---

भूमिजातदेवलक्षणान्तराणि चेत्यर्थः ॥ क्रमेण ह्रसदिति ॥ पञ्चनवति-चतुर्नवति-त्रिनवति-द्विनवतीत्येवं रूपेणेत्यर्थः । पादे त्वित्यस्यार्थमाह ॥ अत्रेति ॥ उत्तमावरसुरावधिके देवमानविषय इत्यर्थः ॥ क्रमेण ह्रसदिति ॥ एकांगुलमध्य एव पादांगुलार्धांगुलादिरूपेण ह्रसदित्यर्थः । चतुरंगुल यावदित्यस्यार्थः सप्ताशीत्यंगुलपर्यन्तमिति ॥ अत्रापि ॥ गन्धर्वादिविषयेऽपीत्यर्थः ॥ देवोपदेवेति ॥ देवानामुपदेवशब्दितगन्धर्वाणां च परिमाण-

ज्ञेयमङ्गुलमानं तदुपदेवादिषु स्फुटम् ।
देवेष्ववरवज्ज्ञेयमृषीणां चक्रवर्तिनाम् ॥
यावद्यावत्प्रियो विष्णोस्तावत् स्त्रीपुंस्वरूपिणः ।
हरेः सादृश्यमस्य स्यादनादिक्रमसुस्थिरम् ॥'

इति च ॥ २५-२६ ॥

क्षेत्रक्षेत्रज्ञसंयोगादित्यत्र क्षेत्रं श्रीः । 'मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्' इति वक्ष्यमाणत्वात् ।

'अव्यक्तं च महद्ब्रह्म प्रधानं क्षेत्रमित्यपि ।
उच्यते श्रीः सदा विष्णोः प्रिया निर्दोषचिद्घना ॥

परिमाणं ज्ञातव्यमित्यर्थः । ऋष्यादिलक्षणमाह ॥ देवेष्विति ॥ च्यवनादीनां पृथ्वादीनामवरदेववत् परिमाणं ज्ञातव्यमित्यर्थः । एतल्लक्षणतारतम्ये हेतुमाह ॥ यावदिति ॥ अनेनैतत् स्वाभाविकमिति चोक्तं भवति ॥ २५-२६ ॥

यदुक्तं हरिरेव सर्वजीवानां सदसद्योनिजन्मसु स्वतन्त्रकारणमिति तत्प्रपञ्च्यते 'यावदिति'। तत्र क्षेत्रज्ञस्य हरेः क्षेत्रसंयोगो नाम जडदेहसंयोग इत्यन्यथाप्रतीतिनिरासायाह ॥ क्षेत्रेति ॥ 'यावत् सञ्जायते' इत्येतद्विवरणरूपे 'मम योनिः' इत्युत्तराध्यायगतवाक्ये लक्ष्मीनारायणसंयोगात्सर्वभूतसम्भवस्योक्तत्वात् अत्रापि क्षेत्रपदेन श्रीरेवोच्यत इति भावः । अव्यक्ततत्वे प्रसिद्धः क्षेत्रशब्दः श्रीवाचीत्येतत्कुत इत्यतः श्रियः क्षेत्रशब्दवाच्यत्वं, प्रसङ्गात् महाभूतानीत्याद्युक्ताहङ्कारादिशब्दानां च देवतावाचित्वं प्रमाणेन दर्शयति ॥ अव्यक्तमिति ॥ सरस्वत्यादीनामपि श्रीशब्दवाच्यत्वात् तद्व्यावृत्त्यर्थमाह ॥ सदेति ॥ किं जडाव्यक्ताभेदात् तच्छब्दवाच्येत्यत आह ॥ निर्दोषेति ॥

मित्यर्थः ॥ अवरदेववदिति ॥ एकनवत्यंगुलपरिमाणमित्यर्थः ॥ यदुक्तमिति ॥ उपद्रष्टेत्यादिनेति भावः ॥ सरस्वत्यादीनामपीति ॥ ताश्चेन्द्र-

सा हि न व्यज्यते विष्णुरत्र क्षेति महागुणा ।
जीवोत्तमा च तेनैतैः शब्दैरेकाऽभिधीयते ॥
महान् ब्रह्मा जीवमहान् परात्मप्रेरिताः क्रियाः ।
अहं कर्तेति येनायं जीवो मंस्यत्यसौ शिवः ॥
अहंकार इति प्रोक्तो जीवाहङ्कृतिकृद्यतः ।
उमा बुद्धिरिति ज्ञेया शब्दादिज्ञानदा यतः ॥
मतिदो मन उद्दिष्ट इन्द्रः स्कन्दोऽपि तत्सुतः ।
श्रोत्रं तु श्रावयंश्चन्द्रः स्पर्शो वायुसुतो मरुत् ॥
चक्षुः सूर्यश्चक्षयति जिह्वा वारिपतिर्हृतेः ।
अश्विनौ घ्राणमाघ्रातेर्वागग्निर्वचनादपि ॥
हस्तौ वायुसुतौ ज्ञेयौ मरुतौ हानिलाभयोः ।
पादौ तु विष्णुनाऽऽविष्टौ यज्ञशम्भू शचीसुतौ ॥
पदनादेव पायुश्च भुक्तस्यैवाप्ययाद्यमः ।
सन्तत्युपस्थितिकृतेरुपस्थः सशिवो मनुः ॥

कथं तर्हि अव्यक्तादिपदवाच्यत्वमित्यत आह ॥ सा हीति ॥ न व्यज्यत इत्यव्यक्तम् । विष्णुरस्यां निवसतीति क्षेत्रम् । महागुणेति महद्ब्रह्म, जीवोत्तमेति प्रधानमुच्यत इत्यर्थः । अत्र महतोऽनुक्तत्वेऽप्यादिकार्यत्वात् ग्राह्य एव । क्रियाः उद्दिश्य । उक्तं विवृणोति ॥ जीवेति ॥ शब्दादि बोधयतीति बुद्धिरित्यर्थः । तत्सुतोऽनिरुद्धोऽपि ॥ स्पर्शयतीति स्पर्शः । हृञ् हरण इति धातोः रसाहरणहेतुत्वात् जिह्वेत्यर्थः । आघ्रातेर्गन्धाघ्राणहेतुत्वात् । वचनात् वचनप्रवर्तकत्वात् । हानिलाभयोर्निमित्तत्वात् । सन लाभ इति धातुः । क्वचिद्विष्णोः पाददेवत्वोक्तेः विष्णुनेत्युक्तम् । यज्ञशम्भू च न हरिहरावित्युक्तम् ॥ शचीति ॥

धर्मेनासत्यसंश्रयाच्छ्रिय ईरिता इति भारततात्पर्योक्तेरिति भावः । विष्णुरत्र क्षेतीत्युक्तिसूचितविग्रहमाह ॥ विष्णुरिति ॥ क्षि निवासगत्योरिति धातोरिति भावः ॥ अत्रेति ॥ गीतायामित्यर्थः । एवकारान्वयेनार्थमाह ॥ सा श्रीरेवेति ॥

विनायकस्तथाऽकाशो निरावृत्या प्रकाशनात् ।
प्रधानवायुजो भूतवायुर्नाम्ना मरीचिकः ॥
अग्निश्च पृथिवी चैव प्रसिद्धौ वरुणो जलम् ।
अदनात् प्रथनाज्जन्मलयहेतोस्तथाऽभिधाः ॥
शब्दाद्या पञ्च शिवजाः शब्दनात् स्पर्शनादपि ।
रूपणाद्रसनाच्चैव गन्धनाच्च तथाऽभिधाः ॥
सुखं धृतिश्चेतना च सुखनाद्विधृतेरपि ।
चेतोनेतृत्वतश्चैव मुख्यवायुः सरस्वती ॥
श्रीश्चेच्छा सैव सा वायोः पत्नी त्वेवं धृतिर्मता ।
इच्छादानात्तु सैवेच्छा स्थानभेदात्तु देवताः ॥
पृथक् पृथक् च कथ्यन्ते लक्ष्म्याद्या उदिता अपि ।
दुःखद्वेषौ कलिश्चैव द्वापरो ब्रह्मणः सुतौ ॥

पदनात् गतिप्रवर्तकत्वात् । पद गताविति धातुः । निरावृत्या प्रतिबन्धाभावेन । वातीति वायुः । अदनादग्निः । प्रथनाद् विस्तृतत्वात् पृथिवी । जन्मलयहेतुत्वात् जलमित्यर्थः । पृथु विस्तार इति धातुः । उत्पत्तिलययोर्जलाधीनत्वदर्शनात् तन्नियामकदेवतायास्तत्सिद्धम । शब्दनादित्यादेः शब्दादिप्रवर्तकत्वादित्यर्थः । मुख्यवायुः सुखनात् सुखमित्यादि द्रष्टव्यम् । सा श्रीरेव । एवं सरस्वतीवद्वायोः पत्नीविधृतेर्धृतिर्मतेत्यर्थः ।

श्रीरेवेच्छेत्युक्तम् । तदुपपादयति ॥ इच्छेति ॥ यद्यव्यक्तचेतनेच्छादिशब्दैः लक्ष्म्यादिदेवता उच्यन्ते तर्हि क्वचिदव्यक्तमुक्त्वा पुनश्चेतनादिकं कथमुच्यत इत्यत आह ॥ स्थानेति ॥ अव्यक्तपदोक्तश्रियः चेतनादिपदेन पुनरुक्तिर्युक्ता । अभिमन्यमानस्थानभेदेन रूपभेदादित्यर्थः । एवं देवतान्तरेऽपि द्रष्टव्यम् । कथं तर्हि जडपदार्थेष्व-

---

इच्छा च सैवेत्यर्थः ॥ एवं देवतान्तरेऽपीति ॥ जिह्वावारिपतिर्वरुणो जलं

प्रवरावसुराणां तौ सञ्ज्ञातश्चेतनाः परे ।
एतैरभिमतं यच्च तत्तन्नाम्नाऽभिधीयते ॥
चेतनाचेतनं त्वेतत् सर्वं क्षेत्रमितीरितम् ।
क्षितिरेतद्भगवतो यदतः क्षेत्रमीर्यते ॥
क्षिणोति त्राति चैवैतदतो वा क्षेत्रमुच्यते ।
क्षितिं कृत्वा त्राति चैतदतो वा क्षेत्रमीरितम् ॥
एतस्मात् क्षीणमेतेन त्रातमित्यथवा पुनः ।
इच्छाद्यानां क्षेत्रनाम्नामपि नामान्तरं स्मृतम् ॥
विकारा इति यस्मात्ते विशेषविकृतिस्थिताः ।
विशेषात् क्रियते यस्माद्विकारः कार्यमन्तिमम् ॥
विगतं करणं चात्र पुनर्नाशमृते यतः ।
तत्सम्बधाद्विकाराख्या इच्छाद्या अभिमानिनः ॥
एतत्सर्वं सर्वदैव निर्दोषेणैव चक्षुषा ।
प्रेरयन्नेव जानाति तत्क्षेत्रज्ञो हरिस्ततः ॥' इति च ।

व्यक्तादिशब्दाः प्रवर्तन्त इत्यत आह ॥ एतैरिति ॥ अव्यक्तादिनामक-देवताभिमन्यमानत्वात् जडानामव्यक्तादिशब्दवाच्यत्वमिति भावः । क्षिणोति नाशयति । क्षितिं कृत्वा त्राति स्वनिवासनिमित्तेन रक्षति । क्षीणम् अधमम् ॥ विशेषविकृतिस्थिता इति ॥ महदादिभ्योऽतिशयेन विकारितयाऽवस्थिता इत्यर्थः । घटादावप्येतदेव विकारशब्दप्रवृत्ति-निमित्तमित्याह ॥ विशेषादिति ॥ विगतमित्यादेः अत्रान्तिमकार्ये नाशं विना कार्यान्तरोत्पादकत्वं नास्तीत्यर्थः । अभिमानिनामपीच्छादि-शब्दवाच्यत्वात् कथं विकारत्वमित्यत आह ॥ तदिति ॥ सम्बन्धो नियम्यनियामकभावः ।

शिवोऽहंकार इति प्रोक्तः उपस्थः स शिवो मनुरित्याद्युक्तदेवतान्तर इत्यर्थः । करणमित्यस्यार्थः ॥ कार्यान्तरोत्पादकत्वमिति ॥ उक्तनिरुक्तीति ॥ हिंसाहेतुश्च

'यस्यात्मा शरीरम्' इत्यादिश्रुतेश्चेतनस्यापि 'इदं शरीरं कौन्तेय' इति शरीरत्वोक्तिर्युज्यते ।

सत्त्वं जीवः क्वचित्प्रोक्तः क्वचित्सत्त्वं जनार्दनः ।
सत्त्वं नाम गुणः क्वापि क्वचित्साधुत्वमुच्यते ॥

इति शब्दनिर्णये । 'तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम्' इति च पैङ्गिश्रुतिः । जनी प्रादुर्भाव इति धातोर्जीवस्यापि शरीरे व्यक्त्यपेक्षया जनिर्युज्यते ॥ २७ ॥

जीवेषु दुःखयोगादिरूपेण विनश्यत्स्वप्यतथाभूतम् ।

यदुक्तं चेतनाचेतनं सर्वं क्षेत्रमिति, तदयुक्तम । चेतनस्य 'इदं शरीरं' इत्युक्तशरीरत्वानुपपत्तेः । हिंसाहेतुरित्यादिनिर्वचनस्य तत्रासम्भवादित्यत आह ॥ यस्येति ॥ चेतनस्य क्षेत्रत्वेऽपि न तस्योक्तशरीरत्वासम्भवः । 'यस्यात्मा शरीरम्' इत्युक्तत्वात् । उक्तनिरुक्त्यसम्भवेऽपि भगवत्तन्त्रत्वेन शरीरत्वोपपत्तेरिति भावः । 'यावत्सञ्जायते किञ्चित् सत्त्वं' इत्यत्र सत्त्वशब्दो जीववाचीति 'मम योनिः' इति वाक्यस्योदाहरणेनैव सूचितम् । तत्र सत्त्वशब्दस्य जीववाचित्वे प्रमाणमाह ॥ सत्त्वमिति ॥ तयोरन्य इति यदुच्यते स जीव इति वक्तव्ये सत्त्वमिति श्रुत्योच्यते । सत्त्वशब्देन जीवग्रहणे तस्यानादित्वात् संजायत इत्युक्तजननं न युज्यत इत्यत आह ॥ जनी प्रादुर्भाव इति ॥ २७ ॥

परमेश्वरस्य सर्वशरीरस्थत्वमुक्तम् । तदधिष्ठानतारतम्यात्तस्य तारतम्यं दुःखिसहावस्थानात् दुःखं च स्यादित्यत उच्यते—'समं' इति । तत्र 'विनश्यत्स्वविनश्यन्तम्' इत्ययुक्तम् । जीवानां विनाशाभावात् । न च तस्याचेतनविषयत्वम् । चशब्दाद्यभावादित्यत आह ॥

जीवस्येत्यादिना प्रागुक्तनिरुक्त्येत्यर्थः । पृथिव्याद्या देवतास्तु देहवद्वशत्वत इति काण्वभाष्योक्तदिशाऽर्थमाह ॥ भगवत्तन्त्रत्वेनेति ॥

'दुःखयोगादिरूपेण जीवेषु विनशत्स्वपि ।
दुःखयोगादिरहितः सर्वजीवेष्ववस्थितः ॥
गुणैः सर्वैः समो नित्यं न हीनो हीनगोऽपि सन् ।
इति पश्यति यो विष्णुं स एव न तमो व्रजेत् ॥'

इति पाद्मे ॥ २८-२९ ॥

प्रकृत्य स्वयमेव प्रारभ्य विष्णुना क्रियमाणानि । विष्णोर्नान्यः पूर्वप्रेरक इति । 'पूर्वं तु बादरायणो हेतुव्यपदेशात्' इति भगवद्वचनात् । 'द्रव्यं कर्म च कालश्च' इति च ।

जीवेष्विति ॥ एवं विजानन्नेव ज्ञानीत्युक्तम् । तज्ज्ञानफलमुच्यते 'समं' इति । श्लोकद्वयं स्मृत्यैव व्याचष्टे ॥ दुःखेति ॥ न हिनस्तीत्यस्यार्थः 'स एव' इति ॥ २८-२९ ॥

ईश्वरः सदसद्योनिजन्मसु कर्मानपेक्ष्यैव कारणं चेत्तर्हि तस्य वैषम्यादि स्यात् । कर्मापेक्षायां स्वातन्त्र्यप्रच्युतिः । तथा तस्यापि जनकसद्भावाच्च न स्वातन्त्र्यमित्यत उच्यते—'प्रकृत्य' इति । तत्र प्रकृतिरेव कर्त्री न परमात्मेत्यन्यथाप्रतीतिनिरासायाह ॥ प्रकृत्येति ॥ स्वयमेव प्रारभ्येति ॥ पूर्वकर्मादिकं स्वयमेव प्रबोध्येत्यर्थः । अभिप्रायं वक्ति ॥ विष्णोरिति ॥ कर्मसापेक्षत्वेऽपि न भगवतः स्वातन्त्र्यप्रच्युतिः । यावताऽसौ स्वयमेव पूर्वकर्मादिकमुद्बोध्य तदपेक्ष्येदानीं कर्माणि कारयति । न तु कर्मादिकं विष्णोरुद्बोधकमिति भावः । कुत एतदित्यत आह ॥ पूर्वमिति ॥ अस्तु कर्मादि हरिरुद्बोधयति, न तु तद्धरिमुद्बोधयतीति । तथापि हरेस्तदपेक्षत्वादस्वातन्त्र्यमित्यतः कर्मादिसत्ताया अपि भगवदधीनत्वात् तदपेक्षायामपि नास्वातन्त्र्यमिति भावेन कर्मादिसत्ताया भगवदधीनत्वे प्रमाणमाह ॥ द्रव्यमिति ॥ कुत एवमर्थकल्प-

---

पूर्वमितीति ॥ पूर्वोक्तं ब्रह्मैव कर्तृरूपं सत् कर्म प्रवर्तयति । न तु कर्म ब्रह्मप्रवर्तकम् । पुण्येन पुण्यं लोकं नयतीत्यादौ ब्रह्मणः कर्तृत्वस्य कर्मणो

'स्वयं प्रकृत्या भगवान् करोति निखिलं जगत् ।
नैव कर्ता हरेः कश्चिदकर्ता तेन केशवः ॥'

इति च स्कान्दे । तेनेति प्रस्तुतत्वादेव सिद्धम् । 'अहं सर्वस्य प्रभवः', 'स हि कर्ता', 'कर्तारमीशं पुरुषं ब्रह्मयोनिम्', 'जन्माद्यस्य यतः', 'मत्त एवेति तान् विद्धि' इत्यादिसकलप्रमाणविरोधश्चान्यथा । 'प्रकृत्यैव च' इति चशब्दात्तेनैवेति सिद्ध्यति ।

'प्रकृतेन क्रियायोगं चशब्दः क्वचिदीरयेत् ।
क्वचित्समुच्चयं ब्रूयात् क्वचिद्दौर्लभ्यवाचकः ॥'

इति शब्दनिर्णये । प्रकृतेः कर्तृत्वं 'रचनानुपपत्तेश्च नानुमानम्' इत्यादिभगवद्वचनेन निरस्तम् । 'न ऋते त्वत्क्रियते किञ्चनारे' इति च । केवलप्रकृतेः कर्तृत्वाङ्गीकारे चशब्दो व्यर्थः । 'तत एव

नेत्यत उक्तार्थे स्मृतिसमाख्यां दर्शयति ॥ स्वयमिति ॥ नन्वत्र ईश्वरेणेत्यश्रवणात् कथमयमर्थः स्यादित्यत आह ॥ तेनेति ॥ 'समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम्' इति ईश्वरस्य प्रस्तुतत्वात् तेनेश्वरेणेत्यनुक्तेऽपि सिद्ध्यतीत्यर्थः । किमनया कल्पनया ? प्रकृतेरेव कर्तृत्वं नेश्वरस्येत्येवार्थः किं न स्यादित्यत उदाहृतः स्मृतिविरोधस्तावत् वाक्यान्तरविरोधं च दर्शयति ॥ अहमिति ॥ तेनेश्वरेणेत्यत्र सूचितं चेत्याह ॥ प्रकृत्येति ॥ चशब्देन कथमेतत्सिद्ध्यतीत्यत आह ॥ प्रकृतेनेति ॥ उच्यमानक्रियायाः प्रकृतकर्तृत्वमीरयेदित्यर्थः ।

ईश्वरस्य कर्तृत्वाभिधायकवचनविरोधान्नार्थान्तरकल्पना युक्तेत्युक्तम् । प्रकृतेः कर्तृत्वस्य श्रुत्यादिविरुद्धत्वाच्च नासौ युक्तेत्याह ॥ प्रकृतेरिति ॥ त्वदृते दूरेऽपि किञ्चन केनापि न क्रियत इत्यर्थः । इतश्च नार्थान्तरकल्पना युक्तेत्याह ॥ केवलेति ॥ ईश्वरसमुच्चयार्थश्चशब्द इत्यतः केवलेत्युक्तम् । आत्मानमकर्तारमित्यत्र परेणेश्वरस्याकर्तृत्वाङ्गी-

---

हेतुत्वस्य व्यपदेशादिति भक्तिपादीयान्तिमसूत्रार्थः ॥ नन्वत्रेति ॥ गीताया-

च विस्तारं' इति वाक्यशेषविरोधश्च । 'अहं बीजप्रदः पिता' इति वक्ष्यमाणमत्रापि क्षेत्रक्षेत्रज्ञसंयोगादिति प्रकृतमिति तेनापि विरोधः । अचेतनं करोतीति स्वोक्तिविरोधश्च । 'इच्छापूर्वं क्रियादानं कर्तृत्वं मुख्यमीरितम्' इति पैङ्गिश्रुतिः । विकारलक्षणं कर्तृत्वं तु प्रकृतेरङ्गीकृतमेव । तथापि लक्ष्मीपरमेश्वरमुक्तचेष्टासु तदभावात् सर्वश इत्यस्य सङ्कोचप्राप्तिः ।

'अचेतनाश्रितं कर्म विकारात्मकमीरितम् ।
यत्तु केवलचित्संस्थं प्रत्यभिज्ञाप्रमाणतः ।
अविकारात्मकं ज्ञेयं तन्न तत्प्राकृतं भवेत् ॥'

इति च ॥ ३० ॥

कारात् न तत्समुच्चयार्थश्चशब्द इति भावः । इतश्च नेश्वरस्याकर्तृत्वमेतदर्थ इत्याह ॥ तत एवेति ॥ इतोऽपि नार्थान्तरकल्पना युक्तेत्याह ॥ अहमिति ॥ अत्र यावत्सञ्जायत इतीश्वरस्य सर्वकर्तृत्वं प्रकृतमिति तेनापीश्वराकर्तृत्वव्याख्यानं विरुद्धम् । न च वाच्यं पूर्ववाक्येऽपि प्रकृतेरेव कर्तृत्वं क्षेत्रज्ञस्य तत्संयोगात् कर्तृत्वोपचार इति । मम योनिर्महद्ब्रह्मेत्यादिना उत्तराध्यायेऽन्यथैतद्वाक्यार्थस्य वक्ष्यमाणत्वादित्यर्थः । इतोऽपि न प्रकृतेरेव कर्तृत्वमिति अस्यार्थ इत्याह ॥ अचेतनमिति ॥ कथं स्वोक्तिविरोध इत्यत आह ॥ इच्छेति ॥ इच्छापूर्वक्रियास्वीकारो हि कर्तृत्वम् । तथा श्रुतेः । अचेतनं नामेच्छारहितम् । अतोऽचेतनं च करोति चेति व्याहतिरिति भावः । ननु प्रकृतेः स्वतन्त्रकर्तृत्वाभावेऽपि परिणामरूपं कर्तृत्वमङ्गीक्रियत एव सिद्धान्तिनाऽपि । अतस्तदर्थोऽयं श्लोकः किं न स्यादित्यत आह ॥ विकारेति ॥ यद्यपि प्रकृतेः परिणामरूपं कर्तृत्वमङ्गीकृतं, तथापि न तदर्थोऽयं श्लोकः । अत्र सर्वकर्मणां प्रकृत्यैव क्रियमाणत्वोक्तेः । एतदर्थत्वे च परमेश्वरादिकर्मसु प्रकृतिविकारत्वाभावात् सर्वश इति पदस्यार्थसङ्कोचप्राप्तेरित्यर्थः ।

मित्यर्थः । अत्रापीत्यनन्तरमत्रेत्यनुवादपूर्वं किञ्चित्पूरयित्वा मूलार्थमाह ॥ यावदिति ॥ तत्सङ्गात् प्रकृतिसंयोगात् । इति न च वाच्यमित्यन्वयः ॥

*

'एकविष्ण्वाश्रितानां तु जीवानां भेदमेव यः ।
ततः परस्परं चैव तारतम्येन पश्यति ।
विष्णोरेव च विस्तारं जगतः स विमुच्यते ॥'

इति च ॥ ३१ ॥

शरीरस्थो जीवः । 'स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति ।' इति श्रुतेः ।

'शरीरस्थस्तु संसारी शरीराभिमतेर्मतः ।
विष्णुः शरीरगोऽप्येष न शरीरस्थ उच्यते ॥

परमेश्वरादिकर्मणः प्रकृतिविकारत्वाभावः कुत इत्यत आह ॥ अचेतनेति ॥ ३० ॥

न केवलं भगवतः सर्वप्रेरकत्वादिज्ञानमात्रेणालम् । किन्तु तस्य सर्वाधारत्वाद्यपि ज्ञातव्यमित्युच्यते—'यदा' इति । तत् तिरोहितार्थत्वात् प्रमाणवाक्येनैव व्याचष्टे ॥ एकेति ॥ भूतपृथग्भावस्य परमात्मस्थत्वोक्त्या पृथग्भूतानां तत्स्थत्वमभिप्रेतम् । तदेवात्रोक्तम् ॥ ३१ ॥

सर्वचेतनाचेतनात्मकत्वात् परमात्मनः कथं भूतानां ततः पृथग्भाव इत्यत उच्यते—'अनादित्वात्' इति । तत्र परमात्मनोऽकर्तृत्वप्रतीतिं च निराकर्तुं शरीरस्थपदं व्याख्याति ॥ शरीरस्थ इति ॥ शरीरस्थशब्दस्य कुतो जीववाचित्वमित्यतः तत्प्रयोगं दर्शयति ॥ स्वप्नेनेति ॥ ननु जीववदीश्वरस्यापि शरीरस्थितेः जीवस्यैव तत्पदवाच्यत्वं कुत इत्यत आह ॥ शरीरस्थ इति ॥ विष्णोरपि मयेदं सृष्टं, मदधीनमित्यभिमानोऽस्त्येव । अतः कथं तदनभिमान इत्यत आह ॥

एतद्वाक्यार्थस्येति ॥ यावदित्यादिवाक्यार्थस्येत्यर्थः ॥ अलमिति ॥ मोक्षादिपुमर्थायेति योज्यम् । प्रमाणस्य मूलसमानार्थत्वाय मूलस्याभिप्रेतार्थमाह ॥ भूतेति ॥ अत्रोक्तमिति ॥ प्रमाणवाक्योक्तमित्यर्थः ॥ अकर्तृत्वप्रतीतिं चेति ॥ न केवलं सर्वात्मकत्वमिति शङ्कामिति चार्थः । जडं न भवतीत्य-

शरीराभिमतिर्यस्मान्नैवास्यास्ति कदाचन ।
तद्गतानां तु दुःखानां भोगोऽभिमतिरुच्यते ।
तदभावान्नाभिमानी भगवान् पुरुषोत्तमः ॥

इति च । अनादित्वान्निर्गुणत्वात्परमात्मा जीवोऽपि न, किमुत जडं न भवतीति । शरीरोत्पत्तिलक्षणमप्यादिमत्त्वं परस्य नास्तीति विशेषः । जीवस्य हि तदस्तीति । सत्त्वादिगुणसम्बन्धश्च । सर्वं करोति परमात्मा तथापि न लिप्यते । वादिप्रसिद्धत्वादेव 'इष्टापूर्तं मन्यमाना वरिष्ठं' इत्यादिवन्निषेधः ।

तद्गतानामिति ॥ शरीरस्थपदं जीववाचकं चेत् कथं योजनेत्यत आह ॥ अनादित्वादिति ॥ इति वाच्यमिति शेषः । जीवस्याप्यनादित्वात् किं विशिष्येश्वरस्यैव तदुच्यते, येनास्य जीवाभेदनिवारणे हेतुत्वं स्यादित्यत आह ॥ शरीरेति ॥ एवम्भूतादिमत्त्वाभावेऽपि कथं परमात्मनो जीवाद्विशेष इत्यत आह ॥ जीवस्येति ॥ इतिशब्दो हेतौ । ननु निर्गुणत्वं कथमीश्वरस्य जीवभेदे हेतुर्भवति ? जगत्कर्तृत्वादिगुणानाम् ईश्वरे भावेन हेतोरसिद्धेरित्यत आह ॥ सत्त्वेति ॥ नात्र गुणपदेन जगत्कर्तृत्वादयो विवक्षिताः । किन्तु सत्त्वादय एव । तत्सम्बन्धश्चेश्वरे नास्ति, जीवेऽस्तीति भवति हेतुरिति भावः । करोति न लिप्यत इति जीवेश्वरभेदे हेत्वन्तरम् । तद्व्याचष्टे ॥ सर्वमिति ॥ जीवो न करोति लिप्यत एवेति द्रष्टव्यम् । लेपश्च तत्फलेन । नन्वत्र जीवाद्यभेदस्याप्राप्तत्वात्कथं निषेधो युक्त इत्यत आह ॥ वादीति ॥ यथा शून्यवादिसिद्धत्वात् शून्यकारणत्वस्य 'तद्धैक आहुः' इत्यादिना निषेधः क्रियते तथा सर्वाद्वैतवादिप्राप्तत्वात् अद्वैतनिषेधो युज्यते । यथा च ज्ञानद्वारा मोक्षार्थं कर्मभिरीश्वर एवाराध्य इति कर्मश्रुत्यभिप्रायापरिज्ञानप्राप्तस्य केवलकर्मणैव

त्रेतिपदानुवादेन शेषमाह ॥ इति वाच्यमिति शेष इति ॥ अनुरूपं दृष्टान्तं स्वयमाह ॥ यथा शून्येति ॥ भूतानां प्रकृतेस्सकाशान्मोक्षो यस्मादिति

कुर्वाणोऽपि यतः सर्वं पुण्यपापैर्न लिप्यते ।
जन्ममृत्यादिरहितः सत्त्वादिगुणवर्जितः ।
विष्णुस्तद्विपरीतस्तु जीवोऽतस्तौ पृथक् सदा ॥'

इति च । 'स एष नेति नेति' इत्यादि च ॥ ३२-३४ ॥

जीवानामचेतनप्रकृतेर्मोक्षं भूतप्रकृतिमोक्षम् ॥ ३५ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये त्रयोदशोऽध्यायः ॥ १३ ॥

स्वर्गादिपुरुषार्थलाभो भवतीत्यस्य 'इष्टापूर्तं' इत्यादिना निषेधः क्रियते तथा भगवता सर्वं व्याप्तमिति 'सर्वं खल्विदं ब्रह्म' इत्यादिश्रुत्यभिप्रायापरिज्ञानप्राप्तस्याद्वैतस्य निषेधो युक्त इति भावः । प्रातीतिक एवार्थः किं न स्यादित्यत उक्तार्थे वाक्यान्तरसम्मतिमाह ॥ कुर्वाण इति ॥ मृत्यादिरहित इत्यनेनाव्ययपदं व्याख्यातं भवति । ईश्वरस्य चेतनाचेतनभिन्नत्वे श्रुतिसम्मतिं चाह ॥ स एष इति ॥ ३२-३४ ॥

अध्यायार्थ उपसंह्रियते ॥ क्षेत्रेति ॥ तत्र भूतप्रकृतिमोक्षपदं तिरोहितार्थत्वात् व्याचष्टे ॥ जीवानामिति ॥ मोक्षं मोक्षसाधनममानित्वमित्याद्युक्तम् ॥ ३५ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां त्रयोदशोऽध्यायः ॥ १३ ॥

विग्रहमाश्रित्याह ॥ मोक्षं मोक्षसाधनमिति ॥ तत्किमित्यत उक्तम् ॥ अमानित्वादिकमिति ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
त्रयोदशोऽध्यायः ॥ १३ ॥

॥ अथ चतुर्दशोऽध्यायः ॥

हरिः ॐ ॥ क्षेत्रक्षेत्रज्ञसंयोगस्पष्टीकरणपूर्वकं त्रैगुण्यं विविच्य दर्शयति ॥ १-२ ॥

'योनिर्भार्या तथा स्थानं योनिः कारणमेव च।'

इति शब्दनिर्णये। अत्र योनिर्भार्या। 'तस्मिन् गर्भं दधाम्यहम्' इति वाक्यशेषात् ॥ ३-१५ ॥

हरिः ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ क्षेत्रेति ॥ प्राधान्येनोत्तराध्यायैः साधनमेवोच्यते। तत्र बन्धप्रकारपरिज्ञान एव तन्मोक्षसाधनानुष्ठानं युज्यते। बन्धश्च त्रिगुणात्मकः। अतो 'याव-त्सञ्जायते' इत्युक्तविवरणपूर्वकं त्रिगुणविकारस्थितिं तदत्ययोपायं च दर्शयत्यनेनाध्यायेनेति भावः। 'कार्यते ह्यवशः कर्म' इत्यादौ त्रैगुण्यस्य सङ्क्षेपेणोक्तत्वात् विविच्येत्युक्तम्।

'परं भूयः प्रवक्ष्यामि' इति प्रतिज्ञातमुच्यते 'मम योनिः' इति। तत्र योनिशब्दस्य कारणार्थत्वप्रतीतिनिरासाय भार्याद्यर्थत्वे प्रमाण-माह ॥ योनिरिति ॥ स्थानं गुह्यस्थानम्। अस्त्वेवं योनिशब्दो भार्या-द्यनेकार्थः। प्रकृतः किमर्थ इत्यत आह ॥ अत्रेति ॥ योनिशब्दस्यानेकार्थ-त्वात् कथमयमेवार्थ इत्यत आह ॥ तस्मिन्निति ॥ ३ ॥

हरिः ॐ ॥ भाष्यदिशा षट्कार्थमाह ॥ प्राधान्येनेति ॥ अत्र साधन-शब्देन भगवज्ज्ञानसाधनस्य कर्मध्यानरूपस्याद्यषट्कोक्तस्य कामादिवर्जन-रूपेतिकर्तव्यतांशो ग्राह्यः। मम योनिर्महद् ब्रह्म, न तद्भासयते सूर्य इत्यादिना ईश्वरमाहात्म्यस्यापि वर्णनात्प्राधान्येनेत्युक्तम्। प्राचुर्यापेक्षया संग्राहकमेतदिति भावः ॥ तत्रेति ॥ अध्यायपञ्चकमध्ये दर्शयत्यनेनाध्याये-नेत्यन्वयः ॥ इत्युक्तेति ॥ क्षेत्रक्षेत्रज्ञसंयोगहेतुकप्रपञ्चजननविवरणेत्यर्थः।

एतेभ्यः सत्त्वादिगुणेभ्योऽन्यं कर्तारमीशं यदा पश्यति तदैवायं ना पुरुषः। अन्यथा पशुसमः। न केवलमन्यत्वेन पश्यन् ना तं कर्तारं विष्णुम्। किन्तु गुणेभ्य उत्तमत्वेन च। कथं स एव ना। यस्मात् मद्भावं सोऽधिगच्छति।

'महालक्ष्मीरिति परा भार्या नारायणस्य या।
प्रकृतिर्नाम सा ज्ञेया प्रकर्षेण करोति यत् ॥
तस्यास्तु त्रीणि रूपाणि सत्त्वं नाम रजस्तमः।
सृष्टिकाले विभज्यन्ते सत्त्वं श्रीः सद्गुणप्रभा ॥

त्रैगुण्ये विविच्योक्ते सति तर्हि गुणा एव सर्वोत्तमाः, न तु ततोऽन्यः सर्वोत्तम इति शङ्का स्यात्। सा निराक्रियते—नान्यमिति। अत्र गुणानामेव कर्तृत्वं, नेश्वरस्येत्यन्यथाप्रतीतिनिरासायाह ॥ एतेभ्य इति ॥ अज्ञस्यापि पुरुषत्वात् को विशेषो ज्ञानिन इत्यत आह ॥ अन्यथेति ॥ एवं योजनायां 'मद्भावं सोऽधिगच्छति' इति व्यर्थं स्यात्। वाक्यस्य तद्विनैव समाप्तत्वादित्यतः तत्सार्थक्यं दर्शयति॥ कथमिति ॥ भगवति भावप्राप्तियोग्यस्यैव पुरुषत्वं 'पुरुषत्वे वा विस्तरादात्मा' इत्यादिश्रुतिसिद्धम्। प्रतीत एवार्थः किं न स्यादित्यतो 'मम योनिः' इत्यादि स्मृत्यैव व्याचष्टे॥ महालक्ष्मीरिति॥ परा षड्भ्योऽधिका। सद्गुणत्वात् सत्, त्विष दीप्ताविति धातोः प्रभारूपत्वात् त्वमिति सत्त्वमित्यर्थः। सृष्ट्या हि रञ्जनं भवति। किमियं प्रसिद्धा पृथिवीदेवताऽसावित्यत आह ॥ यदिति ॥ तमु ग्लपन इति

गीतावाक्यमवतारयति ॥ त्रैगुण्य इति ॥ इत्यादिश्रुतिसिद्धमिति। ऐतरेयश्रुतौ सामपरमात्मा पुरुष एवातिशयेनाविर्भवतीत्युक्त्या योग्यस्यैव पुरुषत्वमित्येतत्सिद्धमित्यर्थः ॥ परेत्यनुवादः, षड्भ्योऽधिकेति व्याख्या। जांबवत्यादिभ्य इत्यर्थः ॥ सद्गुणत्वात्सदिति ॥ सद्भावे साधुभावे च सदित्येतत् प्रयुज्यत इत्युक्तेरिति भावः ॥ इति धातुरिति ॥ असुन्प्रत्यये तम इति

रजो रञ्जनकर्तृत्वात् भूः सा सृष्टिकरी यतः ।
यदावेशादियं पृथ्वी भूमिरित्येव कथ्यते ॥
जीवानां ग्लपनाद्दुर्गा तम इत्येव कीर्तिता ।
एताभिस्तिसृभिर्जीवाः सर्वे बद्धा अमुक्तिगाः ॥
सर्वान् बध्नन्ति सर्वाश्च तथाऽपि तु विशेषतः ।
श्रीर्देवबन्धिका नृणां भूर्दैत्यानां तथा परा ॥
एताभ्योऽन्यं परं चैव विष्णुं ज्ञात्वा विमुच्यते ।
सामर्थ्यातिशयादासां नैताभ्यो विद्यते परः ॥
इति यावद्विजानाति तावत्तं नृपशुं विदुः ।
तस्मादाभ्योऽधिकगुणो विष्णुर्ज्ञेयः सदैव च ॥'

इति महाविष्णुपुराणे ॥ १६-१९ ॥

रजसस्तु फलं दुःखमित्यत्र दुःखमिति दुःखमिश्रं सुखम् ।
'दुःखं दुरिति संप्रोक्तं खं नाम सुखमुच्यते,'

इति शब्दनिर्णये ।

धातुः । ग्लपनं संसारेण ग्लानिदानम् । अमुक्तिगा इत्यनेन 'देहे देहिनं' इत्यस्यार्थ उक्तो भवति । केषां का बन्धिकेत्यत आह ॥ सर्वानिति ॥ अनेन तत्र सत्त्वमित्यादिना तारतम्येनोक्तबन्धत्रैविध्यस्य विषयः प्रदर्शितो भवति । एवमेतासां सर्वबन्धकत्वेनातिसामर्थ्यात् सर्वोत्तमत्वमिति न मन्तव्यमित्याह ॥ एताभ्य इति ॥ विष्णुं सर्वोत्तमत्वेन जानन्नेव यतो विमुच्यतेऽतः स एव पुरुषः । अतो नैताभ्यो विद्यते परः इति जानन् नृपशुरित्यर्थः ॥ १६-१९ ॥

'रजसस्तु फलं दुःखम्' इत्यत्र दुःखशब्दः केवलदुःखार्थ इत्यन्यथाप्रतीतिनिरासायाह ॥ रजस इति ॥ दुःखशब्दः कथं दुःखमिश्रसुखवाचीत्यत आह ॥ दुःखमिति ॥ अत्र केवलदुःखवाची किं न स्यादित्यतो रजसो मिश्रफलत्वे स्मृतिमाह ॥ कर्मण इति ॥ अज्ञानजमित्यनेन अज्ञान-

'कर्मणो राजसस्योक्तं दुःखमिश्रं सुखं फलम् ।
अज्ञानजं तामसस्य नित्यदुःखं फलं विदुः ॥'

इति स्कान्दे ॥ २०-२१ ॥

लोकस्थितान् प्रकाशादीन् प्रायो न द्वेष्टि नेच्छति ।

'स्वयंप्रकाशी मोहोज्झस्तथापि पुनरिच्छति ।
विष्णोः प्रकाशं तं चापि नित्यभक्त्याऽभिसेवते ॥
सुखदुःखादिभावेऽपि विष्णुभक्तौ समः सदा ।
अर्थार्थं वा प्रियार्थं वा निन्दादीनां भयादपि ॥
न विष्णुभक्तिह्रासोऽस्य किन्तु साम्यमथोन्नतिः ।
अवैष्णवारम्भवर्जी विष्णुं याति न संशयः ॥'

इति च ॥ २२ ॥

मिति व्याख्यातं भवति । तेन केवलदुःखस्य तमःफलत्वोक्तिश्चार्थान्तरे बाधिकेति सूचितं भवति ॥ २०-२१ ॥

गुणात्ययोपायादिप्रश्नस्य परिहार उच्यते 'प्रकाशं' इति । तत्र स्वस्मिन् प्रकाशं नेच्छति, स्वगतमोहं न द्वेष्टि, दुःखादिसाम्यं च स्पृहाद्यभावमात्रं, सर्वारम्भपरित्यागश्च सर्वत्रोदासीनत्वमित्यन्यथा-प्रतीतिनिरासाय प्रमाणान्तरेण तद्व्याचष्टे ॥ लोकेति ॥ पुरुषान्तरे स्थितं प्रकाशादि साधु न द्वेष्टि । तत्र मोहाद्यसाधु नेच्छतीत्यर्थः । स्वस्य प्राप्तप्रकाशत्वात् मोहोज्झितत्वात् स्वस्मिन्नेव तदिच्छाद्यभावः किं न स्यादित्यत आह ॥ स्वयमिति ॥ मोहं द्वेष्टि चेति द्रष्टव्यम् । तं चापीत्यनेन मां चेत्युक्तार्थं भवति । सुखदुःखादीत्यस्य विष्णुभक्ति-परित्यागे सुखस्य, अन्यथा दुःखस्य भावेऽपीत्यर्थः । अर्थार्थमित्यादिना

रूपमिति भावः ॥ अर्थान्तर इति ॥ रजसः केवलदुःखफलकत्वरूपार्थान्तर इत्यर्थः । यद्वा तमसो ज्ञानमात्रफलकत्वरूपार्थान्तर इत्यर्थः ॥ गुणात्य-योपायादीति ॥ लक्षणाचारावादिपदार्थः ॥ साध्विति ॥ समीचीनधर्म-

उदासीनवदित्युक्तेश्च न केवलोदासीनत्वम् । नेङ्गत इत्युदासीनप्रवृत्तिनिषेधः । सर्वारम्भपरित्यागीति विशेषप्रयोजनापेक्षयाऽपि नावैष्णवारम्भ इति ।

'इङ्गनं क्षणिकं कर्म दीर्घमारम्भ उच्यते ।'

इति शब्दनिर्णये ॥ २३-२५ ॥

'लक्ष्म्यादिभिः कृतो बन्धो योऽनादिः पुरुषस्य तु ।
तमत्येतीह यो विद्वान् स विज्ञेयो गुणात्ययी ॥'

समलोष्टेत्याद्युक्तार्थं भवति । अवैष्णवेत्यनेन सर्वारम्भेत्युक्तार्थं भवति । विष्णुं यातीत्यनेन सगुणानित्यादेः तात्पर्यमुक्तं भवति ॥ २२ ॥

इतश्च सर्वारम्भपरित्यागीति न केवलोदासीनत्वमुच्यते । उदासीनवदिति पूर्ववाक्ये केवलोदासीनत्वाभावस्योक्तेः । अन्यथोदासीन एवेत्युक्तिप्रसङ्गादित्याह ॥ उदासीनवदिति ॥ नेङ्गत इति पूर्ववाक्ये कर्माभावस्योक्तत्वात् कथं केवलोदासीनत्वाभाव इत्यत आह ॥ नेङ्गत इति ॥ नेङ्गत इति न सर्वप्रवृत्तिनिषेधः, किन्तु भगवदुदासीनप्रवृत्तिनिषेध एवेत्यर्थः । तर्हि नेङ्गत इत्यनेनैव अवैष्णवकर्माकरणस्योक्तत्वात् सर्वारम्भपरित्यागीति पुनरुक्तिरित्यत आह ॥ सर्वेति ॥ इति वक्तीति शेषः । नेङ्गत इति सामान्योक्तिरिति द्रष्टव्यम् । नेङ्गत इत्यल्पावैष्णवप्रवृत्त्यभाव उच्यते । सर्वारम्भपरित्यागीति दीर्घावैष्णवप्रवृत्त्यभाव उच्यत इत्यतश्च न पुनरुक्तिरिति भावेन इङ्गनारम्भशब्दयोः अल्पमहत्कर्मार्थत्वे प्रमाणमाह ॥ इङ्गनमिति ॥ २३-२५ ॥

ननु गुणशब्देन श्रयादीनां विवक्षितत्वात् 'सगुणान् समतीत्यैतान्' इति तदत्ययः कथमुच्यते । अशक्यत्वादित्यत आह ॥

मित्यर्थः ॥ इत्याद्युक्तार्थमिति ॥ विष्णुभक्तिकृतौ(ते)लौकिकपुमर्थहानिप्राप्तौ तत्त्यागे पुमर्थप्राप्तावपि विष्णुभक्तिरनुष्ठेयैवेत्यादिरूपेणोक्तार्थमित्यर्थः ॥ दीर्घावैष्णवेति ॥ बहुकालानुष्ठेयेत्यर्थः । श्रीरूपस्यैव सत्वगुणमानित्वादाह ॥

इति च प्रवृत्ते । तत्कृतबन्धात्ययात् तदधिकविष्णुप्राप्तेश्च तदत्ययीत्युच्यते । यथा द्वारपालमतीत्य राजानं गच्छतीति ।

ब्रह्मणि भूयं ब्रह्मभूयम् । ब्रह्मेति प्रकृता महालक्ष्मीः ।

'अतीत्य त्रीणि रूपाणि महालक्ष्मीं प्रपद्यते ।
तया त्वनुगृहीतोऽसौ वैष्णवो विष्णुगो भवेत् ॥'

इति च ।

ब्रह्म प्राप्तो मत्प्राप्त एव भवतीत्याह ॥ ब्रह्मणो हीति ॥

लक्ष्म्यादिभिरिति ॥ लक्ष्मीति श्रीरुच्यते । स्मृत्युक्तार्थानुवादेन अर्थान्तरं चाह ॥ तदिति ॥ उभयत्र प्रयोगं दर्शयति ॥ यथेति ॥ यथा द्वारपालकृतबन्धात्ययेन गच्छन् द्वारपालमतीत्य राजानं गच्छतीत्युच्यते, यथा च यो राजानं गच्छति स द्वारपालमतीत्य गच्छतीत्युच्यते तथैवेत्यर्थः । 'ब्रह्मभूयाय' इत्यस्य ब्रह्मभावायेत्यन्यथाप्रतीतिनिरासार्थमाह ॥ ब्रह्मणीति ॥ अत्र ब्रह्मेति भगवानित्यन्यथाप्रतीतिनिरासायाह ॥ ब्रह्मेति ॥ 'मम योनिर्महद्ब्रह्म' इति महालक्ष्म्या एव ब्रह्मशब्देन प्रकृतत्वात् अत्रापि सैवोच्यत इत्यर्थः । प्रमाणान्तरसमाख्यानेनाप्येतत् साधयति ॥ अतीत्येति ॥ गुणातीतस्य भगवत्प्राप्त्याद्येव वक्तव्यं, लक्ष्मीप्राप्तिः किमर्थमुच्यत इत्याशङ्कापरिहारत्वेन श्लोकमवतारयति ॥ ब्रह्म प्राप्त इति ॥ लक्ष्मीर्भगवन्तमाश्रित्यैव वर्तत इत्येवात्रोच्यते । न तु लक्ष्मीप्राप्त्या भगवत्प्राप्तिः । येन तदुक्तिः सङ्गता स्यादित्यतोऽभिप्रायमाह ॥ मदिति ॥ तत्स्थत्व इति शेषः । लक्ष्मीनारायणयोरवियोगश्चेत् गुणातीतो मामाप्नोतीत्येव वक्तव्यम् । किं परम्परोक्त्येत्यत आह ॥ तथापीति ॥ यद्यपि तयोरवियोगस्तथापि लक्ष्मीसमीपं प्राप्य तदनुज्ञया

श्रीरुच्यत इति ॥ उभयत्रेति ॥ तत्कृतबन्धत्यागेन तदधिकप्राप्त्या च तदत्य-

मदवियोगात् तस्या अपि मत्स्थ एव भवतीत्यर्थः । तथापि मत्प्राप्तिक्रमविवक्षया तदुक्तिः । एकान्तिकस्य सुखस्य मोक्षस्य ।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये चतुर्दशोऽध्यायः ॥ १४ ॥

भगवत्प्राप्तिर्भवतीति परम्परोक्तिर्युक्तेत्यर्थः । 'सुखस्यैकान्तिकस्य' इति तिरोहितार्थत्वाद्व्याचष्टे ॥ एकान्तिकस्येति ॥ एकमेवास्मादधिकमिति गणनेऽन्ते स्थितमेकान्तिकम् । तच्च मोक्ष एवेति भावः ।

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीतातात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायां चतुर्दशोऽध्यायः ॥ १४ ॥

यीत्युच्यत इत्यत्रेत्यर्थः । तद्व्यनक्ति ॥ यथेति ॥ एकमेवेति ॥ अन्ते स्थितमित्यन्वयः । सर्वाधिकत्वेनान्ते स्थितमित्यर्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते चतुर्दशोऽध्यायः ॥ १४ ॥

॥ अथ पञ्चदशोऽध्यायः ॥

हरिः ॐ ॥ त्रयोदशाध्यायोक्तं विविच्य दर्शयति ।
'पृथङ् मूलं हरिस्तस्य जगद्वृक्षस्य भूमिवत् ।
सत्त्वादियुक्ते चिदचित्प्रकृती मूलभागवत् ॥
अत्रापि चिदचिद्योगो वृक्षवत्संप्रकीर्तितः ।

एतदध्यायप्रतिपाद्यं दर्शयति ॥ त्रयोदशेति ॥ यत् त्रयोदशाध्याये जगत्स्वरूपं वर्णितं तदस्मिन् अध्याये विविच्य दर्शयति । तस्यैव संसाररूपत्वात् । संसारं जिहासता तत्स्वरूपस्य ज्ञातव्यत्वात् । यश्च तत्र संसारात्ययोपायो निरूपितस्तं चात्र दर्शयतीत्यर्थः । तत्राप्रतिपत्त्यन्यथाप्रतिपत्तिनिरासाय श्रुत्यैवाध्यायो व्याख्यायते ॥ पृथगिति ॥ तत्रोर्ध्वमूलमित्यस्यार्थः पृथगिति । जगद्वृक्षस्य हरिर्मूलं चेत्तर्हि तस्य जगदेकदेशत्वं स्यादित्यतः पृथगित्युक्तम् । यथा प्रसिद्धस्य वृक्षस्य भूमिरतदेकदेशत्वेन मूलं तथैवेत्यर्थः । प्रकारान्तरेणोर्ध्वमूलत्वं दर्शयति ॥ सत्त्वादीति ॥ मूलभागवदिति ॥ प्रसिद्धवृक्षस्यैकदेशभूतमूलवन्मूलमित्यर्थः । सत्त्वादियुक्ते इत्यनेन त्रिमूलो जगद्वृक्ष इत्युक्तं भवति । गुणप्रवृद्धा इत्यस्य तात्पर्यं चोक्तं भवति । मूलैर्हि शाखा प्रवर्धन्ते । ननु जगतोऽचेतनत्वात् अचेतनप्रकृतेरेव एतन्मूलत्वं, न चेतनप्रकृतेरित्यत आह ॥ अत्रापीति ॥ यदि हरिर्भूमिवन्मूलं तर्हि

हरिः ॐ ॥ जगत्स्वरूपमिति ॥ महानहंकार इत्यादिना प्रकृतिमहदादिचतुर्विंशतितत्त्वात्मकमिच्छाद्वेषात्मकं इच्छाद्वेषादिविकारसहितं सदैवतं यज्जगत्स्वरूपमुक्तमित्यर्थः । संसारस्वरूपं दर्शयतीति भाष्याविरोधायाह ॥ तस्यैवेति ॥ संसरत्यनेनेति व्युत्पत्त्येति भावः ॥ जिहासता त्यक्तुमिच्छतेत्यर्थः ॥ निरूपित इति ॥ य एनं वेत्ति पुरुषमित्यादिना भगवदादिज्ञानरूपोपायइत्यर्थः ॥ अतदेकदेशत्वेनेति ॥ तदेकदेशत्वाभावेनेत्यर्थः ॥ धर्मार्थयोः

पृथिवीदेवतावत्तद्धरिर्मृद्वदचेतना ॥
उत्तमत्वात्तु मूलानामूर्ध्वमूलस्त्वयं स्मृतः ।
नीचास्ततो महदहंबुद्ध्यो भूतसंयुताः ॥
शाखाश्छन्दांसि पर्णानि काममोक्षफले ह्यतः ॥ १ ॥

कारणेषु स्थितं कार्यं व्याप्तं कार्येषु कारणम् ॥
अन्योन्यसन्तताः शाखा मूलानि च सदैव तु ।
विषया दर्शनीयत्वात् प्रवालसदृशा मताः ॥ २ ॥

तस्य जगद्रूपेण परिणामः स्यात् । भूम्यंशानां लोके परिणामित्वदर्शनादित्यत आह ॥ पृथिवीति ॥ तत्तत्र जगद्वृक्षे हरिः प्रसिद्धवृक्षस्य पृथिवीदेवतावन्निमित्तत्वेनैव मूलं न तु मृद्वदुपादानतयेत्यर्थः । तर्हि तद्वत्परिणामितया मूलं किमित्यत आह ॥ मृद्वदिति ॥ अचेतना अचेतनप्रकृतिः । एवं चेज्जगद्वृक्षो विष्णवादिमूलः स्यात्, ऊर्ध्वमूलः कथमित्यत आह ॥ उत्तमत्वादिति ॥ विष्णोः सर्वोत्तमत्वात्, श्रियः परतन्त्रेषूत्तमत्वात्, अचित्प्रकृतेरचेतनेषूत्तमत्वात् ऊर्ध्वानि उत्तमानि विष्णवादिमूलानि यस्यासावूर्ध्वमूल इत्यर्थः । अधःशाखमित्यस्यार्थो नीचा इति । अधो भगवदपेक्षया नीचा महदादयः शाखा यस्यासावधःशाख इत्यर्थः । जगद्वृक्षस्येति सम्बध्यते । छन्दसां पर्णत्वमुपपादयति । कामेति ॥ लोके पर्णोत्पत्त्यनन्तरमेव फलदर्शनादत्रापि फलहेतुत्वाच्छन्दसां पर्णत्वमिति भावः । अनेन धर्मार्थयोः काममोक्षार्थत्वात् काममोक्षाख्यद्विफलो जगद्वृक्ष इत्युक्तं भवति । अधश्चोर्ध्वं चेत्यस्यार्थः अन्योन्येति । अनेनाधोभूताः शाखा ऊर्ध्वमूलेषु प्रसृताः, मूलानि चाधः शाखासु सन्ततानीत्युक्तं भवति । तस्योपपादनं कारणेष्विति ।

काममोक्षार्थत्वादिति ॥ धर्मो मोक्षार्थः अर्थः कामार्थ इत्यर्थः ॥ अश्वत्थ-

जगद्वृक्षोऽयमश्वत्थो ह्यश्ववच्चञ्चलात्मकः ।
अव्ययोऽयं प्रवाहेण स्वसक्तिज्ञानहेतिना ॥
विष्णोः सम्यक् पृथग्दृष्टिनामच्छेदनभाक् सदा ।
अव्यक्तादिसमस्तं तु नेति नेत्यादिवाक्यतः ॥
बोधेनैव पृथग्विष्णोः कृत्वा मृग्यः स केशवः ।
तमेवाद्यं प्रपद्येत यदंशाभासको ह्ययम् ॥
जीवराशिः समस्तोऽपि ब्रह्मरुद्रेन्द्रपूर्वकः ॥ ३-४ ॥

कारणेषु कार्यस्य स्थितत्वात् शाखानां मूलेषु प्रसृतिर्युज्यते । कार्येषु कारणस्य व्याप्तत्वान्मूलानां शाखासु सन्ततिर्युक्तेत्यर्थः । वृक्षमात्रसाम्यस्योक्तत्वात् 'अश्वत्थं प्राहुः' इत्यादावश्वत्थोक्तिः कथमित्यत आह ॥ जगदिति ॥ अश्ववत् स्थितोऽश्वत्थ इत्यर्थः । चञ्चलश्चेत् किं सर्वात्मनोच्छिद्यत इत्यत आह ॥ अव्यय इति ॥ किमतो यद्येवं जगद्वृक्ष इत्यत आह ॥ स्वसक्तीति ॥ सङ्गराहित्यसहितज्ञानासिनेत्यर्थः । अस्य विष्णोः पृथक्त्वमेव कुतः? तज्ज्ञानेन च किमित्यत उक्तं विवृण्वन्नाह ॥ अव्यक्तादीति ॥ नेति नेतीत्यादेः पृथक्त्वज्ञानेन च भगवन्मार्गणं भवति । जगतो भगवद्वैलक्षण्ये ज्ञाते हि तत्स्वरूपं ज्ञातुं शक्यत इति भावः । अनेन 'अश्वत्थमेनं' इत्युक्तार्थं भवति । को जगद्वृक्षच्छेदनोपाय इत्यत आह ॥ तमेवेति ॥ अनेन 'तमेव' इति विवृतं भवति । वृक्षच्छेदार्थमिति शेषः । ननु जगद्वृक्षच्छेदो ब्रह्मादिप्रतिपत्त्याऽपि भवति । अतः 'तमेव' इति किमवधार्यत इत्यत आह ॥ यदिति ॥ ब्रह्मादीनां भगवदंशाभासत्वेनासमर्थत्वात् जगद्वृक्षच्छेदाय भगवन्तमेव प्रपद्येतेत्याशयः ॥ १-४ ॥

स्थितोऽश्वत्थ इति ॥ सुपि स्थ इति कप्रत्ययः ॥ कुत इति ॥ कस्मात्प्रमाणादित्यर्थः ॥ भगवन्मार्गणमिति ॥ श्रवणादिरूपमित्यर्थः ॥ प्रकृतिस्थानीत्यत्र

किञ्चित्सादृश्यमात्रेण भिन्नोऽप्यंश इवोच्यते ।
ईश्वरस्तु यदा त्वस्य शरीरं विशति प्रभुः ।
मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ ५-७ ॥

शब्दादीन् प्रत्यथ यदा जीवमादाय यात्यतः ।
गृहीत्वैतानि संयाति वायुर्गन्धानिवाऽशयात् ॥ ८ ॥

भुङ्क्ते हरिः शुभान् भोगानिन्द्रियेषु व्यवस्थितः ।
पूर्णानन्दोऽपि भगवान् क्रीडया भुङ्क्त एव तु ॥ ९-१२ ॥

सौम्यत्वात् सोमनामाऽसौ सोममण्डलगः सदा ॥ १३ ॥

स एवाग्निस्थितो विष्णुर्नाम्ना वैश्वानरः सदा ।
सर्वेषां स नराणां यदुपजीव्यः सदैव च ॥ १४ ॥

स एव व्यासरूपेण वेदान्तकृदुदाहृतः ॥ १५ ॥

अंश एव किं न स्यादिति चेन्न । भिन्नत्वात् । तर्ह्यंशाभासोऽपि कथमित्यत आह ॥ किञ्चिदिति ॥ अनेन 'ममैव' इत्युक्तार्थं भवति । किञ्च जीवस्य विषयान् प्रति इन्द्रियप्रेरणादिकमपीश्वराधीनमिति तत्प्रपत्तिर्जगद्वृक्षच्छेदनोपाय इति भावेन भगवन्महिमानं दर्शयति ॥ ईश्वर इति ॥ प्रकृतिस्थानि शरीरस्थानि । अनेन मनःषष्ठानीत्युक्तार्थं भवति । अथेत्यनेन 'यच्चापि' इत्युक्तार्थं भवति । अतः शरीरतः । भुङ्क्त इत्यनेन 'श्रोत्रं' इत्यस्यार्थ उक्तो भवति । शुभानित्यनेन 'गुणान्' इत्युक्तार्थं भवति । ईश्वरस्य पूर्णानन्दत्वात् किं विषयभोगेनेत्यत आह ॥ पूर्णेति ॥ ९-१२ ॥

उपजीव्यतया विश्वनरसम्बन्धो वैश्वानर इत्यर्थः । क्षरणं

प्रकृतिशब्दस्तत्कार्यपर इत्युपेत्याह ॥ शरीरस्थानीति ॥ सर्वेषामित्यस्यार्थमाह ॥ उपजीव्यतयेति ॥ एतेन यच्छब्दो हेत्वर्थ इत्युक्तं भवति । तस्येदमित्यण्-प्रत्यये आदिवृद्धौ उपपदस्य नरे संज्ञायामिति दीर्घे वैश्वानर इति रूपमिति

ब्रह्मरुद्रादयः सर्वे शरीरक्षरणात् क्षराः ।
श्रीरक्षरात्मेत्युदिता नित्यचिद्देहका यतः ।
चेतनाचेतनस्यास्य राशेः संस्थापकत्वतः ॥
कूटस्थ आत्मा सा ज्ञेया परमात्मा हरिः स्वयम् ॥ १६-१७
क्षराक्षरात्मनोर्यस्मादुत्तमः स सदाऽनयोः ।
पुरुषोत्तमनाम्नाऽतः प्रसिद्धो लोकवेदयोः ॥'

इति नारायणश्रुतिः ॥ १८-२० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये पञ्चदशोऽध्यायः ॥ १५ ॥

विनाशः । क्षर विनाशसन्ततदानयोरिति धातोः । अत्रात्मपदप्रयोगेण 'द्वाविमौ पुरुषौ' इति पुरुषशब्दः चेतनार्थ इत्युक्तं भवति । ततश्च न श्रियः पुरुषत्वविरोधः ॥ १३-२० ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां पञ्चदशोऽध्यायः ॥ १५ ॥

भावः ॥ इति धातोरिति ॥ शरीरद्वारा क्षरतीत्यर्थे पचाद्यच्प्रत्यये क्षरेति रूपमिति भावः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
पञ्चदशोऽध्यायः ॥ १५ ॥

॥ अथ षोडशोऽध्यायः ॥

हरिः ॐ ॥ देवासुरलक्षणम् ।

'येऽतिमानेन मन्यन्ते परमेशोऽहमित्यपि ।
मिथ्या जगदिदं सर्वं भ्रमजत्वान्न तिष्ठति ॥
मिथ्यात्वान्नेश्वरोऽस्यास्ति परेभ्यो न च जायते ।
स्वस्मिन्नपि तथाऽन्यस्मिन्नियन्ताऽन्य इतीरिते ॥
प्रद्विषन्त्यसुरास्ते तु सर्वे यान्त्यधरं तमः ।
अयोग्येशत्वकामाच्च[1] लोभाच्चात्मसमर्पणे ॥
तत्त्ववेदिषु[2] कोपाच्च तमस्तेषां[3] न दुर्लभम् ।
अक्षागमानुमानां च स्वोक्तेरपि विरोधिनः ।

हरिः ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ देवेति ॥ अभयादिदेवतालक्षणानां मोक्षहेतुत्वात् तदापादनाय दम्भाद्यसुरलक्षणानां तद्विरोधित्वात् तत्परित्यागाय तदुभयमस्मिन्नध्याये निरूप्यत इति भावः ।

तत्र 'अभिमानश्च', 'ईश्वरोऽहं', 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । 'अपरस्परसम्भूतं', 'मामात्मपरदेहेषु प्रद्विषन्तः', 'ततो यान्त्यधमां गतिं, 'त्रिविधं नरकस्येदं' इत्यादिना चार्वाकाणामसुरत्वमुच्यत इत्यन्यथाप्रतीतिनिरासाय तत्स्मृत्यैव व्याचष्टे ॥ य इति ॥ परेभ्यो न च जायते । भ्रमजत्वादेव । कुत एतेऽसुरा इत्यत आह ॥

हरिः ॐ ॥ तदुभयमस्मिन्नध्याये निरूप्यत इति ॥ एतेन पूर्वाध्याये निर्मानमोहा इत्यादिना पुमर्थयोर्ज्ञानमोक्षयोः साधनस्य, यतन्तोऽप्यकृतात्मान इत्यादिना पुमर्थविरोधिनश्च संक्षेपेणोक्तस्य देवासुरलक्षणरूपस्यात्र विस्तरणात् पूर्वानन्तर्यमस्य सूचितं भवति ॥ तत्रेति ॥ देवासुरलक्षणोक्तिपरेऽध्याये इत्यर्थः ॥ तत्स्मृत्यैवेति ॥ उदाहृतवाक्यजातमित्यर्थः । अक्षादिविरोधं

---

1. अ. कामत्वात् । 2. अ. तत्त्ववादिषु । 3. अ. ततस्तेषां ।

*

यस्मात्ततोऽसुरा[1] ज्ञेया एवमन्येऽपि तादृशाः ॥
ये तु विष्णुं परं ज्ञात्वा यजन्ते नान्यदेवताः ।
प्रत्यक्षाद्यविसंवादिज्ञानादेव विमुक्तिगाः ॥'

इति ब्रह्मवैवर्ते ।

निबन्धाय नीचस्थानेऽन्धे तमसि बन्धाय ।
'सर्गाणां सुबहुत्वेऽपि शुभाशुभफलाधिकौ[2] ॥

अक्षेति ॥ सती पृथिवीत्यादिप्रत्यक्षस्य, विश्वं सत्यमित्याद्यागमस्य, प्रमाणदृष्टत्वाद्यनुमानस्य सर्वस्य मिथ्यात्वे सर्वमिथ्यात्वस्यापि मिथ्यात्वप्राप्त्या सर्वस्य त्वमिति स्वोक्तिविरोधः । न केवलं परमेश्वरोऽहमित्यादि मन्वाना असुराः, किन्तु येऽन्ये प्रत्यक्षादिविरुद्धवादिनस्ते सर्वेऽप्यसुरा इत्याह ॥ एवमिति ॥

देवलक्षणमाह ॥ ये त्विति ॥ अनेन 'ज्ञानयोगव्यवस्थितिर्दानं' इत्यादि व्याख्यातं भवति । कुत एवंविधानां देवत्वमित्यत आह ॥ प्रत्यक्षेति ॥ विमुक्तिगा इत्यनेनैव दैवीत्युक्तार्थं भवति ।

ननु 'ततो यान्त्यधमां गतिं' इत्यासुरसम्पदोऽन्धतमसहेतुत्वस्य वक्ष्यमाणत्वात् कथं 'निबन्धायासुरी मता' इति बन्धहेतुत्वमुच्यत इत्यत आह ॥ निबन्धाय नीचेति ॥ नात्र संसारहेतुत्वमुच्यते, किन्त्वतिनीचान्धतमससाधनत्वमेवेति[3] भावः । ननु भूतसर्गाणामतिबहुप्रकारत्वात् 'द्वौ भूतसर्गौ' इत्यादि कथमुच्यत इत्यत आह ॥ सर्गाणामिति ॥ सर्गाणां सुबहुत्वेऽपि द्वाविति वक्तुं शक्यते । शुभाशुभफलाधिक्यविवक्षयेति भावः । गन्धर्वमनुष्याद्यमादीनामपि शुभा-

---

स्वोक्तिविरोधं च व्यनक्ति ॥ सतीत्यादिना ॥ सती सद्रूपेत्यर्थः ॥ सर्वमिथ्यात्वस्यापि मिथ्यात्वादिति ॥ सर्वं मिथ्येत्युक्ते सर्वशब्देन वियदादिजगत इव तन्मिथ्यात्वस्यापि सर्वशब्दार्थमध्ये पतितत्वादिति भावः ॥ दैवीतीति ॥ दैवी संपद्विमोक्षायेत्येतदित्यर्थः ॥ अन्धतमोहेतुत्वमिति ॥ समासान्तविधे-

---

1. अ. तेऽतोसुरा । 2. अ. पथाधिकौ ।

3. अत्र अन्धतमोहेतुत्वमिति मूलपाठो भावदीपकारैः धृत इति भाति ।

देवासुराख्यौ द्वावेव गन्धर्वाद्यास्तदन्तराः[1] ।
मुक्तिगा एव विज्ञेया देवा एव विमुक्तिगाः ॥

इति च । विमोक्षायेत्यत्र वीत्युपसर्गादेव च मोक्षनानात्वं ज्ञायते ।

'देवासुरनरत्वाद्या जीवानां तु निसर्गतः ।
निसर्गो नान्यथैतेषां केनचित् क्वचिदेव वा ॥
देवाः शापबलादेव प्रह्लादादित्वमागताः ।

शुभफलाधिकत्वात् को विशेषो देवादीनामित्यत आह ॥ गन्धर्वेति ॥ तदुभयफलान्तर्वर्तमाना एवेत्यर्थः । तद्विवृणोति ॥ मुक्तिगा इति ॥ एवं तमोगा एवेति च द्रष्टव्यम् । तर्हि देवादीनामपि मुक्त्यादिगत्वादेभ्यः को विशेष इत्यत आह ॥ देवा इति ॥ एवमसुरा एवातिदारुणतमोगा इति द्रष्टव्यम् ।

यदुक्तं द्वावित्युक्तिघटनाय मोक्षस्यानेकविधत्वात् देवानामेवाधिकमोक्षो नान्येषामिति तद्गीतायामपि ज्ञायत इत्याह ॥ विमोक्षायेति ॥ ननु देवत्वादेः कारणविशेषेण हानोपादानदर्शनात् द्वौ भूतसर्गाविति निसर्गत्वोक्तिः कथमित्यत आह ॥ देवेति ॥ निसर्गत्वादेव नान्यथा भवतीत्यर्थः । ननु प्रह्लादाद्यसुराणां देवत्वदर्शनात्कथमन्यथाभावाभाव इत्यत आह ॥ देवा इति ॥ प्रह्लादादीनां स्वतो देवानामेव

रनित्यत्वादेव समन्धेभ्य इति समासान्तो नाश्रितः । तेन अन्धतमस इति भाव्यमिति नाशङ्क्यम् ॥ तदुभयफलान्तर्वर्तमाना इति ॥ तेषां तादृशाशुभाशुभफले न स्त इत्यर्थः । यद्वा तदुभयफलत्वादेवासुरग्रहणेनैव तेऽपि गृहीता इत्यर्थः ॥ देवादीनामपीति ॥ देवासुराणामपि मुक्तितमोगत्वादेवेभ्योसुरेभ्यः को विशेषो देवानामित्यर्थः । यद्वा देवादीनां देवगन्धर्वप्रभृतीनां मुक्तिगत्वादेवेभ्यो गन्धर्वादिभ्यो देवानां को विशेष इत्यर्थः । तथा मनुष्याधमानामपि तमोगत्वादेवेभ्योऽसुराणां को विशेष इति चार्थः ॥ यदुक्तमिति ॥ विमुक्तिगा इति शब्देनेति भावः ॥ निसर्गत्वोक्तिरिति ॥ स्वभावत्वोक्तिरित्यर्थः ॥

---

1. अ. तदन्तरा ।

अतः पुनश्च देवत्वं ते यान्ति निजमेव तु ॥
हेतुतः सोऽन्यथाभावो रक्तता स्फटिके यथा ।
अतो[1] नित्यश्च नाप्येष स्वभावविनिवर्तकः ॥
किन्त्वाक्रम्यैव[2] तं तिष्ठेद्देवसर्गस्ततो हि सः[3] ।
अशोच्य एव विज्ञेयो मोक्षयोग्यो हरेः प्रियः ॥'

इति च ॥ १-२४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीतातात्पर्यनिर्णये षोडशोऽध्यायः ॥ १६ ॥

कारणविशेषेणैवासुरत्वम् । अतस्तद्विहाय देवत्वं युक्तमिति भावः । ननु तत्राप्यसुरत्वं नष्टमित्यस्त्येवेत्यत आह ॥ हेतुत इति ॥ औपाधिकत्वादसुरत्वस्य नाशो युक्त एव । न तेन स्वाभाविकासुरत्वानाशमतस्य विरोध इति भावः । मास्त्वसुराणां देवत्वं, देवानां तु देवत्वपरित्यागेनासुरत्वं प्राप्तमित्यत आह ॥ नापीति ॥ नासुरभावः प्रह्लादादीनां देवत्वस्वभावनिवर्तकः । औपाधिकत्वात् । स्फटिकशौक्ल्यानिवर्तकलौहित्यवदिति भावः । तर्हि शापादिवैयर्थ्यमित्याशङ्क्य परिहरति ॥ किन्त्विति ॥ ततो देवानामसुरत्वाभावात् । देवत्वस्यानपगमेऽपि कुतोऽशोच्यत्वमित्यत आह ॥ मोक्षेति ॥ तदुपपादयति ॥ हरेरिति ॥ अनेनैव मा शुच इत्यस्य तात्पर्यं चोक्तं भवति ॥ १-२४ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीतातात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायां षोडशोऽध्यायः ॥ १६ ॥

अन्यथाभावाभाव इति ॥ अन्यथात्वाभाव इत्यर्थः । तत इत्यनुवादः देवानामित्यादि व्याख्या ॥ तात्पर्यं चेति ॥ न केवलं कुतोऽशोच्यत्वमिति शङ्कानिरास इति चार्थः ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते षोडशोऽध्यायः ॥ १६ ॥

---

1. अ. ततो । 2. अ. किञ्चाक्रम्यैव । 3. अ. यः ।

॥ अथ सप्तदशोऽध्यायः ॥

हरिः ॐ ॥ सदसत्कर्मविवेकः ॥ १-२ ॥

सत्त्वानुरूपा जीवानुरूपा । अतो ये सात्त्विकश्रद्धास्ते सात्त्विका

एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ सदिति ॥ सत्कर्मण एव पुरुषार्थसाधनत्वेनानुष्ठेयत्वात् असत्कर्मणस्तद्विरुद्धत्वेन त्याज्यत्वात् अनुष्ठानत्यागयोश्च विविच्याज्ञानेऽसम्भवात् सदसत्कर्मणी विविच्या-प्रोच्येते इति भावः ॥ १-२ ॥

'ये शास्त्रविधिमुत्सृज्य' इति प्रश्नस्योत्तरमुच्यते—त्रिविधेति । तत्र नाज्ञानाच्छास्त्रविधिमुत्सृज्य यजनं सात्त्विकत्वादिज्ञापकम् । किन्तु सात्त्विकत्वादिभेदेन श्रद्धा त्रिविधा भवति । तत्र यो यजमानो यादृश-श्रद्धः स तादृश इति श्रद्धयैव तज्ज्ञानमित्युक्तस्योपपादनायोक्तम् ॥ सत्त्वानुरूपेति ॥ तत्र श्रद्धायाः सत्त्वगुणानुरूपत्वोक्त्या कथं यो यच्छ्रद्धः स एव स इत्यस्योपपादनमित्यत आह ॥ सत्त्वेति ॥ सत्त्व-

---

हरिः ॐ ॥ अनुष्ठानत्यागयोश्चेति ॥ असंभवादित्यनेनान्वयः । ननु ये शास्त्रविधिमुत्सृज्येत्यत्र तेषां निष्ठा तु केति पृष्टे सात्त्विकत्वादिकमेव वाच्यम् । त्रिविधेत्यादिकं किमुच्यत इत्यत आह ॥ इति प्रश्नस्यैवेति ॥ शास्त्रविधिमजानतां निष्ठायाः तदज्ञानस्य सात्विकादित्रयाणां संभवेनाज्ञान-मुखेन सात्विकादिभेदस्य वक्तुमशक्यत्वात् । प्राक् यष्टृविशेषणतया यागां-गत्वेनोक्तश्रद्धां विभज्य तदाश्रयेण तेषां सात्विकत्वादिस्वरूपमुच्यत इति भवति तत्प्रश्नस्येदमुत्तरमिति नासङ्गतमिति भावेन तदुत्तरत्वं विवृण्वन्नुत्तर-श्लोकमवतारयति तत्रेत्यादिना भवतीत्यन्तेन । त्रिविधेति श्लोकार्थ उक्तः । यो यच्छ्रद्ध इत्यस्यार्थस्तत्रेत्यादिनोच्यते ॥ तज्ज्ञानमिति ॥ सात्त्विकत्वादि-

इति ज्ञेया[1] अन्येभ्य इति । श्रद्धामयः श्रद्धास्वरूपः ।

'श्रद्धा स्वरूपं जीवस्य तस्माच्छ्रद्धाविभेदतः ।
उत्तमाधममध्यास्तु जीवा ज्ञेयाः पृथक् पृथक् ॥
स्वरूपभूता श्रद्धैव तमोगानां च मोक्षिणाम् ।
शिष्यते संसृतिस्थानां श्रद्धारूपं मनोऽपरम् ॥
तत्र स्वरूपश्रद्धैव व्यज्यते प्रायशः क्वचित् ।

शब्दस्य जीववाचित्वं पूर्वमेव साधितम् । किमतो यद्येवमित्यत आह ॥ अत इति ॥ श्रद्धाया जीवानुरूपत्वात् तया तत्स्वरूपं ज्ञायत इत्यर्थः । श्रद्धाया जीवस्वरूपत्वं कुत इत्यत आह ॥ श्रद्धामय इति ॥ तत्र मयट्-शब्दस्यानेकार्थत्वादत्रोपयुक्तमर्थमाह ॥ श्रद्धेति ॥

'तां शृणु' इति प्रतिज्ञातं 'यो यच्छ्रद्धः' इत्यस्य विवरणेनोच्यते ॥ यजन्त इति ॥ तत्रान्तःकरणवृत्तिश्रद्धाया अपि विद्यमानत्वेन स्वरूप-भूताया विवेक्तुमशक्यत्वात् तया कथं जीवस्वरूपज्ञानम् ? सर्वेषामपि देवतायाजित्वात् कथं यक्षरक्षांसीत्यादि ? कथं च नित्याकृशमीश्वरं तामसाः कर्शयन्ति? इत्यादिशङ्कापरिहाराय सत्त्वानुरूपेत्यादि प्रमाण-वाक्येनैव व्याचष्टे ॥ श्रद्धेति ॥ किं श्रद्धा स्वरूपभूतैव उत भिन्नाऽप्य-स्तीत्यत आह ॥ स्वरूपेति ॥ तर्हि स्वरूपश्रद्धाया एव ज्ञातुमशक्यत्वात् न तया जीवस्वरूपविवेक इत्यत आह ॥ तत्रेति ॥ व्यज्यतेऽन्तःकरणे ।

ज्ञानम् । इत्युक्तस्येति चतुर्थपादोक्तस्येत्यर्थः ॥ पूर्वमेवेति ॥ सत्वं जीवः क्वचित्प्रोक्त इत्यादिना त्रयोदशाध्याये ॥ अनेकार्थत्वादिति ॥ तादात्म्यार्थे विकारार्थे प्राचुर्यार्थे मयट् त्रिधेत्युक्तेरिति भावः ॥ तामिति ॥ सात्विकादिश्रद्धां सात्विकादिश्रद्धावद्भिः क्रियमाणयजनमिति यावत् । इत्यस्य विवरणेनेति ॥ य इत्यत्र सात्विकादिश्रद्धः सात्विकादिरित्युक्ते कः सात्विकश्रद्धादिरिति जिज्ञा-

---

1. अ. ज्ञायन्ते ।

सात्त्विकस्य तमोरूपा श्रद्धाऽन्तःकरणात्मिका ।
सात्त्विकी तामसस्यापि भूयस्त्वात्तद्विविच्यते ' ॥ ३ ॥
श्रद्धेत्यास्तिक्यनिष्ठोक्ता सा येषां देवतोत्तमे ॥
विष्णौ तद्भक्तबुद्ध्यैव रमाब्रह्मादिकेषु च[1] ।
ते सात्त्विका इति ज्ञेयास्तैरिष्टं विष्णुरेव तु ॥
श्रीश्च साध्यक्षविद्याख्या ब्रह्मेन्द्राद्याश्च देवताः ।
विबुधत्वात्तु मन्वाख्या भुञ्जते प्रीतिपूर्वकम् ॥
व्यामिश्रयाजिनो ये तु विष्ण्वाधिक्ये ससंशयाः ।
स्वरूपमात्रे देवानां श्रद्धायुक्ताश्च सर्वदा ॥
राजसास्ते तु विज्ञेयास्तैरिष्टं यक्षराक्षसाः ।

एवं राजसस्यापि सात्त्वकी तामसी कचिदेव भवतीति ज्ञातव्यम् ॥ किं तत इत्यत आह ॥ भूयस्त्वादिति ॥ एवं स्वरूपश्रद्धाया एवाधिक्येनाभिव्यक्तेर्ज्ञातुं शक्यत्वात् तया जीवस्वरूपं विविच्यत इत्यर्थः ॥ ३ ॥

कथं श्रद्धया जीवस्वरूपविवेक इत्यत आह ॥ श्रद्धेति ॥ अनेन यजन्त इत्युक्तार्थं भवति । व्यामिश्रयाजिनोऽक्रमेण याजिनः[2] । अखिलं जगन्मिथ्येति मन्यन्त इत्यर्थः । अनेन सर्वयाजिनां देवतायाजित्वसाम्येऽपि भोक्तृविवक्षया देवानित्याद्युक्तिरित्युक्तं भवति । 'अध्यक्षविद्याख्या', 'दीनत्वात्', 'शिवस्कन्दादि' इत्यनेन कचित्तथोक्तीनां गतिरुक्ता स्यात् । त्रिविधानां तेषां यजनफलमाह ॥

सायां देवादियाजी सात्विकश्रद्धादिरिति विवरणेनेत्यर्थः ॥ एवमिति ॥ सात्विकी तामसस्यापीति एवं राजसस्यापीत्यादि ध्येयमित्यर्थः । उभयत्रान्तःकरणात्मिकेत्यनुषङ्गो मूले ध्येय इति भावः । व्यामिश्रयाजिन इत्यनुवादः अक्रमेणेत्यादि व्याख्या । यजमानाः यागं कुर्वाणा इत्यर्थः । नेति चाखिलमित्यस्यार्थः अखिलमित्यादि ॥ कचित्तथोक्तीनामिति ॥ कचिद्ग्रन्थे अध्यक्ष-

---

1. अ. तु । 2. अत्र 'यजमानाः' इति पाठः भावदीपकारैर्धृतः ।

दीनत्वाद्देवनामानो ब्रह्मेन्द्रादिसनामकाः ॥
गृह्णन्ति ये हरिं त्वन्यदेवादिसममेव तु[1] ।
नीचं ब्रह्माद्यनत्यं वा मन्यन्ते नेति चाखिलम् ॥
ततच्छ्रद्धायुतास्ते तु तामसाः परिकीर्तिताः ।
भूतप्रेतास्तु तैरिष्टं शिवस्कन्दादिनामकाः ॥
साक्षाच्छिवपरीवारा भुञ्जते ह्यतितामसाः ।
मोक्षः साङ्कल्पिकः स्वर्गो भूतादित्वं फलं क्रमात् ॥
त्यक्त्वाऽपि शास्त्रविहितं मिथ्याज्ञानविवर्जिताः ।
भक्त्या विष्णुं यजन्ते[2] ये निषिद्धचरणोज्झिताः ॥
तेऽपि यान्ति हरिं शास्त्रविधानस्थाः कुतः पुनः ।
अशास्त्रविहितं घोरं तप्यन्ते ये तपो[3] जनाः ॥
दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥
अकृशानपि लक्ष्म्यादीन् देवान् विष्णुपरायणान् ।
विष्णुं च सर्वदेहस्थं[4] कृशत्वेन विजानते ॥
तेषामल्पगुणत्वेन कल्पनात्ते तमो ध्रुवम् ।

मोक्ष इति ॥ स्वर्गप्रतिनिधित्वेन कल्पितः साङ्कल्पिकः स्वर्गः । उक्तरीत्या सात्त्विकानां किं शास्त्रविधिं जानतामजानतामपि मोक्ष इत्यत आह ॥ त्यक्त्वेति ॥ अनेन शास्त्रविध्युत्सर्गाद्यप्रयोजकीकृत्य श्रद्धाया एव प्रयोजकत्वकथनस्याभिप्रायोऽपि वर्णितो भवति । तामसानां भूतादित्वमवान्तरफलमेव । मुख्यं तु तम एवेत्युपपादयति ॥ अशास्त्रेति ॥ ज्ञेयाश्चेत्यनेन 'तान् विद्धि' इत्युक्तार्थं भवति ।

त्रिधा भुङ्क्ते, देवा भुञ्जते, शिवस्कन्दादयो भुञ्जत इत्युक्तेर्गतिरुक्ता भवतीत्यर्थः ॥ अनेनेति ॥ त्यक्त्वापि शास्त्रविहितमित्यादिनेत्यर्थः ॥ शास्त्रविध्युत्सर्गादीति ॥ शास्त्रविध्यज्ञानज्ञानेत्यर्थः ॥ प्रयोजकत्वकथनस्येति ॥

---

1. अ. वा । 2. अ. यजन्तो । 3. अ. तपोधनाः । 4. अ. सर्वदेहस्थान् ।

यान्ति ज्ञेयाश्च ते दैत्याः पिशाचा वाऽथ राक्षसाः ॥
अन्नैश्चैवाथ यज्ञाद्यैः प्रायो ज्ञेया इमे नराः ।
सात्त्विकाः सात्त्विकान् कुर्युर्यस्मादन्ये तथेतरान् ॥
ओंतत्सदिति यद्विष्णोर्नामत्रयमुदाहृतम् ।
प्रसिद्धं वैदिकं तस्मात् कर्म तद्विषयं[1] हि सत् ॥
तत्राश्रद्धाकृतं तस्मादसदित्येव कीर्त्यते ।
विप्रा वेदाश्च यज्ञाश्च यस्मादोताः परस्परम् ॥
विहिता विष्णुना तेन विष्णुरोमिति कीर्तितः ।
ओतमस्मिन्निदं सर्वमिति चोक्तः स ओमिति ॥
तस्मादोमिति यज्ञादीन् प्रवर्तन्ते हि वैदिकाः ।

अन्नैश्चेत्यनेन 'आहारः' इत्यादेस्तात्पर्यमुक्तं भवति। श्रद्धाया जीवस्वरूपत्वेन तया[2] तज्ज्ञानमुपपद्यते। आहाराद्यैस्तत्कथमित्यत आह ॥ सात्त्विका इति ॥ अत्र जीवानां सात्त्विकत्वादि उत्तमत्वादीति ज्ञेयम्। सात्त्विययज्ञादीनामित्थंभावान्तरविधानायाह ॥ ओमिति ॥ अनेन 'ॐ तत्सत्' 'कर्म च' इत्यादि व्याख्यातं भवति। केन हेतुना विष्णोरोमिति नामेत्यत आह ॥ विप्रा इति ॥ तस्मादोङ्कारस्य भगवन्नामत्वात्, ओमित्युच्चार्येति शेषः ॥ प्रवर्तन्त इति ॥ प्रवर्तयन्तीत्यर्थः। अनेन ब्राह्मणा इत्याद्युक्तार्थं भवति। भगवन्नामान्तरसद्भावात् कथमेतदुच्चा-

---

गीतायां त्रिविधेत्यादिनेति भावः ॥ तज्ज्ञाने तज्ज्ञानमिति ॥ सात्विकादिश्रद्धाज्ञाने सात्विकादिजीवस्वरूपज्ञानमित्यर्थः ॥ सात्विकत्वादीति ॥ सात्विकत्वमुत्तमत्वं राजसत्वं मध्यमत्वं तामसत्वमधमत्वमिति ज्ञातव्यमित्यर्थः ॥ तस्मादित्यनुवादः ॐकारस्येत्यादि व्याख्या ॥ इति सिद्धमिति ॥ कथमे-

---

1. अ. सद्विषयं।
2. अत्र 'तज्ज्ञाने' इति पाठः भावदीपकारैरादृत इति भाति।

अनोङ्कृतं ह्यासुरं स्याद्यत्स्मादोङ्कृतं त्वपि ॥
ओङ्कारार्थहरेः सम्यगज्ञानादासुरं भवेत् ।
फलं त्वनभिसन्धाय तद्ब्रह्म स्यान्ममास्पदम् ॥
इति यत् क्रियते कर्म तन्नामातो जनार्दनः ।
अभिसंहितं[1] हि तत्प्रोक्तं ततं वा स्वगुणैः सदा ॥

इत्यादि च । 'मयं[2] प्रधानमुद्दिष्टं स्वरूपं कार्यमेव च' इति शब्द-निर्णये । शास्त्रविहितमपि भगवच्छ्रद्धाविहीनमसदेवेति वक्ष्यति—'अश्रद्धया हुतं' इति । भगवच्छ्रद्धाविरहितत्वादेव चाशास्त्रविहितं भवति । 'विष्णुभक्तिविधानार्थं सर्वं शास्त्रं प्रवर्तते' इति पैङ्गिश्रुतिः ॥ ४-७ ॥

रणनियतिरित्यतोऽस्य विशेषमाह ॥ अनोङ्कृतमिति ॥ ओङ्कारोच्चारणं तदर्थज्ञानपूर्वकमेव कार्यमिति भावेनाह ॥ ओङ्कृतं त्विति ॥ किंनिमित्तं विष्णोस्तदिति नामेत्यत आह ॥ फलमिति ॥ अनेन तदित्युक्तार्थं भवति । ननु मयट्प्रत्ययस्य विकारैकार्थत्वात् कथं श्रद्धामय इत्यस्य श्रद्धास्वरूप इति व्याख्येत्यत आह ॥ मयमिति ॥ श्रद्धैव प्रयोजिका न तु शास्त्रविधानानुसारित्वादीति यत्परिहारवाक्याभिप्रायवर्णनं तत्कुत इत्यत आह ॥ शास्त्रेति ॥ भगवतैव श्रद्धाभावे शास्त्रविधानानुसारिणोऽप्यसत्त्वस्यैवोक्तत्वात् श्रद्धैव प्रयोजिका नान्यदिति ज्ञायत इति भावः । हुतमित्यत्र शास्त्रविधानानुसारेणेति सिद्धम् । विधानोक्तिप्रसङ्गात् । अङ्गीकृत्य चेदमुक्तम् । भगवच्छ्रद्धाभावे शास्त्रविधानानुसारित्वं च नास्ति । ततोऽपि श्रद्धैव सात्त्विकत्वादौ प्रयोजिकेत्याशयेनाह ॥ भगवदिति ॥ तत्कुत इत्यत आह ॥ विष्णुभक्तीति ॥ विष्णुभक्तिविधानार्थमेव शास्त्रप्रवृत्तिश्रुतेः तदभावे न शास्त्रविधानानुसारित्वं भवतीत्यर्थः । शास्त्रविधानस्याप्रयोजकत्वे कथमशास्त्रविहितमिति तामसत्वे प्रयोजकत्वमुच्यत इत्यतो वाह ॥ भगवदिति ॥

तज्ज्ञायत इत्यत आह ॥ उक्ति प्रसङ्गादिति ॥ प्रकरणबलादिति भावः ।

---

1. अ. अभिसन्धितं । 2. अ. मयः ।

स्थिराः स्थिरगुणाः घृतादयः। कट्वादीनामप्यारोग्यरसाद्यर्थत्वेन सात्त्विकत्वमेव। रस्यादीनामपि राजसत्त्वमनारोग्यादिहेतुत्वे। 'दुःख शोकामयप्रदाः' इत्युक्तेः। सत्त्वं साधुभावः। भवति हि सोऽपि शुच्यन्नात्।

'हृद्यं पश्चान्मनोहारि प्रियं तत्कालसौख्यदम्।
सुखं[1] तु दीर्घसुखदं रस्यमभ्याससौख्यदम्॥'

'रस्याः स्निग्धाः स्थिरा हृद्याः' इत्याहाराणां किंनाम स्थिरत्वं, केषां चोच्यत इत्यत आह॥ स्थिरा इति॥ बहुकालं गुणप्रदा इत्यर्थः। कट्वाम्ललवणेति कट्वादीनां यद्राजसत्वमुक्तं तन्न नियतं, कदाचित् सात्त्विकत्वमपि स्यादित्याह॥ कट्वादीनामिति॥ रसो रसायनम्। एवं रस्याः स्निग्धाः स्थिरा हृद्या इति सात्त्विकत्वेनोक्तानां रस्यादीनां सात्त्विकत्वं न नियतं, कदाचित् राजसत्त्वमपि भवतीत्याह॥ रस्येति॥ कट्वादीनां राजसत्त्वनियमः किं न स्यात्? कदाचित्सात्त्विकत्वं कुत इत्यत आह॥ दुःखेति॥ दुःखादिप्रदाश्चेत् राजसा इत्युक्तत्वादारोग्यादिहेतुत्वे कट्वादीनां सात्त्विकत्वावगतेर्न राजसत्त्वनियम इत्यर्थः। रस्यादीनां सात्त्विकत्वानियमे चायुःसत्त्वेत्याद्युदाहर्तव्यम्। बलशब्दात् सत्त्वशब्दस्यानतिभिन्नार्थत्वात् पुनरुक्तिरित्यत आह॥ सत्त्वमिति॥ नात्रायं सत्त्वशब्दार्थः साधुभावः। तस्यान्नोत्पन्नत्वाभावादित्यत आह॥ भवतीति॥ 'सुखप्रीतिविवर्धनाः' 'हृद्याः' इति शब्दस्यैकार्थत्वप्रतीति-

---

रसाद्यर्थमित्यत्र रसपदस्यार्थमाह॥ रसो रसायनमिति॥ मूले कट्वादीनां राजसत्वनियमे दुःखशोकेत्यादिविशेषणं ज्ञापकतया यथोदाहृतं तथा रस्यादीनां सात्विकत्वनियमे आयुरित्यादि विशेषणं ज्ञापकतयोदाहर्तव्यमित्यर्थः। तथा च दुःखशोकाद्यहेतुत्वे यथानराजसत्वं तथा आयुरादिविवर्धनाहेतुत्वे सात्विकत्वं रस्यादीनां नेति ज्ञातव्यमिति भावः॥ शङ्कते॥ नात्रायमिति॥

1. अ. सुखदं।

इति शब्दनिर्णये ॥ ८ ॥

रूक्षं नीरसं, तीक्ष्णं सर्षपादि ॥ ९ ॥

'यामान्तरितपाकं तु यातयाममितीर्यते ।
क्वचिच्च गतसारं स्यान्नियम्यं यातमस्य यत् ॥'

इति च । पूर्वं स्वादु पश्चादन्यथा जातं गतरसम् ।

'शुद्धभागवतानां तु स्वभावापेक्षयैव तु ।
स्वादुत्वादि विजानीयात् पदार्थानां न चान्यथा ॥'

इति सूदशास्त्रे ॥ १०-११ ॥

निरासायाह ॥ हृद्यमिति ॥ सेवानन्तरमपि यत्पुनर्भूयादिति मनो हरति तद् हृद्यम् । उपयोगकाल एव सौख्यप्रदं प्रियम् । सकृदुपयुक्तं दीर्घकालं सुखं ददत् सुखदम् । बहुवारोपभोग एव सौख्यदं रस्यमित्यर्थः ॥८॥ रूक्षशब्दस्यानेकार्थत्वादत्र विवक्षितमर्थमाह ॥ रूक्षमिति ॥ अन्नस्य तीक्ष्णत्वं घटयन्नाह ॥ तीक्ष्णमिति ॥९॥ पङ्क्तिपावनपुरुषशेषान्नस्य सात्त्विकत्वप्रसिद्धेः कथं यातयामं तामसमित्यतः प्रकारान्तरेण प्रमाणत एव व्याचष्टे ॥ यामेति ॥ यामं याम्यं नियम्यम् अपेक्षितांशः सार इति यावत् । तर्हि गतरसमिति पुनरुक्तिरित्यत आह ॥ पूर्वमिति ॥ यो वा को वा यस्य रसस्तदपगमे यातयामं, स्वादुत्वापगमे गतरसमित्यर्थभेद इति भावः । रूक्षशब्देन राजसतयोक्तनीरसस्य कथं तामसत्वमुच्यत इत्यतो वाऽऽह ॥ पूर्वमिति ॥ स्वत एव नीरसं रूक्षम्, पूर्वं स्वाद्वेव पश्चादन्यथा जातं गतरसमित्यदोष इति भावः । अपगतस्वादुत्वं तामसत्वमिति दुर्गमम् । एकस्यैव वस्तुनः पुरुषभेदेन स्वादुत्वास्वादुत्वसम्भवेन स्वाद्वादेरनिश्चयादित्यत आह ॥ शुद्धेति ॥

अन्नोत्पन्नत्वेपीति ॥ विवर्धत इत्यनेन सत्त्वस्य तदुत्पन्नत्वश्रवणादिति भावः । कर्मणि घञन्तं यामपदमित्युपेत्याह ॥ यामं याम्यमिति ॥ तत्रेति ॥ याग

'यागात्तु राजसात् स्वर्गः साङ्कल्पिक उदाहृतः ।
लोकः सदीनदेवानां सनाम्नां वासवादिभिः ॥

विष्णावश्रद्धयाऽयोग्यकामाच्चैषां पुनर्भवेत् ।
नरकं च विना यज्ञं राजसा नरलोकगाः ॥

निषिद्धं कर्म कुर्युश्चेदीयुस्ते[1] नरकं ध्रुवम् ।
कदाचित् सात्त्विकाः कुर्युः कर्म राजसतामसम् ॥

यदुक्तं राजसयजनेन साङ्कल्पिकः स्वर्ग एवेति तन्न युज्यते। 'अभिसन्धाय तु फलं' इति तत्र फलाभिसन्धिना प्रवृत्तेः, राजसयागेन इन्द्रादिदेवलोकः स्वर्गो भवतीति कचिद्वचनाच्चेत्याशङ्कां स्मृत्यन्तरेण परिहरति ॥ यागादिति ॥ स्वर्गाभिसन्धानात्तत्र प्रवृत्तेः कथं तदभाव इत्यत आह ॥ विष्णाविति ॥ स्वर्गकामनेन प्रत्युत नरक एव भवति, न स्वर्गः । तेषां विष्णावश्रद्धासद्भावेन स्वर्गयोग्यानां तत्कामस्या-योग्यत्वादिति भावः । राजसानां सकामयज्ञाभावेऽपि नरकसद्भावात् कथमयोग्यकामादि तत्कारणमित्यत आह ॥ विनेति ॥ कचिन्नरक-दर्शनस्य गतिमाह ॥ निषिद्धमिति ॥ अत्र नरकलोकप्रचुरत्वोक्त्या राजसेषु मध्यमा विवक्षिताः न तु नित्यत्रैविद्या इति ज्ञातव्यम । यदि राजसकर्मणा नरकः स्यात्तर्हि सात्त्विकानामपि तत्कारणसम्भवात् नरकप्राप्तिः स्यादित्यत आह ॥ कदाचिदिति ॥ यद्यपि सात्त्विका राजस-तामसे, राजसाः सात्त्विकतामसे, तामसाश्च सात्त्विकराजसे कर्मणी यद्यपि कुर्वन्ति । तथापि तत्कदाचिदेव । स्वाभाविककर्मण्येव प्राधान्येन स्थितिः । महता चाल्पाभिभव इति न फलसङ्कर इति भावः । स्वाभाविकं महाफलमस्वाभाविकम् अल्पफलमित्यतोऽपि स्वाभाविके-नान्याभिभवसम्भवान्न फलसङ्कर इत्याह ॥ स्वमिति ॥ यदि सात्त्विका-दीनां स्वाभाविकास्वाभाविककर्मकरणं स्यात्तर्हि इदं स्वाभाविकं कर्म,

---

1. अ. ईयुष्टे।

अन्येऽन्यच्च तथाप्येषां स्थितिः स्वाभाविकी पुनः ।
स्वं स्वं कर्म तु सर्वेषां सदैव स्यान्महाफलम् ।
अन्यदल्पफलं चैव बाहुल्यं तेषु लक्षणम् ॥

इति पाद्मे ॥ १२-१५ ॥

मौनं मननम् ॥ १६ ॥

युक्तैः भगवदर्पणादियोगयुक्तैः । युक्तैरिति दानादिषु सर्वत्र समम् । सत्सम्बन्धित्वादेव कर्मादि सत् ॥ १७-२२ ॥

इदं नेति कथं ज्ञायत इत्यत आह ॥ बाहुल्यमिति ॥ स्वाभाविकादिकर्मसु यद् बहुलं तत् स्वाभाविकम्, अल्पमस्वाभाविकमिति बाहुल्यादिज्ञापकमिति भावः ॥१०-१५॥

'मनःप्रसादः सौम्यत्वं मौनं' इत्यत्र मौनशब्दस्यान्यार्थत्वप्रतीतिनिरासायाह ॥ मौनमिति ॥ कथमन्यथा मानसं तपः स्यादिति भावः । 'अफलाकाङ्क्षिभिर्युक्तैः' इत्यत्र युक्तत्वं नाम किमित्यत आह ॥ युक्तैरिति ॥ ननु सात्त्विकयज्ञदानयोर्भगवदर्पणमनुक्त्वा तपस्येव किमुच्यत इत्यत आह ॥ युक्तैरिति ॥ न केवलं तपस्येवैतदुच्यते किन्तु यज्ञदानतपस्स्वपि एतदनुषञ्जनीयमिति भावः ।

'ओंतत्सदिति निर्देशः' इत्येतद्वाक्यान्तरेण व्याख्यातम् । तद्वाक्यविवरणेनैतद्वाक्यं विवृणोति ॥१६-२२॥ सदिति ॥ ततश्च किमित्यत आह ॥ ओमिति ॥ कर्मादीनां सत्सम्बन्धित्वादेव हि सत्त्वम । तच्च पदं ब्रह्मैव । ओंतत्सदिति नाम्ना विष्णौ प्रसिद्धत्वात् । अतो विष्णुसम्बन्ध्येव कर्मादि सदिति भावः । अनेन 'ॐ तत्सदिति यद्विष्णोः'

इत्यर्थः ॥ वाक्यान्तरेणेति ॥ ॐ तत्सदिति, यद्विष्णोरित्यादिवाक्यान्तरेणेत्यर्थः ॥ तद्वाक्येति ॥ प्रागुक्तस्मृतिवाक्यविवरणेनैतद्वाक्यं गीतावाक्य-

ॐतत्सदिति नाम्नां विष्णौ प्रसिद्धत्वात् । 'स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते । अनोङ्कृतमासुरं कर्म' इति श्रुतेरनोङ्कृतस्याऽसुरत्वप्रसिद्धेः ।

'अनर्थज्ञोदितो मन्त्रो निरर्थस्त्राति मानतः ।
यन्मन्त्रस्तेन कथितो मन्त्रार्थो ज्ञेय एव तत् ॥' इति

पैङ्गिश्रुतेश्च । तदर्थत्वेन फलानभिसन्धिपूर्वककर्मण एव सात्त्विकत्वाच्च । तद्भक्त्या तत्स्मरणपूर्वकमेव कर्म सदन्यदसदेवेति भावः ।

इति विवृतं भवति । 'अनोङ्कृतं ह्यासुरं स्यात्' इत्यनोङ्कृतस्यासुरत्वप्रसिद्धिः तदुच्चारणे हेतुतयोक्ता । काऽसावित्यतो वैदिकीत्याह ॥ स्रवतीति ॥ 'ओङ्कृतं त्वपि' इत्युक्तार्थं श्रुतिं चाऽह ॥ अनर्थज्ञेति ॥ निरर्थो निष्प्रयोजनः । कुतः ? यस्मादर्थज्ञानत एव ज्ञातारं त्राति तेन हि मन्त्रः कथितः । नन्वस्मिन्नध्याये सदसत्कर्मविवेकः कार्यः । तं विहाय ॐ तत्सदित्यादिना किमुच्यत इत्यतोऽभिप्रायमाह ॥ तदर्थत्वेनेति ॥ अत्र ह्योङ्कारार्थस्मरणपूर्वकं तमुच्चार्य भक्त्या भगवदर्थत्वेन निष्कामतया कृतमेव कर्म सात्त्विकमन्यद्राजसादीत्युच्यते । ततश्चैतादृशमेव सत्कर्म अन्यदसत्कर्मेति सदसत्कर्म विविच्योक्तमेवेति भावः । न च वाच्यमत्रैवंविधकर्मणः सत्त्वमन्यस्यासत्त्वं स्वयमेवोच्यत इति । अन्यथा प्रसङ्गाननुगुणत्वप्रसङ्गेन सदादिशब्दस्य सात्विकाद्यर्थत्वात् । एतेन 'अफलाकाङ्क्षिभिः' इत्यादेरप्येवमेवाध्यायसङ्गतिः सूचिता भवति ।

मित्यर्थः ॥ तच्च पदमिति ॥ सदिति पदं चेत्यर्थः ॥ विवृतं भवतीति ॥ ओमादिनामकभगवत्सम्बन्धाद्यज्ञादिकमपि तन्नामकमिति विवृतमित्यर्थः ॥ तदुच्चारण इति ॥ ॐकारोच्चारण इत्यर्थः ॥ तेन हि मन्त्र इति ॥ मं ज्ञातारं त्रातीति मन्त्र इत्यर्थः । माङ् मान इत्यतः कर्तरि अण् प्रत्ययेऽप्रत्यये वा म इति रूपम् । त्रैङ् पालन इत्यत आतोनुपसर्गे क इति कप्रत्यये डप्रत्यये

राजसस्याप्यसदन्तर्भाव एव । विष्णुश्रद्धारहितत्वात् ।

'सात्त्विकं मोक्षदं कर्म राजसं सृतिदुःखदम् ।
तामसं पातदं ज्ञेयं तत्कुर्यात् कर्म वैष्णवम् ॥' इत्याग्नेये
॥ २३-२८ ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-
तात्पर्यनिर्णये सप्तदशोऽध्यायः ॥ १७ ॥

ननु 'कर्म चैव तदर्थोऽयं' इति सात्त्विकं कर्मोक्त्वा राजसमनभिधाय 'अश्रद्धया हुतं' इति तामसमेव किमुच्यत इत्यत आह ॥ राजसस्येति ॥ नात्र तामसमेवासच्छब्देनोच्यते अपि तु राजसमपीति भावः । तत्कुत इत्यतोऽश्रद्धयेत्युक्तासल्लक्षणस्य राजसेऽपि भावादित्याह ॥ विष्ण्वति ॥ 'न च तत्प्रेत्य नो इह' इति यद्राजसतामसकर्मणोः फलमुक्तं तद्विविच्य स्मृत्या दर्शयति ॥ सात्त्विकमिति ॥

**इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-
तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां
न्यायदीपिकायां सप्तदशोऽध्यायः ॥ १७ ॥**

वा मन्त्र इति रूपसिद्धेः ॥ एवमेवाध्यायसङ्गतिः सूचितेति ॥ अफलाकांक्षित्वादिना क्रियमाणं कर्म सत्, अन्यदसदिति तात्पर्यादध्यायान्तर्भावसंगतिरित्यर्थः ।

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते
सप्तदशोऽध्यायः ॥ १७ ॥

॥ अथ अष्टादशोऽध्यायः ॥

हरिः ॐ ॥ सर्वाध्यायोक्तधर्मस्य समासतो निर्णयात्मकोऽनुक्तत्रैगुण्यवादी चायम् ॥ १-२ ॥

"मनीषिणः" इत्युक्तत्वात् तेऽप्यनिन्द्याः । अतः 'त्याज्यं दोषवत्' इत्यस्यार्थः 'सङ्गं त्यक्त्वा फलं च' इति ॥ ३-४ ॥

हरिः ॐ ॥ एतदध्यायप्रतिपाद्यमर्थं दर्शयति ॥ सर्वेति ॥ यत्सर्वेष्वध्यायेषु विप्रकीर्णतया पुरुषार्थसाधनमुक्तं तन्मन्दानां बुद्ध्यारोहार्थं सङ्क्षेपेणास्मिन्नध्याये निरूप्यते । चतुर्दशाद्यनुक्तं त्रैगुण्यं चोच्यत इत्यर्थः ॥ १-२ ॥

'सर्वकर्मफलत्यागं' इति स्वोक्तत्यागस्वरूपावधारणाय प्रातीतिकी विद्वन्मतविप्रतिपत्तिरुद्भाव्यते—'त्याज्यम्' इति । अत्र यज्ञदानतपःकर्म न त्याज्यं, कार्यमेव तदिति भगवन्मतविरोधित्वात् त्याज्यं दोषवदिति त्यागपक्षिणो निन्द्या इत्यन्यथाप्रतीतिनिरासायाह ॥ मनीषिण इति ॥ तन्मतस्य भगवन्मतविरुद्धत्वात् कथं ते न निन्द्या इत्यत आह ॥ अत इति ॥ 'कार्यमित्येव यत्कर्म' इत्यत्र यथा कर्मणि सङ्गफलत्यागेन कर्मत्यागो वर्ण्यते, न तु कर्मस्वरूपत्यागेन, तथा त्याज्यमित्येतदर्थो वर्णयितुं शक्यते । अतो न तस्य भगवन्मतविरोधः । कुतोऽर्थान्तरकल्पनेति चेत् मनीषिण इत्युक्तत्वादेवेति भावः ॥ ३-४ ॥

निश्चयं शृणिवति प्रतिज्ञातमुच्यते—यज्ञेति । तत्र ज्योतिष्टोमादियज्ञेषु हिरण्यादिदानेषु यतीनां शूद्रादीनां चाधिकाराभावात् ऊर्ध्वरेतस्त्वादितपस्सु गृहस्थादीनाम् अधिकाराभावात् कथं सर्वेषां यज्ञादि विधीयत इत्यत आह ॥ द्रव्येति ॥ नात्र सर्वेषां ज्योतिष्टोमादियज्ञः,

---

हरिः ॐ ॥ पुमर्थसाधनमिति ॥ मोक्षहेतुज्ञानसाधनं त्रैगुण्यविषया वेदा इत्यादिनोक्तमित्यर्थः । त्रैगुण्यं सत्त्वादिगुणत्रयकार्यमित्यर्थः ॥ नाग्निर्न

*

द्रव्ययज्ञादीनां मध्ये स्वोचितो यज्ञो विद्यादानादिषु स्वोचितं दानं स्वोचितं तपश्च सर्वैर्वर्णाश्रमिभिरन्यैश्च कार्यमेवेत्यर्थः । विष्णुनामस्वाध्यायोऽन्त्यानां [1]सत्योपवासादितपश्च ॥ ५-६ ॥

सङ्गफलत्यागमृते स्वरूपत्यागः कार्य इति मिथ्याज्ञानाख्यमोहात् । 'स्वयज्ञादीन् परित्यज्य निरयं यान्त्यसंशयम् ।' इति पाद्मे ॥ ७ ॥

मोहं विना दृष्टदुःखमित्येव । दुःखशब्देन केवलं मानसम् । कायक्लेशस्य पृथगुक्तेः ।

हिरण्यादिदानानि, ऊर्ध्वरेतस्त्वादितपांस्येव विधीयन्ते, किन्तु द्रव्ययज्ञादियज्ञाः, विद्यादिदानानि, सत्यवचनादितपांसि। तेषां च यत्यादीनामप्युचितत्वात् युक्तं सर्वेषां तद्विधिरिति भावः । 'नाग्निर्न यज्ञः' इत्यादेः त्रिवर्णबाह्यानां न क्वापि यज्ञेऽधिकार इत्यत आह ॥ विष्ण्वति ॥ द्रव्यादियज्ञाभावेऽपि तेषां स्वाध्याययज्ञेऽधिकारोऽस्त्येव । न च वेदानधिकारेण तदभावः । विष्णुनामस्वाध्याययज्ञेऽधिकारसम्भवादिति भावः । तेषां किं तप इत्यत आह ॥ सत्येति ॥ ५-६ ॥

'त्यागो हि' इत्युक्तं प्रपञ्चयते—'नियतस्य' इति । तत्र कर्मत्यागस्य स्वयमेव स्तूयमानत्वात् कथं मोहनिमित्तत्वमुच्यत इत्यत आह ॥ सङ्गेति ॥ स्वरूपत्यागस्यापि मोहनिमित्तत्वं कुतः ? येनायमर्थः स्यादित्यत आह ॥ स्वेति ॥ ननु पुरुषार्थसाधनेऽपि कर्मणि दुःखसाधनमिति मिथ्याज्ञानेन तत्स्वरूपपरित्यागस्य राजसत्वकथनात् कथं तामसत्वमित्यत आह ॥ मोहमिति ॥ मोहं विनेति ॥ परत्रापीदं दुःखसाधनमिति मिथ्याज्ञानं विनेत्यर्थः । दुःखशब्देन शरीरायास

यज्ञ इत्यादेरिति ॥ अपशूद्राधिकरणभाष्योक्तवचनादित्यर्थः । भावानभिज्ञः

---

1. अ. सत्येति नास्ति ।

'दुःखं तु मानसं ज्ञेयमायासो बाह्य उच्यते ।
विशेषस्य विवक्षायामन्यथा सर्वमेव तु ॥'

इति [1]शब्दनिर्णये ॥ ८-९ ॥

'न द्वेष्ट्यकुशलं कर्म केवलं दृष्टदुःखदम् ।
जन्मान्तरकृते पुण्ये न सज्जेत् सात्त्विकश्चले ॥
यः सम्यक्तत्त्वविद्विष्णोः तदर्पणधियैव तु ।
फलेच्छावर्जितस्तस्य कर्म बन्धाय नो भवेत् ॥
बहुलं चेदल्पदोषं यावदेवापरोक्षदृक् ॥'

इति च ॥ १०-११ ॥

उच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ दुःखेति ॥ केवलमिति ॥ शरीरायासद्वारा प्राप्तं न चेत्यर्थः । शरीरायास एवार्थः किं न स्यादित्यत आह ॥ कार्यैति ॥ न केवलमन्यथा पुनरुक्तिप्रसङ्गादत्र दुःख-शब्दो मानसदुःखार्थः । किन्तु तथा वचनाच्चेत्याह ॥ दुःखमिति ॥ अर्थविशेषविवक्षायामेवं ज्ञेयम् । तदभावे द्वयमपि शब्दद्वयेनोच्यत इति भावः ॥ ८-९ ॥

सात्त्विकत्यागी पुनर्निरूप्यते — 'न द्वेष्टि' इति । तत्र कथं सात्त्विकत्यागिनोऽकुशलकर्माद्वेषः कुशलकर्मासङ्गश्चोच्यते । 'कार्य-मित्येव' इत्युक्तिविरोधादित्यतः प्रमाणान्तरेण तद्व्याचष्टे ॥ न द्वेष्टीति ॥ पुण्य इति ॥ तत्फल इति यावत् ॥ तमेव स्तौति ॥ य इति ॥ सम्यगित्यनेन मेधावीत्याद्युक्तार्थं भवति । तदर्पणेनेत्यनेन त्यागी-त्युक्तार्थं स्यात् । तस्येत्यनेनानिष्टमित्यस्य तात्पर्यमुक्तं भवति । किं

शङ्कते ॥ कर्मत्यागस्येति ॥ कार्यमित्येवेत्युक्तविरोधादिति ॥ तत्र कुशले कर्मण्यनुषङ्गस्योक्तत्वादकुशले फले द्वेषस्य च प्रतीतेरिति भावः ॥ किं तस्य

1. अ. शब्दतत्त्वे ।

अन्येषामिष्टम् । अस्य तु त्यागित्वादेव नेष्टम् । 'ज्ञानादेर्मोक्षभोग्याच्च नान्यत् स्यात्कर्मणः फलम्', 'त्यागिनस्तत्त्वसंवेत्तुरन्येषां तदृते फलम् ॥' इति च ।

केवलकाम्यकर्मणां फलानपेक्षयाऽप्यकरणमित्येवांस्त्यागात्

तस्य सर्वथा बन्धकं कर्म न बन्धाय भवतीत्यत आह ॥ बहुलं चेदिति ॥ बहुलं चेत् सर्वत्यागिनामप्यत्यल्पदोषकरं कियत्पर्यन्तमित्यत आह ॥ यावदिति ॥ १०-११ ॥

'अनिष्टमिष्टं मिश्रं च' इत्यत्र बन्धकं कर्मफलं त्यागिन इष्टमित्यन्यथाप्रतीतिनिरासायाह[1] ॥ अन्येषामिति ॥ त्यागिन एवेष्टं किं न स्यादित्यत आह ॥ अस्येति ॥ न त्यागिनो बन्धकं कर्मफलमिष्टम् । त्यागित्वादेव । 'यस्तु कर्मफलत्यागी' इति कर्मफलेच्छात्यागिन एव त्यागित्वेनोक्तत्वादिति भावः । भवेदेवं यदि 'अनिष्टमिष्टं मिश्रं च' इत्यत्र बन्धककर्मफलं विवक्षितं स्यात् । न चैवमबन्धककर्मफलस्यापि ग्रहणे बाधकाभावादित्यतस्त्यागिनो बन्धककर्मफलस्यैवाभावेऽत्यागिनो बन्धककर्मफलभावे प्रमाणमाह ॥ ज्ञानादेरिति ॥ त्यागिमात्रस्य ज्ञानभक्त्यादेः । तस्यैवापरोक्षतस्तत्त्वसंवेत्तुः मोक्षभोग्यानन्दातिशयात् । तदृते ज्ञानादिकमृते । अनेन 'भवत्यत्यागिनां' इत्युक्तार्थं भवति । भवत्यत्यागिनां प्रेत्य न तु त्यागिनामित्यत्यागिनां प्रतियोगित्वेन त्यागिन एव वक्तव्याः । संन्यासिनस्तु किमित्युच्यन्त इत्यत आह ॥ केवलेति ॥ अत्यागिप्रतियोगितया संन्यासिकथनं नानुपपन्नम् । स्वार्थे फलेच्छाभावेऽपि परोपकारार्थं कारीर्यादिकेवलकाम्यकर्मकरणमस्ति त्यागिनाम् । तदपि

सर्वथेति ॥ बन्धकं कर्म तस्य सर्वथा सर्वात्मना न बन्धाय भवति किमित्यर्थः । सर्वत्यागिनां सर्वकर्मफलत्यागिनामित्यर्थः ॥ त्यागित्वादेवेति ॥ कर्मफलस्येत्यनुषङ्गः ॥ तदपीति ॥ परार्थकाम्यकर्मस्वरूपत्यागिनमित्यर्थः ।

---

1. 'ननु पुरुषार्थभाक्त्वात् सन्यासिनां कथमिष्टस्याप्यभाव इत्यत आह' इति मुद्रितपुस्तके पाठान्तरमपि दृश्यते ।

संन्यासस्य विशेष इत्यत्यागिनां प्रतियोगित्वेन न्यासिन उक्ताः। त्यागित्वं तेषामपि ह्यस्ति।

'परेच्छयाऽपि ये काम्यं कर्म कुर्युर्न तु क्वचित्।
न्यासिनो नाम तेऽन्येभ्यः फलत्यागिभ्य उत्तमाः॥'

इति च॥ १२॥

'कथितं परमं साङ्ख्यं कपिलाख्येन विष्णुना।
सेश्वरं वैदिकं साक्षाज्ज्ञेयमन्यदवैदिकम्॥'

इति च॥ १३॥

अधिष्ठानं शरीरादि॥ १४-१६॥

न्यासिनां नास्तीत्येतावन्मात्रविशेषवत्त्वात् त्यागिभ्यो विशेषो न्यासिनामित्यर्थः। एतावानेव चेद्विशेषः तत् किं तयोः साम्यम्? येन त्यागिषु वक्तव्येषु न्यासिनामुक्तिरित्यत आह॥ त्यागित्वमिति॥ कर्मफलेच्छाभावो द्वयोरपि सम इत्यर्थः। त्यागिभ्यो न्यासिनामुक्त एव विशेष इत्येतत् कुत इत्यत आह॥ परेति॥ १२॥

कर्मण्यभिमानत्यागोऽपि संन्यास इति भावेन कर्मकारणान्युच्यन्ते—'पञ्च' इति। तत्र साङ्ख्यकृतान्तपदेन परमसाङ्ख्यसिद्धान्त एवोच्यते, न तु प्रसिद्धसाङ्ख्यमेव। अत्र दैवशब्देनेश्वरस्य गृहीतत्वात् परमसाङ्ख्यस्य च सेश्वरत्वात् प्रसिद्धसाङ्ख्यस्य निरीश्वरत्वात्, तथा परमसाङ्ख्यस्य वैदिकत्वेनात्रोपादानसम्भवात् अन्यस्यावैदिकत्वेन तदसम्भवादिति भावेन तयोः सेश्वरत्वादौ प्रमाणमाह॥ कथितमिति॥ १३॥

अधिष्ठानपदस्यात्र विवक्षितमर्थमाह॥ अधिष्ठानमिति॥ १४-१६॥

तथा च सन्यासिनामित्युक्त्या त्यागिनामित्येवोक्तं भवतीति भावः॥ कर्मण्यभिमानत्यागोऽपीति॥ न केवलं काम्यकर्मन्यासमात्रं संन्यास इत्यपिशब्दार्थः॥ तज्ज्ञानं स्तूयत इति॥ स्वात्मनोक्तकर्तृत्वज्ञानमित्यर्थः।

'स्वातन्त्र्यमीश्वरे वेत्ति नैवात्मनि कदाचन ।
ईश्वराधीनमेवात्मन् स्वातन्त्र्यं तु जडान् प्रति ॥
तारतम्येन लक्ष्म्यादेर्जीवान् प्रति च सर्वशः ।
यस्तदर्थं समुत्पन्नो यथा रुद्रो यथा यमः ।
हत्वाऽपि स इमान् लोकान् न हन्ति न निबद्ध्यते ॥
अज्ञस्तदर्थं जातोऽपि वध्यते[1] दैत्यवद् ध्रुवम् ।
अपरोक्षदृङ् न जातो यस्तदर्थं मुक्तिगं सुखम् ॥
ह्रसेत्तस्य परोक्षज्ञः किञ्चिद्दोषेण लिप्यते ॥'

इति च । अस्वातन्त्र्यज्ञानाद् हन्मीति भावोऽप्यस्य नास्तीति न

तज्ज्ञानं स्तूयते—'यस्य' इति। एतच्च सर्वानहङ्कारादिमतां सममित्यन्यथाप्रतीतिनिरासाय वचनान्तरेणैव व्याचष्टे ॥ स्वातन्त्र्यमिति ॥ आत्मन् आत्मनि । लक्ष्म्यादेश्च स्वातन्त्र्यं वेत्तीत्यनुषज्यते । तदर्थं लोकहननार्थम् । तदर्थं जातत्वेनैवालं, किमीश्वरस्वातन्त्र्यादिज्ञानेनेत्यत आह ॥ अज्ञ इति ॥ लोकान् हन्ति चेदिति शेषः । तर्हि ज्ञानेनैवालं, किं तदर्थं जातत्वेनेत्यतः परोक्षापरोक्षज्ञानिनोरपि तदर्थमजातयोर्लोकहनने विभागेन बाधकमाह ॥ अपरोक्षेति ॥ परोक्षज्ञस्तदर्थमजातो यदि लोकान् हन्ति तर्हि किञ्चिद्दोषेण लिप्यत इत्यर्थः । अपरोक्षेत्युक्त्या ज्ञानं चापरोक्षमपेक्षितमिति सूचितम् । परोक्षज्ञानेन तदर्थं जातत्वेनैवालं, किमपरोक्षज्ञानेनेत्यतो वाऽऽह ॥ परोक्षेति ॥ अत्र तदर्थं जात इति ग्राह्यम् । ननु सर्वेषामप्यस्वतन्त्रत्वेनाहन्तृत्वात् अस्यैव न हन्तीति किं विशिष्योच्यत इत्यत आह ॥ अस्वातन्त्र्येति ॥ भावोऽस्य नास्तीत्यन्यस्य भावोऽस्तीति हेतोर्न हन्तीति विशेषो युक्त इति योज्यम् । न हन्तीत्युच्यत इत्यतो न पौनरुक्त्यम् । ननु बुद्धेर-

---

मूले इत्यन्तेन न हन्तीत्यस्य हन्मीति भावं न करोतीत्यर्थमुपेत्य पौनरुक्त्यमाशङ्क्योच्यत इति शेषपूरणेन तन्निराह ॥ न हन्तीत्युच्यत इत्यत इति ॥

---

1. अ. बद्ध्यते।

हन्ति। अन्यस्य भावोऽस्तीति विशेषः। 'बुद्धिर्यस्य न लिप्यते' इति। रागान्न हन्ति, किन्तु धर्मबुद्ध्या।

'स्वातन्त्र्यं मन्यमानस्य रागाद्धर्मं च कुर्वतः।
तन्निमित्तस्तु दोषः स्याद् गुणश्च स्यात् स्वकर्मजः'[1] ॥

इति च ॥ १७ ॥

'सम्प्रेरयितुरीशस्य कर्मस्वखिलचेतनान्।
ज्ञातृज्ञेयज्ञानरूपा प्रेरणा सा स एव यत् ॥
स्वरूपेणैव नित्या सा विशेषात्मतया भवेत्।
विशेषोऽपि स्वरूपेण नित्यश्च स्याद्विशेषतः ॥

लोपो नाम स्वातन्त्र्याभिमानपरित्यागः। अतः पुनरुक्तिरित्यत आह ॥ बुद्धिरिति॥ भवेदेवं, 'यस्य नाहङ्कृतो भावो', 'बुद्धिर्यस्य न लिप्यते' इत्यनयोरर्थभेदो यदि स्वातन्त्र्याभिमानफलरागयोरुभयोरपि बन्धकत्वं स्यात्। तदेव कुत इत्यत आह ॥ स्वातन्त्र्यमिति ॥ १७ ॥

'दैवं चैव' इतीश्वरस्य कर्मसु प्रेरकत्वमुक्तम्। तत्प्रेरणास्वरूपं निरूप्यते—'ज्ञानम्' इति। तत्स्मृत्योपपादयति ॥ सम्प्रेरयितुरिति ॥ प्रेरणाया भगवद्धर्मत्वात् कथं ज्ञातृत्वादीत्यत आह ॥ सेति ॥ प्रेरणाया ज्ञानादिरूपभगवत्स्वरूपत्वेन तथात्वमुपपद्यत इत्यर्थः। प्रेरणायास्तदा तदा जायमानायाः कथं भगवत्स्वरूपत्वमित्यत आह ॥ स्वरूपेणेति ॥ न प्रेरणा तदा तदोत्पद्यते ॥ किन्तु भगवत्स्वरूपतया सर्वदा विद्यमानैव व्यक्तिरूपेण जायते। अतो भगवत्स्वरूपत्वमुपपन्नमिति भावः।

योऽयं प्रेरणाया व्यक्तिरूपो विशेषः सोऽपि नानित्य इति शङ्कनीयम्। तस्य नित्यप्रेरणारूपत्वेन सदा विद्यमानस्यैव विशेषतो

पुनरुक्तिरिति ॥ नाहंकृतो भाव इत्यनेनेति योज्यं तस्याङ्गीकृतत्वादिति ॥

1. अ. सुकर्मजः।

स्वनिर्वाहकता यस्मान्नानवस्था विशिष्टवत् ।
विशेष्यस्य विशिष्टस्याप्यभेदेऽप्यविवादिनि[1] ॥
विशेषोऽस्त्येव नात्रास्ति ह्यनवस्था कदाचन ।
ज्ञातुरन्योऽहमिति तु कस्याप्यनुभवो न हि ॥
अस्मि ज्ञातैवाहमिति भेदस्तस्मात्तयोः कुतः ।
पश्यामीति विशेषोऽयमिदानीं मे समुत्थितः ॥

जायमानत्वादित्याह ॥ विशेषोऽपीति ॥ एवं विशेषस्यापि विशेषस्तस्यापीत्यनवस्था स्यादित्यत आह ॥ स्वनिर्वाहकतेति ॥ भवेदनवस्था, यदि प्रेरणाया भिन्नो विशेषस्तस्यापि तथेत्यङ्गीक्रियते । न चैवम् । सा प्रेरणा स्वरूपमेव स्वात्मानं विशेषतया विशेषितया निर्वहति । स विशेषोऽप्येवमित्यङ्गीकारादित्यर्थः । एतद् दृष्टान्तेनोपपादयति ॥ विशिष्टवदिति ॥ तदेव विवृणोति ॥ विशेष्यस्येति ॥ अस्ति तावद् विशेष्यविशिष्टयोरविप्रतिपन्नोऽभेदः । धर्मधर्मिभेदवादिनाऽपि तस्याङ्गीकृतत्वात् । न च विशेष्यविशिष्टयोर्निर्विशेषाभेदः । तथासति ज्ञातृदेवदत्तशब्दयोः पर्यायतापातात् । न च विशेषोऽपि निर्विशेषः । तथात्वे विशेषविशेषिशब्दयोः पर्यायत्वापत्तेः । न चैवं विशेष्यस्यापि विशेषाङ्गीकारेणानवस्थाऽस्ति । विशेष्यवस्तुनस्तद्विशेषाणां च स्वनिर्वाहकत्वात् । एवं ईश्वरप्रेरणाया विशेषस्तस्यापि विशेष इत्यङ्गीकारे न कश्चिद्दोष इति भावः । भवेदेतद्विशेष्यविशिष्टयोरभेदसिद्धौ, स एव कुत इत्यत आह ॥ ज्ञातुरिति ॥ विशेष्यविशिष्टयोर्भेदानुभवाभावात् अभेदानुभवसद्भावाच्च न भेद इति भावः । विशेष्यविशिष्टयोरभेदेऽनु-

---

विशेष्यविशिष्टयोरभेदस्याङ्गीकृतत्वादित्यर्थः ॥ ज्ञाता देवदत्त इति[2] ॥ ज्ञातृत्वविशिष्ट इत्यर्थः । देवदत्त इति विशेष्योक्तिः । दार्ष्टांतिके योजयति ॥ एव-

---

1. अ. अभेदेऽपि विवादिनि । 2. 'ज्ञाता देवदत्तः इति शब्दयोः पर्यायतापातात्' इति टीकापाठः टिप्पण्या आदृत इति भाति ।

इत्याद्यनुभवाद्भेदो न विशेष्यविशिष्टयोः ।
विशेषणं तु द्विविधं विशेषाख्यं तथेतरत् ॥
विशेषमणयेद् येन प्रोक्तं तेन विशेषणम् ।
विशेषोऽपि विशेषस्य स्वस्यैव गमको भवेत् ॥'

इत्यादि तत्त्वविवेके। सङ्ग्रहः पञ्चकारणानां सङ्क्षेपः। अधिष्ठानस्य करणेऽन्तर्भावात्। दैवशब्दोदितेश्वरस्यैव मुख्यकर्तृत्वात् स्वतन्त्रास्वतन्त्रकर्त्रोः कर्तृशब्देनैवोक्तेस्त्रैविध्यम्। कर्म चेष्टा ॥ १८ ॥

भवान्तरं च दर्शयति ॥ पश्यामीति ॥ म इति विशेष्यमुच्यते । विशेषः समुत्थित इति तस्यैव विशिष्टत्वम् ।

विशेषणयुक्तं विशिष्टम् । तद्विशेषणं निरूपयति ॥ विशेषणमिति ॥ विशेषाख्यं यथा 'वस्तुनोऽस्तित्वं', 'फलस्य नीलत्वम्' इति । इतरदत्यन्तभिन्नं दण्डादि । तदुभयमपि विशेषणमिति कस्मादुच्यत इत्यत आह ॥ विशेषमिति ॥ अणयेत् गमयेत् । ननु दण्डादिविशेषणं वस्तुनि दण्डत्वादिविशेषं गमयति, विशेषः किं गमयेदित्यत आह ॥ विशेषेति ॥

पूर्वोक्तकर्मकारणानि सङ्क्षिप्यात्रोच्यन्ते- 'करणं' इति । तत्र कर्मसङ्ग्रहकथनं कोपयुज्यत इत्यतस्तदनूद्य मध्यमपदलोपिसमासोऽयमिति भावेन व्याचष्टे॥ सङ्ग्रह इति॥ कथमधिष्ठानादिपञ्चकस्य करणादित्रित्वमित्यत आह ॥ अधिष्ठानस्येति ॥ ननु पूर्वानुक्तकर्मणोऽत्र कथनात् कथं तेषामयं सङ्क्षेपः स्यादित्यत आह ॥ कर्मेति ॥ १८ ॥

सात्त्विकज्ञानादिसाधनानुष्ठानाय गुणभेदा उच्यन्ते—'ज्ञानम्' इति । तत्र, गुणाः सङ्ख्यायन्तेऽस्मिन्निति गुणसङ्ख्यानपदेन प्रसिद्ध-

---

मीश्वरेति ॥ अण पण गताविति धातोर्निरुक्तात्वादेव न दीर्घत्वं, किन्तु पररूपत्वमिति भावः ॥ सात्विकज्ञानादिसाधनेति ॥ सात्विकज्ञानकर्मादेः मोक्षसाधनत्वात्सात्विकज्ञानादिरूपमोक्षसाधनानुष्ठानाय गुणनिमित्तसात्विकज्ञानादि-

एवं[1] गुणसङ्ख्याने परमसाङ्ख्यशास्त्रे ॥ १९ ॥

'अस्तित्वाद् भूतनामभ्यः सर्वजीवेभ्य एव च ।
मुक्तेभ्योऽपि पृथक्त्वेन विष्णोः सर्वत्रगस्य च ।
ऐक्येन च स्वरूपाणां प्रादुर्भावादिकात्मनाम् ।
तारतम्येन जीवानां भेदेनैव परस्परम् ॥
जडेभ्यश्चैव जीवानां जडानां च परस्परम् ।
तेभ्यो विष्णोश्च सम्यक् तल्लक्षणज्ञानपूर्वकम् ॥
ज्ञानं सात्त्विकमुद्दिष्टं यत्साक्षान्मोक्षकारणम्' ॥ २० ॥

साङ्ख्यशास्त्रमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ एवमिति ॥ प्रसिद्ध-साङ्ख्यशास्त्रमेवात्र किं न स्यादित्यत एवमित्युक्तम् । एवं सर्वगत-स्येश्वरस्य सर्वतो भेदादिविषयं ज्ञानं सात्त्विकमित्यादि गुणसङ्ख्याने प्रोच्यत इति ह्यत्रोच्यते । तच्च परमसाङ्ख्यशास्त्रग्रहण एवोपपद्यते, न निरीश्वरसाङ्ख्यग्रहण इति भावः ॥ १९ ॥

तत्र प्रतिज्ञातं ज्ञानत्रैविध्यमुच्यते— 'सर्व' इति । तत्प्रतीत्यादि-निरासाय स्मृत्यैव व्याचष्टे ॥ अस्तित्वादिति ॥ पृथक्त्वेनेत्यन्तेन सर्वभूतेष्विति सप्तम्या अभिप्रायोऽप्युक्तो भवति । विष्णोरित्यादिना अविभक्तमित्युक्तार्थं भवति । तारतम्येनेत्यनेन विभक्तेष्विति द्वेधा व्याख्यातं भवति । अथ भूतशब्देन भवतीति जडं चोच्यत इत्यभिप्रेत्य विभक्तेष्वित्यस्यार्थ उच्यते ॥ जडेभ्य इति ॥ तेभ्यो जडेभ्य इत्यनेन सप्तम्यर्थ उक्तो भवति ॥ सम्यगिति ॥ विष्णुः सर्वोत्तमः, जीवास्तद्-

---

भेदा उच्यन्त इत्यर्थः । एवमित्यनुवादः । सर्वगतस्येति व्याख्या ॥ सप्तम्या अभिप्राय इति ॥ आधारत्वस्य भेदनिबन्धनत्वात्तेन पृथक्त्वं लब्धमिति भावः ॥ भवतीति जडं चोच्यत इति ॥ भू सत्तायामिति धातोः प्रकृत्यादि-

1. अ. एवमिति नास्ति ।

'विष्णोरन्यस्य याथार्थ्यज्ञानं राजसमुच्यते ।
यदि विष्णुं न जानाति यदि वा मिश्रतत्त्ववित् ॥
अन्यथाकरणीयत्वात् कार्याख्यं जीवमेव यः ।
अकार्यं ब्रह्म जानाति स एवाखिलमित्यपि ॥
एकजीवपरिज्ञानात् कृत्स्नज्ञोऽस्मीति मन्यते ।
युक्तिविज्ञानराहित्यात्[1] स्वपक्षस्याप्ययुक्तितः[2] ।
अयुक्ततामेव गुणं मन्यते चाल्पदर्शनः ।
अतत्त्वार्थं जगद् ब्रूते तत्त्वार्थज्ञानवर्जनात् ॥

धीनज्ञानादिमन्तः, जडं तद्रहितमित्यतो विष्णवादीनां भेद इत्यर्थः। अनेनैकमित्युक्ताभिप्रायं भवति ॥ २० ॥

विष्णोरित्यनेन पृथक्त्वेनेत्युक्ततात्पर्यं भवति । सात्त्विकज्ञानस्यापि विष्णोरन्यत्र यथार्थत्वेनोक्तत्वात् कथं राजसत्वमस्य स्यादित्यत आह ॥ यदीति ॥ मिश्रतत्त्ववित् सन्दिग्धतया भगवत्स्वरूपं जानन्नित्यर्थः । अन्यथेत्यनेन वस्त्वित्युक्तार्थं भवति । यत्किञ्चिदेकं कृत्स्नं जानातीति चादौ द्रष्टव्यम् । जानातीत्यन्तेन कार्ये कृत्स्नवत् सक्तमित्यस्य तात्पर्यमुक्तं भवति । कृत्स्नमकार्यत्वादिगुणपूर्णं ब्रह्म यथा विषयीकरोति ब्रह्मेति तथेत्यर्थः । स एवेत्यनेन कार्ये कृत्स्नवत् सक्तमित्यस्य कृत्स्नपदमखिलजगद्विषयमङ्गीकृत्य अर्थान्तरमुक्तं भवति। एकेत्यनेन एकस्मिन् कार्ये कृत्स्नवत्सक्तमित्युक्ततात्पर्यं भवति । युक्तीत्यनेनाहैतुकमित्यस्य तात्पर्यमुक्तं भवति। स्वस्य युक्तिज्ञानाभावात् तज्ज्ञेयार्थस्य युक्तिराहित्याच्च तथा मन्यत इत्यर्थः । अल्पेत्यनेनाल्प-

---

जडस्यापि सद्रूपत्वाद् भूतपदेन ग्रहणमित्यर्थः ॥ उक्तत्वादिति ॥ पूर्वश्लोके

---

1. अ. युक्तिभिर्ज्ञानराहित्यात् ।
2. अ. स्वपक्षस्याल्पयुक्तितः ।

स मुख्यतामसज्ञानी ह्येकैकेनापि किं पुनः ॥
सर्वैरेतैर्विशेषैश्च युक्तः पापतमाधिकः ॥'

इति पाद्मे ।

'पृथक्त्वेन तु यज्ज्ञानं' इत्यस्य व्याख्या 'नानाभावान्' इत्यादि । सर्वगतमेकमीश्वरं न जानातीत्येतावतैव राजसत्वम् । एकस्य

मित्युक्तार्थं भवति । अल्पसम्यग्ज्ञान इत्यर्थः । भ्रान्तस्याप्यधिष्ठानादि विषयसम्यग्ज्ञानवत्त्वात् । अतत्त्वार्थमित्यनेनातत्त्वार्थवदित्युक्तार्थं भवति । यथावस्थिताकाराद् विपरीताकारमित्यर्थः । तत्त्वार्थज्ञान-वर्जनादिति ॥ यथास्थिताकारज्ञानाभावादित्यर्थः ।

ननु सर्वेषु भूतेषु पृथक्त्वेन यज्ज्ञानमित्येतदेव नानाभावान् पृथग्विधानित्युच्यते । अतः पुनरुक्तिदोष इत्यत आह ॥ पृथक्त्वेनेति ॥ व्याख्यानव्याख्येयभावात् न पुनरुक्तिदोष इति भावः । ननु सर्वेषु भूतेषु पृथक्त्वज्ञानविषयस्य सात्त्विकत्वेनोक्तत्वात् कथं राजसत्वम-प्रोच्यत इत्यत आह ॥ सर्वेति ॥ न केवलं सर्वेषु भूतेषु पृथक्त्वविषयं सात्त्विकज्ञानमुक्तम् । किन्तु तद्गतेश्वरमपृथक्त्वेन सर्वोत्तमत्वेन च विषयीकुर्वत् । तदभावाद्भूतेषु पृथक्त्वविषयत्वेऽप्यस्य राजसत्वं युक्तमिति भावः । अनेन यदीति स्मृतिर्विवृता भवति ।

'यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तं ज्ञानं तदहैतुकं, अतत्त्वार्थ-वदल्पसज्ज्ञानयुक्तम्' इति नियतमेवातः तदुक्तौ पुनरुक्तिरित्यत उक्तं विवृण्वन्नाह ॥ एकस्येति ॥ यस्य कस्यचिदेकस्य नास्तीत्यन्तमुक्तार्थ-विवरणम् । न पूर्वोक्तस्यैवाहैतुकत्वादिविशेषणानि विधीयन्ते, येन पुनरुक्तिः स्यात् । किन्त्वहैतुकत्वादीनां स्वयमेव तामसानामुक्त-

---

विभक्तेष्वित्यादिनेति भावः ॥ अनेन यदीति स्मृतिर्विवृतेति ॥ सर्व(गतं)गत्व-मित्याद्यंशेन विवृतेत्यर्थः । एकस्येत्यस्यार्थमाह ॥ यस्य कस्यचिदेकस्येति ॥

कृत्स्नवज्ज्ञानमेव तामसम् । मुक्तत्वादिरूपेण अन्यथा[1] करणीयत्वात् पराधीनत्वेनाल्पस्य जीवस्य स्वातन्त्र्यादिगुणपूर्णत्वात् कृत्स्नेन ब्रह्मणैक्यज्ञानं च महातामसम् । किं पुनस्तावन्मात्रं सर्वमिति ज्ञानम् । किं पुनस्तत्राप्येकजीवादन्यत् किमपि नास्तीति । अहैतुकं ज्ञानं सर्वमपि तामसम् । किमु तदेवोक्तलक्षणम् । अतत्त्वार्थवत् सदसद्वैलक्षण्याद्यन्यथार्थकल्पनायुक्तमेव तामसम् । किमु तदेवोक्तविशेषणैर्युक्तम् । प्रायोऽल्पज्ञानमपि तामसम् । अज्ञानबहुलत्वात् । किमु तदेवोक्तमिथ्याज्ञानबहुलमित्यपुनरुक्तिः । एकस्मिन् सर्वज्ञानं[2] कार्ये जीवे पूर्णब्रह्मेति सक्तं ज्ञानं निर्युक्तिकं चातत्त्वार्थकल्पनायुक्तमल्पज्ञानं च पृथक् पृथक्[3] तामसानीति वा[4] । मायावादे त्वेतानि समस्तानि । अन्यत्रापि त्वहैतुकत्वादिकं विरुद्धवादिषु समं सर्वेषु ॥ २१-२२ ॥

'मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा' इत्युक्त[5]त्वात्, 'ये मे मतम्', 'ये त्वेतत्' इति च तस्य मोक्षसाधनस्याकरणे[6]

विशेषणयोगितया अतितामसत्वज्ञापनाय उक्तविशेषणान्युच्यन्त इति भावः । सदसद्वैलक्षण्याद्यविद्यमानाकारकल्पनायुक्तमित्यर्थः । एवमेषां पदानां सामानाधिकरण्यमङ्गीकृत्यैव पुनरुक्तिं परिहृत्यानेकाधिकरण तथाऽपि तां परिहरति ॥ एकस्मिन्निति ॥ कार्ये सर्वं जगदिति, सक्तमेकस्मिन् कार्ये सर्वं जगदिति चैतानि पदानि योज्यानीति वा न पुनरुक्तिरिति सम्बद्ध्यते । नन्वेवंविधज्ञानस्य क्वाप्यभावात् तस्य तामसत्वकथनं कथमित्यत आह ॥ मायेति ॥ २१-२२ ॥

गुणभेदेन कर्मत्रैविध्यमुच्यते—'नियतं' इति । तत्र नियतपदेन

भिन्नाधिकरणतयेति । भिन्नाभिन्नविषयतयेत्यर्थः ॥ विधायेति ॥ तृतीयाध्याये

---

1. अ. अन्यथा इति नास्ति । 2. अ. सर्ववज्ज्ञानम् । 3. अ. पृथगपि ।
4. अ. च । 5. अ. इत्युक्त्वा । 6. मोक्षसाधनत्वस्य ।

प्रत्यवायस्य चोक्तिर्भगवदर्पितत्वेन सर्वकर्मकरणं तस्य विष्णोः सर्व-परमत्वज्ञानं च नियतमेवेति ज्ञायते । 'अध्यात्मचेतसा' इत्युक्तत्वात् तत्स्वरूपयाथार्थ्यज्ञानादि । 'ये तु सर्वाणि कर्माणि' इत्येतस्मिन् श्लोकेऽध्यात्मचेतस्त्वस्य 'मत्पराः अनन्येनैव योगेन मां ध्यायन्तः'

स्ववर्णाश्रमोचितमात्रमुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ मयीति ॥ विष्णोः सर्वोत्तमत्वज्ञानपूर्वकं तद्भक्त्या तदर्पणबुद्ध्या क्रियमाणमेव कर्म नियतमित्यत्रोच्यते । न तु स्ववर्णाश्रमोचितत्वमात्रम् । कुतः ? 'मयि सर्वाणि कर्माणि' इति भगवत्सर्वोत्तमत्वज्ञानपूर्वकं तदर्पणबुद्ध्या कर्मकरणं विधाय 'ये मे मतमिदम्' इति तस्य मोक्षसाधनत्वोक्तेः । 'ये त्वेतत्' इति तदकरणे प्रत्यवायस्य चोक्तेः । यत्करणे फलप्राप्तिः, यदकरणे प्रत्यवायः तस्यैव नियतत्वादिति भावः ।

भवतु भगवदर्पणबुद्ध्या क्रियमाणं कर्म नियतम् । तस्य भगवत्सर्वोत्तमत्वज्ञानादिपूर्वकत्वं कुतः ? 'मयि सर्वाणि कर्माणि' इत्यत्र तदनुक्तेरित्यत आह ॥ अध्यात्मेति ॥ सर्वाधिके परमात्मनि चेतः अध्यात्मचेतः । अपेक्षिततया ज्ञायत इति सम्बध्यते । भवेदेतत्, यद्यध्यात्मचेतसेति पदं भगवत्सर्वोत्तमत्वज्ञानार्थं स्यात् । तदेव कुत इत्यत आह ॥ ये त्विति ॥ 'मयि सर्वाणि' इति श्लोकार्थानुवादरूपे 'ये तु सर्वाणि' इत्यस्मिन् श्लोकेऽध्यात्मचेतसेति पदस्य 'मत्पराः' इत्यादिना भगवत्सर्वोत्तमत्वज्ञानतत्स्मरणाद्यर्थतया व्याख्यातत्वात् भवेदेवैतत्पदं तदर्थमिति भावः । अहं परः सर्वोत्तमो येषां ते मत्पराः । न च वाच्यमेतच्छ्लोकस्य तच्छ्लोकानुवादरूपत्वं कुत इति । 'एवं सततयुक्ता ये' इत्यर्जुनेन प्रागुक्तप्रकारानुवादेन पृष्टस्य भगवतस्तथैव परिहारोक्तेर्युक्तत्वात् । समाख्यावशाच्च एतच्छ्लोकार्थानुवादित्वं

इति योज्यम् । स्वरूपयाथार्थ्यज्ञानादित्यत्र काङ्क्षितं पूरयति ॥ अपेक्षिततया ज्ञायत इति सम्बध्यत इति ॥ तदर्थलाभप्रकारमाह ॥ अहं परः सर्वोत्तम

इति व्याख्यातत्वात् । एवं सर्वमपि भगवद्भक्तियुक्तमेव सात्त्विकम् ॥ २३-२५ ॥

सर्वस्य भगवदधीनत्वनिश्चयादेवानहंवादी ॥ २६-२७ ॥

'भगवद्भक्तिसामर्थ्यात् प्रकृष्टो न कृतो हि यः ।
स प्राकृतो दीर्घसूत्री कुर्यां पश्चादिति स्मरन् ॥'

इति शब्दतत्त्वे । प्राप्तकालस्य कर्मणो दीर्घकालेनैव कृतिं सूचयन् दीर्घसूत्रीत्यर्थः ।

विज्ञायते । किमेतन्नियतत्वं कर्मण एव सात्त्विकत्वे प्रयोजकमुत ज्ञानादीनामपीत्यत आह ॥ एवमिति ॥ भगवदर्पणादिकं चात्र द्रष्टव्यम् ॥ २३-२५ ॥

गुणभेदतः कर्तुस्त्रैविध्यमुच्यते — 'मुक्त' इति । तत्र कर्ता चेदनहंवादीति कथमित्यत आह ॥ सर्वस्येति ॥ कर्ताऽप्यहमेव कर्तेति सात्त्विको न वदति । तेन स्वकर्तृत्वादेः सर्वस्य भगवदधीनतया निश्चितत्वादित्यर्थः ॥ २६-२७ ॥

ननु सात्त्विकस्यापि प्राकृतत्वदीर्घसूत्रित्वयोः सद्भावात् कथं तत्तामसस्यैवोच्यत इत्यतः तत्पदद्वयस्यार्थं स्मृत्यैव दर्शयति ॥ भगवद्भिति ॥ स्मरन्निति । चिन्तयन्नित्यर्थः । पश्चात् कुर्यामिति चिन्तनं सात्त्विकेऽपि सममित्यत आह ॥ प्राप्तेति ॥ यस्य कर्मणो यः कालो विहितः तस्मिन् काले प्राप्तेऽपि पश्चात् कुर्यामिति चिन्तयन् दीर्घसूत्रीत्यर्थः । अनेन अलसादप्यस्य वैलक्षण्यं सूचितम् । सः प्राप्तकालं कर्म उदास्त एवेति । नन्वेवं चेद्दीर्घसूत्रितः स्तब्धादीनां

इत्यादिना ॥ कर्तापीति ॥ कार्यानुकूलकृतिमानपीत्यर्थः ॥ धृतिश्चेद् व्यभिचारशून्यैवेति ॥ स्खलनशून्यैवेत्यर्थः । कर्मैषामधिकं यत इत्यत्र स्थायिकपदमनूद्य

'अलसो दीर्घसूत्री च सत्त्वयुक् तामसो मतः ।
अयुक्तो राजसः स्तब्धः प्राकृतो नैकृतिकः[1] शठः ॥
एकैकेनेव दोषेण प्रोक्तस्तामसतामसः ।
दुर्नरत्वं च तिर्यक्त्वं तमश्चैतत् फलं क्रमात् ॥'

इति च ॥ २८-३० ॥

'किञ्चिद् यथावद् धर्मादीनयथावच्च पश्यति ।
यया बुद्ध्या राजसी सा मिथ्यादृक् त्वेव तामसी ॥'

इति च ॥ ३१-३२ ॥

'वैष्णवो भक्तियोगो यस्तद्युक्ता सात्त्विकी धृतिः ।' इति च । विहितविषयैवेत्यव्यभिचारिणी ॥ ३३-३४ ॥

उत्कृष्टत्वात् कथं तामसतया गणनमित्यतः प्रमाणवाक्येनैव तामसेष्वेव तान् विभज्याह ॥ अलस इति ॥ अयुक्तो भगवदर्पणादियोगरहितः । स्तब्धो नाम आत्मसम्भावनया क्वाप्यनतः । नैकृतिको नीचकर्मा । शठो गूढद्वेषी । त्रिविधतामसानां फलमाह ॥ दुर्नरत्वमिति ॥ २८-३० ॥

'बुद्धेः' इति प्रतिज्ञातमुच्यते—'प्रवृत्तिं' इति । तत्र 'यया धर्ममधर्मं' इत्युक्तबुद्ध्योरेकप्रकारत्वात् कथं राजसतामसत्वमित्यतः तद्विभागं वाक्यान्तरेण दर्शयति ॥ किञ्चिदिति ॥ अनेन 'अयथावत्' इति नियमेन यथावच्चेत्युक्तं भवति। 'योगेन' इति उपायबलेनेत्यल्पार्थ-प्रतीतिनिरासाय तद् वाक्यान्तरेण व्याचष्टे ॥ वैष्णव इति ॥ अनेन योगेन युक्तयेति पूरितं भवति। धृतिश्चेद् व्यभिचारशून्यैवातोऽव्यभि-चारिण्येति विशिष्यास्या एव किमुच्यत इत्यत आह ॥ विहितेति ॥ न चात्राव्यभिचारित्वमस्खलितत्वमिति भावः । यया स्वप्नमित्युक्तमात्रं यया न मुञ्चति सा तामसीति प्रतीतिनिरासायाह ॥ स्वप्नमिति ॥ सर्वनिषिद्धं भगवद्द्वेषादि । भगवद्द्वेषादेः वृद्धनिषिद्धत्वेन तामसत्वात्

1. अ. निकृतिः ।

'स्वप्नं भयम्' इत्यादि सर्वनिषिद्धोपलक्षणम् ।

'तत्तत् सात्त्विकमेव स्याद् यद्यद्वृद्धाः प्रचक्षते ।
निन्दन्ति तामसं तत्तद् राजसं तदुपेक्षितम् ॥'

इति भागवते[1] । 'महात्मानस्तु मां पार्थ', 'अभयं सत्त्वसंशुद्धिः' इत्यादिना वृद्धाश्चोक्ताः ॥ ३५-३६ ॥

विष्णोः प्रसादात् स्वमनःप्रसादात् सात्त्विकं सुखम्' इति पाद्मे ॥ ३७-३९ ॥

सत्त्वं जीवजातम् । मुक्तानां गुणातीतत्वात् । पृथिव्यां दिवि देवेषु[2] च' इति विशेषः ।

तद्विषयधृतेरपि तामसत्वमिति भावः । वृद्धनिषिद्धत्वेऽपि कुतस्तामसत्वमित्यत आह ॥ तदिति ॥ ननु भगवद्द्वेषादेः कैश्चन वृद्धैर्विहितत्वात् कथं तन्निन्दितत्वमित्यत आह ॥ महात्मान इति ॥ ये भगवद्द्वेषादिविधायका न ते वृद्धाः, किन्तु भगवन्तं भजन्त एव । तथोक्तत्वादित्यर्थः ॥ ३५-३६ ॥

'सुखं' इति प्रतिज्ञातमुच्यते— 'अभ्यासात्' इति । तत्र 'आत्मबुद्धिप्रसादजं' इत्यस्य स्वमनःप्रसादजमित्यन्यथाप्रतीतिनिरासाय स्मृत्यैवार्थमाह ॥ विष्णोरिति ॥ जातमिति शेषः । मनःप्रसादो नाम मनसः स्वतोऽपि प्रायो विषयागतिः ॥ ३७-३९ ॥

सर्वजीवानामपि गुणतस्त्रैविध्यमुच्यते—'न तत्' इति । तत्र सत्त्वस्यापि गुणविशेषत्वात् कथं गुणबद्धत्वमुच्यत इत्यत आह ॥ सत्त्वमिति ॥ ननु गुणातीतं सत्त्वं नास्तीत्येतावता पूर्णत्वात् पृथिव्यां दिवीति विशेषोक्तिः किमर्थेत्यत आह ॥ मुक्तानामिति ॥ मुक्तानां गुणबद्धत्वाभावात् गुणातीतं सत्त्वं नास्तीत्युक्ते तेषामपि तत्प्रसक्तेस्तद्व्यावृत्त्यर्थं पृथिव्यामित्यादिविशेषोक्तिर्युक्तेत्यर्थः ।

1. अ. इति हि भागवते ।　　2. अ. पृथिव्यां देवेषु वा ।

'यथेष्टं सञ्चरन्तोऽपि मुक्ता भूम्यादिगा न तु ।
ग्रामस्था अपि न ग्राम्या वैलक्षण्याद्धि सज्जनाः ॥

नराधमास्तामसेषु सात्त्विकास्तत्र राजसाः[1] ।
दैत्यभृत्या महादैत्या मुख्यतामसतामसाः ॥

राजसास्तु नरास्तत्र विप्रा राजससात्त्विकाः ।
तत्रस्थशुद्धसत्त्वास्तु परहंसाः प्रकीर्तिताः ॥

हंसो बहूदः कुटिजो[2] वनस्थो नैष्ठिको गृही ।
क्रमाद् रजोऽधिका बाह्यं कर्मैषामधिकं यतः ॥

'इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्' इत्यादेः मुक्तानामपि पृथिव्यादौ सञ्चरणात् कथमनेन तद्व्यावृत्तिरित्याशङ्कां परिहरन् वाक्यान्तरेण जीवानुगुणभेदतो बहुधा विभज्य दर्शयति ॥ यथेष्टमिति ॥ तद्गतदोषसम्बन्धाभावादिति शेषः । अतो भूम्यादिस्था एव गुणबद्धा इत्युक्ते तद्व्यावृत्तिः सिद्ध्यतीति चात्र द्रष्टव्यम् । अमुक्ताः कथं गुणबद्धा इत्यतस्तद्विभज्याह ॥ नरेति ॥ सात्त्विकराजसतामसास्त्रिविधा जीवाः । तेषु तामसाः त्रिविधाः । त उच्यन्ते—'नराधमाः' इति । तत्र तामसेषु तामसभेदमुक्त्वा राजसान् सामान्येनाह ॥ राजसा इति ॥ नरा उत्तमा मध्यमा अधमाश्चेति । तेऽपि त्रिविधाः । तत्र भागवता विप्रादिपुल्कसान्ताः राजससात्त्विकाः । वर्णभेदेन तेष्वप्यनेकविधतामाह ॥ तत्रेति ॥ तेषु राजससात्त्विकेष्वपि विप्रा राजससात्त्विकसात्त्विका इत्यर्थः । राजससात्त्विकसात्त्विकेषु विप्रेष्वप्याश्रमभेदेन अनेकविधतामाह ॥ तत्रस्थेति ॥ राजससात्त्विकसात्त्विकेषु शुद्धसात्त्विका इत्यर्थः । परमहंसाः शिखायज्ञोपवीतहीनाः एकदण्डिनः । यज्ञोपवीतवान् एकदण्डी शिखारहितो हंसः । त्रिदण्डी शिखायज्ञोपवीतवान् ग्रामैकरात्रिः बहूदः । त्रिदण्डी शिखायज्ञोपवीत-

---

1. अ. रजसि सात्त्विकाः । 2. अ. कुटिको ।

धर्माः परमहंसानां बाह्या एव शमादिकाः ।
देवादेः कर्मबाहुल्यं न लिङ्गं रजसः क्वचित् ॥
न हि विष्णोश्चलेत्तेषां मनः कर्मकृतावपि ।
अन्येषां चलचित्तत्वात् प्रायः स्यात् कर्म राजसम् ॥
यदि तत् स्मारकं विष्णोर्विद्यात् सात्त्विकमेव तु[1] ।
धर्मार्थहिंसनाऽग्निश्च विशेषो ब्रह्मचारिणः ।
पैतृकं चापि यतितो दारास्तु गृहिणस्ततः ॥

वान् यावज्जीवं पुत्रदत्ताशादः कुटीचकः । अधिकं क्रमादिति सम्बद्ध्यते । तत् परमहंसानामपि समं किमित्यत आह ॥ धर्मा इति । शमो दम इत्यादौ ब्राह्मकर्मतयोक्ता इत्यर्थः । कर्मबाहुल्याद् हंसादीनां राजसत्वे देवादीनामपि तद्भावाद् राजसत्वं स्यादित्यत आह ॥ देवादेरिति ॥ कुतो नेत्यत आह ॥ न हीति ॥ कर्मणि मनश्चलतु मा वा, तथाप्यस्ति तावद् बहुलं कर्म । अतो हंसादिवद्राजसत्वमेव देवादेरित्यत आह ॥ अन्येषामिति ॥ न हंसादिष्वपि कर्म स्वरूपत एव रजोऽनुमापकम् । किन्तु चित्तचलनहेतुत्वेनैव । देवादिकर्मणस्तु तदभावान्न राजसत्वे लिङ्गत्वमिति भावः । कर्मणः स्वरूपत एव रजोऽनुमापकत्वं किं न स्यादित्यत आह ॥ यदीति ॥ भगवत्स्मरणहेतुकर्मणः सत्त्वानुमापकत्वदर्शनान्न कर्म स्वरूपत एव राजसत्वानुमापकमिति भावः । अत एव प्रायः स्यादित्युक्तम् ।

परमहंसादर्वाग् गृहस्थान्तानां यत् क्रमेण कर्मबाहुल्यमुक्तं तल्लेशतो विभज्य दर्शयति ॥ धर्मेति ॥ हंसादिषु कर्मबाहुल्यक्रमोऽन्यतो द्रष्टव्यः । चतुर्विधयतितो ब्रह्मचारिणः समिदादिच्छेदनमग्निपूजा

काङ्क्षितं पूरयति ॥ अधिकं क्रमादिति सम्बध्यत इति ॥ तदिति ॥ कर्माधिक्यमित्यर्थः ॥ इत्यादाविति ॥ अत्रैवोत्तरश्लोक इत्यर्थः ॥ गृहस्थान्ता-

1. अ. तत् ।

असर्गो ग्राम्यसन्त्यागः पश्वहिंसा गृहस्थतः ।
वनस्थस्य विशेषोऽयं सर्वेषामितरत् समम् ॥' इति च ।

'सात्त्विकाः स्वल्परजसः क्षत्रियाः सत्त्वराजसाः ।
वैश्याः शूद्रा अतिस्वल्पसत्त्वाधिक्येन तामसाः ॥

ये तु भागवता वर्णास्तेषां भेदोऽयमीरितः ।
सत्त्वाधिकः पुल्कसोऽपि यस्तु भागवतः सदा ॥

त्रैविद्यमात्रा विष्णोर्ये सर्वाधिक्ये ससंशयाः ।
अन्याधिक्यं न मन्यन्ते श्रीशाद् राजसराजसाः ॥

श्राद्धकरणमिति विशेषः । ब्रह्मचारितो गृहस्थस्य दारसङ्ग्रहो विशेषः । अपत्यानुत्पादनं, ग्रामभववस्तुसेवाभावः, पश्वहिंसेति गृहस्थाद् वनस्थस्य विशेष इत्यर्थः । ग्राम्यसंत्यागोक्त्या वनस्थस्य ब्रह्मचारितोऽपि कर्माल्पत्वमुक्तं भवति । इतरत् स्वोचितं यज्ञादि ।

राजससात्त्विकेषु भागवतेषु वर्णभेदेनानेकप्रकारेषु विप्रस्वरूपमुक्तम् । क्षत्रियादिस्वरूपं राजसराजसादिस्वरूपं च वाक्यान्तरेण दर्शयति ॥ सात्त्विका इति ॥ राजससात्त्विकेष्विति द्रष्टव्यम् । सत्त्वराजसा इति ॥ समसत्त्वराजसा इत्यर्थः । अतिस्वल्पसत्त्वाधिक्येनेति ॥ तमसोऽप्यतिस्वल्पतया सत्त्वमधिकं यथा तथैवेत्यर्थः । क्षत्रियादिमात्रस्यैवं स्थितिः किमित्यत आह ॥ य इति ॥ वर्णबाह्या भागवताश्चेत् किमित्यत आह ॥ सत्त्वेति ॥ यः पुल्कसोऽपि भागवतोऽसौ राजसेष्वपि सत्त्वाधिक इत्यर्थः । राजससात्त्विकानुक्त्वा राजसराजसादीनाह ॥ त्रैविद्येति ॥ कालतो भागवतान् जायमानान् व्यवच्छिनत्ति ॥ त्रैविद्य-

---

नामिति ॥ नैष्ठिको गृहीत्युक्तगृहस्थान्तानामित्यर्थः । असर्ग इत्यादेरर्थः अपत्यानुत्पादनमित्यादि ॥ त्रिप्रादिस्वरूपमुक्तमिति ॥ विप्रा राजससात्त्विका इत्यादिनेति भावः ॥ इति गमयितव्यमिति ॥ अन्यथान्याधिक्यमित्याद्युत्तर-

अज्ञा विष्णौ द्वेषहीनाः सर्वे राजसतामसाः ।
पितृगन्धर्वपूर्वाश्च मुनयो देवता इति ॥
सात्त्विकास्त्रिविधास्तत्र श्रेष्ठा एवोत्तरोत्तराः ।
देवा इन्द्रो विरिञ्चाद्या इति त्रेधैव देवताः ॥
क्रमोत्तराः शिवो वाणी ब्रह्मा चैवोत्तरोत्तराः ।
सत्त्वसत्त्वमहासत्त्वसूक्ष्मसत्त्वश्चतुर्मुखः ।
तस्माद् यावद् विमुक्तिः स्यान्मुक्तावेवं सुखक्रमः ॥

इति च ।

मात्रा इति ॥ सर्वाधिक्य इति ॥ सर्वप्रकारेणाधिक्ये इति गमयितव्यम् । सात्त्विकप्रभेदमाह ॥ पितृगन्धर्वेति ॥ श्रेष्ठा एवेत्यनेन पितृगन्धर्वपूर्वकाः सात्त्विकतामसाः, मुनयः सात्त्विकराजसाः, देवा सात्त्विकसात्त्विका इत्युच्यन्ते ।

देवान् विभज्याह ॥ देवा इति ॥ क्रमोत्तरा इति ॥ सात्त्विकसात्त्विकेषु बृहस्पत्यादयस्तामसाः, इन्द्रो राजसो, ब्रह्मादिरुद्रावसानाः सात्त्विका इत्युच्यन्ते । विरिञ्चादीन् विभज्याह ॥ शिव इति ॥ उत्तरोत्तरा इति ॥ सात्त्विकसात्त्विकेषु रुद्रस्य तामसत्वं, सरस्वत्या राजसत्वं, ब्रह्मणः सात्त्विकत्वमुक्तं भवति । एवं चेद्विरिञ्चः किमुच्यत इत्यत आह ॥ सत्त्वेति ॥ तस्मादुक्तरीत्या गुणनिबन्धनमेव तेषां तारतम्यं कियत्पर्यन्तमित्यत आह ॥ यावदिति ॥ तत्र गुणाभावात् साम्यं किमित्यत आह ॥ मुक्ताविति ॥ गुणाभावेऽप्युक्तप्रकारावसितसुखक्रमेणैव तारतम्योपपत्तिरिति भावः ।

वाक्यविरोधादिति भावः ॥ गुणाभावादिति ॥ सत्त्वादिगुणाभावादित्यर्थः ॥ उक्तप्रकारेति ॥ श्रेष्ठा एवोत्तरोत्तरा इत्यादावुक्तप्रकारावसितेत्यर्थः ॥

विष्णौ किञ्चित्प्रीति[1]युक्तास्तामसमध्ये सात्त्विका नराधमा इत्यर्थः। राजसानां मध्ये सात्त्विका एव भागवता[2] विप्रादयः। राजसस्थसात्त्विकेष्वेव शुद्धसात्त्विकाः किञ्चिद्रजोयुक्तसात्त्विकाः समरजोयुक्तसात्त्विकाः सत्त्वात् किञ्चिदूनतमोयुक्तसात्त्विका इति वर्णभेदः। सत्त्वप्रधानत्वादेतानारभ्यो[3]त्तरोत्तरं सर्वेऽपि मोक्षयोग्याः। 'सत्त्वात् सञ्जायते ज्ञानम्' इत्यादेः।

"नराधमास्तामसेषु सात्त्विकाः" इत्युक्तम्। ते कीदृशा इत्यतस्तद्विवृणोति॥ विष्णाविति॥ "राजसास्तु नरास्तत्र विप्रा राजससात्त्विकाः" इत्युक्तम्। तत्र 'ये तु भागवता वर्णाः' इति वचनान्तरबलेन राजससात्त्विकानां भागवतत्वं ग्राह्यमिति सूचयन् भागवतविप्राणां राजससात्त्विकत्वमेवेत्यन्यथाप्रतीतिनिरासाय अनुक्तं पूरयति॥ राजसानामिति॥ राजससात्त्विकेषु वाक्यद्वयेनोक्तं वर्णभेदं बुद्ध्यारोहार्थमेकीकृत्य दर्शयति॥ राजसस्थेति॥ अनेन 'विप्रा राजससात्त्विकाः' इत्यादि प्रागुक्तरीत्या विवृतं भवति। राजससात्त्विका न साधारणविप्रादयः। अपि तु भागवता एवेति वाक्यान्तरानुसारेणोक्तं हेत्वन्तरं चाह॥ सत्त्वेति॥ राजससात्त्विकानारभ्य हिरण्यगर्भावसानाः सर्वेऽपि हि मोक्षयोग्याः। गुणान्तरापेक्षया येषु सत्त्वाधिक्यान्मोक्षयोग्यता च भागवतानामेव। अतो राजससात्त्विकादयः सर्वेऽपि भागवता एवेति भावः। सत्त्वप्रधानत्वेऽपि कुतो मोक्षयोग्यतेत्यत आह॥ सत्त्वादिति॥ 'रजस्तमश्चाभिभूय सत्त्वं भवति' इत्यधिक-

---

इत्युच्यन्त इति॥ नराधमास्तामसेषु सात्त्विका इति पूर्वोक्तस्मृताविवत्यर्थः॥ वाक्यद्वयेनोक्तमिति॥ 'राजसास्तु नरास्तत्रेति' 'ये तु भागवता इति च' वाक्यद्वयेनेत्यर्थः॥ प्रागुक्तरीत्येति॥ शुद्धसत्त्वास्तु परमहंसा इत्यादिनोक्तरीत्येत्यर्थः॥ वाक्यान्तरेति॥ (येतु) भागवतेति वाक्यान्तरेत्यर्थः॥ स्वफल-

---

1. अ. किञ्चिदप्रीति। 2. अ. भागवतविप्रादयः।
3. अ. सत्त्वप्रधानत्वादेव तानारभ्य।

'सत्त्वाधिको मोक्षयोग्यो योग्योऽन्धतमसस्तथा ।
तमउत्तरो रजोभूयान् समो वा सृतिपात्रकः ॥'

इति च ॥ ४०-४१ ॥

'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं विप्रकर्म स्वभावजम् ॥
एते गुणाः किञ्चिदूनाः विप्रात् क्षत्रिय एव च ।
अधिका वा ब्राह्मणेभ्यः केषुचिच्चक्रवर्तिषु ॥
ऋषयस्त्वेव विज्ञेयाः कार्तवीर्यादयो नृपाः ॥ ४२ ॥

गुणस्येतराभिभवेन स्वफलप्रदत्वस्योक्तत्वात् सत्त्वप्राधान्ये रजस्तमसोरभिभवेन मोक्षसाधनज्ञानस्य सम्भवात् सत्त्वाधिक्ये मोक्षो भवति । ज्ञानस्य सत्त्वफलताया उक्तत्वादिति भावः । अत्र स्फुटार्थं वाक्यान्तरं चाह ॥ सत्त्वाधिक इति ॥ सत्त्वाधिको राजससात्त्विकादिः । तमउत्तरो नराधमादिः । रजोभूयान् त्रैविध्यः । समः एकप्रकारेण गुणत्रयोऽज्ञः ॥ ४१ ॥

ब्राह्मणेत्युक्तं प्रपञ्चयते—'शमः' इति । तत्र शमादयो ब्राह्मणस्यैवेत्यन्यथाप्रतीतिनिरासाय तत् प्रमाणान्तरेण व्याचष्टे ॥ शम इति ॥ अनेन ब्राह्मणे तदुक्तिराधिक्यविवक्षयेत्युक्तं भवति । तपो ब्रह्मचर्यादि । शौचं शुद्धिः । क्षान्तिः क्रोधासमुत्थितिः । आर्जवं मनोवाक्कायकर्मणामवैपरीत्यम् । ज्ञानं सामान्यतः । विज्ञानं विशेषतः । आस्तिक्यं धर्मादौ 'अस्त्येवानेन मम प्रयोजनम्' इति भावः । कार्तवीर्यादिक्षत्रियेषु ब्राह्मणेभ्योऽप्याधिक्येनैतद्गुणदर्शनात् कथमेतदित्यत आह ॥ अधिका वेति ॥ सत्यं क्षत्रियेषु ब्राह्मणाधिकाः शमादयः सन्तीति,

---

प्रदत्वस्योक्तत्वादिति ॥ चतुर्दशेऽध्याये ॥ राजससात्त्विकादिरिति ॥ परमहंसादिरादिपदार्थः ॥ नराधमादिरिति ॥ दैत्यादिरादिपदार्थः । सम इत्यनुवादः एकेत्यादि व्याख्या । फलितमाह ॥ अज्ञ इति ॥ तत्त्वज्ञानमिथ्याज्ञानोभयहीन इत्यर्थः ॥ प्रयोजनमिति ॥ भाव इति ॥ भावेनेत्यर्थः ॥

'शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रियेऽन्ये गुणा अपि' ॥ ४३ ॥

'क्षत्रियोनब्रह्मगुणो वैश्यः कृष्यादिजीवनः
तत ऊनः शमाद्यैर्यः शुश्रूषुः शूद्र उच्यते ॥
अधिकाश्चेद् गुणाः शूद्रे ब्राह्मणादिः स उच्यते ।
ब्राह्मणोऽप्यल्पगुणकः शूद्र एवेति कीर्तितः ।
नरोऽपि यो देवगुणो देवो ज्ञेयो[1] नृतां गतः ॥'

इति च[2]। 'स्वकर्मणा तमभ्यर्च्य' इति वचनात्[3] क्षत्रियादिष्वपि शमाद्यनुवृत्तिः ज्ञायते। न हि शमादिकं विना तस्याभितोऽर्चनं

तथापि नोक्तविरोधः। तेषाम् ऋषित्वात्। तदितरक्षत्रियाणामत्र विवक्षितत्वादिति भावः। शौर्यमभीरुत्वम। तेजः शरीरगतम्। धृतिर्धैर्यम्। दाक्ष्यं पाटवम्। क्षत्रियादूनाः ब्राह्मगुणाः शमादयो यस्यासौ तथोक्तः। ततो वैश्यात्। शुश्रूषुः शुश्रूषाजीवनः। नेयं नियतिर्युक्ता। शूद्रस्याप्यधिकगुणत्वदर्शनादित्यत आह॥ अधिकाश्चे-दिति॥ ब्राह्मणादिरिति॥ ब्राह्मणसमशमादिगुण इत्यादि द्रष्टव्यम्। शूद्र एवेत्युपलक्षणम्। तत्तत्समगुणोऽसाविति ज्ञातव्यम्। जाति-मनपेक्ष्य गुणमात्रेण कथं ब्राह्मणत्वादिकल्पनेत्यत आह॥ नरोऽपीति॥ यथेति शेषः। एवं प्रमाणान्तरेण क्षत्रियादिष्वपि शमाद्यनुवृत्तिरस्ती-त्युक्त्वा वाक्यशेषबलेनाप्येतदुपपादयति॥ स्वकर्मणेति॥ अत्र सर्वेषां भगवदभ्यर्चनमेवोच्यते, न तु शमादिकमित्यत आह॥ न हीति॥ यदा सर्वेषां भगवदभ्यर्चनमेवोच्यते, तदा शमादिकमुक्तमेव। तद्विनाऽभि-

---

तेषामिति॥ येषु क्षत्रियेष्वाधिक्यमुच्यते तेषामित्यर्थः॥ इत्यादि द्रष्टव्य-मिति॥ क्षत्रियसमगुणश्चेत्क्षत्रिय इत्यादिरादिपदार्थः॥ तत्तदिति॥ क्षत्रिय-

---

1. अ. ज्ञेयो देवो। 2. अ. 'च' इति नास्ति।
3. अ. वचनाच्च।

भवति। सम्यक् शमादिभिरर्चनं ह्यभ्यर्चनम्। न च शमादीन् विना सिद्धिं विन्दति। 'यज्ञदानतपःकर्म न त्याज्यम्' इत्युक्तत्वाच्च। 'शमो मन्निष्ठता बुद्धेर्दम इन्द्रियनिग्रह इति'[1] भागवते। न च क्षत्रियादिभिरपि शौचतपःशमादिभिर्हीनैर्भवितव्यमिति तत्तद्धर्मेषूच्यते। युक्ता ह्येतैः सर्वगुणैर्जनकतुलाधारादयः। अतो युद्धेऽप्य-

---

तोऽर्चनस्यैवायोगादिति भावः। तत्कुत इत्यत आह॥ सम्यगिति॥ सम्यगर्चनं ह्यभितोऽर्चनं च शमादिभिरर्चनमेवेत्यर्थः। शमादिकं विनाऽपि साधनसम्पूर्त्याऽर्चनमात्रमत्र विवक्षितं किं न स्यादित्यत आह॥ न चेति॥ शमादिभिरर्चनमेवात्राभ्यर्चनं विवक्षितम। न तु शमादिकं विनाऽन्यत्। एतदभ्यर्चनस्य मोक्षफलत्वश्रवणात। शमाद्यभावे तदयोगादिति भावः। उपक्रमबलेन क्षत्रियादिषु ब्राह्मणधर्मानुवृत्तिर्ज्ञायत इत्याह॥ यज्ञेति॥ शमाद्यभावे कुतो मोक्षाभाव इत्यत आह॥ शम इति॥ भगवन्निष्ठादिकं हि शमादिकं नाम। भगवन्निष्ठाद्यभावे च मोक्षाभावः सुप्रसिद्ध इति भावः। निषेधाभावाच्च क्षत्रियादिषु शमाद्यङ्गीकार्यमित्याह॥ न चेति॥ निषेधश्च भवंस्तद्धर्मकथनस्थल एव भवतीति तत्तद्धर्मेष्वित्युक्तम्। इतोऽपि क्षत्रियादिषु शमाद्यङ्गीकार्यमित्याह॥ युक्ता हीति॥ तुलाधारो वैश्यः। आदिपदेन दण्डधारादिशूद्रसङ्ग्रहः। हीति भारतादिप्रसिद्धिं सूचयति। एवं चेत् स्वपरधर्मविवेकः कथमित्यत आह॥ अत इति॥ उक्तन्यायेनान्येषां साधारणत्वादित्यर्थः। एवं कृष्यादयो वैश्यस्य जीवनार्थम। शुश्रूषा

समगुणश्चेत् क्षत्रियः वैश्यसमगुणश्चेद्वैश्य इत्येवं द्रष्टव्यमित्यर्थः॥ तद्धर्मकथनस्थल एवेति॥ क्षत्रियधर्मकथनस्थल एव इत्यर्थः॥ उक्तन्यायेनेति॥ एते गुणाः किञ्चिदूनाः विप्रादित्यादिनोक्तन्यायेनेत्यर्थः। यद्वा स्वकर्मणेत्यादिनोक्तन्यायेनेत्यर्थः। मूले क्षत्रियस्य विशेषधर्मा उक्ताः। अन्येषां स्वय-

---

1. अ. इति हि।

पलायनमैश्वर्यं च क्षत्रियस्य विशेषगुणौ । तौ च[1] कृष्यादयो जीवनार्थं शुश्रूषा याजनं जीवनार्थं प्रतिग्रहश्चेत्येत एवान्येषां परधर्माः ।

'शौर्यं तेजो धृतिर्दाक्ष्यं दानं च क्षत्रियेऽधिकाः ।
तद्धीना ब्राह्मणे तस्माद्वैश्ये शूद्रे ततोऽल्पकाः ॥
अध्यापनं च शुश्रूषा जीवनार्थमृते सताम्[2] ।
विप्रादिषु क्रमाज्ज्ञेयाः शूद्रस्याध्यापनं विना ।
एते नैसर्गिका भावाः स्याद्भावोऽन्योऽपि च क्वचित् ॥
बलाद्विरुद्धभावस्तु हेयः स्वाभाविकोऽपि यः ।
अनिसर्गोऽपि हि शुभो वर्धनीयः प्रयत्नतः ॥

शूद्रस्य । याजनं जीवनार्थमध्यापनं प्रतिग्रहश्च विप्रस्येति द्रष्टव्यम् । परधर्मानाह ॥ तौ चेति ॥

शमादीनां साधारणत्वेऽपि क्षत्रियस्य शौर्यादयः सर्वेऽपि विशेषधर्माः किं न स्युः ? ब्राह्मणस्याध्यापनादिमात्रं, शूद्रस्य शुश्रूषामात्रं च स्वधर्मः किं न स्यात् ?—इत्यतस्तेषां साधारण्यं प्रमाणेन दर्शयति ॥ शौर्यमिति ॥ एतेन क्षत्रिये शौर्याद्युक्तिराधिक्यविषयेति चोक्तं भवति । सतामध्यापनं च शुश्रूषेति सम्बन्धः । शूद्रस्याध्यापनं विना किमुक्तं भवतीत्यत आह ॥ तस्मादिति ॥ शुश्रूषायाः सर्वधर्मत्वादित्यर्थः । सतामिति सम्बद्ध्यते । शौर्यादीनां साधारणत्वे क्षत्रियादीनां के विशेषगुणा इत्यत आह ॥ एत इति ॥ साधारणतयोक्तेभ्योऽन्ये युद्धेऽपलायनैश्वर्यादय इत्यर्थः । नैसर्गिका असाधारणाः । किमेते पुंसामसाधारणा एव धर्मा नियत्या भवन्तीत्यत आह ॥ स्यादिति ॥ एतेषामसाधारणत्वादवश्यानुष्ठेयत्वमिति च नाशङ्कनीयमित्याह ॥ बलादिति ॥

माह ॥ एवं कृष्यादय इत्यादि ॥ शुश्रूषायाः सर्वधर्मत्वादिति ॥ अध्यापनञ्च शुश्रूषेत्युक्तदिशेति भावः ॥ इत्यादीति ॥ क्षत्रियस्य भीत्या पलायनं वैश्यस्यापि

---

1. अ. 'च' शब्दो नास्ति । 2. अ. सदा ।

याजनैश्वर्यपूर्वास्तु नान्यैः कार्याः शुभा अपि ।
अपलायनं च शूद्राणां ब्रह्मक्षत्रार्थमिष्यते ॥' इति च ।

'प्रसह्य वित्ताहरणं शारीरो दण्ड एव च ।
अशिष्याणां शासनं च तथैवार्थविनाशनम् ॥

एष ईश्वरभावः स्यान्न कार्यः क्षत्रियेतरैः ।
सर्वे विधर्मिणः शास्याः क्षत्रियैर्यत्नतः सदा ॥

अङ्गाद्यहानिकृद्दण्डः शिष्येषु ब्राह्मणादिभिः ।
कार्यो देहेऽपि शिष्यश्च स्वामिना स्वेन वाऽर्पितः ॥

यथा ब्राह्मणस्य जीवनार्थं याजनमित्यादि । एवमसाधारण्येनात्मीयत्वाभावेऽपि त्याज्यत्वं च न मन्तव्यमित्याह ॥ अनिसर्ग इति ॥ यथा ब्राह्मणस्य जीवनार्थमध्यापनमित्यादि । उक्तस्यापवादमाह ॥ याजनेति ॥ अस्वाभाविकाः शुभा अपि साधारणा एव वर्णनीयाः । न तु विप्राद्यसाधारणा याजनादय इत्यर्थः । शौर्यादीनामसाधारणत्वोक्त्या युद्धेऽपलायनमैश्वर्यं च क्षत्रियस्य विशेषधर्मावित्युक्तम् ॥ तस्यापवादमाह ॥ अपलायनमिति ॥ विप्रक्षत्रार्थमिति विशेषोक्त्या सामान्यतः क्षत्रियस्यैव सिद्ध्यति । ततो नोक्तविरोधः ।

यथा क्षत्रियैकधर्मतयोक्तं युद्धेऽपलायनं कारणविशेषादन्येषामपि स्यात्तथैवैश्वर्यमप्यन्यधर्मः स्यात् किम् ? इत्यतः तत्स्वरूपनिरूपणपूर्वकं तस्य क्षत्रियेतरेष्ववृत्तिं प्रमाणेन दर्शयति ॥ प्रसह्येति ॥ प्रसह्य वित्तहरणादि केषामित्यतः तद्वदनूनकार्यः क्षत्रियेतरैरित्यस्य व्यावर्त्य-

---

यथान्यायातिक्रमणमित्यादीत्यर्थः ॥ इत्यादीति ॥ क्षत्रियस्यापि धैर्येणापलायनम् । वैश्यस्य न्यायेन कृष्यादीत्येवं ध्येयमित्यर्थः ॥ उक्तस्येति ॥ अनिसर्गोपीत्युक्तस्येत्यर्थः ॥ नोक्तविरोध इति ॥ क्षत्रियस्य विशेष इत्युक्तविरोधो नेत्यर्थः ॥ इत्यस्य व्यावर्त्यमाहेति ॥ क्षत्रियैरेव कर्तव्यत्वरूपं व्यावर्त्यमाहेत्यर्थः । ननु

पुत्रानुजादयः सर्वे शिष्या एव निसर्गतः ।
गुरवश्चैव मित्राणि सखिसब्रह्मचारिणः ॥
संबन्धिनश्च सर्वेऽपि तत्तद्योग्यतयाऽखिलैः ।
शिक्षणीयेषु भावेषु शिक्षणीयाः प्रयत्नतः ॥
उन्मादे बन्धनाद्यैर्वा ताडनं न गुरोः क्वचित् ।
पापं चरन्तस्त्वन्येऽपि सर्वैर्दृष्टिपथं गताः ।
शक्तितो वारणीयाः स्युर्देशकालानुसारतः ॥
तदुत्तमविरोद्धारः सन्त्याज्या गुरवोऽपि तु ।
यथाशक्त्यनुशास्यैव कालतोऽपि न चेच्छुभाः ॥
विष्णौ परमभक्तस्तु न त्याज्यः शास्य एव च ।
शिक्षयंश्च गुरून् शिष्यो गुरुवन्नैव शिक्षयेत् ॥

माह ॥ सर्वे इति ॥ तर्हि किं ब्राह्मणादिभिर्विधर्मिणां शासनमेव न कार्यमित्यत आह ॥ अज्ञादीति ॥ शिष्यो नाम कीदृश इत्यत आह ॥ शिष्यश्चेति ॥ तर्हि पुत्रादीनामशासनप्रसङ्ग इत्यत आह ॥ पुत्रेति ॥ अनिसर्गशिष्यस्वरूपं तदिति भावः । न केवलं ब्राह्मणाद्यैः शिष्या एव शास्याः किन्तु गुर्वादयोऽपीत्याह ॥ गुरव इति ॥ शिक्षणीयेषु भावेष्विति ॥ शिक्षणीयार्थविषय इत्यर्थः । न केवलं गुर्वादय एव शास्याः, किन्त्वज्ञाता अपीत्याह ॥ पापमिति ॥ अत्र सर्वत्र अज्ञाद्यहानिर्दण्डः शिष्येषु गुरवश्च देशकालानुसारत इति विशेषोक्त्या क्षत्रियादिविशेषो द्रष्टव्यः । पापं चरन्तो वारणीया इत्युक्तम् । यदि स्वोत्तमविरोधाख्यं महापापं कुर्युस्तर्हि किं कार्यमित्यत आह ॥ तदिति ॥ किं सहसा त्याज्या एवेत्यत आह ॥ यथेति ॥ स्वोत्तमविरोद्धारो गुर्वादयः किं सर्वथा त्याज्या एवेत्यत आह ॥ विष्णाविति ॥ तच्छिक्षाप्रकारमाह ॥

ब्राह्मणानामपि शिक्षाकर्तृत्वे क्षत्रियस्य विशेषाविति प्रागुक्तविरोध इत्यत आह ॥ अत्र सर्वत्रेति ॥ श्लोकद्वयं एकान्वयेन योजयति ॥ यदि

महान्तो नानुशास्याश्च विरुद्धाचरिता अपि ।
यदि च स्वाधिकानां[1] ते विरोधं नैव कुर्वते ॥'

इत्यादि च ।

'आपत्सु विप्रः क्षात्रं तु विशां वा धर्ममाचरेत् ।
क्षात्रासिद्धौ न शूद्रस्तु विप्रक्षत्रिययोः क्वचित् ॥
क्षत्रियो ब्राह्ममापत्सु तदापत्सु विशामपि ।
क्षत्रियो विप्रधर्माऽपि नैव भैक्ष्यप्रतिग्रही ॥
वैश्य आपत्सु शौद्रं तु धर्ममेकं न चापरम् ।
शूद्र आपत्सु विड्धर्मा तदापत्सु च कारुकः ॥
शूद्रस्तु वैश्यधर्माऽपि नैव वेदाक्षरो भवेत् ।
अत्यापदि क्षत्रियोऽपि पादशुश्रूषणं विना ॥
शौद्रधर्मं चरन् विप्रक्षत्रियेषु न दुष्यति ।
येषु कर्मसु याच्यः स्यात् स्वामिनाऽपि न याचिता ॥

शिक्षयन्निति ॥ विष्णौ परमभक्तः स्वोत्तमविरोधेतरपापमाचरति चेत् किं कार्यमित्यत आह ॥ महान्त इति ॥

प्रसङ्गाद्विप्रादीनाम् आपद्धर्मान् स्मृत्या दर्शयति ॥ आपत्स्विति ॥ क्षत्रियस्य विप्रधर्माचरणे विशेषमाह ॥ क्षत्रिय इति ॥ भिक्षेतरहिरण्यादिप्रतिग्राही स्यादित्यर्थः । शौद्रं तु धर्ममाचरेदिति सम्बद्ध्यते । न शूद्रस्तु विप्रक्षत्रिययोर्धर्ममाचरेदित्युक्तम् । तर्ह्यापत्सु तेन को धर्म आश्रयणीय इत्यत आह ॥ शूद्र इति ॥ शूद्रस्य वैश्यधर्मत्वे विशेषमाह ॥ शूद्र इति ॥ वेदाक्षरादिश्रवणादिमान् न भवेदित्यर्थः । क्षत्रियो ब्राह्ममापत्सु, तदापत्सु विशां धर्ममाचरेदित्युक्तम् । ततोऽप्यापदि किं कार्यमित्यत आह ॥ अत्यापदीति ॥ विप्रक्षत्रियेषु शूद्रधर्मं शुश्रूषणं चरन्नित्यर्थः । न केवलं क्षत्रियः शूद्रधर्मं चरन् न दुष्यतीत्येव, किं

---

1. अ. स्वोत्तमानां ।

शौद्राण्यपि स्वधर्मत्वे क्षत्रियस्यापदो यदि ।
आत्मनश्चेद् बलाधिक्यं सानुबन्धादपि प्रभोः ॥
धर्मार्थं सेवतोऽर्थार्थं विप्रधर्मादिकाद्वरः ।
प्रभुणा याच्यवृत्तिस्तु विशेषेणापि धर्मभाक् ॥
बाह्वोर्बलेऽधिको यः स्यात् क्षत्रियो विद्ययाऽधिकः ।
विप्रो भागवतौ चैतौ सेशा लोकास्तयोरिमे ॥'

इत्यादि[1] व्यासस्मृतौ ॥ ४४-४८ ॥

नैष्कर्म्यसिद्धिम् अनिष्टसर्वकर्मनाशाख्यसिद्धिम् ॥ ४९ ॥

तर्हीत्यत आह ।' येष्विति ॥ यदि क्षत्रियस्य स्वधर्मकृतावापदो भवन्ति तर्हि तस्य सानुबन्धात् स्वामिनो बलाधिक्येऽपि धर्मार्थं तमनभिभूय येषु कर्मसु नियुक्तः स्वामिनाऽपि याच्यः स्यान्न तु स्वयं याचिता। तानि शौद्राण्यपि कर्माण्यर्थाद्यर्थं सेवमानस्य विप्रादिधर्मोपजीवनादपि वरो धर्मो भवतीत्यर्थः । तत्र स्वाम्यनभिभवादपि स्वामिना याच्यत्वं विशेषेण धर्मकारणमित्याह ॥ प्रभुणेति ॥ विप्रधर्माद्याश्रयणे परोपजीवनाभावात् शूद्रधर्मे तद्भावात् कथं सानुबन्धात् प्रभोर्बलाधिक्यादौ सत्यपि ततोऽस्य वरत्वमित्यत आह ॥ बाह्वोरिति ॥ सर्वस्य तदीयत्वान्न परोपजीवनमिति भावः ॥ ४८ ॥

'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते' इत्युक्तस्यैव इत्थम्भावानन्तरमुच्यते—'असक्त' इति । तत्र नैष्कर्म्यसिद्धिपदस्य मोक्षार्थत्वप्रतीतिनिरासायार्थमाह ॥ नैष्कर्म्येति ॥ सर्वपदमप्रारब्धविषयम् ॥४९॥

असक्तेत्यादिना नैष्कर्म्यसिद्धिसाधनविवरणप्रतिज्ञापूर्वकं तदनन्तरफलमुच्यते—'सिद्धिं' इति । तत्र नैष्कर्म्यसिद्ध्यनन्तरं च येनोपायेन परंब्रह्माप्नोति तं प्रकारं निबोधेत्यन्यथाप्रतीतिनिरासायाह ॥ वक्ष्य-

---

क्षत्रियस्येत्यादिना ॥ नैष्कर्म्यसिद्धिसाधनेति ॥ प्रारब्धेतरसर्वारिष्टकर्मनाश-

---

1. अ. इति।

वक्ष्यमाणप्रकारेण वर्तमानस्तदनन्तरं नैष्कर्म्यसिद्धिं प्राप्तो भूत्वा ब्रह्माख्याया [1]महालक्ष्म्याः सकाशं यथाऽऽप्नोति तथा निबोध। 'मम योनिर्महद् ब्रह्म', 'ब्रह्मणो हि प्रतिष्ठाऽहम्' इत्युक्तत्वात्। 'ब्रह्मभूतः प्रसन्नात्मा' इत्युक्त्वा 'मद्भक्तिं लभते पराम्' इति वक्ष्यमाणत्वाच्च।

'सर्वपापक्षयाद्देहं त्यक्त्वा देवान् क्रमाद् व्रजन्।
प्राप्य लक्ष्मीं तत्प्रसादात् पुनः स्वृद्धा हरौ यदा ॥
भक्तिस्तया पुनर्ज्ञाने स्वृद्धे विष्णुं प्रपद्यते।
अपरोक्षदृशो विष्णोः शरीरेऽपि सतः पुरा ॥

माणेति ॥ अत्र यथा येन वक्ष्यमाणप्रकारेण वर्तमानो नैष्कर्म्यसिद्धिं प्राप्तो भूत्वा महालक्ष्मीं प्राप्नोति तं प्रकारं निबोधेत्येवोच्यते। न तु नैष्कर्म्यसिद्ध्यनन्तरं परब्रह्मप्राप्तिसाधनं निबोधेत्यर्थः। ब्रह्मशब्दस्य लक्ष्मीवाचकत्वमेव कुत इत्यत आह ॥ ममेति ॥ अत्र ब्रह्मपदेन परब्रह्मैव किं न स्यादित्यत आह ॥ ब्रह्मेति ॥ एतद्ब्रह्मप्राप्त्यनन्तरमपि भक्त्यादिलाभश्रवणात् लक्ष्मीतत्त्वमेवेदं, न तु परं ब्रह्मेत्यर्थः। भवेदेतद्यदि नैष्कर्म्यसिद्धिं प्राप्तस्य लक्ष्मीप्राप्त्यनन्तरमपि भक्त्यादिलाभोऽस्ति, न तु परब्रह्मप्राप्त्यनन्तरमिति सिद्ध्यति। तदेव कुत इत्यत आह ॥ सर्वेति ॥ पापपदम् अप्रारब्धानिष्टकर्मपरम्। नन्वपरोक्षज्ञानिनो हि नैष्कर्म्यसिद्धिः। तत्कथं तदनन्तरमपि ज्ञानादिलाभः? तथात्वे मुक्तावपि तत्प्रसङ्गादित्यत आह ॥ अपरोक्षेति ॥ पुरा देहत्यागात्। अपरोक्षज्ञानानन्तरमपि ज्ञानादिवृद्धिर्भवेदेव। न चातिप्रसङ्गः। प्रमाणानुगुणेन मुक्तौ तदभावोपपत्तेरिति भावः ॥ ५०-५२ ॥

साधनविवरणे(ने)त्यर्थः ॥ न चातिप्रसङ्ग इति ॥ मुक्तावपि ज्ञानवृद्धिप्रसङ्ग-

1. अ. लक्ष्म्याः।

त्यक्तदेहादिकस्यापि यावद् विष्णुं प्रपद्यते ।
तावद् गुणा विवर्धन्ते स्थिताः स्युः प्राप्य केशवम् ॥'
इति महावराहे ॥ ५०-५२ ॥

'विमुच्य निर्ममः शान्तः' नैष्कर्म्यसिद्धिं प्राप्तो भूत्वा ब्रह्मणि भूयाय भवतीत्यर्थः ॥ ५३-५५ ॥

विहितानि सर्वकर्माण्यपि मद्व्यपाश्रयो भूत्वा सदा कुर्वाणः । न हि यथेष्टचरणे तात्पर्यमत्र । तथासति विहिताकरणेऽपि समत्वात्

यदुक्तं नैष्कर्म्यसिद्धिसाधनं निबोधेत्येषोच्यते, न तु तदनन्तरं ब्रह्मप्राप्तिसाधनमिति । तदयुक्तम । बुद्ध्या विशुद्धयेत्यादिसाधनमुक्त्वा ब्रह्मभूयाय कल्पत इत्युक्तत्वात् । अन्यथा नैष्कर्म्यसिद्धिं प्राप्तो भूत्वेति वक्तव्यत्वादित्याशङ्कां परिहरन् ब्रह्मभूयपदस्यान्यथाप्रतीतिनिरासायार्थमाह ॥ विमुच्येति ॥ ज्ञानानन्तरं लक्ष्मीप्राप्तौ साधनानामनावश्यकत्वात् नैष्कर्म्यसिद्धिं प्राप्तो भूत्वेत्यत्राभिप्रेतमेवेति भावः ॥ ५३-५५ ॥

'यतः प्रवृत्तिः' इत्युक्तमेव विशिष्यते 'सर्व' इति । तत्र मद्व्यपाश्रयश्चेत् यथेष्टतो निषिद्धान्यनिषिद्धानि वा सर्वकर्माणि कुर्वाणः शाश्वतं पदं प्राप्नोतीत्यन्यथाप्रतीतिनिरासाय तद्व्याचष्टे ॥ विहितानीति ॥ मद्व्यपाश्रय इति ॥ मय्येव समर्पयन्नित्यर्थः । प्रतीतार्थ एव किं न स्यादित्यत आह ॥ न हीति ॥ नात्र यथेष्टतो निषिद्धानिषिद्धकर्माचरणे तात्पर्यं कल्प्यम् । तथासति भगवदाश्रयस्य विहिताकरणेऽप्यत्र तात्पर्यप्रसङ्गात् । निषिद्धकरणविहिताकरणयोः समानत्वादित्यर्थः । अत्र भगवदाश्रितस्य विहिताकरणेऽपि तात्पर्यं स्यादेवेत्यत आह ॥ मामिति ॥ यद्यत्र भगवदाश्रितस्य विहिताकरणेऽपि तात्पर्यं

रूपो न चेत्यर्थः ॥ लक्ष्मीप्राप्ताविति ॥ एतेन ब्रह्मभूयायेत्यस्य लक्ष्मीप्राप्त्यर्थमित्यर्थ उक्तो भवति ॥ ज्ञानानन्तरमित्युक्त्या च नैष्कर्म्याय मोक्षाय सिद्धिं तदुपायज्ञानसिद्धिमित्यप्यर्थः सूचितः ॥ विशिष्यत इति ॥

'मामनुस्मर युध्य च', 'ततः स्वधर्मं कीर्तिं च' इत्यादिप्रस्तुतविरोधः। अपिशब्दस्त्वेकमपि कर्मा तदाश्रयेण न कार्यमित्यर्थे ॥५६॥

भगवत्संश्रितस्य त्रैविद्यस्य च मनसैव विशेष इत्याह—'चेतसा

तर्हि भगवदाश्रितस्यैवार्जुनस्य 'मामनुस्मर युध्य च' इत्यादौ विहितयुद्धाकरणे 'अथ चेत्त्वमिमं धर्म्यं' इत्यादौ प्राक् प्रत्यवाय उक्तः। तद्विरोधः स्यादिति भावः। प्रतीतार्थानङ्गीकारेऽपिशब्दवैयर्थ्यमित्यत आह ॥ अपीति ॥ ५६ ॥

यदि भगवदाश्रिततया विहितकर्म कुर्वतो मुक्तिस्तर्हि त्रैविद्यस्यापि स्यात्। तस्यापि विहितकर्माणि कृत्वा भगवदर्पणसद्भावेन भगवदाश्रिताविशिष्टत्वादित्याशङ्कापरिहाराय श्लोकमवतारयति ॥ भगवदिति ॥ भगवदाश्रितत्रैविद्ययोर्विहितकरणादिसाम्येऽपि मोक्षभावाभावावुपपद्येते। विहिताशेषकर्माणि चेतसा भगवति संन्यस्य भगवदाश्रितः करोति। न तथा त्रैविद्य इति तयोश्चेतसैव विशेषसद्भावादिति भावः। मत्पर इति त्रैविद्याद्भागवतस्य विशेष उच्यते। तत्र भगवति तात्पर्यवानित्यर्थाङ्गीकारे तत् त्रैविद्यस्यापि समम्। अहं परः सर्वोत्तमो यस्येत्यभ्युपगमे वा वस्तुनि विकल्पायोगात् तदपि त्रैविद्ये सममित्यत आह ॥ स एवेति ॥ परः सर्वप्रकारेणेति शेषः। भावः सर्वदेति च द्रष्टव्यम्। एवं चेन्मच्चित्त इति पुनरुक्तिः स्यात्। न हि भगवत्सर्वोत्तमत्वभावादन्यत् तच्चित्तत्वमस्तीत्याशङ्कापरिहाराय तदर्थमाह ॥ तत्रेति ॥ तत्र भगवति। त्रैविद्याद् भागवतस्य विशेष इति शेषः। तर्हि

स्वकर्मणा तमभ्यर्च्येत्यत्र स्वकर्मकृतौ किञ्चिद्विशेषणमाहेत्यर्थः ॥ इत्यादौ प्रागिति ॥ द्वितीयाध्याये ॥ वस्तुनि विकल्पायोगादिति ॥ भागवतस्य सर्वोत्तमत्वं त्रैविद्यस्य तु नेति वस्तुनि हरौ विकल्पायोगादित्यर्थः ॥ तदपीति ॥ भगवत्सर्वोत्तमत्वमपीत्यर्थः ॥ भाव इति ॥ भावनेत्यर्थः ॥

सर्वकर्माणि' इति। स एव सर्वस्मात् परम इति भावोऽस्येति मत्परः[1]। तत्र[2] चित्तवृत्तिनिरोधोऽपि। बुद्धियोगः प्रत्याहारादिः ॥ ५७-५८ ॥

प्रकृतिरीश्वरेच्छा। 'प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त कथ्यते' इति[3] वचनात्। एषा तु 'प्रकृत्यैव च कर्माणि' इत्यादिष्वपि युज्यते। तस्या एव हि मुख्यतो नियोक्तृत्वं स्वभावकर्मादिभिर्बद्धा ॥ ५९-६० ॥

बुद्धियोगमुपाश्रित्येति पुनरुक्तिः स्यात्। भगवति बुद्धेर्योगो हि बुद्धियोग इत्यत आह ॥ बुद्धीति ॥ बुद्धेर्ध्यानस्य योगः प्रत्याहाराद्युपाय इत्यर्थः। अथ चेत्त्वमहङ्कारादित्यभ्युपगम्योक्तम् ॥ ५७-५८ ॥

तदुक्ताकरणमशक्यं च तवेत्युच्यते—'यदि' इति। तत्र प्रकृतिपदेन स्वभावाद्युच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ प्रकृतिरिति ॥ ईश्वरेच्छायाः प्रकृतिशब्दवाच्यत्वं कुत इत्यत आह ॥ प्रकृतिरिति ॥ प्रसङ्गादत्रोक्तार्थमन्यत्राप्यतिदिशति ॥ एषेति ॥ अत्र प्रकृतिशब्दः परमेश्वरेच्छावाची कुतः? स्वभावाद्यर्थ एव किं न स्यादित्यत आह ॥ तस्या एवेति ॥ प्रकृतिस्त्वां नियोक्ष्यतीत्यत्र प्रकृतेः जीवनियोक्तृत्वमुच्यते। तच्चेश्वरेच्छाया एव मुख्यमिति सैवात्रोच्यत इति भावः। ननु स्वभावजेनेत्येतद्विवरणात्मकोत्तरश्लोके प्रकृतिशब्दस्य स्वभावार्थत्व ग्रहणात् कथं नेत्यत आह ॥ स्वभावेति ॥ जीवमिति शेषः। नेयं प्रकृतिरुत्तरत्र स्वभावपदेनोच्यते, किन्त्वस्या जीवनियोगे साधनतया स्वभावाद्युत्तरत्रोच्यत इति भावः। इतोऽप्यत्रेश्वरेच्छैव प्रकृतिशब्दार्थ इत्याह ॥ तदेवेति ॥ एतद्विवरणात्मकोत्तरश्लोके भगवदिच्छाया एव

---

1. अ. तत्परः।
2. अ. तत्र चित्तवृत्तिनिरोधोऽपि यो बुद्धियोगः प्रत्याहारादिः।
3. अ. इत्यादि।

तदेवाह—ईश्वरः सर्वभूतानामिति ।

'निश्चितार्थः स तु ज्ञेयो यत्रात्मैव परोक्षतः ।
उच्यते विष्णुना यद्वत् तद् ब्रह्मेत्यादि कथ्यते ॥'

इति शब्दनिर्णये । 'मन्मनाः' इत्युपसंहाराच्च ॥ ६१ ॥

शाश्वतं स्थानं वैकुण्ठादि—

'श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा ।
अतो हि वैष्णवा लोके नित्यास्ते चेतना अपि ॥'

इत्याग्नेये । 'न वर्तते यत्र रजस्तमस्तयोः सत्त्वं च' इत्याद्युक्तम्[1] ॥ ६२-६३ ॥

तत्त्वसारकथनं 'द्वाविमौ पुरुषौ' इत्यत्रैवोपसंहृतम् । तत्त्वप्रशंसार्थमेव तद्बुद्धिप्रशंसा कृता । अत्र तु साधनसारोपसंहारः—

सर्वनियोक्तृत्वस्योक्तत्वाच्च अत्र प्रकृतिपदं तदर्थमिति भावः । मायेतीश्वरेच्छैवोच्यते ॥ ५९-६१ ॥

ईश्वरः सर्वभूतानामित्यादौ भगवतेश्वरस्य पारोक्ष्येण निर्दिष्टत्वादयमीश्वरो भगवतोऽन्य इति प्रतीतिनिरासायाह ॥ निश्चितेति ॥ पारोक्ष्येणोक्तेः अन्यथाऽप्युपपत्तेर्न तन्मात्रेणेश्वरस्य भगवदतिरिक्तत्वं कल्प्यमिति भावः । इतश्च तन्न कल्प्यमित्याह ॥ मदिति ॥ अत्र 'तमेव शरणं गच्छ' इत्यन्यव्यावृत्त्या ईश्वरशरणप्राप्तिमुद्दिश्योपसंहारे 'मन्मना भव' इत्यादिना स्वशरणप्राप्त्युपदेशाच्च न भगवदितरोऽयमीश्वरः। अन्यथा व्याहतेरिति भावः । 'स्थानं प्राप्स्यसि शाश्वतं' इत्युक्तं शाश्वतस्थानं किमित्यत आह ॥ शाश्वतमिति ॥ सर्वस्थानानां प्रलये विनाशात् कथं वैकुण्ठादेः शाश्वतत्वमित्यत आह ॥ श्रीरेवेति ॥ ६३ ॥

1. अ. इत्याद्युक्तं च ।

'सर्वगुह्यतमम्' इति। 'मन्मनाः' इत्यादेः पूर्वमेवोक्तत्वात् 'भूयः' इति। अर्थतस्त्वत्रापि विष्ण्वाधिक्यमेवोक्तं भवति ॥ ६४-६५ ॥

अन्यसर्वधर्मान् परित्यज्येत्युक्तशेषत्वेनैव सर्वधर्मानिति वचनम्।

'इदं तु ते गुह्यतमं' इति प्रतिज्ञाय यज्ज्ञानादिपदोदितं गुह्यतमं तत्त्वमुक्तं तदेवात्र 'सर्वगुह्यतमं' इति पुनरुच्यत इत्यन्यथाप्रतीतिनिरासायाह ॥ तत्त्वेति ॥ नात्र 'इदं तु ते गुह्यतमं' इत्यादिनोक्तं गुह्यतमं ज्ञेयमुच्यते। तत्कथनस्य द्वाविमावित्यत्रैवोपसंहृतत्वादित्यर्थः। 'इति गुह्यतमं' इति वाक्यशेषादुपसंहृतत्वं ज्ञातव्यम्। तर्हि किमत्र गुह्यतममुच्यत इत्यत आह ॥ अत्रेति ॥ ननु 'एतद्बुद्ध्वा बुद्धिमान् स्यात्' इति साधनसारस्योपसंहृतत्वात् कथमत्र तदुक्तिरित्यत उक्तम् ॥ तत्त्वेति ॥ न तत्र साधनसारस्योपसंहाररूपेण भगवत्सर्वोत्तमत्वज्ञानप्रशंसा कृता। किन्तु तज्ज्ञानमात्रेण मोक्षसद्भावात् किमस्य महिमा वर्णनीय इति भगवत्प्रशंसार्थमेवेति भावः। तत्रोक्तगुह्यतमस्यात्रानुक्तत्वे भूय इति व्यर्थमित्यत आह ॥ मन्मना इति ॥ साधनसारस्य प्रागुक्तत्वात् तदपेक्षया भूय इत्युपपद्यत इति भावः। तर्हि पुनरुक्तिः स्यादित्यतः साधनसारोपसंहार इत्युक्तम्। ननु 'मन्मना भव' इत्यादिनाऽन्यव्यावृत्तिपूर्वकं स्वभजनस्यात्रोपदिष्टत्वेन भगवत्सर्वोत्तमत्वमेवोक्तमिति कथं तत्त्वसारकथनं नेत्यत आह ॥ अर्थत इति ॥ सत्यमत्र विष्ण्वाधिक्यमुक्तमिति। तथाप्यन्यभजननिरासपूर्वकं स्वभजनोपदेशान्यथानुपपत्त्यैवोक्तम्। न तु मुखतः। अतो नात्र तत्त्वसारकथनमिति भावः ॥ ६४-६५ ॥

अन्यभजननिरासस्यात्र अकृतत्वात् कथमर्थतोऽपि विष्ण्वाधिक्य-

प्रतिज्ञायेति ॥ नवमेऽध्याये। द्वाविमावित्यत्रोपसंहारो न दृश्यत इत्यत आह ॥ इति वाक्यशेषादिति ॥ प्रागुक्तत्वादिति ॥ चतुर्दशाध्यायादावित्यर्थः ॥ साधनोपसंहार इति ॥ बुध्यारोहाय संक्षिप्य कीर्तनं व्यर्थमित्यर्थः ॥ अन्य-

'मामेकं शरणं व्रज' इत्यपि 'मन्मनाः' इत्याद्युक्तनिगमनात्मना तद्व्याख्यानम् ।

'सर्वोत्तमत्वविज्ञानपूर्वं तत्र मनः सदा ।
सर्वाधिकप्रेमयुक्तं सर्वस्यात्र समर्पणम् ॥
अखण्डा त्रिविधा पूजा तद्वृत्यैव स्वभावतः ।
रक्षतीत्येव विश्वासस्तदीयोऽहमिति स्मृतिः ।
शरणागतिरेषा स्याद् विष्णौ मोक्षफलप्रदा ॥'

मुक्तमित्यत आह ॥ अन्येति ॥ अन्यधर्मान् सर्वान् परित्यज्य मन्मना भवेत्येवं प्रकारेण सर्वधर्मान् परित्यज्येति वचनं मन्मना इत्याद्युक्तशेषत्वेन हि वर्तते । अतोऽन्यव्यावृत्तिपूर्वकं स्वभजनमत्रोपदिष्टमेवेति भावः । नन्वत्र मन्मना इत्याद्युक्तसर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेत्युपदिश्यत इति किं न स्यादित्यत आह ॥ मामिति ॥ 'मामेकं शरणं व्रज' इत्यनेनापि मन्मना इत्याद्युक्तस्यैव व्याख्यायमानत्वादन्यथाऽर्थकल्पने मन्मनस्त्वादिकं परित्यज्यानुतिष्ठस्व चेति व्याहतोक्तिः स्यादिति भावः । व्यर्थमिदमुक्तव्याख्यानमित्यतो निगमनात्मनेत्युक्तम् । मन्मना भवेत्यादिना किमुक्तं भवति ? मामेकं शरणं व्रज इति व्याख्यानत्वं द्रष्टव्यम् ।

भवेदेतद्यदि भगवन्मनस्त्वादिकं शरणागतिः स्यात्, तदेव कुत इत्यत आह ॥ सर्वोत्तमत्वेति ॥ अत्र यथासम्भवं मन्मना इत्याद्युक्तार्थैकार्थत्वं द्रष्टव्यम् । त्रिविधा मनोवचनशरीरभवा । स्वभावतः न फलान्तरापेक्षया । मोक्षफलप्रदेत्यनेन मामेवैष्यसीत्युक्तार्थं भवति । मामेकमिति सर्वधर्मानित्यस्य व्याख्यानं द्रष्टव्यम् । 'अहं त्वा सर्व-

---

थाऽर्थकल्पन इति ॥ मन्मनस्त्वादिधर्मान् परित्यज्येति व्याख्यान इत्यर्थः ॥ एकार्थत्वमिति ॥ सदेत्यन्तेन तन्मनस्त्वस्य सर्वाधिकत्वे प्रेमयुक्तमित्यनेन मद्भक्त इत्यस्य सर्वत्र समर्पणमित्यनेन मद्याजीत्यस्य अखण्डा त्रिविधा

इति महाविष्णुपुराणे। अनादिजन्मकृतसर्वपापेभ्यः । अत्र प्राप्त्यभावात्। धर्मपरित्यागे पापपरित्यागस्य कैमुत्येनैव सिद्धत्वात् ॥६६॥

अतपस्कायैव न वाच्यम्। अशुश्रूषुवे पुनश्चेति दोषाधिक्यमशुश्रूषोर्दर्शयितुं चशब्दः। एवमभक्ताय कदापि न वाच्यम्। कदाचिदल्पतपसोऽल्पशुश्रूषोरपि भक्त्याधिक्ये वाच्यं भवतीति कदाचनेति शेषः। अभक्ताच्च न वाच्यमसूयोरिति तत्रापि चशब्दः।

'समुच्चये तथाऽधिक्ये न्यूनत्वे चः प्रयुज्यते।'

इति शब्दनिर्णये।

पापेभ्यो मोक्षयिष्यामि' इत्यस्य युद्धनिमित्तपापेभ्य इत्यन्यथाप्रतीतिनिरासार्थमाह ॥ अनादीति ॥ अत्रत्यपापान्येव विवक्षितानि किं न स्युरित्यत आह ॥ अत्रेति ॥ पापानामिति शेषः। कुतोऽत्र न पापप्राप्तिः? भविष्यद्युद्धस्यैव तत्प्रापकत्वादित्यत आह ॥ धर्मेति ॥ यदा भगवान् अतिशुद्धधर्मवैपरीत्यादन्यधर्मत्यागं बोधयति तदा किमु वाच्यं पापपरित्यागं बोधयतीति। तथाऽर्जुनश्च यदा अन्यधर्मत्यागं कुर्यात् तदा किमु वाच्यं पापपरित्यागं कुर्यादिति। ताभ्यां च युद्धस्य बोध्यमानत्वात्, करिष्यमाणत्वाच्च न पापप्रापकतेति भावः ॥ ६६ ॥

गीतास्वनधिकारिनिरासेनाधिकारी लक्ष्यते— 'इदं' इति। तत्राऽतपस्कादीनां चतुर्णामप्यनधिकारित्वं किं सममित्यतो गीतापदैरेव तत्तारतम्यं दर्शयति ॥ अतपस्कायेति ॥ यथाऽतपस्कादतिशयेन अशुश्रूषोर्न वाच्यं, एवमशुश्रूषोरप्यतिशयेन अभक्ताय न वाच्यमिति कदाचनेत्यनेन ज्ञायत इत्यर्थः। नन्वतपस्कादीनामपि कदाचनावाच्यमेव। अतः कदाचनेति विशिष्याप्रोक्त्या कथमस्य दोषाधिक्यं सूच्यत इत्यत आह ॥ कदाचिदिति ॥ विशेषो दोषाधिक्यसूचको भवतीति

पूजेत्यादिना मां नमस्कुर्वित्यस्यैकार्थ्यं व्यक्तमिति द्रष्टव्यमित्युक्तम् ॥ लक्ष्यत इति ॥ लक्षणया प्रतिपाद्यते, तपःप्रभृतिगुणयुक्तोऽधिकारीत्युच्यत इत्यर्थः ॥

'अभक्तादपि पापः स्यादसूयुर्दोषदृग्यतः ।'

इति च पाद्मे ॥ ६७ ॥

'सोऽपि मुक्तः', 'न च तस्मान्मनुष्येषु' इत्युक्तेश्च मुक्तानां महत् तारतम्यं ज्ञायते । 'मनुष्येषु' इति विशेषणात् तत्रापि देवानामाधिक्यं च ।

'मुक्तिर्ज्ञात्वाऽपि विष्णुं स्यात् शास्त्रं श्रुत्वा ततोऽधिकम् ।
मुक्तौ सुखं तत्पठतस्ततोऽप्यधिकमिष्यते ॥

व्याख्यातुस्तु समं मुक्तौ सुखं नान्यस्य कस्यचित् ।
ततोऽधिकं तु देवानां मुख्यव्याख्याकृतो यतः ॥'

इति च[1] ॥ ६८-७२ ॥

शेषः । अभक्ताच्चातिशयेनेत्यर्थः । इति सूचयितुमिति शेषः । चशब्दस्य दोषाधिक्यसूचकत्वं कुत इत्यत आह ॥ समुच्चय इति ॥ अभक्ताच्च न वाच्यमसूयोरित्यत्र स्मृतिं चाह ॥ अभक्तादपीति ॥ ६७ ॥

गीताव्याख्यानादि फलकथनेन स्तूयते— 'यः' इति । तत्र व्याख्यात्रादीनामुक्तो मोक्षः किमेकप्रकार इत्यतो गीतावाक्यैरेव तत्तारतम्यं दर्शयति ॥ सोऽपीति ॥ मुक्तानां व्याख्यात्रादीनामिति शेषः । एवं चेत् किं व्याख्यातुरेव सर्वाधिक्यमित्यत आह ॥ मनुष्येष्विति ॥ तत्र मुक्तेष्वपि । एतदेव प्रमाणान्तरेण द्रढयति ॥ मुक्तिरिति ॥ मुख्यव्याख्याकृत इति ॥ अन्येषां व्याख्यातृत्वे मुख्यकारणभूता

गीताव्याख्यानादीति ॥ आदिपदेनाध्ययनश्रवणयोर्ग्रहः ॥ कारणभूता इति ॥ सर्वेन्द्रियप्रेरकत्वाद्देवानामिति भावः ॥ तत्रेति ॥ गीतायां तात्पर्यनिर्णयाख्य-

1. अ. चशब्दो नास्ति ।

'यथेच्छसि तथा कुरु' इत्याक्षेपपरिहाराय 'करिष्ये वचनं तव' इत्यनुसरति भगवन्तम् ॥ ७३-७८ ॥

नमस्ते वासुदेवाय प्रेयसां मे प्रियोत्तम ।
समस्तगुणसम्पूर्ण निर्दोषानन्ददायिने ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट् तद्दर्शतमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

इत्यर्थः । नन्वर्जुनेन स्वोक्तमद्यापि नाङ्गीकृतम् । तत्कथं भगवता तद्बोधनं समाप्यत इत्याशङ्कां 'यथेच्छसि तथा कुरु' इति यथेष्टाचरणमनुज्ञायत इत्यन्यथाप्रतीतिं पराकुर्वन् परिहरति ॥ यथेति ॥ भगवदुक्तानुसरणमर्जुनेन कृतमित्यत्रैवोक्तत्वात् ततः प्रागेव तज्ज्ञस्य भगवतः तद्बोधनोपरमो युक्त इति भावः ॥ ७३-७८ ॥

अथ समापितग्रन्थोऽयं भगवानाचार्यः स्वप्रतिपादितप्रकारमेव वासुदेवं नमति ॥ नम इति ॥ स्वस्वरूपपरिज्ञानस्यापि कैवल्याद्यखिलपुरुषार्थहेतुत्वात् स्वकृतां ग्रन्थनिर्माणरूपपरिचर्यां केशवे समर्पयन् तदाह ॥ यस्येति ॥ अथ तमेव हरिमादरविशेषात् पुनः स्तौति ॥ निःशेषेति ॥ भूतिर्महालक्ष्मीः ।

ग्रन्थे वा प्रतिपादितगुणपूर्णत्वनिर्दोषानन्ददायित्वज्ञानिश्रेष्ठस्वप्रियतमत्वप्रकारमित्यर्थः ॥ तदाहेति ॥ वायोस्तृतीयावताररूपं स्वस्वरूपमाहेत्यर्थः ॥ तमेवेति ॥ स्वग्रन्थे प्रतिपादितप्रकारमेव हरिमित्यर्थः ॥

निःशेषदोषरहित कल्याणाशेषसद्गुण[1] ।
भूतिस्वयम्भुशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भगवद्गीता-तात्पर्यनिर्णये अष्टादशोऽध्यायः ॥ १८ ॥

श्रीमदानन्दतीर्थार्यहृदयामलमन्दिरः ।
इन्दिरारमणः प्रीतिं यातु दीनदयापरः ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्भगवद्गीता-तात्पर्यनिर्णयस्य टीकायां जयतीर्थमुनिविरचितायां न्यायदीपिकायां अष्टादशोऽध्यायः ॥ १८ ॥

अशेषदोषदूराय गुणपूर्णाय विष्णवे ।
नमः श्रीप्राणनाथाय भक्ताभीष्टप्रदायिने ॥

इति श्रीमद्गीतातात्पर्यटीकाभावदीपे राघवेन्द्रयतिकृते अष्टादशोऽध्यायः ॥ १८ ॥

॥ श्रीकृष्णार्पणमस्तु ॥

---

1. अ. कल्याणाखिलसद्गुण ।